

तपागच्छाधिराज
श्रीसोमप्रभसूरिप्रणीतः

# जइ-जीयकप्पो

(यतिजीतकल्पः)

संपादकः

पंन्यासश्री नयभद्रविजयगणिवर्य

णमोत्थु णं समणस्स भगवओ महावीरस्स

।। श्रीआत्म-कमल-वीर-दान-प्रेम-रामचन्द्र-भद्रङ्कर-कुन्दकुन्दसूरिसद्गुरुभ्यो नमः ।।

卐

तपागच्छाधिराज–श्रीसोमप्रभसूरिप्रणीतः

# जइ–जीयकप्पो

## (यतिजीतकल्पः)

(साधुशिरोमणि–साधुरत्नसूरिविहितवृत्तियुतः)

शतावधानी मुनिराजश्री लाभसागरगणिसंशोधितमुद्रितपुस्तकसहायेन

संपादकः

पूज्यपाद आचार्यदेवश्रीमद्विजय रामचन्द्र–भद्रंकर–कुंदकुंदसूरीश्वरजी महाराजाना

शिष्यरत्न वर्धमानतपोनिधि पूज्यपादपंन्यासप्रवरश्री.

नयभद्रविजयगणिवर्य

सड्ढ - जीयकप्पो

प्रथम संस्करणम्

प्रकाशक : परम धर्मः - अमदावादः

वि.सं. २०६९

प्रतय : ६००

## प्राप्तिस्थान

**परेश जे. शाह**
ऐ/२, घनश्यामपार्क फ्लेट,
१७, आनंदनगर सोसायटी
भट्ठा, पालडी, अहमदाबाद - ७
मो. ०९८२५०७४८८९

**मनीष जे. कोठारी**
२/अे-३१, आर.अेम.अेल.नगर,
३०६, अेल.बी.अेस.मार्ग,
कुर्ला (वेस्ट), मुंबइ - ७०
मो. ९७०२४२४१८७

## પ્રસ્તુત પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ વ્યાખ્યાનવાચસ્પતિ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન અધ્યાત્મયોગી પૂજ્યપાદ પંન્યાસપ્રવર શ્રીભદ્રંકર વિજયજી ગણિવરના શિષ્યરત્ન હાલારદેશે સદ્‌ધર્મસંરક્ષક પૂજ્યપાદ આચાર્યદેવશ્રીમદ્‌વિજય કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન વર્ધમાનતપની ૧૦૦ + ૭૯ મી ઓળીના આરાધક **પૂજ્યપાદ પંન્યાસપ્રવરશ્રી નયભદ્ર વિજયજી ગણિવરની** શુભ પ્રેરણાથી વિ.સં. ૨૦૬૮માં શ્રીશત્રુંજયસામૂહિકચાતુર્માસ આરાધના સમિતિ (રાજેન્દ્રજૈનભવન ધર્મશાળા, પાલીતાણા) એ જ્ઞાનદ્રવ્યની ઊપજમાંથી સુંદર લાભ લીધો છે.

एतद्‌ग्रन्थस्वामित्व श्रीजैनश्वेताम्बरमूर्तिपूजक सङ्घस्यैव
एतद्‌ग्रन्थपठन पाठनाधिकारी
कृतयोगोद्वहनो गुर्वनुज्ञातः श्रमण एव

# પ્રસ્તાવના

જન્મ જરા અને મૃત્યુથી વ્યાપ્ત એવા ચતુર્ગતિમય સંસારમાં અનાદિકાળથી અનંત આત્માઓ પરિભ્રમણ કરી રહ્યા છે. પ્રત્યેક જીવો સુખની અપેક્ષાવાળા હોવા છતાં સૌથી વધુ દુઃખો ભોગવી રહ્યા છે. આ અનંત દુઃખમય સંસારથી મુક્ત થવા માટે અને આત્માના વાસ્તવિક સુખને અનુભૂતિનો વિષય બનાવવા માટે કરુણાના સાગર પરમતારક વીતરાગ પરમાત્માઓએ ધર્મતીર્થની સ્થાપના કરીને આપણા ઉપર મહાન ઉપકાર કરેલો છે. પરમ પુણ્યોદયે પ્રાપ્ત થયેલા દુર્લભ અને ઉત્તમ મનુષ્યજન્મને સફળ બનાવવા માટે સાધુધર્મ સિવાય બીજો કોઇ ઉપાય નથી અને સાધુજીવન પામ્યા પછી સાધુજીવનની નિર્મળ સાધના કરવા માટે ગુરુકુલવાસ, ગુરુકૃપા, શાસ્ત્રાભ્યાસ અત્યંત જરૂરી છે. પર્યાય અને પરિણતિ દ્વારા યોગ્યતા પ્રાપ્ત થયા બાદ યોગોદ્વહન કરવાપૂર્વક આગમનો અભ્યાસ કરવાનો હોય છે અને આગમના અભ્યાસ દ્વારા વિશુદ્ધ પરિણતિના સ્વામી બની આત્મવિકાસ સાધવાનો હોય છે. ઉત્સર્ગમાર્ગના આગમશાસ્ત્રનો અભ્યાસ કરનારા મહાત્માઓને છેદસૂત્રોનો અભ્યાસ ગુરુભગવંત યોગ્યતા જોઇને કરાવતા હોય છે. જૈન શાસનમાં છેદસૂત્રનું ઘણું મહત્ત્વ છે. દીક્ષાપર્યાય સાથે પરિણત હોય અને ગુર્વાજ્ઞામાં વ્યવસ્થિત હોય તેને જ અત્યંત ગંભીર એવા છેદસૂત્રનું અધ્યયન કરાવવામાં આવે છે. યોગ્ય અને પરિણત શિષ્યને અધ્યયન કરાવવામાં ન આવે તો ગુરુને ચતુર્ગુરુ પ્રાયશ્ચિત્ત આવે છે. અપાત્ર વગેરેને અધ્યયન કરાવવામાં આવે તો પણ ગુરુને ચતુર્ગુરુ પ્રાયશ્ચિત આવે છે. एतेषामप्राप्ताऽपात्राऽव्यक्तानां वाचनां—श्रुतपाठनरूपां यो ददाति उद्देशसमुद्देशानुज्ञां वा करोति तस्य चतुर्गुरवः। तथा प्राप्तपात्रव्यक्तानां च यो वाचनां न ददाति उद्देशादींश्च न करोति तस्यापि चतुर्गुरवः ।

કુલ ૪૫ આગમો વર્તમાનમાં છે. તેમાં છ છેદગ્રંથો છે. દશાશ્રુતસ્કંધ[૧], વ્યવહાર[૨], બૃહત્કલ્પ[૩], નિશીથ[૪], મહાનિશીથ[૫] અને જીતકલ્પ[૬]. કેટલાકના મતે પંચકલ્પ છેદસૂત્રોમાં ગણાય છે. પરંતુ તેનો લોપ થયા બાદ જીતકલ્પને છેદસૂત્રમાં માન્ય કરેલ છે. આ છ છેદસૂત્રોમાં બૃહત્કલ્પ, વ્યવહાર, નિશીથ આ ત્રણ છેદસૂત્રો આકર ગ્રંથો છે. મૂલસૂત્રો અને તેની નિર્યુક્તિઓ પર ભાષ્યો લગભગ લખાયાં છે. જ્યારે જીતકલ્પભાષ્ય ફક્ત મૂલસૂત્ર ઉપર છે. તેની ઉપર નિર્યુક્તિ લખાયેલી નથી. વર્તમાનમાં છેદસૂત્રો ઉપર લખાયેલાં ભાષ્યોમાં નિર્યુક્તિ અને ભાષ્ય બંને મળીને એક ગ્રંથરૂપ બની ગયા છે.નિશીથસૂત્રનો અભ્યાસ કરેલા મુનિવરો જઘન્ય ગીતાર્થ ગણાય છે અને તેનો અભ્યાસ કર્યા વિના સ્વતંત્ર વિહાર કરવાનો અધિકાર નથી. આવા ગંભીર અને ઉત્તમ શ્રુતનું અધ્યયન મુનિવરો સુંદર રીતે કરી શકે તે માટે પૂર્વના પૂજ્ય પુરુષોએ ખૂબ પ્રયત્ન કરેલો છે.

પરિણતિને વિશુદ્ધ બનાવવા માટે અને ચારિત્રમાં થયેલી સ્ખલનાને પ્રાયશ્ચિત્ત દ્વારા શુદ્ધ કરવા માટે છેદગ્રંથ અત્યંત ઉપયોગી છે. તેથી જ છેદસૂત્રને ઉત્તમશ્રુત તરીકે નિશીથભાષ્ય ગાથા - ૬૧૮૪ માં જણાવેલું છે.

छेदसुयं कम्हा उत्तमसुत्तं ? भण्णति-जम्हा एत्थ सपायच्छित्तो विधी भण्णति, जम्हा य तेण चरणविसुद्धी करेति, तम्हा तं उत्तमसुतं ।

છેદગ્રંથને રહસ્યસૂત્ર પણ કહે છે. જીતકલ્પ, સાધ્વાચારથી સંબંધિત સંક્ષિપ્ત અને મહત્ત્વપૂર્ણ ગ્રંથ છે. ૧૦૩ ગાથાઓમાં પૂ.શ્રી. જિનભદ્રગણિક્ષમાશ્રમણે જીતવ્યવહારથી સંબંધિત પ્રાયશ્ચિત્તોનું સંક્ષેપમાં વર્ણન કરેલું છે. મોક્ષનું કારણ ચારિત્ર છે અને ચારિત્રની શુદ્ધિ પ્રાયશ્ચિત્ત દ્વારા થાય છે. જીતકલ્પગ્રંથ ઉપર ભાષ્ય ૨૬૦૮ ગાથાપ્રમાણ છે. પૂ.શ્રી સિદ્ધસેનસૂરિ મ.એ જીતકલ્પ ઉપર 'જીયકપ્પ-ચુણ્ણી' રચી છે. આ 'જીયકપ્પ-ચુણ્ણી' ઉપર વિ.સં. ૧૨૨૭માં પૂ.શ્રી ચન્દ્રસૂરિ મ.એ 'જીતકલ્પબૃહચ્ચૂર્ણિવિષમપદવ્યાખ્યા' ની રચના કરી છે. જીતકલ્પ ઉપર વિ.સં. ૧૨૭૫ માં ૧૭૦૦ શ્લોકપ્રમાણ ટીકા પૂ. શ્રી શિવપ્રભસૂરિજીના શિષ્ય પૂ. શ્રી તિલકાચાર્યએ લખી છે. જિનરત્નકોશના અનુસારે તેની ઉપર અવચૂરિ પણ લખાયેલી છે. તે હજી સુધી પ્રગટ થઈ નથી.

જીતકલ્પ નામના ગ્રંથના કર્તા દુઃષમાન્ધકારગ્રસ્તપ્રવચનપ્રદીપસમ પુણ્યનામધેય પૂ.શ્રી જિનભદ્રગણિક્ષમાશ્રમણ છે. તેના આધારે અનેક જીતકલ્પો અને તેના ઉપવિભાગરૂપ જીતકલ્પો પણ રચાયા છે. જેમ કે – યતિજીતકલ્પ, શ્રાદ્ધજીતકલ્પ, લઘુશ્રાદ્ધજીતકલ્પ. અત્યારે સંવિગ્ન ગીતાર્થ મહાપુરુષો જેના દ્વારા જે કાંઇ પ્રાયશ્ચિત્ત આપે છે; તે અત્યંત મહત્ત્વના ગ્રંથો યતિજીતકલ્પ અને શ્રાદ્ધજીતકલ્પ છે. આ બંને ગ્રંથોને હસ્તલિખિત પ્રતો ઉપરથી પ.પૂ.ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય માણિક્યસાગરસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન શતાવધાની પૂ.મુ.શ્રી લાભસાગરજીગણિવરે અત્યંત પરિશ્રમ કરવાપૂર્વક વિ.સં. ૨૦૨૮માં છપાવ્યા હતા. ત્યારબાદ તે બંને ગ્રંથોને સિદ્ધાંતમહોદધિ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મહારાજાના અંતિમ શિષ્યરત્ન વૈરાગ્યવારિધિ પૂ.આચાર્યદેવ શ્રીમદ્ વિજય કુલચન્દ્રસૂરીશ્વરજી મહારાજાએ વિ.સં. ૨૦૬૩માં ઓપસેટ પ્રીન્ટ કરાવ્યા.

વિ.સં. ૨૦૬૮માં પાલીતાણામાં ૪ મહિના (શેષકાળ)માં સમુદાયના યોગ્ય મુનિવરોને વર્તમાન ગચ્છાધિપતિ પ્રવચનપ્રદીપ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય પુણ્યપાલસૂરીશ્વરજી મહારાજાની અનુમતિથી યતિજીતકલ્પ પોષ સુ.૧૩ થી વંચાવવાનો શરૂ કર્યો અને શેષકાળમાં જ આખો ગ્રંથ પૂર્ણ કર્યો. ત્યારે આ ગ્રંથમાં મુદ્રણાશુદ્ધિઓ જોવા મળી. તેનું શુદ્ધિકરણ કરવાપૂર્વક અને અન્ય ગ્રંથોમાં મળેલી ગાથાઓનું સૂચન કરવાપૂર્વક શ્રાદ્ધજીતકલ્પ અને યતિજીતકલ્પ

આ બંને ગ્રંથો આજે પ્રકાશિત થઇ રહ્યા છે. તેમાં ભારપૂર્વક જણાવવાનું કે - યોગ્ય મુનિવરો, પૂજ્ય ગીતાર્થ ગુરુભગવંતની આજ્ઞા પ્રાપ્ત કરીને જ આ ગ્રંથનો અભ્યાસ પૂજ્ય ગીતાર્થ ગુરુભગવંત પાસે કરે અને વિશુદ્ધ પરિણતિ ઉત્પન્ન કરી પરંપરાએ મુક્તિને પ્રાપ્ત કરનારા બને.

આ બંને ગ્રંથોનું મેટર તૈયાર થયે છતે પૂ. આચાર્યદેવ શ્રીમદ્ વિજય કુલચંદ્રસૂરીશ્વરજી મહારાજાએ પણ ઉદારતાથી તપાસી આપ્યું છે. તેમનો પણ અંતઃકરણપૂર્વક ઉપકાર માનું છું.

આ ગ્રંથમાં શુદ્ધિની કાળજી રાખવા છતાં પણ અજ્ઞાનતા તથા પ્રમાદાદિના કારણે કોઇપણ અશુદ્ધિ રહી ગઇ હોય તો ગીતાર્થ ગુરુભગવંતો શુદ્ધ કરે અને સૂચન જણાવે.

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।<br>
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।<br>
सपरजाणणट्ठा विसोहिअं, विवरियं च जमिह मए ।<br>
तं सोहंतु गीअत्था, अणभिनिवेसी अमच्छरिणो ।।

છેદ ગ્રંથોનું પ્રકાશન ઉચિત ગણાય? આ એક જટિલ પ્રશ્ન ઉપસ્થિત થાય છે. છેદગ્રંથો અને પ્રાયશ્ચિત્તના અધિકારો ઘણા ગૂઢ હોય છે. તેના અધિકારીઓ પણ બહુ ઓછા હોય છે. છતાં આવા મહાન ગ્રંથોનું અધ્યયન,અધ્યાપન યોગ્ય મુનિવરો સારી રીતે કરી શકે અને ગ્રંથ સુરક્ષિત રહી શકે એજ એક શુભ ભાવથી પ્રકાશન કરેલું છે. કોઇપણ વસ્તુ ગુપ્ત રાખવા યોગ્ય હોય તે બરાબર છે. પરંતુ ગુપ્ત રાખવા જતાં બિલકુલ અધ્યયન બંધ થઇ જાય અને યોગ્યને પણ ન મળે તે બરાબર નથી. જો કે આજે તો બધા જ છેદસૂત્રો પૂજ્ય મહાત્માઓ દ્વારા સંપાદિત થઈને સંબંધિત પ્રકાશકો તરફથી પ્રકાશિત થયેલાં છે.

આ બંને ગ્રંથોના પ્રૂફ વગેરે સર્વ કાર્યોમાં મારા શિષ્યો મુ.શ્રી નિર્મલયશ વિ., મુ.શ્રી અજિતયશ વિ., મુ.શ્રી પ્રશાંતયશ વિ., મુ.શ્રી શ્રમણયશ વિ., મુ.શ્રી જયંતયશ વિ. તથા મુ.શ્રી. જયંતપ્રભ વિ. સંપૂર્ણ રીતે સહાયક બન્યા છે.

પં.નયભદ્ર વિ. ગણિ<br>
વિ.સં. ૨૦૬૯, કારતક સુદ - ૫<br>
રાજેન્દ્રજૈનભવન, પાલિતાણા (સૌરાષ્ટ્ર)

# ગ્રંથપરિચય

जइजीयकप्पो (यतिजीतकल्पः) ગ્રંથ સાધુના પ્રાયશ્ચિત્તને જણાવનારો છે. બૃહત્કલ્પ–વ્યવહાર અને નિશીથસૂત્ર ઉપરથી સંક્ષેપમાં રચાયેલો અતિમહત્ત્વનો અને વર્તમાનમાં પ્રાયશ્ચિત્તના આધાર સ્વરૂપ આ ગ્રંથ ૩૦૭ ગાથાપ્રમાણ (અગાઉના પુસ્તકમાં આ ગ્રંથની મૂળ ગાથા ૩૦૬ છે કારણ કે, ગાથાઓમાં ૫૯મી ગાથા चउरो चउगुरु अहवा.......... પછીની ગાથામાં ૬૦ નંબર આપવાના બદલે ૫૯ નં. આપેલ છે.) છે. મૂલકાર તપાગચ્છાધિરાજ પૂ. સોમપ્રભસૂરીશ્વરજી મહારાજા છે અને ટીકાકાર તેઓશ્રીના જ પ્રશિષ્ય અને ૪૯ મા પટ્ટધર પૂ. દેવસુંદરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પૂ. સાધુરત્નસૂરીશ્વરજી મ. છે. ગ્રંથરચનાસમય વિ.સં. ૧૪૫૬ જણાવ્યો છે.

जइजीयकप्पो ગ્રંથના પાના નં. ૧૩૮માં મહાનિશીથ સૂત્રનો પાઠ અશુદ્ધ લાગવાથી પૂ.આ.શ્રી. કુલચન્દ્રસૂરીશ્વરજી મહારાજા દ્વારા સંપાદિત થઇને પ્રકાશિત થયેલી પ્રતમાંથી શુદ્ધ પાઠ છપાવ્યો છે.

## शुद्धि-पत्रकम्

| पृष्ठ: | पंक्ति: | अशुद्ध: | शुद्ध: | पृष्ठ: | पंक्ति: | अशुद्ध: | शुद्ध: |
|---|---|---|---|---|---|---|---|
| ८ | ६ | प्रायश्चित्तदातॄणां | प्रायश्चित्तदातृणां | ९८ | टिप्पणी | पादुकारुढयो : | पादुकारूढयो : |
| १८ | १३ | नैषेधिकी | नैषेधिकी | १२६ | ९९ | उपघेर | उपधेर |
| २४ | २६ | विशंत्युच्छवास: | विंशत्युच्छ्वास: | १३१ | २९ | यदर्ध्दाङ्घुलात | यदर्ध्दाङ्गुलात |
| २८ | ६ | क्षमाश्रमणा ! | क्षमाश्रमणा: ! | १५४ | टिप्पणी | ग्रन्थविशेष: | ग्रन्थविशेषै: |
| २८ | ९२ | चलचित | चलचित्त | १६७ | २ | सङ्घाघिपानां | सङ्घाधिपानां |
| २९ | ९६ | मेघावी | मेधावी | १७८ | १६ | सङ्घजीयकप्पो | अस्य पुस्तकस्य |
| ३५ | ९ | स्त्रिभि | स्त्रीभि | | | पृ.क्र. १०० - १०१ | पृ.क्र. २१५-२१६ |
| ३६ | २० | मन्त्रोपहत | मन्त्रोपहत: | १८० | २९ | पञ्चकछेद: | पञ्चकच्छेद: |
| ७० | टिप्पणी | खिसनं | खिंसनं | १८९ | २३ | सर्वछेदे | सर्वच्छेदे |
| ७१ | २९ | दोषा | दोषा: | १९९ | १६ | शैषैमोदकै | शेषैर्मोदकै |
| ८३ | २ | कन्यादिशं | [illegible] | [illegible] | २७ | अनुज | मनुज |
| ९८ | ४ | तदीयोच्छवास | तदीयोच्छ्वास | १०४ | ६ | श्रीनिशीथादिछेद | श्रीनिशीथादिच्छेद |

## सड्ढ–जीयकप्पो तथा जइ-जीयकप्पोमां जणावेला ग्रंथोना
# संकेताक्षरसूचि

| | | |
|---|---|---|
| आ०ग्र०वि०प्र० | : | आलोचनाग्रहणविधिप्रकरणम् |
| आ०नि० | : | आवश्यकनिर्युक्तिः |
| ओ०नि०/ओघ०नि० | : | ओघनिर्युक्तिः |
| ओ०नि०भा०गा० | : | ओघनिर्युक्तिभाष्यगाथा |
| ग०प० | : | गच्छाचारपयन्ना |
| गु०वि० | : | गुरुतत्त्वविनिश्चयः |
| जी०भा० | : | जीतकल्पभाष्यम् |
| दश०/दशवै० | : | दशवैकालिकसूत्रम् |
| द०वै०नि० | : | दशवैकालिकनिर्युक्तिः |
| द्र०स० | : | द्रव्यसप्ततिका |
| नि०भा० | : | निशीथभाष्यम् |
| पञ्च०/पञ्चव०/प०व० | : | पञ्चवस्तुकम् |
| पंचा० | : | पञ्चाशक |
| पिं०नि० | : | पिण्डनिर्युक्तिः |
| पिं०वि० | : | पिण्डविशुद्धिः |
| पुष्पमा०(उप०) | : | पुष्पमाला (उपदेशमाला) |
| प्र०सा०/प्रव०सारो०/प्रवचनसारो | : | प्रवचनसारोद्धारः |
| बृ०क० | : | बृहत्कल्पसूत्रम् |
| म०प० | : | मरणसमाहिपयन्ना |
| लघु०प्र०सा० | : | लघुप्रवचनसारोद्धारः |
| वि०आ०भा० | : | विशेषावश्यकभाष्यम् |
| व्य०सू० | : | व्यवहारसूत्रम् |
| सं०प्र० | : | सम्बोधप्रकरणम् |
| सि०हे० | : | सिद्धहेमचन्द्रशब्दानुशासनम् |

## विषयानुक्रमः


| विषयः | पृष्ठक्रमाङ्कः |
|---|---|
| मङ्गलादिप्रतिपादनम् । | १ |
| आगमादिपञ्चव्यवहारनिरूपणम् । | २ |
| व्रतषट्कादीनि अष्टादश स्थानानि । | ३ |
| दशधा दर्पिकाप्रतिसेवना । | ४ |
| चतुर्विंशतिधा कल्पिकाप्रतिसेवना । | ५ |
| दिव्याद्या उपसर्गाः । | १२ |
| प्रायश्चित्तस्य भेदाः । | १३ |
| आलोचना—प्रायश्चित्तम् । | १४ |
| पञ्चधा उपसम्पद् । | १७ |
| प्रतिक्रमणप्रायश्चित्तम् । | १७ |
| इच्छादिसामाचारी । | १८ |
| लघुमृषादृष्टान्ताः । | १९ |
| विवेकार्हं व्युत्सर्गार्हं च प्रायश्चित्तम् । | २२ |
| अष्टधा ज्ञानाचारातिचारः । | २५ |
| श्रुताध्ययनपर्यायः । | २६ |
| दीक्षाया अयोग्याः । | २६ |
| प्रव्रज्यादिविधिः । | ३४ |
| देवाद्याशातना—प्रायश्चित्तम्, दर्शनाचारातिचारोऽष्टधा । | ४१ |
| प्रथममहाव्रतातिचारप्रायश्चित्तम् । | ४४ |
| साधूनां जलमार्गे गमनविधिः । | ४५ |
| द्वितीयादिमहाव्रतातिचारप्रायश्चित्तम् । | ५५ |
| षोडशोद्गमदोषाणां प्रायश्चित्तम् । | ८४ |
| षोडशोत्पादनादोषाणां प्रायश्चित्तम् । | ८९ |
| दशग्रहणैषणादोषाणां प्रायश्चित्तम् । | ९१ |
| ग्रासैषणादोषपञ्चकप्रायश्चित्तम् । | १०३ |
| आहारग्रहणाग्रहणकारणानि । | १०५ |
| शय्यातरवर्णनम् । | १०७ |
| जिनाचरितमालम्बनीयम् । | ११४ |
| नवधा वसतिः । | ११९ |
| प्रक्षेपकदोषस्वरूपम् । | १२३ |
| उपधिविषयं प्रायश्चित्तम् । | १२४ |
| पात्रविषयं प्रायश्चित्तम् । | १३१ |
| स्वाध्यायस्य कर्त्तव्यता । | १३८ |
| साध्वीनां वस्त्रदानविधिः । | १४४ |
| यथाछन्दादिस्वरूपम् । | १४७ |
| अतिक्रमादिस्वरूपम् । | १६१ |
| अवधावित—प्रत्यावृत्तसाधुविषयं प्रायश्चित्तम् । | १६६ |
| आलोचनाग्राहिणः पुरुषाः । | १६७ |
| नवविधतपोदानव्यवहारः । | १७४ |
| नवविधापत्तितपोव्यवहारः । | १७५ |
| प्रायश्चित्तस्य पञ्चप्रकारा आरोपणाः । | १८८ |
| छेदार्हं मूलार्हं च प्रायश्चित्तम् । | १८९ |
| अनवस्थाप्यार्हं प्रायश्चित्तम् । | १९१ |
| अनवस्थाप्यतपोविधिः । | १९४ |
| पाराञ्चिकप्रायश्चित्तम् । | १९६ |
| योगविधिविषयातिचारप्रायश्चित्तम् । | २०३ |
| प्रशस्तिः । | २०४ |
| परिशिष्ट-१ मूलगाथानां अकारादिक्रमः | २०५ |
| परिशिष्ट-२ अवान्तरगाथानां अकारादिक्रमः | २१० |
| परिशिष्ट-३ यंत्रस्थापना | २१४ |

णमोत्थु णं समणस्स भगवओ महावीरस्स

।। श्री आत्म-कमल-वीर-दान-प्रेम-रामचन्द्र-भद्रंकर-कुंदकुंदसूरिसद्गुरुभ्यो नमः ।।

साधुशिरोमणि—साधुरत्नसूरिविहितवृत्तियुतः तपागच्छाधिराज — श्रीसोमप्रभसूरिप्रणीतः

# जइ — जीयकप्पो

जयति महोदयशाली भास्वाञ्श्रीवर्धमानतीर्थपतिः । विशदं चरणपथं सा तपस्थितिर्यदुदिता तनुते।।१।।
जयति प्रवचनदीपः प्रतिहतदुरपोहमोहतिमिरौघः । चित्रं निरञ्जनोऽयं जगति गुणग्रामवृद्धिकरः।।२।।
सकलत्रिलोकविस्मयविधायिनिस्सीमधीगुणातिशयान् । बहुविधलब्धिसमृद्धान् निखिलानपि गणधरान्नौमि ।।३।।
प्रणमामि विश्रुतश्री—जिनभद्रगणिक्षमाश्रमणमुख्यम् । सङ्क्षिप्तजीतकल्पं महाश्रुताद्यः समुद्दध्रे ।।४।।
श्रीसोमप्रभसूरीन् गुरूत्तमान् स्तौमि विश्रुतातिशयान् । सुविहितहिताय विहितः सव्यासो यैरसावेव ।।५।।
श्रीसोमतिलकसूरीन् वन्दे विख्यातवैभवाभ्युदयान् । यैरस्य जीतकल्पस्याऽऽतेने वृत्तिरतिविशदा ।।६।।
मन्दमतिबोधहेतोरतिगहनमहागमावगाहनया । कालानुभाववशतो व्युच्छिन्ना सा तदैव परम् ।।७।। युग्मम्।।
जगति जयन्ति गरिष्ठा गुरवः श्रीदेवसुन्दरमुनीन्द्राः । सम्प्रति निष्प्रतिमगुण—प्रभाप्रभावाद्भुता विदिताः।।८।।
ये निजवचनसुधाञ्जन—वशेन शिष्यस्य मादृशस्यापि । उद्घाटयन्ति लोचनमान्तरमज्ञानतिमिरभृतम् ।।९।।
तस्याः पुनरालेखे चित्रकलाकौशलेन विकलोऽपि । तैः स्वविनेयकनिष्ठो—ऽप्यादिष्टोऽयं ततो यतते ।।१०।।
यद्यपि साहसमेवं कुर्वन् हास्योऽस्मि तदपि किं कुर्वे । यन्मामत्र प्रसभं प्रेरयति गुरुप्रसादोऽयम् ।।११।।

इह दुःषमान्धकारनिमग्नजिनप्रवचनप्रदीपायमान—श्रीजिनभद्रगणिक्षमाश्रमणविरचितो जीतकल्पोऽतिसङ्क्षिप्तः। निशीथभाष्यादिछेदग्रन्थाश्चातिमहान्तो दुरवगाहाश्च । अतः साध्वनुग्रहाय पूज्यश्रीसोमप्रभसूरयः किञ्चित् विस्तरप्रायश्चित्तविधिप्रतिपत्तये प्रायो जीतकल्पनिशीथाद्यन्तर्गतगाथाभिरेव यतिप्रायश्चित्तविभागाविर्भावकं जीतकल्पनामकं प्रकरणं चिरन्तनजीतकल्पात् किञ्चित् समधिकगाथाकदम्बकं कृतवन्तः । परं द्विधा विनेयाः—योग्या अयोग्याश्च । तत्र योग्या ये रङ्गत्संवेगतरङ्गिणीतरङ्गप्रक्षालिताऽऽन्तरमलाः परिमलितबुद्धयः समस्तसिद्धान्तमहार्णवपारीणाः परिणतवयसः सार्वपथीनप्रतिभाप्राग्भारसारचेतसः सततमुत्सर्गापवादगोचराऽऽचारचतुराश्चिरप्रव्रजिताः। ये त्वेतद्विपरीताः तिन्तिणिकादयश्चाग्रतो वक्ष्यमाणस्वरूपाः तेऽयोग्याः । एतेषामयं जीतकल्पो न दातव्यः । यतः—

'आमे घडे निहित्तं जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं अप्पाहारं विणासेइ' ।।

(नि०भा० ६२४३)

अतो योग्यानामेव दातव्यः । अत्र चादौ पूर्वजीतकल्पगतास्तद्रूपा एव चतुर्विंशतिगाथाः सन्ति । तासां व्याख्याऽपि प्रायस्तद्रूपैव । तथाहि—सर्वाण्यपि शास्त्राणि मङ्गलाभिधेयप्रयोजनप्रतिपादनपुरस्सराण्येव प्रणीयन्ते । विशेषतो निश्शेषकल्मषकरीषंकषो[A] जीतकल्पस्ततस्तस्यादौ मङ्गलादिप्रतिपादिकेयं गाथा—

**कयपवयणप्पणामो वुच्छं पच्छित्तदाणसंखेवं ।**
**जीअव्ववहारगयं जीवस्स विसोहणं परमं ।।१।।**

व्याख्या—**प्रकर्षेण** परसमयापेक्षया यथावस्थितभूरिभेदप्रभेदै**रुच्यन्ते** जीवाजीवादयः पदार्था अनेनाऽस्मिन्निति वा **प्रवचनं** सामायिकादि बिन्दुसारपर्यन्तं मुख्यतः श्रुतज्ञानम् उपचारात् तत्रोपयुक्तश्चतुर्विधः सङ्घोऽपि । कृतः प्रवचनस्य प्रणामो येन स **कृतप्रवचनप्रणामो**ऽहं **वक्ष्ये प्रायश्चित्तदानसङ्क्षेपम्** । पापं छिनत्ति इति पापछित् । अथवा प्रायः चित्तं—जीवं मनो वाऽतीचारमलमलिनितं शोधयतीति प्रायश्चित्तम् । आर्षत्वात् प्राकृतेन पच्छित्तं । उक्तं च—

**पावं छिंदइ जम्हा पायच्छित्तंति भण्णए तम्हा । पाएण वा वि चित्तं विसोहई तेण पच्छित्तं** ।। (व्य०सू० ३५)

तस्य दानं तस्य सङ्क्षेपः सङ्ग्रहस्तं **जीतव्यवहारकृतं** जीतव्यवहारो— **'वत्तणुवत्ते'**[B]त्यग्रेतनगाथयैव वक्ष्यमाणलक्षणस्तेन **कृतम्** उपदिष्टम्, **जीतव्यवहारगतं** वा जीतव्यवहारानुप्रविष्टम् । **जीवस्य** 'जीव प्राणधारणे, जिजीव जीवति जीविष्यती' त्युपयोगलक्षणत्वेन त्रिकालमपि जीवनाज्जीवस्तस्य विशेषेण शोधनम् । विशेषश्चायं—द्विजादयोऽपि स्थूलबुद्धयः क्वापि प्राणवधादौ सामान्येन प्रायश्चित्तं ददति, न पुनः सङ्घट्टनपरितापनोपद्रवादिभेदैः सर्वेषामेकेन्द्रियादि—त्रसपर्यन्तानां विषयभेदेन प्रायश्चित्तं दातुं जानन्ति । नह्ययमुपदेशस्तदीयशास्त्रेष्वस्ति । इह पुनः प्रवचने सर्वमस्ति । अत एव यथा पलाशक्षारारिष्टकोदकादिर्वस्त्रमलस्य शोधनम् । तथाऽत्रापि कर्ममलमलिनस्य जीवस्य जीतव्यवहारोपदिष्टं **विशोधनं परमं** प्रकृष्टमनन्यसदृशम्, नान्यत्रैवं विशिष्टप्रायश्चित्तविधिरस्तीत्यर्थः । इह शिष्यः प्राह — विशेषणं हि व्यवच्छेदकं भवति, यथा नीलोत्पलमित्यत्र नीलविशेषणं रक्तोत्पलादेरपि सम्भवात् तद्व्यवच्छेदाय । तत् किमत्राप्यन्येऽपि व्यवहाराः सन्ति ? येन जीतव्यवहारगतमिति विशेष्यते । गुरुराह—सन्त्यन्येऽपि आगम—श्रुता—ऽऽज्ञा— धारणाव्यवहारास्तद्व्यवच्छेदाय तज्जीतपदम् । पुनः शिष्योऽभिधत्ते—भगवन्नमीषां मिथः को विशेषः ? गुरुराह—आगमव्यवहारिणस्तावत् षड्विधाः । तद्यथा—केवलिनो मनःपर्यायज्ञानिनोऽवधि—ज्ञानिनश्चतुर्दशपूर्विणो दशपूर्विणो नवपूर्विणश्च । अत्र यदा केवली प्राप्यते तदा तस्याऽग्रे प्रायश्चित्तं गृह्यते, तदभावे मनःपर्यायज्ञानिनः, तस्याप्यभावेऽवधिज्ञानिनः, तदप्राप्तौ चतुर्दशपूर्विणः, तदनुपलम्भे दशपूर्विणः, तस्याऽप्यनासादने नवपूर्विण इति । श्रुतव्यवहारिणश्चाऽष्ट—सप्त— षट्—पञ्च—चतु—स्त्रि—द्व्येकार्द्ध—पूर्विण एकादशाङ्गधारिणो निशीथकल्पव्यवहारदशाश्रुतस्कन्धपञ्चकल्पाद्यशेषश्रुतसूत्रार्थाभिज्ञाश्च ।

---

**A.** करीषं कषति, अपसारयति, दूरीकरोति = महावायुः । **B.** द्रष्टव्यः पृष्ठः ११ ।

श्रुतव्यवहारश्चाऽऽचाराङ्गादीनामष्टमपूर्वान्तानामेव । यदुक्तम्— **'आयारपकप्पाई सेसं सव्वं सुअं विणिद्दिट्ठ'** मिति (व्यवहारभाष्ये) । अत्राह कश्चित्—किमष्टमपूर्वान्तमेव श्रुतम्, नवमपूर्वादीनां न श्रुतत्वम्? उच्यते—आगम्यन्ते परिच्छिद्यन्तेऽतीन्द्रियाः पदार्था येन स आगम इति व्युत्पत्तेर्नवमपूर्वादीनां श्रुतत्वाऽविशेषेऽपि केवलज्ञानादिवदतीन्द्रियार्थेषु विशिष्टज्ञानहेतुत्वेन सातिशयत्वादागमत्वेनैव व्यपदेशः । शेषश्रुतस्य तु नातीन्द्रियार्थेषु तथाविधोऽ—वबोधस्ततोऽस्मिन् श्रुतव्यवहारः । इदानीं चाऽऽगमव्यवहारिणामभावे समयानुसारेणोत्कृष्टतमश्रुतानां श्रुतव्यवहारिणां सन्निधावालोच्यते । आज्ञाव्यवहारस्तु कावपि गीतार्थावाचार्यौ सम्यगधीताशेषसूत्रार्थौ क्षीणजङ्घाबलौ दवीयोदेशवासिनौ परस्परेणोपान्तमागन्तुमक्षमौ तयोरेकः प्रायश्चित्तं जिघृक्षुरगीतार्थशिष्यं मतिधारणाकुशलं सन्दिष्टवस्तुनयनसमर्थमागमभाषया गूढान्यपराधपदानि कथयित्वा लिखित्वा वा समर्प्य मन्दमेधसं शिष्यं द्वितीयाऽऽचार्यसमीपे प्रस्थापयति, सोऽपि तथैव गूढपदैः प्रायश्चित्तं कथयित्वा लिखित्वा वा समर्प्य प्रेषयति, एष आज्ञालक्षणः तृतीयो व्यवहारः । तदुक्तं— **'देसंतरट्ठिआणं गूढपयालोअणा आणा'** । आलोचना च प्रतिसेवकस्य प्रतिसेवनीयप्रतिसेवनातः स्यात् । तत्र प्रतिसेवकः साध्वादिः । प्रतिसेवनीयं च व्रतषट्कादीन्यष्टा—दशस्थानानि । तद्यथा—

**वयछक्कं कायछक्कं अकप्पो गिहिभायणं । पलिअंक निसिज्जा य सिणाणं सोहवज्जणं ।।**

(व्य०सू० ४४४०, जी०भा० ५८७)

**व्रतषट्कं** प्राणातिपातविरत्यादिमहाव्रतपञ्चकं रात्रिभोजनविरतिषष्ठम् । **कायषट्कं** पृथिव्यादयः षड्जीवनिकायाः । षट्कद्वयेन मूलगुणा उक्ताः । एतद्वृतिकल्पाश्चाऽकल्पादयः षडुत्तरगुणाः । तत्रा**ऽकल्पो** द्विविधः—शिक्षक—स्थापनाकल्पोऽकल्पस्थापनाकल्पश्च । तत्राऽऽद्योऽनधीतपिण्डनिर्युक्त्यादिशास्त्रसाधुना समानीतमाहारादि साधुभ्यो न कल्पते । उक्तं च—

**'अणहीआ खलु जेणं पिंडेसणसिज्जवत्थपाएसा । तेणाणिआणि जइणो कप्पंति न पिंडमाईणि'** ।।
**उउबद्धंमि न अनला वासावासे उ दोवि नो सेहा । दिक्खिज्जंती पायं (सेहं) ठवणाकप्पो इमो होइ** ।।

आद्या गतार्था । द्वितीयस्याश्चायमर्थः—**ऋतुबद्धे** शीतोष्णकालमासाष्टके **अनला** अयोग्या नपुंसकादयो न दीक्षार्हाः । **वर्षाकाले** तु **'दोवि'** त्ति । **द्वावपि** योग्याऽयोग्यौ शैक्षौ न कार्याविति शेषः । शिक्षकस्थापनाकल्पाख्योऽकल्पः । द्वितीयश्चाऽनेषणीयपिण्डशय्यावस्त्रपात्रलक्षणोऽकल्प उद्गमादिद्विचत्वारिंशद्दोषरहितस्यैव कल्पनीयत्वात् ।१। **गृहिभाजनं** गृहस्थसम्बन्धि स्थालतलिकादिकमकल्पम् ।२। **'पलिअंक'** त्ति । आसन्दकशय्यामञ्चकादावुपवेष्टुं स्वप्तुं वा दुष्प्रतिलेख्यत्वात् साधूनां न कल्पते ।३। **'निसिज्ज'** त्ति । भिक्षार्थं गृहप्रविष्टस्य साधोरुत्सर्गतस्तत्र

निषदनं न कल्पते । अपवादतः पुनः कस्यचित् कल्पते । यदुक्तं श्रीशय्यंभवमिश्रैः[A]—

**'तिण्हमन्नयरागस्स निसिज्जा जस्स कप्पई । जराए अभिभूअस्स वाहिअस्स तवस्सिणो'** ।।

(दशवै० ६/६०)

एते च भिक्षाटनं न कार्यन्त एव परमात्मलब्ध्यपेक्षया सूत्रे त्रयस्योपवेशनमुक्तम् ।४। **स्नानम्** अङ्गप्रक्षालनम्, सर्वतो देशतोऽप्यकल्प्यम् ।५। **शोभावर्जनं** नखकेशसंस्कारादिविभूषात्यागः ।६। इत्यष्टादशस्थानलक्षणं प्रतिसेवनीयम् । प्रतिसेवना च द्विधा—दर्पिका कल्पिका च । आकुट्टिप्रमादसेवने च सत्यावपि न विवक्षिते । दर्पाकल्पसाध्यत्वादाकुट्टेः । प्रमादस्यापि दर्पजन्यत्वादनयोर्दर्पिकाख्यायामाद्यप्रतिसेवनायामेवान्तर्भावः । सा चाद्या दशधा, तद्यथा—

**'दप्प—अकप्प—निरालंब चिअत्ते अप्पसत्थ—वीसत्थे । अपरिच्छि अकडजोगी निरणुत्तावी अ निस्संके'** ।।

(व्य०सू० ४४४२, जी०भा० ५८९, गु०वि० २/१९)

तत्र **दर्पो** धावनडेपनादिः । **धावनं** निष्कारणमतित्वरितमविश्रामं गमनम् । **डेपनं** गर्त्तवरण्डादीनां रयेणोल्लङ्घनम् । आदिशब्दान्मल्लवद् बाहुयुद्धकरणलगुडभ्रमणादिग्रहः ।१। **अकल्पः** पृथिव्यादिकायानामपरिणतानां ग्रहणम्—उदकार्द्रसस्निग्धसरजस्काभ्यां हस्तमात्रकाभ्यामादानम् । अगीतार्थोत्पादिताहारोपधिपरिभोगः । पञ्चकादि—प्रायश्चित्तयोग्यमपवादविधिं त्यक्त्वा गुरुतरदोषसेवनं चेति ।२। **निरालम्बो** ज्ञानाद्यालम्बनं विनाऽपि निष्कारणम—कल्पिकासेवनम्, यद्वा—अमुकेनाऽऽचरितमतोऽहमप्याचरामीति ।३। **'चिअत्ते'** त्ति । **त्यक्तकृत्यः** त्यक्तचारित्रः, अपवादेनाऽसंस्तरे ग्लानादिकारणे वा यदकल्प्यमासेवितं पुनस्तदेव संस्तरेऽपि निवृत्तरोगोऽप्यासेवते ।४। **अप्रशस्तो**ऽप्रशस्तेन भावेन बलवर्णाद्यर्थं प्रासुकमपि भुञ्जानः किं पुनरविशुद्धमाधाकर्मादि ? ।५। **विश्वस्तः** प्राणातिपाताद्यकृत्यं सेवमानः स्वपक्षात् श्रावकादेः परपक्षान्मिथ्यादृष्ट्यादेर्न बिभेति ।६। **'अपरिच्छिअ'** त्ति । **अपरीक्षक** उत्सर्गापवादयोरायव्ययावनालोच्य यः प्रतिसेवते ।७। **अकृतयोगी** ग्लानादिकार्ये गृहेषु त्रिःपर्यटनरूपं **योगं** व्यापारमकृत्वैव योऽनेषणीयमासेवते । यथा असंस्तरादौ त्रीन् वारानेषणीयार्थं पर्यटिताशेषगृहेणाप्यप्राप्तैषणीयेन चतुर्थवेलायामनेषणीयं ग्राह्यमित्येवं व्यापारमकृत्वैव प्रथमद्वित्रिवेलास्वप्यनेषणीयं गृह्णाति स तथा ।८। **निरनुतापी** अपश्चात्तापी, यः साधुरपवादेनापि सङ्घट्टनपरितापनोपद्रवान् कृत्वा नानुतप्यते । यथा हा ! मया दुष्ठु कृतमिति । यस्तु दर्पेणाप्यासेव्य नानुतप्यते किं तस्य उच्यते ? ।९। **निश्शङ्को** निरपेक्षः, अकार्यं कुर्वन् कस्याप्याचार्यादेर्नाऽऽशङ्कते नेहलोकस्यापि बिभेतीत्यर्थः ।१०। एषा **दर्पिका** प्रथमा प्रतिसेवना । द्वितीया कल्पिका प्रतिसेवना चतुर्विंशतिधा । तद्यथा—

**[१]दंसण[२]नाण[३]चरित्ते [४]तव—[५]पवयण—[६]समिइ—[७]गुत्तिहेउं वा । [८]साहम्मिअवच्छल्लत्तणेण [९]कुलओ [१०]गणस्सावि ।।**
**[११]संघस्स[१२]आयरिअस्स य [१३]असहस्स [१४]गिलाण [१५]बाल[१६]वुड्ढस्स । [१७]उदय[१८]ग्गि[१९]चोर[२०]सावय [२१]भय[२२]कंतार[२३]आवई [२४]वसणे ।।**

(व्य०सू० ४४४४-४४४५, जी०भा० ६०१-६०२, गु०वि० २/२०-२१)

A. पूज्यैः

'दंसण' त्ति । दर्शनप्रभावकानि प्रमाणशास्त्राणि प्रमेयरत्नकोशादीनि गृह्णन्नसंस्तरे अकल्प्यमपि यतनया प्रतिसेवमानः शुद्धोऽप्रायश्चित्त इत्यर्थः ।१। 'णाण' त्ति । ज्ञाननिमित्तं सूत्रमर्थं वाऽधीयन्नसंस्तरे अकल्प्याऽऽसेव्यपि शुद्धः ।२। 'चरित्ते' त्ति । यत्र क्षेत्रे एषणादोषः स्त्रीदोषो वा ततः क्षेत्राच्चारित्रार्थिना निर्गन्तव्यम्, निर्गच्छँश्चाक्षमत्वादकल्प्याऽऽसेव्यपि शुद्धः ।३। 'तवे' त्ति । तपः करिष्यामीति घृतादि पिबेत्, कृते वा विकृष्टतपसि मासक्षपणादौ पारणके लाजातरणादि पिबेत्, तीर्यत इवास्यामतिस्वच्छतयेत्यधिकरणे अनटि तरणं लाजा—भृष्टा व्रीहयस्तैर्निर्वृत्तं तरणं लाजातरणम् उपचारात् पेयाऽभिधीयते तां पिबेत् । यद्वा— आधाकर्मादि तस्मै दद्यात् माऽन्येन शीतान्नादिना रोगोऽभूत्, शर्कराऽऽमलकादयो वाऽस्य यतनया पारणके दीयन्ते, परं शुद्धः ।४। 'पवयण' त्ति । प्रवचनार्थं किञ्चित् प्रतिसेवमानः शुद्धः । यथा कोऽपि राजादिर्भणेत् मम विषयान्निर्गच्छतेति । ततस्तद्दण्डार्थमुपक्रमते । यथा विष्णुकुमारमुनिना लक्षयोजनप्रमाणं शरीरं कृतं लवणोदधिश्चलनाभ्यामालोडितः ।५। 'समिइ' त्ति । समितिहेतोः, ईर्यासमितिर्न शुद्ध्यतीति, चक्षुर्निमित्तं वैद्योपदेशादौषधादिपानं कुर्यात् । कथमपि चित्तव्याक्षेपादिसम्भवे मा भाषासमितावसमितो भूवमिति तत्प्रशमनार्थमौषधादि पिबेत् । एषणासमित्यै कदाचिदसंस्तरेऽनेषणीयमपि गृह्णीयात् । एषणादोषेषु वा शङ्कितादिषु सत्स्वसंस्तरे गृह्णीयात् । दीर्घाऽध्वप्रतिपत्तौ वाऽध्वकल्पं प्रतिसेवेत् । अयं भावार्थः— सम्प्रत्यल्पदोषमिदमनाददानः पश्चाद् ग्लानत्वादिभावे माऽऽधाकर्मादि बादरमनेषणीयं ग्रहीषम् । आदाननिक्षेपसमित्यै कश्चित् कम्पवातादिना कम्पमानकरोऽन्यत्र प्रमार्जयत्यन्यत्र वस्तु निक्षिपत्यतस्तत्प्रश— मनार्थमौषधादि विदध्यात् । पारिष्ठापनिकासमित्यै स्थण्डिलाभावे कायिकीं संज्ञां वा कदाचिदक्षमतया पृथिव्यादीन् विराधयन्नपि कुर्वीत, मा ममेदानीं कायिक्याद्याबाधया मृत्युर्भूत् । जीवन् पुनरिमां समितिं यथावस्थितां पालयिष्यामीति ।६। 'गुत्तिहेउं वा' गुप्तिहेतोः कदाचिद् विषमातङ्कादौ अनन्यौषधसाध्ये वैद्योपदिष्टं विकटं स्वल्पमेवाऽऽसेवते । माऽहं वैकल्यान्मनोवाक्कायैरगुप्तो भूवमिति ।७। **साधर्मिकवात्सल्य**— माश्रित्य किञ्चिदकल्प्यं प्रतिसेवेत । यथा आर्यवैरिस्वामिभिरशिखाकमुण्डः पटेऽधिरोप्य दुर्भिक्षान्निस्तारितः । न चैतत्कर्तुं कल्पते साधूनाम् । यदुक्तम् —

**'तहेवाऽसंजयं धीरो आस एहि करेहि वा । सय चिट्ठ वयाहित्ति नेवं भासिज्ज पण्णव'** ।।

(दशवै०७/४७)

मिति ।८। **कुलगणसङ्घकार्येषु** समुत्पन्नेषु वशीकरणोच्चाटनाभिचारादीनि राजादिकमुद्दिश्य प्रयुङ्क्ते, चूर्णयोगादीन् वा करोति ।९-११। आचार्यऽसहिष्णुग्लानबालवृद्धादीनां च येन समाधिर्भवति तत्कार्यम् ।

तत्र राजयुवराजाऽमात्यश्रेष्ठिपुरोहिता असहिष्णवः पुरुषा भण्यन्ते । एते हि अन्तप्रान्तैर्विपरिणाम्यन्ते । बालवृद्धौ च कारणदिक्षितौ भवेताम् । यथाऽऽर्यवैरिस्वामी आर्यरक्षितपिता च । एतेषां च सर्वेषामपि पञ्चकाद्यया यतनया आहारादि गृहीत्वा समाधिहेतोर्दातव्यम् । पञ्चकादियतना चेयं—येन गृहीतेन पञ्चकप्रायश्चित्तापत्तिर्भवति। तदपि तत्प्रायोग्यं सर्वविशुद्धप्रायोग्याऽलाभे ग्राह्यम् । तदभावे येन दशकापत्तिस्तदाप्यादेयम् । एवं यावदाधाकर्माऽप्यादाय तेषां समाधिरुत्पाद्यः ।१२-१६। **उदय**' त्ति । **उदकप्रवाहो** नदीपूरादिः।१७। **अग्गि**' त्ति । दावाग्निः ।१८। **चोर**' त्ति । चौरा द्विविधा—वस्त्राद्युपधिहारिणः शरीरहारिणश्च पारसीकम्लेच्छादयः।१९। **सावय**' त्ति । श्वापदानि च सिंहसिन्धुरव्याघ्रादीनि । एतेषामन्यतरस्मात् सकाशाद् भये सति स्तम्भनविद्यया तं नदीपूरादिकं स्तभ्नीयात्, विद्याया अभावे पलायेत, पलायनाऽसमर्थश्च श्रान्तो वा सचित्तवृक्षमप्यारोहेन्न दोषः ।२०। तथा **भयं** धाट्यादेः, तस्मिन् सति पलायमानः पृथिव्यादीन् विराधयेत् ।२१। **कंतार**' त्ति । अरण्यानी, यत्र भक्तपानादिलाभो न सम्भवत्येव, तत्र यतनया कदल्यादिफलानि उदकादि वाऽप्रासुकमाददीत ।२२। **आवइ**' त्ति । आपत्—द्रव्यक्षेत्रकालभावैश्चतुर्द्धा । द्रव्यतः प्रासुकोदकाद्यलाभे, क्षेत्रतो दीर्घमध्वानं प्रतिपन्नानाम्, कालतो दुर्भिक्षादौ, भावतो ग्लानत्वादावापत्। तत्र किञ्चिदकल्पिकं प्रतिसेवेत तथापि शुद्धः ।२३। **वसण**' त्ति । गीताद्यभ्यासो व्यसनम् । कोऽपि चारणादिः दीक्षितः स्यात् । स च गीतव्यसनतया गीतोच्चारं कुर्यात् । ताम्बूलव्यसनी वा प्रव्रजितो व्यसनितया पक्वशुष्कताम्बूलपत्रादिकं मुखे प्रक्षिपेत् ।२४। एषा **कल्पिका** द्वितीया प्रतिसेवना । गूढपदानि चामूनि—

**पढमस्स य कज्जस्सा पढमेण पएण सेविअं जं तु । पढमे छक्के अब्भिंतरं तु पढमं भवे ठाणं**' ।।

(व्य०सू० ४४४८, जी०भा० ६१८, गु०वि० २/२३)

**प्रथमस्य कार्यस्य** दर्पिकासेवनालक्षणस्य तद्भेदानां दर्पाऽकल्पनिरालम्बादीनां दशानां पदानां मध्यात् **प्रथमेन पदेन** दर्पलक्षणेनासेवितं **यत्** । **प्रथमे षट्के** व्रतषट्काख्येऽ**भ्यन्तरम्** अन्तर्वर्त्ति व्रतषट्कान्तः—पतितमित्यर्थः । **प्रथमं** प्राणातिपाताख्यं **भवे**दतीचार**स्थान**मापन्नमित्येवं गूढपदेन प्राणातिपाताऽतिचारं निर्दिष्टवान् । **एवं बीयं भवे ठाणं, तइअं भवे ठाण**' मित्यादिसर्वपदचारणिकाक्रमेणाशीत्यधिकं शतमती—चारस्थानानां जायते । तथा—

**बीअस्स य कज्जस्सा पढमेण पएण सेविअं जं तु । पढमे छक्के अब्भिंतरं तु पढमं भवे ठाणं**' ।।

(व्य०सू० ४४५६, गु०वि० २/२३)

**द्वितीयस्य कार्यस्य** कल्पिकाऽऽसेवनाख्यस्य तद्भेदानां दर्शनादीनां चतुर्विंशतिसङ्ख्यानां मध्यात् **प्रथमेन पदेन** दर्शनाख्येन दर्शनप्रभावनारूपेणाऽऽसेवितं **यत्** । उत्तरार्द्धं प्राग्वत् । अत्रापि सर्वपदचारणिकाक्रमेण

चत्वारि शतानि द्वात्रिंशदधिकान्यतिचारस्थानानि जायन्ते । उभयराशिमेलने षट् शतानि द्वादशोत्तराणि । एतेषां च परिज्ञानायेदं यन्त्रकद्वयम् ।

| १ | ।। दर्पयन्त्रकम् ।। | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | | | | | | | | | |
| १ | २ | ३ | ४ | ५ | ६ | १ | २ | ३ | ४ | ५ | ६ | १ | २ | ३ | ४ | ५ | ६ | |

| २ | ।। कल्पयन्त्रकम् ।। | | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ |
| १ | २ | ३ | ४ | ५ | ६ | १ | २ | ३ | ४ | ५ | ६ | १ | २ | ३ | ४ | ५ | ६ | | | | | | |

अनयोर्यन्त्रकयोः शीलाङ्गरथवत् सर्वपदचारणिका करणीया । इयं स्थापना—

**पढमस्स य कज्जस्सा'** १८०— पढमेण पएण सेविअं जं तु १८। बीएण १८ । तइएण १८ । तुरिएण १८ । पंचमेण य १८ । छट्ठेण १८ । सत्तमेण य १८ । अट्ठमेण य १८ । नवमेण १८ । दसमेण १८ । पढमे छक्के अब्भिंतरं तु ६, बीए छक्के अब्भिंतरं तु ६, तइए छक्के अब्भिंतरं तु ६। पढमं भवे ठाणं १, बीए (अं) भवे ठाणं १, तइए (अं) भवे ठाणं १, तुरिअं भवे ठाणं १, तह पंचमं भवे ठाणं १, छट्ठं भवे ठाणं १ **एतत्प्रथमं यन्त्रम्** ।

**बीयस्स य कज्जस्सा'** ४३२— पढमेण पएण सेविअं जं तु १८। बी० १८ । त० १८ । तु० १८ । पं० १८ । छ० १८ । स० १८ । अट्ठ० १८ । नव० १८ । द० १८ । एगारसमेण १८ । बा० १८ । ते० १८ । चउद० १८ । पनर० १८ । सोल० १८ । सत्तर० १८ । अढार० १८ । इगुणी० १८ । वी० १८ । इग० १८ । बा० १८ । ते० १८ । च० १८ । पढमे **छक्के** अब्भिंतरं तु ६, बीए ६, तइए ६। पढमं भवे ठाणं १, बीअं भवे ठाणं १, तइयं भवे ठाणं १, तुरिअं भवे ठाणं १, तह पंचमं भवे ठाणं १, छट्ठं भवे ठाणं १ **इदं द्वितीयं यन्त्रम्** ।

**'सोऊण तस्स पडिसेवणं तु आलोअणं कमविहिं च । आगम पुरिसज्जायं परिआय बलं च खित्तं च ।।**
**अवधारेउं सीसो गंतूण य सो तओ गुरुसगासे । तेसि निवेएइ तहा जहाणुपुव्वी गतं[A] सव्वं' ।।**
(व्य०सू० ४४६८-४४६९, जी०भा० ६३६-६३७, गु०वि० २/२४-२५)

स गूढपदावधारकः शिष्यस्तस्याऽऽचार्यस्य प्रतिसेवकस्य **प्रतिसेवामालोचनां च क्रमविधिं** च मूलोत्तरगुणविषयं **श्रुत्वा, आगमम्** आगमधरत्वम्, **पुरुषजातं** वाऽऽचार्यादि, **पर्यायं** व्रतवयोविषयम्, **बलं च** वपुःसामर्थ्यम्, **क्षेत्रं** च कर्कश—साधारणादिरूपम्, **अवधार्य, ततो गत्वा गुरूणां** प्रायश्चित्तदातॄणां **सकाशे यथाऽनुपूर्व्या** श्रुतं तत्तथा **सर्वं तेषां निवेदयति** । ततः—

**'सो ववहारविहिन्नू अणुमज्जिअ तं सुओवएसेणं । सिस्सस्स देइ आणं तस्स इमं देहि पच्छित्तं' ।।**
(व्य०सू० ४४७०, जी०भा० ६३८)

स प्रायश्चित्तदाता आगमादिव्य**वहारविधिज्ञ**स्तत्र स्वयं गन्तुमक्षमः स्वशिष्यं प्रेषयति, तदभावे आगत—**शिष्यस्यैवाऽऽज्ञां ददाति, अनुमृज्य तं** गूढपदालोचितमतीचारं **श्रुतोपदेशेन** विशोध्य, तथा **तस्याऽऽचार्यस्येदं प्रायश्चित्तं दद्या** इति गूढपदैरेव कथयति । तानि चैतानि—

**'पढमस्स य कज्जस्सा दसविहमालोअणं निसामित्ता । नक्खत्ते भे पीडा सुक्के मासे तवं कुणह' ।।**
(व्य०सू० ४४७१, जी०भा० ६३९, गु०वि० २/२६ टीकान्तर्गतगाथा)

**'चाउम्मासं तवं कुणह, छम्मासं तवं कुणह, सुक्के'** इति सञ्चारितान्त्यपदा पुनरेषैव गाथा द्विः पठनीया । आसामर्थः—**प्रथमस्य कार्यस्य** दर्पिकासेवनाऽऽख्यस्य **दशविधामालोचनां** दर्पकल्पादिदशपदात्मिकां **निशम्य नक्षत्रे भे भवतां पीडा** पीडकत्वेनोपचाराद्विराधना । कोऽर्थः ? चन्द्रादित्यग्रहनक्षत्रतारकभेदपञ्चविधज्योतिश्चक्रमध्ये नक्षत्रभेदश्चतुर्थः । अतोऽनेन चतुर्थव्रतगोचरा विराधना सूच्यत इति एके व्याचक्षते । अन्ये त्वाषाढाद्याः संवत्सरा इति । तदाद्यदिने ज्येष्ठपूर्णिमानन्तरप्रतिपदि संवत्सरमूलदिवसे मूलनक्षत्रं भवति । ततः प्राधान्यादत्र नक्षत्रशब्देन मूलं भणन्ति । तेन मूलगुणविराधनां प्राणातिपाताद्यतिचाररूपां ज्ञापयन्ति । अपरे त्वार्द्रादिषु नक्षत्रेषु सर्वेषु वृष्टेऽपि मेघे हस्तवृष्टिं विना न धान्यानि विशिष्टां पुष्टिं बध्नन्ति । ततो हस्तस्य प्राधान्यमिच्छन्तोऽत्र नक्षत्रध्वनिना हस्तं निर्दिशन्ति । ततो हस्तेनाऽदत्तमात्रं हस्तकर्म वा कृतमिति तृतीयचतुर्थव्रतातिचारसूचा । एके तु नक्षत्राणि लोके सप्तविंशतिर्व्यवह्रियन्त इति । नक्षत्रशब्देनानगारगुणानां मूलोत्तरगुणरूपाणां सप्तविंशतिसङ्ख्यानां विराधनामाहुः । तथा चाऽऽवश्यके प्रतिक्रमणाध्ययने— **'सत्तावीसाए अणगारगुणेहिं'** ति ।

**'वयछक्कमिंदिआणं च निग्गहो भावकरणसच्चं च । खमया विरागया वि अ मणमाईणं निरोहो अ' ।।**
**'कायाणं छक्क जोगंमि जुत्तया वेअणाहिआसणया । तह मारणंतिअहिआसणा य एए णगारगुणा'।।**

---

**A.** अवधारितम् ।

गाथे स्पष्टार्थे । नवरं— **भावकरणसच्चं च' त्ति** । **भावसत्यं** शुद्धान्तरात्मतारूपं पारमार्थिकाऽवितथम्, करणेन सत्यं **करणसत्यं** यथोक्तप्रतिलेखनादिक्रियाकरणम् । इह व्रतषट्कं कायषट्कं च १२ मूलगुणाः, शेषाः १५ उत्तरगुणाः । तत्रोत्तरगुणविराधनामाश्रित्य **शुक्ले मासे तपः कुरुत** । **चातुर्मासिकं तपः कुरुत, षाण्मासिकं तपः कुरुत** । **शुक्ले** इति । अयमभिप्रायः—उत्तरगुणविराधनायां शुक्लशब्दवाच्यान्युद्घातिमानि[A] मासिक—चातुर्मासिक—षाण्मासिकानि प्रायश्चित्तानि कार्याणि । मूलगुणातिचारे तु कृष्णशब्दवाच्यान्यनुद्घातिमानि[B] तान्येवेति । तथा च—

**एवं तावुग्घाए अणुघाए ताणि चेव कण्हंमि । मासचउमासछम्मासिआणि छेअं अओ वुच्छं' ।।**

(व्य०सू० ४४७४, जी०भा० ६४४)

**तत्रोद्घातो** भागपातस्तेन निर्वृत्तान्युद्घातिमानि **भावादिम'** (सि०हे०६।४।२१) इतीमः—लघूनीत्यर्थः । तद्विपरीतान्यनुद्घातिमानि गुरूणीत्यर्थः । उपलक्षणं **चैतन्मासिक—चातुर्मासिक—षाण्मासिकानि** । अन्यथा पञ्चकादीनि षाण्मासिकान्तानि प्रायश्चित्तानि भवन्ति । तानि च सर्वाण्यपि लघूनि गुरूणि च । तत्स्वरूपं चाग्रे वक्ष्यति **अद्धेण छिण्णसेस'** मित्यादिना। इह तीर्थे उत्कृष्टतोऽपि षण्मासान्तमेवातिचारशुद्ध्यर्थं तपो भवति । अत एवोक्तं— **मासचउमासछम्मासिआणि छेअं अओ वुच्छं'** यश्चैतावता तपसा न शुद्ध्यत्यतस्तच्छुद्ध्यर्थं छेदादीन् वक्ष्ये । अन्यत्राऽप्युक्तम्—

**उस्सग्गेण उ सुज्झइ अइयारो कोइ कोइ उ तवेणं । तवसा असुज्झमाणे छेअविसेसावि सोहंति' ।।**

छेदादयोऽप्याऽऽज्ञाव्यवहारत्वात् गूढपदैरेवोच्यन्ते ।

**छिन्दित्तु तयं भाणं गच्छंतु वयस्स साहूणो मूलं । अव्वावडा व गच्छे अब्बीआ वावि विहरंतु' ।।**

(व्य०सू० ४४७८, जी०भा० ६४९, गु०वि० २/२६ टीकान्तर्गतगाथा)

**तद्भाजनं** पूर्वव्रतपर्यायरूपं **छिन्दन्तु** तन्मध्यात् कियन्तमपि पर्यायमपनयन्तु—उत्सारयन्त्वित्यर्थः । स च छेदस्तपोभूमिमतिक्रान्तस्य[C] पञ्चदशकादिरूपतया तत्तदतिचाराऽपेक्षया यावत् पर्यायः प्राप्यते तावत् क्रियते । यदाह—

**उक्कोसं तवभूमिं समईओ सावसेसचरणो अ । छेअं पणगाईअं पावइ जा धरइ परिआओ' ।।**

ते चैवं छेदविभागाः—

**छब्भागंगुल पणगे दसराए तिभाग अद्ध पन्नरसे । वीसाइ तिभागूणं छब्भागूणं तु पणवीसा' ।।**

**मासचउमासछक्के अंगुलचउरो तहेव छक्कं तु । एए छेअविभागा नायव्वा अहक्कमेणं तु' ।।**

(व्य०सू० ४४७९-४४८०, गु०वि० २/२६ टीकान्तर्गतगाथे)

---

**A.** लघु । **B.** गुरु । **C.** षोडशप्रकारायास्तपोभूमेरतिक्रान्तस्य साधोः ।

इहाङ्गुलशब्देन माससङ्केतः । ततश्च—**पञ्चके** दिनपञ्चके छेद्ये अङ्गुलषड्भागच्छेद्य इति व्यपदिशन्ति । भवन्ति हि त्रिंशद्दिनमानस्य मासस्य षड्भागे छेद्ये पञ्च, **दशरात्रे** छेद्ये **त्रिभागः**, **पञ्चदशसु** छेद्येष्व**र्द्धम्**, **विंशतौ** छेद्यायां **त्रिभागोनमङ्गुलम्**, **पञ्चविंशतौ** छेद्यायां **षड्भागोनमङ्गुलं** छेद्यमिति । एकद्वित्रिचतुष्पञ्चषडादिमासेषु छेद्येषु तत्सङ्ख्यान्यङ्गुलानि छेद्यानीति निर्दिशन्ति । **एते छेदविभागाः क्रमेण ज्ञातव्याः** ।

सर्वपर्यायच्छेदेनाप्यशुद्धौ **गच्छन्तु साधवो व्रतस्य मूलम्** अष्टमप्रायश्चित्तभाजो भवन्तु । तस्याऽप्ययोग्यतायां **अव्यापृता वा गच्छेयुरव्यापाराः** सन्तिष्ठन्तु—अनवस्थाप्यार्हा भवन्त्वित्यर्थः । तेनाऽप्यशुद्धौ **अद्वितीया वा विहरन्तु** एकाकिनः सन्तो दशमप्रायश्चित्ताऽऽसेविनो भवन्तु इति । दर्पिकासेवनाप्रायश्चित्तान्युक्तानि । कल्पिकासेवनायाः प्राह—

**बिइअस्स य कज्जस्सा तहिअं चउवीसयं निसामित्ता । आउत्तनमुक्कारा भवन्तु एवं भणिज्जाहि' ।।**

(व्य०सू० ४४८१, जी०भा० ६५२, गु०वि० २/२६ टीकान्तर्गतगाथा)

**द्वितीयस्य कार्यस्य** कल्पिकासेवनाख्यस्य दर्शनादिपदगोचरामासेवनां शिष्येण कथितां **श्रुत्वा** गुरुराह—**आयुक्ताः** संयमोद्यमविधायिनः **पञ्चपरमेष्ठिस्मरणपरा भवन्तु** सूरयोऽप्रायश्चित्तेन इति भावः ।

नवरं—**कारणपडिसेवावि हु सावज्जा निच्छए अकरणिज्जा'** । किं सर्वथा ? नेत्याह—**बहुसो वि आरइत्ता'** कर्त्तव्येतिशेषः। **अधारणिज्जेसु अत्थेसु'** अत्यागाढकारणेष्वित्यर्थः । **जइवि अ समणुण्णाया'** प्रक्रमात् सावद्यप्रतिसेवा । **तहवि अ दोसो न वज्जणे दिट्ठो' दढधम्मया हु एवं नाभिक्खनिसेव निद्दयया'**।

**एअं नाऊण तहिं जहोवएसेण देइ पच्छित्तं । आणाइए स भणिओ ववहारो धीरपुरिसेहिं' ।।**

(व्य०सू० ४४८२, जी०भा० ६५३)

**एवं** द्रव्यक्षेत्रकालभावसंहननधृतिबलादिकं तस्य प्रतिसेवकस्य **ज्ञात्वा यथोपदेशेन** गूढपदैः **प्रायश्चित्तं ददाति** । कोऽर्थः ? तस्य शिष्यस्याऽग्रे कथयित्वा लिखित्वा वा समर्प्य प्रेषयति । **एष आज्ञाव्यवहारः** ।

**धारणाव्यवहारस्तु** संविग्नेन गीतार्थेणाऽऽचार्येण द्रव्यक्षेत्रकालभावपुरुषप्रतिसेवना अवलोक्य यत्रापराधे यत् प्रायश्चित्तं दत्तं तद् दृष्ट्वाऽन्योऽपि तेष्वेव द्रव्यादिषु तादृश्येवाऽपराधे तदेव प्रायश्चित्तं ददाति । **एष धारणाव्यवहारः**। अथवा वैयावृत्त्यकरस्य गच्छोपग्रहकारिणः स्पर्द्धकपतेर्वा प्रवर्त्तकस्य संविग्नस्य देशदर्शनसहायस्य वाऽनेकशः कृतकार्यस्य समस्तछेदश्रुतदानाऽयोग्यस्य सानुग्रहो गुरुः कानिचिदुद्धृतानि प्रायश्चित्तपदानि कथयति । स तान्यवधार्योद्धृतपदालोचनां ददाति स **धारणाव्यवहारः** । उक्तं च—

**गीअत्थेणं दिन्नं सुद्धिं अवधारिऊण तह चेव । दिंतस्स धारणा सा उद्धिअपयधरणरूवा वा' ।।**

(प्र०सा० ८५८)

एते चत्वारो व्यवहाराः । **पञ्चमस्तु जीतव्यवहारः** येष्वपराधेषु पूर्वमहर्षयो बहुना तपःप्रकारेण शुद्धिं कृतवन्तस्तेष्वपराधेषु साम्प्रतं द्रव्यक्षेत्रकालभावान् विचिन्त्य संहननादीनां च हानिमासाद्य तदुचितेन केनचित्तपःप्रकारेण यां गीतार्थाः शुद्धिं निर्दिशन्ति तत् समयभाषया **जीतमुच्यते** । अथवा यद्यत्र गच्छे सूत्रातिरिक्तं कारणतः प्रायश्चित्तं प्रवर्त्तितम्, अन्यैश्च बहुभिरनुवर्त्तितं **तज्जीतम्**, तस्य जीतस्य व्यवहारो **जीतव्यवहारः** । स चायम् —

**वत्तणुवत्तपवत्तो बहुसो आसेविओ महाणेण । एसो हु जीअकप्पो पंचमओ होइ नायव्वो'** ।।

(व्य०सू० ४५०२, जी०भा० ६७५)

**वृत्तः** पात्रबन्धग्रन्थिदानादिक एकदा नवो जातः, ततोऽ**नुवृत्तः** पुरुषान्तरं यावत्, ततः **प्रवृत्तः** पुरुषप्रवाहेण । अत एव **बहुश आसेवितो महाजनेन** बहुश्रुतनिवहेन । भाष्यकृताप्युक्तम्—

**वत्तो नामं एक्कसि, अणुवत्तो जो पुणो बिइअवारे । तइअव्वारपवत्तो सुपरिग्गहिओ महाणेण'** ।।

**बहुसो बहुस्सुएहिं जो वत्तो न य निवारिओ होइ । वत्तणुवत्तपमाणं जीएण कयं हवइ एयं'** ।।

एष जीतकल्पः पञ्चमो व्यवहारो भवति ज्ञातव्यः । इह पञ्चसु व्यवहारेषु सत्सु आगमव्यवहारिभ्य एव प्रायश्चित्तमादेयम्, आगमव्यवहारिणो ह्यतिशयिनः सङ्क्लिश्यमानम्, विशुद्ध्यमानम् अवस्थितपरिणामं वा ज्ञात्वा श्रुतादधिकं हीनं वा तन्मात्रं वा तावद्ददति यावता शुद्ध्यति । न श्रुतमनुरुध्यन्ते । तदभावे श्रुतव्यवहारिभ्यो ग्राह्यम् । ते हि श्रुतमनुवर्त्तमाना इङ्गिताकारनेत्रवक्त्रवचनविकारैः भावं—संवेगाद्युपलक्ष्य त्रीन् वारानतीचारालोचनां कारयित्वा परिकुञ्चितमपरिकुञ्चितं वा ज्ञात्वा श्रुतोक्तं प्रायश्चित्तं ददति । तथाविधाऽऽसन्नश्रुतधराभावे आज्ञाव्यवहारेण दूरस्थानामपि गीतार्थाऽऽचार्याणां पार्श्वात् प्रायश्चित्तमानाययितव्यम्। तेषामप्यभावे श्रुतधरपार्श्वावधारित—प्रायश्चित्तपदेभ्यो धारणाव्यवहारिभ्यो ग्राह्यम् । ते च द्वयेऽपि श्रुतोक्तप्रदत्वात् श्रुतव्यवहारकल्पा एव । सर्वेषां चैषामप्राप्तौ जीतेन व्यवहारः । **जीतं** श्रुतोक्तापत्तितो हीनमधिकं वा परम्पराऽऽचीर्णं तेन व्यवहारः । अयं सर्वत्र यावत्तीर्थं भवति ।।१।।

एष च ग्रन्थः प्रायश्चित्तप्ररूपणार्थमेवोपक्रान्तस्ततः प्रायश्चित्तप्राधान्यख्यापनार्थं गाथाद्वयमाह—

**संवरविणिज्जराओ मुक्खस्स पहो तवो पहो तासिं ।**
**तवसो अ पहाणंगं पच्छित्तं जं च नाणस्स ।।२।।**
**सारो चरणं तस्स वि निव्वाणं चरणसोहणत्थं च ।**
**पच्छित्तं तेण तयं नेयं मुक्खत्थिणाऽवस्सं ।।३।।**

व्याख्या—संवरणं संवर आश्रवद्वारप्रविशत्कर्मनिरोधः । आश्रवश्च मिथ्यादर्शनाऽविरतिकषायप्रमाद—कायवाङ्मनोयोगाः । तत्र मिथ्यादर्शनं प्रतीतम् । अविरतिः प्राणातिपातादीनामनिषेधः । कषायाः क्रोधादयः ।

प्रमादो निद्राविकथामद्येन्द्रियस्वेच्छाप्रवृत्त्यात्मकः । काययोगो धावनवल्गनवरण्डाद्युल्लङ्घनबाह्वाऽऽस्फालनाद्या अशुभचेष्टाः । वाग्योगोऽङ्गुष्ठपर्वादौ जीव इत्याद्यसद्भूतोद्भावनं **भवकम्बलो देवदत्त'** इत्यादि छलहिंस्रपरुषालीकपैशुन्यवचनादिः । मनोयोगः परसम्पत्त्यसहनत्वाऽमर्षभयशोकमिथ्याभिसन्धारणराग—द्वेषाऽकुशलसङ्कल्पादिः । एतैर्द्वारैस्तस्य तस्य कर्मणः प्रविशतः सम्यक्त्व— विरति—निष्कषायत्वा—ऽप्रमत्तत्वशुभयोगत्वाऽङ्गीकरणकपाटदानेन निवारणमित्यर्थः । विशेषेण निर्जरणं **विनिर्जरा** पूर्वोपचितशुभाऽशुभकर्मपरिशाटरूपा । सा पुनः समिति—गुप्ति—श्रमणधर्म— भावना—मूलगुणोत्तरगुण—परीषहोपसर्गाधिसहनरतस्य भवति । तत्र समितिगुप्तयः प्रतीताः । श्रमणधर्मो दशधा क्षान्त्यादिः । भावना द्वादशधा अनित्यताद्याः । मूलगुणाः पञ्च प्राणातिपातविरत्याद्याः । उत्तरगुणाः—

**'पिंडस्स जा विसोही समिईओ भावणा तवो दुविहो । पडिमा अभिग्गहावि अ उत्तरगुण मो विआणाहि'** ।।

(व्य०सू० ४७०, नि०भा० ६५३४, गु०वि०१-९४)

परीषहाः क्षुदाद्याः—

**'खुहा पिवासा सीउण्हं दंसाचेलारइत्थिओ । चरिआ निसीहिआ सिज्जा अक्कोसवहजायणा ।।**

**अलाभरोगतणफासा मलसक्कारपरीसहा । पण्णा अण्णाण सम्मत्तं इअ बावीस परीसहा'** ।।

(नवतत्त्वप्रकरणम् २७-२८)

उपसर्गाः दिव्याद्याः—

**'दिव्वा माणुस्सया चेव तेरिच्छा य विआहिआ । आयसंवेअणीआ य उवस्सग्गा चउव्विहा'** ।।

तत्र **दिव्या** हास्यात् १ प्रद्वेषात् २ विमर्शात्— मयाऽपि प्रारब्धो ध्यानादेष न चलिष्यती' त्यादिकात् ३ पृथग्विमात्राः—हास्येन प्रारब्धाः प्रद्वेषेण निष्ठां यान्तीत्यादि संयोगजाः ४। **मानुष्या** हास्यात् १ प्रद्वेषात् २ विमर्शाद्— 'एष शत्रुपुत्रादिर्वर्त्स्यन् ममानर्थाय तदेनमुच्चाटयामी' त्यादिकात् ३ कुशीलप्रतिसेवना—र्थाश्चतुर्थव्रतलोपनार्थं स्वैरिस्त्र्यादिकृताः ४। **तैरश्चा** भयात् १ प्रद्वेषात् २ आहारहेतोः ३ अपत्यलयनसंरक्षार्थाः ४। **आत्मसंवेदनीया** घट्टनात् चक्षुःप्रविष्टरेण्वादिमर्दनात् १ स्तम्भनात्— पादाद्यङ्गानां चिरं स्तब्धत्वेन धरणात् २ श्लेषणात्— तेषामेव वातादिना चिरं सङ्कोच्य धरणात् ३ पतनात्—स्थाण्वाद्यास्फालनेन भूमौ निपतनात् ४ । एते प्रत्येकं चातुर्विध्यात् षोडशेति । ते च संवरनिर्जरे द्विविधे—सर्वतो देशतश्च । तत्रान्त्यगुणस्थानके शैलेशीप्रतिपन्नस्य व्युच्छिन्नक्रियत्वादाद्यसमये एव सर्वसंवरः । द्विचरमसमये तु द्विसप्ततेः चरमसमये चाऽऽयुषा सह त्रयोदशानामुत्तरप्रकृतीनां निर्जरणात् सर्वनिर्जरा । शेषकाले देशसंवरो देशनिर्जरा च। **ते संवरनिर्जरे मोक्षस्य पथः** । कोऽर्थः ? संवरनिर्जराभ्यां नवकर्माऽनादानेन पुरातनकर्मक्षपणेन च मोक्षे गम्यते । तयोश्च संवरनिर्जरयोस्तपःपथः । कोऽर्थः ? तपः कुर्वतां संवरविनिर्जरे भवतः । **तपसश्च** । चशब्दोऽप्यर्थे ।

तपसोऽपि प्रधानमङ्गं प्रायश्चित्तम्, आभ्यन्तरतपोभेदत्वात् तेन तज्ज्ञेयमेवेति द्वितीयगाथान्तेन योगः । तथा यच्च सामायिकादिबिन्दुसारान्तस्य ज्ञानस्य सारः सारभूतं चरणम्, तस्याऽपि सारो निर्वाणम्, परं च तच्चरणं ज्ञानदर्शनान्वितं प्रायश्चित्तेन शोधितं सत् निर्वाणसाधकं भवति, तेन कारणेन निर्वाणसाधकस्य चरणस्य शोधनार्थं चकाराज्ज्ञानदर्शनातिचारशुद्ध्यर्थं च तत् प्रायश्चित्तं मोक्षार्थिनाऽवश्यं ज्ञेयम् ।।२-३।। तद्भेदानाह—

**तं दसविहमालोअणपडिकमणोभयविवेगवुस्सग्गे ।**
**तवछेयमूलअणवट्ठया य पारंचियं चेव ।।४।।**

व्याख्या—अन्वयः सुगमः । भावार्थं ब्रूमः—तत् प्रायश्चित्तं दशविधम् आलोचनार्हादि । तत्राऽऽलोचनार्हम्—आ— मर्यादया—

'जह बालो जंपंतो कज्जमकज्जं च उज्जुअं भणइ । तं तह आलोइज्जा मायामयविप्पमुक्को अ' ।।

(सड्ढ-जीयकप्पो १३)

इत्येवंरूपयाऽऽलोचनं गुरोः पुरतः प्रकाशनं तावन्मात्रेणैव यस्य पापस्य शुद्धिस्तदाऽऽलोचनार्हम्, तद्विशोधकं प्रायश्चित्तमप्युपचाराद् आलोचनार्हम् । एवं सर्वेष्वप्युपचारो द्रष्टव्यः ।१। यन्मिथ्यादुष्कृतमात्रेणैव शुद्ध्यति, न गुरोरालोच्यते, तत् प्रतिक्रमणार्हम् ।२। यच्च प्रतिसेव्य गुरोरालोच्यते, गुरूपदेशेन च विशुद्ध्यर्थं मिथ्यादुष्कृतं दीयते, तत्तदुभयार्हम् ।३। यस्य चानेषणीयग्रहणादेर्विधिना परित्यागेनैव शुद्धिस्तद् विवेकार्हम् ।४। कायचेष्टानिरोधोपयोगमात्रेणैव यद्दुःस्वप्नादिकमिव शुद्ध्यति, तद्व्युत्सर्गार्हम् ।५। यत्र प्रतिसेविते निर्विकृत्यादि षाण्मासिकान्तं तपो दीयते, तत्तपोऽर्हम् ।६। यथा शेषाङ्गरक्षार्थं व्याधिदूषितमङ्गं छिद्यते, एवं व्रतशेषपर्यायरक्षार्थ—मतीचारानुमानेन दूषितः पर्यायो यत्र छिद्यते, तत् छेदार्हम् ।७। यस्यां चाऽऽसेवनायां सर्वपर्यायमपनीय पुनर्महाव्रतारोपणं क्रियते, तन्मूलार्हम् ।८। यत्र प्रतिसेविते उपस्थापनाया अप्ययोग्यत्वेन यावदनाचीर्ण—विशिष्टतपास्तावदनवस्थाप्यः क्रियते पश्चाच्चीर्णतपाः पुनर्महाव्रतेषु स्थाप्यते, तदनवस्थाप्यार्हम् ।९। लिङ्गक्षेत्रकालतपोभिर्बहिष्कृतः तपसा अपराधस्य पारं—तीरमञ्चतीत्येवं साधुकारी ततो दीक्ष्यते यः स पाराञ्ची, पाराञ्च्येव पाराञ्चिकः, येन कर्मणा पाराञ्चिकः क्रियते, तत् पाराञ्चिकार्हम् ।१०। एष सङ्क्षेपतो भावार्थः । विस्तरस्तु दशानामपि प्रायश्चित्तानां स्वस्वविषयनिरूपणायां ज्ञेयः। इह प्रायश्चित्तानि दश, साधवश्च पुलाक—बकुश—कुशील—निर्ग्रन्थ—स्नातकभेदात् पञ्च । तत् कस्य तानि कियन्ति भवन्ति ? इत्युच्यते—

'आलोअण पडिकमणे मीसविवेगे तह विउस्सग्गे । तत्तो तवे अ छट्ठे पच्छित्त पुलाकि छप्पेए ।।
बउसपडिसेवगाणं पायच्छित्ता भवंति सव्वेवि । थेराण भवे कप्पे जिणकप्पे अट्ठहा होइ ।।
आलोअणा विवेगो वा निअंठस्स दुवे भवे । विवेगो उ सिणायस्स एमेआ पडिवत्तिओ' ।।

एतासां व्याख्या—पुलाकादीनां स्वरूपं च व्याख्याप्रज्ञप्तेरवसेयम् । आलोचना १ प्रतिक्रमणं २ मिश्रं ३ विवेकः ४ तपः ५ व्युत्सर्गः ६ एतानि षट् प्रायश्चित्तानि पुलाके । तथा बकुश—प्रतिसेवकयोः— बकुशस्य प्रतिसेवनाकुशीलस्य च सर्वाण्यपि दशापि प्रायश्चित्तानि भवन्ति । तौ च बकुशप्रतिसेवनाकुशीलौ स्थविराणां कल्पे भवतः । जिनकल्पे, उपलक्षणमेतत् यथालन्दकल्पे च । नवरं जिनकल्पे यथालन्दकल्पे च तयोः प्रायश्चित्तमष्टधा भवति, अनवस्थाप्यपाराञ्चिकयोरभावात् । आलोचनाप्रायश्चित्तं विवेकप्रायश्चित्तमित्येते द्वे प्रायश्चित्ते निर्ग्रन्थस्य भवतः । स्नातकस्य केवल एको विवेकः । एवमेताः पुलाकादिषु प्रतिपत्तयः । सामायिकसाध्वादीनां पञ्चानां यानि यस्य भवन्ति तान्यप्युच्यन्ते—

**'सामाइअसंजयाणं पच्छित्ता छेअमूलरहिअट्ठ । थेराण जिणाणं पुण तवमंतं छव्विहं होइ'** ।।

(व्य०सू० ४१६९, जी०भा० २८६)

सामायिकसंयतानां **स्थविराणां** स्थविरकल्पिकानां छेदमूलरहितानि शेषाण्यष्टौ प्रायश्चित्तानि भवन्ति । **जिनानां** जिनकल्पिकानां पुनः सामायिकसंयतानां तपःपर्यन्तं षड्विधं प्रायश्चित्तं भवति ।

**'छेओवट्ठावणिए पायच्छित्ता हवंति सव्वेवि । थेराण जिणाणं पुण मूलंतं अट्ठहा होइ'** ।।

(व्य०सू० ४१७०, जी०भा० २८७)

**छेदोपस्थापनीये संयमे** वर्त्तमानानां **स्थविराणां सर्वाण्यपि प्रायश्चित्तानि । जिनकल्पिकानां पुनर्मूलपर्यन्तमष्टधा भवति ।**

**'परिहारविसुद्धीए मूलंता अट्ठ हुंति पच्छित्ता । थेराण जिणाणं पुण छव्विह छेदाइवज्जं च'** ।।

(व्य०सू० ४१७१, जी०भा० २८८)

**परिहारविशुद्धिके** संयमे वर्त्तमानानां **स्थविराणां मूलान्तानि अष्टौ प्रायश्चित्तानि भवन्ति । जिनानां पुनश्छेदादिवर्जं षड्विधम् ।**

**'आलोअणा विवेगो अ तइअं तु न विज्जई । सुहुमे अ संपराये अहक्खाए तहेव य'** ।।

(व्य०सू० ४१७२, जी०भा० २८९)

**सूक्ष्मसम्पराये यथाख्याते च संयमे** वर्त्तमानानां **आलोचना, विवेक** इत्येवंरूपे **द्वे** प्रायश्चित्ते भवतः । **तृतीयं तु न विद्यते** ।।४।।

**'यथोद्देशं निर्देशः'** इति सविषयप्रथमप्रायश्चित्तनिरूपणायाह—

**करणिज्जा जे जोगा तेसुवउत्तस्स निरइआरस्स ।**
**छउमत्थस्स विसोही जइणो आलोअणा भणिआ ।।५।।**

व्याख्या— **करणीया** अवश्यकर्त्तव्या **ये योगाः** प्रत्युपेक्षणादिक्रियारूपाः श्रुतोपदिष्टा अहोरात्रानुष्ठेयाः, संयमहेतवो यदि वा योगाः कायवाङ्मनोरूपाः । तथाहि—

**'नित्यालीनप्रलीनाङ्गः कूर्मवन्मुनिपुङ्गवः । तिष्ठेत् प्रयोजनाभावे, काययोगोऽयमीरितः'** ।।

तत्र आ—ईषल्लीन आलीनः । बहुतरं लीनः प्रलीनः। भाष्ये तु—

**'अल्लीणा नाणाइसु पइ पइ लीणाओ हुंति पल्लीणा । कोहाई वा पलयं जेसि (सिं) गया ते पलीणा उ'** ।।

(व्य०सू० ४४९४, जी०भा० ६६५)

तथा— **'भूमावघर्षयन् पादं यद्वा रीयेत कार्यतः । अग्रपादादिना देशे कीटिकाद्याकुले पुनः'** ।।
**हितं मितं प्रियं सत्य—मनवद्यं विमृश्य च । यन्मुनिर्वक्ति वाग्योगः सैष तद्धर्मिवर्जनात्** ।।
**मनोयोगः पुनरयं मनसः कुशलस्य यत् । उदीरणं निरोधश्चा—ऽकुशलस्य पुनः सदा** ।।
**तेषूपयुक्तस्य** निरतिचारस्याऽदुष्टभावस्य **छद्मस्थस्य** परोक्षज्ञानिनः श्रुतज्ञानानुसारेणैवाऽशेषक्रिया—कलापानुष्ठानपरायणस्य **यतेर्विशुद्धिरालोचना भणिता** तीर्थकरगणधरैः ।।५।।

अत्राह शिष्यः—निरतिचारो यतिः करणीयान् योगान् करोति ततः किमालोचनया विशोध्यम् ? गुरुराह—सूक्ष्मा आश्रवक्रियाः सूक्ष्मप्रमादनिमित्ता अविज्ञातास्तासामालोचनामात्रेण शुद्धिः । स पुनर्गुरुसन्दिष्टोऽसन्दिष्टो वा कार्यस्याऽऽदौ समाप्तौ वा आलोचयति । करणीययोगान्नामग्राहमाह—

**आहाराइग्गहणे तह बहिआ निग्गमेसु णेगेसु ।**
**उच्चारविहारावणि—चेइअजइवंदणाईसु ।।६।।**

व्याख्या—**आहारः** अशनपानखाद्यस्वाद्यरूपः, स आदिर्येषां ते आहारादय आदिशब्दात् शय्यासंस्तारक—पादप्रोञ्छनवस्त्रपात्राद्या औधिकौपग्रहिकोपधयः । तथा च—

**'ओहेण जस्स गहणं भोगो पुण कारणे स ओहोही । जस्स य दुगंपि निअमा कारणओ सो उवग्गहिओ'** ।।

(पंचवस्तुकम् ८३८)

आचार्यग्लानबालदुर्बलशैक्षक्षपकाऽसहिष्णुप्रायोग्यौषधादयश्च गृह्यन्ते । तेषां **ग्रहणमाहारादिग्रहणं तस्मिन्**। तथा **बहिर्निर्गमेषु अनेकेषु** उच्चारविहारावनिचैत्ययतिवन्दनादिषु । **बहिः** बहिस्तात् शय्याया गुरुपार्श्वाद्वा **उच्चारावनौ** सञ्ज्ञाभूमौ **विहारावनौ** स्वाध्यायभूमौ **चैत्यवन्दनार्थं** दूरमासन्नं वा **यतीनामपूर्वबहुश्रुतसंविग्नानां वन्दनार्थं** तत्पार्श्वे संशयोच्छेदनार्थं वा, **आदिशब्दात्** श्रावकसन्तानिकाऽवसन्नविहारिश्रद्धासंवर्द्धनार्थम् साधर्मिकाणां वा संयमोत्साहनार्थम् । अथवा पीठफलकादिप्रत्यर्पणार्थम् । यद्वा—कुलगणसङ्घानां चैत्यद्रव्यस्य चोपद्रवनिवारणार्थं निर्गमाः स्युस्तेषु ।

**'तत्थ कुलं विण्णेअं एगायरिअस्स संतई जाओ । तिण्ह कुलाणमिहो पुण साविक्खाणं गणो होइ'** ।।

सङ्घः प्रतीतः, चैत्यं पञ्चधा—यथा वारत्तकमहर्षेः पुत्रः स्वपितरि भक्तिभरापूरिततया चैत्यगृहं कारयित्वा तत्र रजोहरणमुखवस्त्रिकाप्रतिग्रहधारिणीं पितुः प्रतिमामचीकरत् तदेव तत्साधर्मिकचैत्यम् ।१। मथुरादिस्थानेषु गृहे कृते मङ्गलनिमित्तमुत्तरङ्गेषु प्रथममर्हत्प्रतिमा प्रतिष्ठाप्यते अन्यथा तद्गृहं पतति तन्मङ्गलचैत्यम् ।२। शाश्वतचैत्यं—नन्दीश्वरादिव्यवस्थितम् ।३। भक्तिचैत्यं—भक्त्या क्रियमाणं जिनायतनम्, तद्द्विधा—

---

**A.** प्रतिकूलः ।

साधूनां निश्रया क्रियमाणं निश्राकृतम् ।४। तदनिश्रया विधीयमानमनिश्राकृतम् ।५। तस्य द्रव्यं— हिरण्यस्वर्णादिकं काष्ठोपलेष्टकादिकं वा तस्योपद्रवस्तन्निवारणार्थम्। अयमभिप्रायः— सति सामर्थ्ये चैत्यद्रव्योपद्रवमुपेक्षमाणः साधुरपि अनन्तसंसारितादण्डभाजनं भवति। अतस्तदर्थमपि बहिनिर्गमः करणीययोग एव ।।६।। किमेतावन्त एव करणीययोगा आहोश्विदन्येऽपि सन्ति ? इत्याह—

**जं चन्नं करणिज्जं जइणो हत्थसय बाहिरायरिअं ।**
**अविगडिअंमि असुद्धो आलोअंतो तयं सुद्धो ।।७।।**

व्याख्या— **यच्च** पूर्वगाथोक्तकरणीयव्यापारेभ्योऽन्यद् **यतेः करणीयं** क्षेत्रप्रतिलेखनस्थण्डिलान्वेषणशैक्ष— निष्क्रमणाऽऽचार्यसंलेखनादि **हस्तशताद् बहिराचरितं,** तस्मिन् पूर्वोक्ते च करणीययोगनिवहे **अविकटिते** गुरोरप्रकाशितेऽनालोचिते **अशुद्धः** । समित्याद्यतिचारलेशवान् **आलोचयँस्तं** करणीययोगनिवहं **शुद्धः** । आलोचनाख्यप्रायश्चित्तेन समित्याद्यतिचारलेशनिवर्त्तनात् । हस्तशताऽभ्यन्तराचरितं तु किञ्चित् प्रश्रवणादिक— मालोच्यते किञ्चिच्च खेलसिङ्घानजल्लनिवेशनोत्थानविजृम्भणाऽऽकुञ्चनप्रसारणोच्छ्वासनिःश्वासचेष्टादिकं नालोच्यते । अत्राह शिष्यः—करणीययोगेष्वाहारादिग्रहणार्थेषु यथोक्तविधिना कृतेष्वपि यद्यालोचनाप्रायश्चित्त— योग्यता भवति तर्हि किमपि न कर्त्तव्यम्, व्रतमादाय प्रथममेव सर्वैरपि अनशनं कार्यम् । गुरुराह—तन्न, एवं सति तीर्थोच्छेदः स्यात् कः केन प्रतिबोधयिष्यते ? किञ्च न खलु मालिन्याशङ्कया वस्त्राणि न परिधीयन्ते । अपरिधाने हि विवस्त्रतया सर्वेषां पशुरूपतापत्तिः ततः परिधीयन्त एव । जातमालिन्यानि च जलेन प्रक्षाल्य निर्मलीक्रियन्ते । एवं चारित्रमपि करणीययोगकरणे सञ्जातातिचारलेशमलमालोचनाप्रायश्चित्तजलेन विशोध्य निर्मलीकार्यम् ।।७।।

अतिचारलेशवतोऽपि तच्छुद्धये भवत्वालोचना, परं निरतिचारस्य किम् ? इत्याह—

**कारणविणिग्गयस्स य सगणाओ परगणागयस्स वि अ ।**
**उवसंपया विहारे आलोअण निरइआरस्स ।।८।।**

व्याख्या—**कारणेन** अशिवदुर्भिक्षराजादिप्रत्यनीकत्वग्लानोत्तमार्थिकाऽऽराधनादिना गुवदिशाद् विनिर्गतः **कारणविनिर्गतस्तस्य निरतिचारस्या**ऽप्यविराधितसमितिगुप्तिकस्याऽप्या**लोचना** भवति । सा च द्विधा—ओघतो विभागतश्च । तत्र यः कारणविनिर्गतः पक्षाऽभ्यन्तरे समागच्छति । आगतमात्रश्चेर्यापथिकीं प्रतिक्रम्य समुद्देशवेलाया[A] अवगिवाऽऽलोचयति तस्याऽप्योघालोचनामात्रं भवति । यथा—

**अप्पा मूलगुणेसुं विराहणा अप्पउत्तरगुणेसुं । अप्पा पासत्थाइसु दाणग्गहसंपओगोहा' ।।**

(नि०भा० ६३१६)

---

**A.** भोजनवेलायाः ।

अल्पशब्दोऽभाववाची, तेन **मूलगुणेषु** विराधना **अल्पा** न काचित्, **उत्तरगुणेष्वप्यल्पा** न काचित् । **पार्श्वस्थाऽवसन्नादिषु** दानग्रहाभ्यां **सम्प्रयोगः** सम्पर्कः **सोऽप्यल्पः** सोऽपि नासीदित्यर्थः । इयमोघालोचना । यस्तु पक्षाभ्यन्तरागतोऽपि समुद्देशानन्तरमालोचयति यो वा पक्षात् परतः समागतः समुद्देशादर्वागप्याऽऽलोचयति, तयोर्निरतिचारयोरपि विभागालोचना—विशेषालोचना सुव्यक्तनिश्शेषनिजानुष्ठितनिवेदनरूपा । यस्तु तक्षशिलायां धर्मचक्रस्य, मथुरायां स्तूपस्य, पुरिकायां जीवत्स्वामिप्रतिमायास्तीर्थकृज्जन्मनिष्क्रमणज्ञाननिर्वाणभूमीनामयोध्यादीनां दर्शनार्थं स्वजनगोकुलविवाहादिसङ्खडिकाप्रेक्षार्थं यत्र विशिष्टाहारोपधी लभ्येते तत्र तल्लिप्सया रम्यदेशदिदृक्षादिना वा गुर्वनादेशाद् विनिर्गतोऽकारणविनिर्गतस्तस्य सातिचारत्वेन बृहत्तरप्रायश्चित्तशोध्यत्वान्नालोचनामात्रेण शुद्धिः । तथा **स्वगणात्** साम्भोगिकरूपादेकमण्डलीभोजिनः **परगणाद्** विसंभोगिकाद् अमण्डलीभोजिनः उभयतोऽपि संविग्नाऽसंविग्नरूपादागतस्यापि च निरतिचारस्य **'उवसंपय'**त्ति उपसम्पद्यमानस्य, सा चोपसम्पत् पञ्चधा—श्रुतग्रहणायाऽन्यमाचार्यमुपसम्पद्यमानस्य श्रुतोपसम्पत् ।१। सुखं दुःखं वा मया भवद्भिः सह सोढव्यमिति सुखदुःखोपसम्पत् ।२। अत्र क्षेत्रे तिष्ठतो मम युष्मदीया निश्रेति क्षेत्रोपसम्पत् ।३। मार्गे व्रजतो मम यौष्माकी निश्रेति मार्गोपसम्पत् ।४। विनयं कर्तुं गच्छान्तरमुपसम्पद्यमानस्य विनयोपसम्पत् ।५। भाष्यकृताऽप्युक्तम्—

**'उवसंपय पंचविहा सुअ सुहदुक्खे अ खित्तमग्गे अ । विणओवसंपयावि अ पंचविहा होइ नायव्वा'** ।।

एतासामन्यतरामुपसम्पदं प्रथममाददानस्य विभागालोचना भवति । **'विहार'**त्ति । विहारे कृते निरतिचारस्या—ऽप्यालोचना भवति । अयं भावः—एकाहात् पक्षाद् वर्षाद्वा यदा साम्भोगिकाः स्पर्द्धकपतयो गीतार्थाऽऽचार्या मिलन्ति, तदा निरतिचारा अप्यन्योऽन्यस्य विहारालोचनां स्वस्वविहारक्रमानुष्ठितप्रकाशरूपां ददतीति ।।८।।

व्याख्यातं प्रथममालोचनार्हं प्रायश्चित्तम् । सम्प्रति प्रतिक्रमणार्हमुच्यते—येषु स्थानेषु स्खलितस्य मिथ्यादुष्कृतयोग्यता भवति तान्याह—

**गुत्तीसमिइपमाए गुरुणो आसायणा विणयभंगे ।**
**इच्छाईणमकरणे लहुसमुसादिन्नमुच्छासु ।।९।।**

व्याख्या—**गुप्तिसमितिप्रमादादिस्थानेषु** मिथ्याकारः प्रतिक्रमणमिति तृतीयगाथान्ते सम्बन्धः । गुप्तिसमितीनां प्रमादो—मनसा दुश्चिन्तितादिः, वचसा दुर्भाषितादिः, कायेन दुश्चेष्टितादिः । ईर्यायां कथां कथयन् गच्छेत्, भाषायां ढड्ढरगिरा[A] गृहस्थभाषया भाषेत, एषणायामनुपयुक्तो भिक्षामाददीत, आदाननिक्षेपे प्रमार्जितादि विस्मार्य आदानं निक्षेपं वा कुर्यात्, उत्सर्गसमितौ स्थण्डिलमप्रमृज्य प्रश्रवणादि त्यजेत् । एवंविधगुप्तिसमितिप्रमादे । तथा **गुरोराशातना—आयो—**ज्ञानादिलाभस्तस्य **शातना** खण्डना **आशातना** । यथा—

---

A. महाध्वनिभाषया ।

**डहरो अकुलीणुत्ति अ दुम्मेहो दमगमंदबुद्धित्ति । अवि अप्पलाभलद्धो सीसो परिभवइ आयरिअं' ।।**

(नि०भा० ६२१०, बृ०क० ७७२)

यद्वा—त्रिधाऽऽशातना—मनसा प्रद्वेषादि, वाचा अन्तरभाषादि, कायेन गुरोः समश्रेण्या गच्छति पुरःस्थितो वा गच्छतीत्यादिका, तस्यां गुर्वाशातनायां । **विनयो** गुरोरभ्युत्थानासनदानाञ्जलिप्रग्रहवन्दनादिस्तस्य **भङ्गे** । **इच्छादीनामकरणे** । इच्छाद्याश्चामी—

**इच्छा मिच्छा तहक्कारो आवस्सिआ य निसीहिआ । आपुच्छणा य पडिपुच्छा छंदणा य निमंतणा ।।**

(पंचाशक ५/४६)

**उवसंपया य काले सामायारी भवे दसहा' ।।**

**इच्छया** बलाभियोगमन्तरेण करणं **इच्छाकारः** । यथा—इच्छाकारेण स्वेच्छया धर्मार्थितया मुने ! ममेदं पात्रलेपादि कुरु न बलादिति ।१। मिथ्याकरणं **मिथ्याकारः** । संयमयोगवितथाचरणे वदन्ति जिनवचनतत्त्ववेदिनो मुनयो यथा—मिथ्यादुष्कृतमिति । इदं दुष्कृतं मिथ्या—वितथमनृतमित्यर्थः ।२। तथाकरणं **तथाकारः** गुरोः किमपि कथयतो यथापूज्यैरुक्तं तथैवेदमित्येवंरूपः ।३। अवश्यकार्यैः योगैर्निष्पन्ना **आवश्यकी** वसतेर्निर्गच्छद्भिर्या विधीयते ।४। निषेधेन निर्वृत्ता **नैषेधिकी** वसतौ प्रविशद्भिर्या क्रियते ।५। आपृच्छन**मापृच्छा** सा विहारादिकार्येषु गुरोर्विधया ।६। **प्रतिपृच्छा** प्राग् नियुक्तेनापि कार्यकरणकाले कार्या निषिद्धेन वा पुनः कार्यं कर्तुकामेन ।७। **छन्दना** प्राग् गृहीतेनाऽशनादिना कार्या, यथा—इदं पूज्या गृह्णन्तु ।८। **निमन्त्रणा** अगृहीतेनाऽशनादिना, यथा—इदमद्य पूज्यानां योग्यमशनाद्यानयामीत्येवंरूपा।९। तथा चोक्तम्—

**आपुच्छणा उ कज्जे पुव्वनिसिद्धेण होइ पडिपुच्छा । पुव्वगहिएण छंदणं निमंतणा अगहिएणं' ।।**

(ओ०नि० ६९७)

उवसंपच्च ज्ञानदर्शनचारित्रार्थं विधेया ।१०। एतासामकरणे । तथा **लहुस'**त्ति । सकार आर्षत्वादल्पवाचक—कप्रत्ययार्थः । ततो लघुकमृषाऽदत्तमूर्च्छासु । तत्र लघुकमृषास्वरूपसूचकदृष्टान्तगाथे इमे—

**पयला[१] उल्ले[२] मरुए[३] पच्चक्खाणे[४] अ गमण[५] परिआए[६] । समुद्देस[७] संखडीओ[८] खुड्डुग[९] परिहारिअ[१०] मुहीओ[११] ।।**

**अवसगमणे[१२] दिसासुं[१३] एगकुले[१४] चेव एगदव्वे[१५] अ । एए सव्वेवि पया लहुसमुसाभासणे हुंति' ।।**

(बृ०क० ६०६६-६०६७, नि०भा० २९८-२९९ तथा ८८२-८८३)

**पयला** निद्राविशेषः, **उल्लं** वर्षणं, **मरुया** विप्राः, शेषं स्पष्टम् । एतद्गाथाद्वयोक्तदृष्टान्ताश्च श्लोकैरुच्यन्ते । तथाहि—

कोऽपि साधुर्दिवा धूर्णन्निद्रयाऽन्येन साधुना । उक्तो निद्रासि किं भद्र ! न निद्रामीति सोऽवदत् ।।१।।

प्रापैवं निह्नवात् शुक्लमासार्हं स लघुं मृषाम् । यत्र यत्रेदृगापत्तिस्तत्र तत्र लघुर्मृषा ।।२।।१,
साधुः कार्येण केनापि प्रस्थितः कोऽपि वर्षति । भणितः साधुनान्येन किं व्रजस्यार्य ! वर्षति ।।३।।
बभाषे प्रस्थितः साधुर्नाऽहं गच्छामि वर्षति । इत्युक्त्वाऽपि परं वर्षत्येव प्रस्थितवाँस्ततः ।।४।।
साधुनोचे मृषा वक्षि सोऽवोचद् वच्मि नाऽनृतम् । वृष्टिराद्रर्याय सा नेयं नन्वेते वर्षविप्रुषः ।।५।।२,
साधुः कार्याद्गतः कोऽप्याऽऽश्रयमागत्य जल्पति । निर्यात भुञ्जते विप्रास्तत्राऽस्माभिरपीयते ।।६।।
प्रस्थिताः साधवोऽटित्वाऽऽयाताः पृच्छन्ति तं क्व ते ? । भिक्षाटनेऽपि नो दृष्टाः स ऊचे स्वस्ववेश्मसु ।।७।।३,
कोऽप्यूचे मण्डलीकाले एहि भुङ्क्ष्वेति केनचित् । सोऽब्रवीद् यूयमश्नीत प्रत्याख्यातमहो ! मया ।।८।।
इत्युदीर्याऽपि मण्डल्यामश्नाति स्म तदैव सः । किमेतदिति पृष्टोऽथ व्याचक्रे वक्रगीरिदम् ।।९।।
ननु प्राणातिपाताद्या सर्वाप्यविरतिर्मया । प्रत्याख्यातैव सावद्या वितथं किमिहास्ति तत् ? ।।१०।।४,
याता चैत्यादिकार्येण त्वं न यासीति केनचित् । कोऽप्युक्तो मुनिरूचे तं व्रज त्वं न व्रजाम्यहम् ।।११।।
ततस्तस्मिन् गते सोऽपि सद्य एव तमन्वगात् । पृष्टस्तेनाथ नेत्युक्त्वा किं गच्छस्यथ सोऽभणत् ।।१२।।
न त्वं जानासि सिद्धान्तं गम्यमानं गतं खलु । प्रश्नकाले स्थितोऽभूवमधुनाऽहं गतिक्रियः ।।१३।।५,
पृष्टो निनंसुना कोऽपि पर्यायं यतिरूचिवान् । ममाऽस्य च दशाब्दानि निनंसुस्तं ततोऽगदत् ।।१४।।
अहं नवाऽब्दपर्यायस्तत् त्वां वन्दे निषीद भोः ! । अथाऽऽचख्यौ स वन्द्यस्त्वं नाहं वन्द्योऽस्मि ते मुने ! ।।१५।।
तेनोक्तं हेतुना केन सोऽभाणीद् भद्र ! शाठ्यतः । पञ्चाऽस्य पञ्च मेऽब्दानि मेलयित्वा दशाऽवदम् ।।१६।।६,
कार्याद् बहिर्गतः कोऽपि विलोक्य ग्रहणं रवेः । अधीयतो यतीनूचेऽद्भुतं भो ! भोजनक्षणः ।।१७।।
उत्थिताः साधवः प्रात्तपात्राः पृच्छन्ति कुत्र सः । गगनेऽदर्शयत्तेषां राहुणा ग्रसनं रवेः ।।१८।।७,
भणति स्माऽऽगतः कोऽपि विधाय प्रथमालिकाम् । अद्य सङ्खडिका बह्व्यो भिक्षाकालेऽथ साधवः ।।१९।।
पप्रच्छुः क्व क्व गेहे ता ? बभाषे च च्छलेन सः । एकेन्द्रियादयो जीवाः सङ्खण्ड्यन्ते गृहे गृहे ।।२०।।८,
कोऽप्यूचे क्षुल्लकं दृष्ट्वाऽऽश्रयासन्नां मृतां शुनीम् । यथा क्षुल्लक ! माता ते मृताऽतो रोदिति स्म सः ।।२१।।
मा रोदीरस्ति जीवन्ती रुदन्तं च तमाह सः । अथ तं क्षुल्लकोऽन्ये च स्माहुर्ब्रूषे कथं द्विधा ? ।।२२।।
स उवाचाऽस्य शुन्येषा कदाऽप्यम्बाऽभवद् यतः । जीवाः सर्वे भवेऽनादौ बभूवुः सर्वनात्रकैः ।।२३।।९,
उद्याने कोऽपि पार्श्वस्थान् दृष्ट्वाऽऽगत्याऽवदन् मया । भोः ! पारिहारिका दृष्टास्तच्छ्रुत्वाऽमोदि साधुभिः ।।२४।।
कीदृशास्ते महात्मानः परिहारतपस्विनः । गतास्तत्राथ तान् द्रष्टुं तावत् पश्यन्ति लैङ्गिकान् ।।२५।।
पृच्छन्ति स्म ततस्तं ते स ददात्युत्तरं शठः । अभक्ष्यादिपरीहाराः किं नैते पारिहारिकाः ? ।।२६।।१०,

कोऽप्याख्यच्चित्रमत्र स्त्री–तुरङ्गमुखीक्ष्यते । साधुभिर्दर्शयेत्युक्तः शठो दर्शयतेऽर्वतीम्[A] ।।२७।।११,
पृष्टः केनापि कोऽप्याऽऽर्य ! भिक्षाचर्यां गमिष्यसि ? । यास्याम्यवश्यं तेनोक्ते स तं यानाह्वदेहि भोः ! ।।२८।।
स प्रत्यूचे न गच्छामि यावद्वेला न जायते । वेलायां तु गमिष्याम्यवश्यं दिवि शिवेऽथवा ।।२९।।१२,
साधुरेकः परेणोक्तः क्व त्वं भिक्षामटिष्यसि ?। पूर्वस्यामिति तेनोक्तः पृच्छकः पश्चिमां गतः ।।३०।।
सोऽपि तत्राऽऽगतः पृष्टः किं न वागऽनुगा क्रिया ? सोऽवादीत् किं न पूर्वैषाऽपरग्रामव्यपेक्षया ? ।।३१।।१३,
भिक्षाचर्याप्रवृत्तेनाऽऽहूतः केनाऽपि कोऽप्यृषिः । जगाद त्वं व्रजैकस्मिन्नेव गच्छाम्यहं कुले ।।३२।।
सोऽप्यथाऽनेकगेहेषु पृष्टोऽटँस्तेन गीतवान् । समकालमनेकेषु किं गच्छन्नस्मि वेश्मसु ? ।।३३।।१४,
यामो भिक्षार्थमागच्छेत्युक्तोऽन्योऽन्येन साधुना । वक्ति स्म त्वं व्रज द्रव्यमेकमेवाहमाददे ।।३४।।
ततो बहूनि द्रव्याणि गृह्णन् पृष्टोऽवदत् स तान् । तत् पुद्गलाऽस्तिकायाख्यमेकमेवाखिलैः परैः ।।३५।।१५,
(नि०भा० ३०० तः ३१६, बृ०क० ६०६८ तः ६०८७)

एते पञ्चदश लघुकमृषादृष्टान्ताः । **लघुकाऽदत्तं** पुनरननुज्ञापिततृणलेष्टुक्षारमल्लकलेपाऽल्पकालिकवृक्षादिछाया–विश्रामणादिविषयम् । **लघुकमूर्च्छा** सूक्ष्ममममत्वरूपा । सा च द्रव्य–क्षेत्र–काल–भावभेदाच्चतुर्द्धा । तत्र द्रव्यतः शय्यातरगृहादौ काकश्वानगवाद्युपद्रवं लघुकल्पस्थ[B]कादिकं च रक्षति । क्षेत्रतः प्रतिक्रमणसंस्तारकादि–स्थानकुलवसतिग्रामनगरराज्यादिषु । कालतो मासकल्पोपरि निवासादौ । भावतोऽल्परागाद्यध्यवसायात्मिका। इह च यत्र यत्र पञ्चकादिलघुमासान्ताऽऽपत्तिस्तत् सर्वं लघुमृषादत्तमूर्च्छारूपं प्रतिक्रमणार्हस्थानमध्ये गृह्यते ।।९।। तथा—

**अविहीइ कासजिंभिअ–खुअवायासंकिलिट्ठकम्मेसु ।**
**कंदप्प–हास–विगहा–कसाय–विसयाणुसंगेसु ।।१०।।**

व्याख्या— **कासजृम्भितक्षुतवाताऽसङ्क्लिष्टकर्मसु** । इतरेतरद्वन्द्वः । कासजृम्भितक्षुतानि प्रतीतानि । वातो द्विधा–ऊर्ध्ववात उद्गाररूपः, अधोवातस्तु अपानजः । तत्र कासजृम्भितक्षुतोद्गारा मुखे मुखवस्त्रिकां हस्तं वा दत्त्वा विधेयाः । अधोवातनिर्गमे च करेणैकपुतावकर्षणं कार्यं येन महान् कुत्सितशब्दो न भवति । अन्यथा **त्वविधिः । असङ्क्लिष्टकर्म** पुनः सङ्क्लेशः कर्मबन्धस्तस्य यन्न कारणं तदसङ्क्लिष्टकर्म छेदनभेदन–घर्षणपीडनाभिघातसिञ्चनकायक्षाराद्यनेकविधम् । **छेदनं** कुष्टादिशरीरविक्रियायां दुष्टाङ्गस्य । **भेदनं** दुष्टव्रणस्य, **घर्षणं** दन्तादेः, **पीडनं** पीडयित्वा शिरामोक्षणादिना रुधिरस्य निष्कासनम्, **अभिघातसेचनं अभिघातो** लगुडादिप्रहारस्तस्योष्णजलादिना **सेचनम्, कायक्षारः** प्रसूत्यादौ काये क्षाराभियोजनम् । **एव्वविधिना कृतेषु** । **कन्दर्पो** वाचिको नर्माऽऽलापादिरूपः, कायिको धावनादि, **हासविकथाकषायविषयाः** प्रतीताः । **तेषामनुषङ्ग** आसेवनं तेषु । तथा—

---

**A.** 'घोडी' इति भाषायाम् ।     **B.** लघुबालकादिकम् ।

**खलिअस्स य सव्वत्थ वि हिंसमणावज्जओ जयंतस्स ।**
**सहसाणाभोगेण व मिच्छाकारो पडिक्कमणं ।।११।।**

व्याख्या—एकं पूर्वगाथाद्वयोक्तातिचारस्थानेषु अन्यत् 'सहस' त्ति सहसाकारोऽविमृश्यकरणम्, तथा— 'पुव्वं अपासिऊणं छूढे पाए कुलिंगि[A] जं पासे । न य तरइ निअत्तेउं जोगं सहसाकरणमेअं' ।। (नि०भा० ९७, व्य०सू० ४०३६)

अनाभोगोऽत्यन्तं विस्मृतिः । ताभ्यां सहसाकारानाभोगाभ्यां स्खलितस्य च अतिचारयोग्यतां प्राप्तस्य च सर्वत्रापि दर्शनज्ञानचारित्रतपःप्रभृतिचतुर्विंशतिपदेष्वपि[B] यतमानस्य हिंसामनापद्यमानस्य अविराधितजीवस्य मिथ्याकारो मिथ्यादुष्कृतदानं प्रतिक्रमणं प्रतिक्रमणार्हप्रायश्चित्तं शुद्धिकृद् भवति ।।११।। तथा—

**आभोगेण वि तणुएसु नेहभयसोगबाउसाईसु ।**
**कंदप्पहासविगहाइएसु नेअं पडिक्कमणं ।।१२।।**

व्याख्या—आभोगेनापि परिस्फुटबुद्ध्यापि अविस्मृत्यापीत्यर्थः । तनुकेषु स्तोकेषु स्नेहभयशोकबाकुश्यादिषु । तत्र स्नेहो मातापितृस्वजनेषु भाक्तिकश्रावकजनेषु वा, भयं सप्तविधम् इहपरलोकाऽऽदानाऽकस्मादाऽऽजीव— मरणाऽश्लोकरूपम्, शोकः सचित्ताचित्तमिश्रद्रव्याणामिष्टानां वियोगेनाऽनिष्टानां संयोगेन, बाकुश्यं बकुशत्वं कश्मलचारित्रत्वम्, ग्लानत्वादिकारणं विनाऽपि हस्तपादादिक्षालनशीलत्वेन, आदिशब्दात् पार्श्वस्थाऽवसन्न— संसक्तकुशीलत्वानि गृह्यन्ते । कन्दर्पहासविकथादिकेषु । कन्दर्पः प्राग् व्याख्यातः, हासादयः प्रतीताः, आदिशब्देन कषायविषयानुषङ्गा गृहीताः । ततः सर्वेष्वप्येतेषु तनुकेषु कृतेषु ज्ञेयं ज्ञातव्यं प्रतिक्रमणं प्रतिक्रमणार्हाऽऽख्यं प्रायश्चित्तम् । अत्राह शिष्यः—ननु कन्दर्पहासविकथाकषायविषयानुषङ्गाः प्राग्गाथायामपि प्रतिक्रमणार्हप्रायश्चित्तयोग्यत्वेनोक्ताः किं पुनरिहोच्यन्ते ? । गुरुराह—सहसाकाराऽनाभोगाभ्यां पूर्वगाथा— त्रयातीचारस्थानानि ज्ञेयानि एकवाक्यत्वात् । इह त्वाऽऽभोगेनाऽपि कन्दर्पाद्यास्तनुकाः कृताः प्रतिक्रमणार्ह— प्रायश्चित्तशोध्या भवन्तीति न पौनरुक्त्यमिति ।।१२।।

उक्तं प्रतिक्रमणार्हम् । इदानीमुभयार्हमुच्यते—

**संभमभयाउरावइ सहसाणाभोगाणप्पवसओ वा ।**
**सव्ववयाईआरे तदुभयमासंकिए चेव ।।१३।।**

व्याख्या—सम्भ्रमः संक्षोभः करिसरित्पूरशार्दूलदवानलादेः । भयं चौरबन्दिकम्लेच्छादेः । 'आउर' त्ति भावप्रधानत्वान्निर्देशस्य आतुरत्वं पीडितत्वं क्षुत्पिपासाद्यैः । आपच्चतुर्धा द्रव्यक्षेत्रकालभावैः । तत्र द्रव्यापत् कल्पनीयाऽशनादिद्रव्यदुर्लभता १। क्षेत्रापत् प्रत्यासन्नग्रामनगरादिरहितमल्पं च क्षेत्रम् २। कालापद् दुष्कालादि

---

A. विकलेन्द्रियम् ।    B. कल्पिकप्रतिसेवनायाः २४ स्थानेषु ।

३। भावापत् ग्लानत्वादि ४। ततः सम्भ्रमभयातुरापद्भिः कारणैः, **सहसाकारानाभोगौ** प्राग् व्याख्यातौ, ताभ्यां च। **अनात्मवशकः** परवशः, वाशब्दाद् भूताद्याविष्टश्च तस्य **सर्वव्रतातिचारे** सति, ते चैवमतीचाराः— हस्तिसम्भ्रमाद्यैः पलायमानः पृथिवीजलानलानिलहरितद्वित्रिचतुष्पञ्चेन्द्रियाँश्चरणघातादिना ताडयन् पादपाद्या— रोहणेन प्राणातिपातविरतिं विराधयेत्, मृषाविरतिं कूटसाक्ष्यादिना, अदत्तविरतिं अप्रभोः स्तैन्येनाऽशनादि ददतो ग्रहणेन, मैथुनविरतिमतिक्रमादिना, परिग्रहविरतिं मूर्च्छादिना, रात्रिभोजनविरतिं दिवागृहीतादिभङ्गकैः। अध्वकल्पो दूरतममार्गे व्रजतां घृतमिश्रकणिक्काद्याऽऽदानरूपः तं विदध्यात्, लेपकृतं क्षीरान्नादि तदुत्सर्गतो न ग्राह्यम् क्वचित्तद् भुञ्जीतेत्याद्या मूलगुणविषयाः । एवमुत्तरगुणेष्वपि ज्ञेयाः । इत्थमतिचारजाते सञ्जाते सति, तथा **आशङ्किते चैव** यदतीचारस्थानं कृतमकृतं वेति निश्चेतुं न शक्नोति तस्मिँश्च दर्शनज्ञानचारित्रतपः— प्रभृतिसर्वपदविषये **तदुभयं** तदुभयार्हं प्रायश्चित्तम्। एकं गुरोरालोचना, द्वितीयं गुरुसन्दिष्टेन मिथ्यादुष्कृतदानं प्रतिक्रमणार्हाख्यमित्येतदुभयं शुद्धिकरम् ।।१३।। किञ्च—

**दुच्चिंतिअ दुब्भासिअ दुच्चिट्ठिअ एवमाइअं बहुसो ।**
**उवउत्तो वि न याणइ जं देवसिआइ अइआरं ।।१४।।**

व्याख्या—**दुश्चिन्तितं** च कोङ्कणार्यकवद् दवदानचिन्तना, **दुर्भाषितं** वा असद्भूतोद्भावनम्, दुश्चेष्टितं च धावनादि, **दुश्चिन्तित—दुर्भाषित—दुश्चेष्टितम्** । **एवमादिकम्** अन्यदप्येवंप्रकारं दुष्प्रतिलेखित-दुष्प्रमार्जितादि, **बहुशो**ऽनेकशः **उपयुक्तो**ऽपि उपयोगवानपि यद् **दैवसिकातिचारादि**, आदिशब्दाद् रात्रिकपाक्षिकचातुर्मासिक— सांवत्सरिकादि च पूर्वकालकृतमालोचनाकाले **न स्मरति**, तस्याप्यतिचारजातस्य शोधकम् अस्यां गाथाया— मनुक्तमपि प्रस्तावात्तदुभयार्हमेव ज्ञेयम् ।।१४।। किं बहुना—

**सव्वेसु वि बीअपए दंसणनाणचरणावराहेसु ।**
**आउत्तस्स तदुभयं सहसाकाराइणा चेव ।।१५।।**

व्याख्या—प्रथमं पदमुत्सर्गस्तदपेक्षया **द्वितीयं पदम**पवादस्तस्मिन्नुपस्थिते सति **आयुक्तस्य** कारणेन यतनया गीतार्थस्यापराधपदान्यासेवमानस्य, **सहसाकारादिना चैव** । आदिशब्दादनाभोगग्रहणे सहसाकाराऽनाभोगाभ्यां च, **सर्वेष्वपि दर्शनज्ञानचरणापराधेषु** तदुभयं प्रायश्चित्तम् । अत्राह शिष्यः— **खलिअस्स य सव्वत्थ वी'** **(अस्मिन् ग्रन्थे मूलगाथा ११)** त्यत्र दर्शनज्ञानचरणादिपदेषु सर्वेषु स्खलितस्य प्रतिक्रमणार्हमभिधाय तेष्वेवेह कथं तदुभयार्हमभिधीयते ? । गुरुराह—तत्र हिंसामनापद्यमानस्येत्युक्तम् । इह तु हिंसाद्यापन्नस्याऽप्याऽऽयुक्तस्य तदुभयार्हेण शुद्धिरिति न विरोधः ।।१५।। अधुना विवेकार्हं भण्यते—

**पिंडोवहिसिज्जाई गहिअं कडजोगिणोवउत्तेण ।**
**पच्छा नायमसुद्धं सुद्धो विहिणा विगिंचिंतो ।।१६।।**

व्याख्या—**पिण्डः** सङ्घातोऽशनपानखाद्यस्वाद्यभेदभिन्नः । **उपधिरौघिक** औपग्रहिकश्च प्रागुक्तरूपः । **शय्या** उपाश्रय, आदिशब्दादौषधतृणलेष्टुक्षारमल्लकादिग्रहः । ततः पिण्डोपधिशय्यादिकं **कृतयोगिना** गीतार्थेन सूत्रतोऽर्थतोऽपि चाऽधिगताशेषतत्समयवर्त्तमानश्रुतेन । **उपयुक्तेन** दत्तोपयोगेन गृहीतं **पश्चाद्** ग्रहणानन्तरम् उद्गमोत्पादनैषणाद्यन्यतरदोषदुष्टत्वेनाऽशुद्धमिति **ज्ञातं** निर्णीतम् । **विधिना** अनापाताऽसंलोकादौ स्थण्डिले **विगिञ्चन्** परित्यजन् **शुद्धो** निर्दोषो भवति ।।१६।। तथा—

**कालद्धाणाइच्छिअ—मणुग्गयत्थमिअगहिअमसठेण ।**
**कारणगहिउव्वरिअं भत्ताइ विगिंचयं सुद्धो ।।१७।।**

व्याख्या—**कालाध्वाऽतिक्रान्तं** प्रहरद्वयादूर्ध्वं ध्रियमाणं **कालातिक्रान्तम्**, अर्द्धयोजनातिरेकादानीतं **चाध्वातिक्रान्तम्**। तच्च साधूनामपरिभोग्यम् । आह—साधूनामुपयुक्तत्वात् कथं कालाध्वातिक्रान्तसम्भवः ? सत्यं, सम्भवत्येव ग्लानादिहेतोः त्यक्तुं वा स्थण्डिलं न स्यात्, सागारिका वा तत्र स्युः, चौरादिभयं वा तत्र स्यादिति । अथ **अनुद्गताऽस्तमितगृहीतमशठत्वेन** मेघमहिकारजोराहुभिरावृते भास्वति प्रातरुद्गतबुद्ध्या सन्ध्यायां चानस्तमित—बुद्ध्या गृहीतम्, पश्चाच्चाऽकाले गृहीतमिति ज्ञातम् । तथा **कारणगृहीतोद्वृतं**[A] बालग्लानाऽऽचार्यप्राघुर्णकदुर्लभ—द्रव्यसहसालाभादिना कारणेन गृहीतस्य विधिना च भुक्तस्योद्वृतं[A] **भक्तादि** अशनपानखाद्यस्वाद्यरूपम्, **अशठः** श्रुतोक्तः स्थण्डिले **विगिञ्चन्** त्यजन् **शुद्धः** । कोऽर्थः ? कालातिक्रान्तादीनां सर्वेषां विवेकार्ह—प्रायश्चित्तेनैव शुद्धिर्भवति ।।१७।। उक्तं विवेकार्हम् । व्युत्सर्गार्हमुच्यते—

**गमणागमणविहारे सुअंमि सावज्जसुमिणयाईसु ।**
**नावानइसंतारे पायच्छित्तं विउस्सग्गो ।।१८।।**

व्याख्या—**गमनागमनविहारे** हस्तशताद् बहिर्गमनागमनादौ, विहारे स्वाध्यायार्थं कन्दरोद्यानादौ गमने, **श्रुते** श्रुतविषये उद्देशानुज्ञाप्रस्थापनप्रतिक्रमणश्रुतस्कन्धाङ्गपरिगुणनादिष्वविधिना विधाने, **सावद्यस्वप्नादिषु** प्राणातिपाताद्यं येषु स्वप्नेषु कृतं स्यात्तेषु, आदिशब्दाद्दुर्निमित्तसूचकेषु स्वप्नेषु, **नौनदीसन्तारे** । तत्र नौश्चतुर्धा—आद्या समुद्रगामिनी समुद्रे १, अन्यास्तिस्रो नद्यां प्रतिश्रोतोगामिनी, अनुश्रोतोगामिनी, तिर्यग्गामिनी च, अन्त्या या नदीं छिन्दती याति । नदीसन्तारो—नद्युत्तारणम्, स चतुर्धा—तत्र जङ्घार्द्धदध्नोदकः सङ्घट्टः १, नाभिद्वयसोदको[B] लेपः २, तदूर्ध्वं जलो लेपोपरिः ३, बाहुभ्यामुडुपाद्यैर्वा चतुर्थः । सर्वेष्वेतेषु प्रायश्चित्तं कायोत्सर्गः । तथा—

---

**A.** शेषम् । **B.** द्वयस = **सुधी पहोचतुं**' इति भाषायाम् ।

**भत्ते पाणे सयणासणे य अरहंतसमणसिज्जासु ।**
**उच्चारे पासवणे पणवीसं हुंति ऊसासा ।।१९।।**

व्याख्या—**भक्ते** भक्तविषये, **पाने** पानविषये, **शयनासनयोः** शयनीयविष्टरयोर्वा प्रार्थनाय । अर्हतां श्रमणानां च शय्या **अर्हच्छ्रमणशय्यास्तासु** चैत्यालयोपाश्रयरूपासु एतेषु हस्तशतात्परतो गमनागमनयोः, **उच्चारे प्रश्रवणे** हस्तशतमध्येऽपि त्यक्ते सति हस्तमात्रेऽपि रेल्लके जाते कायोत्सर्गे क्रियमाणे **पञ्चविंशतिरुच्छ्वासा भवन्ति** । इतः पाश्चात्यायां **'गमणागमणे'** त्यादिगाथायां सामान्येन कायोत्सर्गः प्रायश्चित्तमुक्तम् ।।१९।।

ततश्च किंविषयः कायोत्सर्गः कियदुच्छ्वासपरिमाणः कार्य इति प्ररूपणार्थं गाथात्रयमाह—

**हत्थसयबाहिराओ गमणागमणाइएसु पणवीसं ।**
**पाणिवहाई सुमिणे सयमट्ठसयं चउत्थम्मि ।।२०।।**
**देसिअराइअपक्खिअ—चाउम्मासवरिसेसु परिमाणं ।**
**सयमद्धं तिन्नि सया पंचसयट्ठुत्तरसहस्सं ।।२१।।**
**उद्देससमुद्देसे सत्तावीसं तहा अणुन्नाए ।**
**अट्ठेव य ऊसासा पट्ठवणपडिक्कमणमाई ।।२२।।**

व्याख्या—पूर्वार्द्धं कण्ठ्यम् । नवरमादिशब्दाच्चतुर्विधनौ—नदीसन्तारे च **पञ्चविंशत्युच्छ्वासमानः** कार्यः । **प्राणिवधादि स्वप्ने** करणकारणानुमतिभिः स्वप्नमध्ये प्राणिवधादौ कृते सति **'शत'** मिति शतोच्छ्वासमानम्, **'अष्टशतं चतुर्थ'** इति चतुर्थे मैथुनस्वप्नेऽ**ष्टशतम्** अष्टोत्तरशतोच्छ्वासमानं कायोत्सर्गं कुर्यादित्यर्थः । तथा इह यथासङ्ख्यमुच्छ्वासपरिमाणं ज्ञेयम् । **दैवसिक**प्रतिक्रमणे पश्चिमकायोत्सर्गत्रिकस्याऽऽद्ये द्वौ चतुर्विंशतिस्तवौ चिन्त्येते । शेषद्वयोस्त्वेकैकः । स च पञ्चविंशतिपदात्मकः पञ्चविंशत्युच्छ्वासः समाप्यते। ततश्चतुर्विंशतिस्तवचतुष्टयेनोच्छ्वास**शतं** भवति । **रात्रिक**प्रतिक्रमणे त्वाद्यकायोत्सर्गद्वयेऽप्येकैक चतुर्विंशतिस्तवचिन्तनात् **'अद्धं'** ति शतार्द्धं पञ्चाशदुच्छ्वासा भवन्तीत्यर्थः । पाक्षिककायोत्सर्गे ते द्वादश चिन्त्यन्ते, ततो द्वादशगुणिताः पञ्चविंशतिस्**त्रीणि शतानि** भवन्ति । **चातुर्मासककायोत्सर्गे** ते विंशतिश्चिन्त्यन्ते, ततो विंशतिगुणाः पञ्चविंशतिः **पञ्चशतानि** जायन्ते । वार्षिकप्रतिक्रमणकायोत्सर्गे च चत्वारिंशच्चतु—र्विंशतिस्तवाश्चिन्त्यन्ते, ततश्चत्वारिंशद्गुणाः पञ्चविंशतिः सहस्रमुच्छ्वासानां भवति । तस्योपरि च बहुः कालो निर्विघ्नो गत इति मङ्गलार्थमष्टोच्छ्वासमानः पञ्चपरमेष्ठिनमस्कारश्चिन्त्यते, ततो**ऽष्टोत्तरसहस्रं** भवति। **उद्देशः** सूत्रवाचनादानम् । **समुद्देशो**ऽर्थदानम् । **अनुज्ञा** परं प्रति सूत्रार्थदानानुमतिः । **तथे**त्यनुक्तसमुच्चये। तेन श्रुतस्कन्धाङ्गपरावर्त्तनोत्तरकालं च **सप्तविंशत्युच्छवासः** कायोत्सर्गः । तत्र सप्तविंशतिपदात्मकस्य चतुर्विंशतिस्तवस्य चिन्तनीयत्वात् । तथा **प्रस्थापनप्रतिक्रमणादिषु** । **प्रस्थापनं** स्वाध्यायस्य, **प्रतिक्रमणं** कालस्य, तयोः करणे, **आदिशब्दा**दनुयोगप्रारम्भविसर्जनयोः दुर्निमित्तस्वप्नशकुनादिप्रतिघातार्थं च कायोत्सर्गे**ऽष्टै—वोच्छ्वासाः** । नमस्कारचिन्तनेनाऽष्टोच्छ्वासः कायोत्सर्गः कार्य इत्यर्थः ।।२०-२१-२२।।

गतं व्युत्सर्गार्हम् । तपोऽर्हमभिधीयते—

**उद्देसज्झयणसुअखंधंगेसु कमसो पमाइस्स ।**
**कालाइक्कमणाइसु नाणायाराइआरेसु ।।२३।।**
**भिन्न—लहु—गुरु—लहुगा णगाढि पयवुड्ढिगाढि अत्थे अ ।**
**अपत्तापत्तावत्त—वायणुद्देसणाइसु अ ।।२४।।**

व्याख्या—इह तपोऽर्हप्रायश्चित्ते ज्ञानदर्शनचारित्रतपोवीर्याचारपञ्चकसत्कमतीचारचक्रमालोच्यम् । तत्राऽऽद्यो ज्ञानाचारस्यातिचारो ज्ञानाचारातिचारः सोऽष्टविधः, तद्यथा—अकाले अस्वाध्यायिके वा स्वाध्यायकरणं **कालातिचारः** ।१। श्रुतमधिजिगांसोर्जातिमदावलेपेन गुरुषु **विनयो** वन्दनादिरुपचारस्तस्याऽप्रयोजनं हीलनं वा **विनयातिचारः** ।२। श्रुते गुरौ वा **बहुमानो** हार्दः प्रतिबन्धविशेषस्तस्याकरणं **बहुमानातिचारः** ।३। **उपधानं** आचामाम्लादितपसा योगविधानं तस्याकरण**मुपधानातिचारः** ।४। यत्पार्श्वे श्रुतमधीतं तं निह्नुते अपलपति, अन्यं वा युगप्रधानमात्मनोऽध्यापकं निर्दिशति, स्वयं वाऽधीतमित्याचष्टे, एष **निह्नवाभिधानो—ऽतिचारः** ।५। व्यज्यतेऽर्थोऽनेनेति व्यञ्जनमागमः सूत्रं तन्मात्राक्षरबिन्दुभिरूनमतिरिक्तं वा करोति, संस्कृतं वा विधत्ते, पर्यायैर्वाऽभिदधाति, यथा- **'धम्मो मंगलमुक्किट्ठ'** मित्यादिस्थाने **'पुण्णं कल्लाणमुक्कोसं दया संवरनिज्जरे'**ति **व्यञ्जनातिचारः** ।६। आगमपदार्थस्याऽन्यथा परिकल्पन**मर्थातिचारः**, यथा—आचारसूत्रे अवन्त्यध्ययनमध्ये **'आवंती केयावंती लोगंसि विप्परामुसंती'**ति । यावन्तः केचन लोकेऽस्मिन् पाखण्डिलोके विपरामृशन्तीति प्रस्तुतेऽर्थेऽन्योऽर्थः परिकल्प्यते—**'आवंति—जनपदे केया—घटीमाला वांता—पतिता तां लोकः परामृशति कूपे'** ।७। यत्र च सूत्रार्थौ द्वावपि विनाश्येते स **तदुभयातिचारो**, यथा—**'धम्म मंगलमुक्कट्ठा अहिंसा गिरिमत्थए । देवावि तस्स नस्संति जस्स धम्मे सया मसी'** ।८। अयं च महीयान् अतिचारो, यतः सूत्रार्थोभयनाशे चारित्रनाशः, तन्नाशे मोक्षाभावः, तदभावे दीक्षावैयर्थ्यमिति । एष चाष्टविधोऽपि ज्ञानाचारातिचारो द्विधा—ओघतो विभागतश्च । तत्र विभागत उद्देशकाऽध्ययनश्रुतस्कन्धाङ्गेषु विषये **प्रमादिनः** प्रमादपरस्य **कालातिक्रमणादिष्वष्टसु ज्ञानाचारातिचारेषु क्रमशः** क्रमेण **तपो भिन्नं लघुगुरुलघुका अनागाढे** दशवैकालिकादिश्रुते उद्देशकातिचारेऽकालपाठादिके **भिन्नमासः** अध्ययनातिचारे **मासलघु**, श्रुतस्कन्धातिचारे **मासगुरु**, अङ्गातिचारे **चत्वारो लघव** इत्यर्थः । **आगाढे** तूत्तराध्ययन—भगवत्यादिके एतेष्वेवातिचारस्थानेषु **पदवृद्धिः** कार्या, लघुमासादि चतुर्गुरुकान्तमित्यर्थः । **अर्थे च** अर्थश्रवणेऽप्युद्देशकालातिक्रमणादिष्वतीचारेषु लघुमासादि चतुर्गुरुकान्तमेव तपो भवति, **अप्राप्ताऽपात्राऽव्यक्तवाचनोद्देशनादिषु च** । यत्र व्रतपर्याये यत् श्रुतमधीयते तदाश्रित्य तं व्रतपर्यायमनासादयन्नप्राप्तः । श्रुताध्ययनपर्यायश्चायम्—

**तिवरिसपरिआयस्स उ आयारपकप्पनाम अज्झयणं । चउवरिसस्स उ सम्मं सूअगडं नाम अंगंति' ।।**

(पंचवस्तुकम् ५८२)

**दस–कप्प–ववहारा संवच्छरपणगदिक्खिअस्सेव । ठाणं समवाओ वि अ अंगेए अट्ठवासस्स ।।**
**दसवासस्स य विवाहो इक्कारसवासयस्स इमे उ । खुड्डिअविमाणमाई अज्झयणा पंच नायव्वा ।।**
**बारसवासस्स तहा अरुणववायाइ पंच अज्झयणा । तेरसवासस्स तहा उट्ठाणसुआइया चउरो ।।**
**चोद्दस्सवासस्स तहा, आसी विसभावणं जिना बिंति । पन्नरसवासगस्स य दिट्ठिविसभावणं तह य ।।**
**सोलसवासाईसु अ, एगुत्तरवड्ढिएसु जहसंखं । चारणभावण महसुविणभावणा तेअगनिसग्गा ।।**
**एगूणवीसगस्स उ दिट्ठिवाओ दुवालसममंगं । संपुन्नवीसवरिसो अणुवाई सव्वसुत्तस्स ।।**
**जं केवलिणा भणिअं केवलनाणेण तत्तओ नाउं । तस्सन्नहा विहाणे आणाभंगो महापावो ।।**

(व्यवहारसूत्रम् – उद्देशकः १० सूत्राणि २९ तः ३५, पंचवस्तुकम् ५८३ तः ५८८, ५९०)

**अपात्रमयोग्यः** तिंतिणिकचलचित्तगाणंगणिकादिः । **अव्यक्तो** वयसा लघुः श्रुते चाऽत्यल्पश्रुतः । **चशब्दो**–ऽनुक्तसमुच्चये । एतेषामप्राप्ताऽपात्राऽव्यक्तानां **वाचनां** श्रुतपाठनरूपां यो ददाति उद्देशसमुद्देशानुज्ञा वा करोति तस्य चतुर्गुरवः । तथा प्राप्तपात्रव्यक्तानां च यो वाचनां न ददाति उद्देशादींश्च न करोति तस्यापि चतुर्गुरवः ।।२३-२४।। अथाप्राप्ताव्यक्तयोः स्वरूपं सुखावसेयमिति तदनभिधायाऽपात्रस्वरूपं सूत्रकृदेवाह–

**तिंतिणिए चलचित्ते गाणंगणिए अ दुब्बलचरित्ते ।**
**आयरिअपरिभासी वामावट्टे अ पिसुणे य ।।२५।।**

(नि०भा० ६१९८, बृ०क० ७६२)

व्याख्या–**तिन्तिणिकः चलचित्तः गाणङ्गणिकश्च दुर्बलचरित्रः आचार्यपरिभाषी आचार्यपरिभावी वा वामावर्त्तश्च पिशुनश्च** । तत्र **तिन्तिणिको** द्विधा–द्रव्यतो भावतश्च । तत्र यदग्नौ प्रक्षिप्तं तिम्बुरुकदारुवद् दह्यमानं सत् त्रटत् त्रटदिति करोति तत् द्रव्यतिन्तिणिकम् । भावतिन्तिणिकः पुनर्यो गुर्वादिभिः कृताकृतेषु किंभणितो नोदितो वा सम्पूर्णदिवसमपि त्रटत्–त्रटायते । मम संमुखमिदमिदं च जल्पितमेभिरिति झषन्नास्ते इति भावः । आहारोपधिशय्याविषयोऽपि भावतिन्तिणिकः स्यात् । स च रसतिन्तिणिकोऽपि भण्यते । तत्राहारतिन्तिणिको द्विविधो– बहिःसंयोजनया अन्तःसंयोजनया च । तत्र क्षीरदध्यादि लब्ध्वा कलमशाल्योदनादिना रसगृध्नुतया यदुपाश्रयाद् बहिः संयोजयति सा बहिःसंयोजना । अन्तः संयोजना पुनरुपाश्रयमध्ये स्यात्, सा त्रिविधा–भाजने हस्ते मुखे च । तत्र भाजने यत्र कलमशाल्योदनस्तत्र दुग्धदध्यादि प्रक्षिपति, हस्ते मण्डकादिना गुडशर्करादि हस्तस्थितं वेष्टयित्वा मुखे प्रक्षिपति । मुखविषया तु पूर्वं मुखे मण्डकादि प्रक्षिप्य शर्कराखण्डादि प्रक्षिपति । एवंविधां द्विविधामप्याहारसंयोजनां लोभाभिभूततया कुर्वन् यदा यदा संयोजनीयवस्तुयोगं न लभते तदा तदा तिन्तिणिकत्वं करोतीत्याहारतिन्तिणिक उच्यते । एवमुपधिशय्यातिन्तिणिकावपि ज्ञेयौ, यतः–उपधेरपि संयोजना द्विविधा–बहिरन्तश्च । तत्र बहिःसंयोजना–उत्कृष्टं कल्पं लब्ध्वा चोलपट्टकमप्युत्कृष्टमुत्पादयति, और्णिकं वा कल्पं सुन्दरं लब्ध्वा तदनुरूपमेव सौत्रिकमुत्पादयति, उत्पाद्य च तदुभयपरिभोगेन संयोजयति । अन्तःसंयोजना

पुनः विभूषार्थं श्वेतकम्बल्यां कृष्णदवरसीवनिकां ददातीत्यादि। शय्या—प्रतिश्रयस्तस्या अपि संयोजना द्विधा—बहिरन्तश्च । तत्र बहिःसंयोजना—अकपाटमुपाश्रयं लब्ध्वा कपाटाभ्यां संयोजयति । अन्तःसंयोजना—शोभार्थं प्रतिश्रयं गोमयमृदादिना लिम्पति सेटिकया वा धवलयति। अथवा शय्याशब्देन संस्तारक उच्यते । ततश्च सुन्दरतरं संस्तारकं प्राप्य यदुत्तरपट्टमपि तदनुरूपमुत्पाद्य परिभुङ्क्ते, सा बहिःसंयोजना । यत् पुनः सुकुमारस्पर्शार्थं विभूषार्थं वा सुन्दरया भङ्ग्या संस्तारकं प्रस्तृणाति सा अन्तः संयोजना । तदेवमुपध्यादिविषयां संयोजनां कुर्वाणो विवक्षितवस्तुयोगाभावे तिन्तिणिको भवति । हा ! नास्त्यमुकं वस्तु अत्र स्थण्डिलप्राये संनिवेशे' इत्यादि जल्पतीत्यर्थः । उक्तं च—

**तिंबुरुअदारुअंपि व अग्गाहिअं तिडितिडेति दिवसंपि । अह दव्वतिन्तिणो भावओ अ आहारुवहिसिज्जा ।।**
**अंतोबहिसंजोअण आहारे बाहि खीरदहिमाई । अंतो उ होइ तिविहा भायण हत्थे मुहे चेव ।।**
**एमेव उवहिसिज्जा गुणोवगारी उ जस्स जं होइ । सो तेण जोअयंतो तदभावे तिंतिणो होइ' ।।**

(नि०भा० ६१९९, ६२००, ६२०१ — बृ०क० ७६४, ७६५, ७६६)

एवं तिन्तिणिको व्याख्यातः । अथ **चलचित्तः**, स च चञ्चल उच्यते । स च चतुर्धा—गतिचञ्चलः स्थानचञ्चलो भाषाचञ्चलो भावचञ्चलश्च । तत्र द्रुतद्रुतगामी गतिचञ्चलः । स्थानचञ्चलस्त्रिविधः—यो निषन्नः सन् पृष्ठबाहुकरचरणादिभिः कुड्यस्तम्भादि असकृत् स्पृशति १, यो वा निषन्न एवेतस्ततो भ्राम्यति २, पादौ वा पुनःपुनः सङ्कोचयति प्रसारयति वा ३, स स्थानचञ्चलः । भाषाचञ्चलश्चतुर्धा—असत्प्रलापी १, असभ्यप्रलापी २, असमीक्षितप्रलापी ३, अदेशकालप्रलापी ४। तत्राऽसत्—अलीकमशोभनं वा प्रलपितुं शीलमस्येत्यसत्प्रलापी १, असभ्यं—सभायाः **धम्मत्थसत्थकुसला सभासया जत्थ सा सभा नाम । जा पुण अविहिपलुट्टा बुहेहिं सा भण्णए मेली' ।।** इत्युक्तलक्षणाया योग्यं यद्वचनं तत् सभ्यं, तद्विपरीतमसभ्यं **'दासचण्डाल'**[A] इत्यादिकं ग्राम्यवचनं, कर्कशं कटुकं निष्ठुरं जकारमकारादि वा तत् प्रलपितुं शीलमस्येत्यसभ्यप्रलापी २, किमिदं पूर्वापरविरुद्धं किं वा इहपरलोकबाधकमित्याद्यविमृश्य यद् वदति तद्वचनमसमीक्षितं तत्प्रलपनशीलोऽसमीक्षितप्रलापी ३, कार्यस्य विनाशं दृष्ट्वा कश्चिद् भणति—यथा मया पूर्वमेव विज्ञातमिदं कार्यमेवं भविष्यति । यथा केनचित् साधुना पात्रं लेपितं, ततो रूढं सत् कुतोऽपि प्रमादतो भग्नं, ततः कश्चिदात्मनो दक्षत्वं ख्यापयन् ब्रवीति—यदैवेदं परिकर्मयितुमारब्धं तदैव मया ज्ञातं, यथेदं निष्पन्नमपि भङ्क्ष्यते । एष एवंविधोऽदेशकालेऽनवसरे प्रलपनशीलोऽदेशकालप्रलापी ४। भावचञ्चलः पुनर्यत् श्रुतमारब्धं तस्य पारमप्राप्तः सन्नपरापरश्रुतद्रुमाणां सूत्रार्थलवपल्लवान् स्वरुच्या ग्रहीतुं शीलमस्येति पल्लवग्राही । एषां गतिचञ्चलादीनामाज्ञादयो दोषाः संयमात्मविराधना च । तत्र संयमविराधना—गतिचञ्चलस्य त्वरितं गच्छतः पृथिव्यादीनां कायानामुपमर्दनम्, आत्मविराधना—प्रपतनप्रस्खलनदेवताछलनादिका । एवं स्थानचञ्चलादिष्वप्यु—पयुज्याऽऽत्मसंयमविराधने वक्तव्ये । कारणेन तु गतिचञ्चलत्वाद्यपि न दोषाय, यथा स्तेनश्वापदभयेन

**A. दास ! चण्डाल ! वा दासश्चासौ चण्डालश्च वा ।**

द्रुतमपि गच्छेन्न दोषः । ग्लानो वा कश्चिदागाढस्तस्यौषधानयननिमित्तं शीघ्रमपि गच्छेन्न च प्रायश्चित्तमाप्नुयात्। उन्मत्तयक्षाविष्टादिः स्थानचञ्चलत्वमपि कुर्यान्न च प्रायश्चित्तमाप्नुयादनात्मवशत्वात् । वादिनो बुद्धिं पराभवितुमलीकमपि ब्रूयात्, यथा—रोहगुप्तेन पोट्टशालपरिव्राजकमतिव्यामोहनार्थं जीवा, अजीवा, नो जीवाश्चेति त्रयो राशयः स्थापिताः। तथा पण्डकादेः शैक्षस्य व्युत्सर्जने विधेये तन्निर्भर्त्सयन्नसभ्यमपि भणेत् येनोद्वेजितः स्वयमेव गणान्निष्क्रम्य गच्छेत् । आचार्या वा कुतश्चित् प्रमादस्थानान्नोपरमन्ते ततोऽदेशकालप्रलापित्वमपि कुर्यात् । यथा क्षमाश्रमणा ! अमुकः संयतो अमुकश्च श्रावको मम पुरत इदं भणति, यथा—त्वदीया गुरवः पार्श्वस्थीभवन्तः सम्भाव्यन्ते । एतच्च मया पूर्वमपि विज्ञातमासीत्, यथा—क्षमाश्रमणानामेवमाचरतामपवादो भविष्यति । एवमुक्ते तेऽश्लोकभयेनैवोपरमन्ते । बालो वा केलिकन्दर्पादि कुर्वाणो वार्यमाणोऽपि न निवर्त्तते ततोऽनूहितमपि यदपि तदपि भाषित्वा वारणीयः । प्रत्यनीकादयो वा खरपरुषादिभाषणैरुपशमयितव्याः। तथा कस्याप्याचार्यस्यापूर्वं सूत्रमर्थो वा विद्यते तस्योभयस्यापि तत्पार्श्वादनधीयमानस्य व्यवच्छेदो भवति । अतः पूर्वारब्धं शास्त्रमर्धपठितमपि मुक्त्वा तदुभयमप्यध्येतव्यमिति यथाक्रमं गतिस्थानभाषाभावचञ्चलेषु द्वितीयपदम्। एवं चलचितश्चतुर्धा प्रोक्तः । यदुक्तम्—

**गइठाणभासभावे लहुगो मासो उ होइ इक्किके । आणाइणो अ दोसा विराहणासंजमायाए ।।**
**दावद्दविओ गइचंचलो थाणचवलो इमो तिविहो । कुड्डादसइं फुसइ भमइ व पाए व विच्छुभइ ।।**
**भासाचवलो चउहा असत्ति अलिअं असोभणं वावि । असभाजुग्गमसब्भं अणूहिउं तं तु असमिक्खं ।।**
**कज्जविवत्तिं दट्ठूण भणइ पुव्विं मए उ विन्नायं । एवमिणं तु भविस्सइ अदेसकालप्पलावी अ ।।**
**जं जं सुअमत्थो वा उद्दिट्ठं तस्स पारमप्पत्तो । अण्णण्ण सुअदुमाणं पल्लवगाही उ भावचलो' ।।**

(नि०भा० ६२०२ तः ६२०६)

इति चलचित्तो व्याख्यातः । अथ **गाणङ्गणिकस्तस्येदं** स्वरूपम्—उपसंपन्नः साधुः कारणाभावे षण्मासानपूरयित्वा यद्येकस्माद् गणात् परं गणं सङ्क्रामति, षण्मास्याः परतो वा यावत् द्वादश वर्षाण्यपूरयित्वा द्वादशभ्यो वा वर्षेभ्य ऊर्ध्वं निष्कारणं गणाद् गणं सङ्क्रामति यदि, तदा गाणङ्गणिकः स्यात् । कारणे तु ज्ञानदर्शन—चारित्राणामन्यतरस्मिन् पुष्टालम्बने समुत्पन्ने मध्ये द्वादशवर्षमन्तःषण्मासं वा गणाद्गणं सङ्क्रामन्नपि न प्रायश्चित्तभाग् भवति । अथ **दुर्बलचारित्रः** यो धृतिवीर्यपरिहीणो दर्शनज्ञानादिपुष्टालम्बनं विना मूलगुणोत्तर—गुणविषयानपराधान् प्रतिसेवते, कथम् ? पञ्चकादि यावच्चरमम् । इह पञ्चकशब्देन यत्र प्रतिसेविते रात्रिंदिवपञ्चकमापद्यते स सर्वजघन्यश्चरणापराधः परिगृह्यते । आदिशब्दाद्दशरात्रिंदिवादिप्रायश्चित्तस्थानानि यावच्चरमं सर्वोत्कृष्टचरणापराधलक्षणं पाराञ्चिकप्रायश्चित्तस्थानं स एष दुर्बलचारित्रः । उक्तं च—

**मूलगुणे उत्तरगुणे पडिसेवइ पणगमाइ जा चरिमं । धिइवीरिअपरिहीणो दुब्बलचरणो अणट्टाए'** ।।

एवंविधस्य छेदश्रुतार्थदाने दोषबाहुल्यं । यदुक्तम्—

**पंचमहव्वयभेओ छक्कायवहो अ तेणणुन्नाओ । सुहसीलविअत्ताणं कहेइ जो पवयणरहस्सं'** ।।

(बृ०क० ७७०, नि०भा० ६२०९)

**तेनाऽऽचार्येण पञ्चमहाव्रतभेदः षट्कायवधश्चानुज्ञातः**, ये **सुखशीलाऽव्यक्तानां** सुखं शरीरशुश्रूषादिकं शीलयन्तीति सुखशीलाः पार्श्वस्थादयः । अव्यक्ताः श्रुतेन वयसा च । सुखशीलाश्चाव्यक्ताश्चेति द्वन्द्वस्तेषाम् । यद्वा—**सुखे** शरीरसौख्ये **शीलं** स्वभावो **व्यक्तः** परिस्पष्टो येषां ते सुखशीलव्यक्तास्तेषाम् । अथवा सुखं—मोक्षसौख्यं तद्विषयं यत् **शीलं** मूलोत्तरगुणानुष्ठानं ततो विगतो **यत्न** उद्यम आत्मा वा येषां ते **सुखशीलवियत्नाः सुखशीलव्यात्मानो वा** तेषामुभयत्रापि पार्श्वस्थादीनामित्यर्थः । **प्रवचनरहस्यं** छेदग्रन्थार्थतत्त्वं कथयति । एवं दुर्बलचारित्रो व्याख्यातः । अथा**ऽऽचार्यपरिभावी** कश्चित् कुशिष्यः सूचया असूचया वा आचार्यं परिभवति। **सूचा** नाम स्वव्यपदेशेन परस्वरूपसूचनं, यथा—कोऽपि वयसा परिणतः साधुर्बालकमाचार्यं ब्रवीति — अद्यापि डहरा बालका वयं किं नामास्माकमाचार्यपदस्य योग्यत्वमिति । **असूचा** स्फुटमेव परदोषोद्घट्टनं, यथा भो आचार्य ! त्वं तावदद्यापि डहरो मुग्धः क्षीरकण्ठो वर्त्तसे । अतः कीदृशं भवत आचार्यत्वमिति । योऽकुलीन आचार्यस्तमुद्दिश्य भणति अहो ! उत्तमकुलसम्भूता अमी योग्या एवाऽऽचार्यपदस्य, वयं तु हीनकुलोत्पन्नाः कुतोऽस्माकं सूरिपदयोग्यता । यद्वा—धिक् कष्टं यदकुलीनोऽप्ययमाचार्यपदे निवेशित इति । एवं मेघावी मन्दमेधसम्, ईश्वरप्रव्रजितो दरिद्रप्रव्रजितम्, बुद्धिसम्पन्नो मन्दबुद्धिम्, लब्धिसम्पन्नो मन्दलब्धिम् आचार्यं सूचया असूचया च परिभवतीत्याचार्य—परिभावी । उक्तं च—

**डहरो अकुलीणुत्ति अ दुम्मेहो दमगमंदबुद्धी अ । अवि अप्पलाभलद्धी सीसो परिहवइ आयरिअं'** ।।

(बृ०क० ७७२, नि०भा० ६२१०)

**रायणिअपारिभासी'** तिपाठे तु **रात्निको** रत्नाधिको **रत्नैः** ज्ञानदर्शनचारित्ररूपैः परमपुरुषार्थप्रापणप्रवणै**श्चरति** व्यवहरतीतीकणि **रात्निको** रत्नाधिक आचार्यादिस्तं प्रत्यवज्ञावचनादि परिभाषत इत्येवंशीलो रात्निकपरिभाषी । अथ **वामावर्त्तः** यः शिष्य आगच्छेति भणितः सन् व्रजति, व्रजेति भणितः सन् शीघ्रं समालीयते । एवमन्यदपि कार्यं यद्यथा भण्यते तत्तथा न करोति, स वामावर्त्तः । उक्तं च—

**एहि भणिओ उ वच्चइ वच्चसु भणिओ दुअं समल्लिअइ । जं जह भणइ तं तह अकरिंतो वामवट्टो अ'** ।।

(बृ०क० ७७४, नि०भा० ६२११)

अथ पिशुनः— अलीकानीतराणि वा परदूषणानि भाषमाणः प्रीतिं शून्यां करोतीति वक्ष्यमाणलक्षणः । उपलक्षणत्वादपरेऽप्यपात्रभूताः शिष्या ज्ञेया यथा आद्यदृष्टभावः[A] १ । अकृतसामाचारीकः २, तरुणधर्मा ३, गर्वितः ४, प्रकीर्णप्रज्ञविद्यः ५, गुरुनिह्नवी ६ । तत्राऽऽवश्यकादि—सूत्रकृताङ्गपर्यन्तेषु ग्रन्थेषु ये भावाः पदार्था अभिधेयास्ते आदिमा भावा येनाऽवगता न सन्ति, स आद्यदृष्टभावः[A] ।१। ज्ञानोपसम्पदि सूत्रार्थमण्डली[B]विषयां सामाचारीं शास्त्रान्तरविस्तरोक्तां यो न करोति स्म, सोऽकृतसामाचारीकः ।२। यस्य श्रुतस्य यो यावान् कालः— **तिवरिसपरिआयस्स उ'** इत्यादिगाथाकदम्बकप्रतिपादितस्तस्य तावन्तकालमसमापयन् तरुणधर्मा भवति ।३। गर्वितो यः श्रुतमधीयानः तदवलेपादेव दुर्विनीतो भवन्नुपलभ्यते, तादृशे पुरुषे आचारादि श्रुतजातं स्तोकमात्रमपि नाचक्षीत । यतः—परिकर्त्तितकर्णहस्तस्य पुरुषस्य कुण्डलकङ्कणाद्याभरणं दीयमानं न शोभेत । विशेषेणाऽयमयोग्यः । यदुक्तम्—

**मद्दवकरणं नाणं तेणेव उ जे मयं समुवयंति । ऊणगभायणसरिसा अगदो वि विसायए तेसिं'** ।।

(नि०भा० ६२२२, बृ०क० ७८३)

योऽर्थमण्डल्यां राहसिकग्रन्थार्थं श्रुत्वा उत्थितः सन् अपरिणतानां लेशोद्देशतः कथयति । यथा अमुकं प्रलम्बग्रहणादिकमत्र सूत्रेण कल्पनीयतया कथ्यते स प्रकीर्णप्रज्ञः । प्रज्ञाशब्देनेह प्रकर्षेण ज्ञायते उत्सर्गा—पवादतत्त्वमनयेति व्युत्पत्त्या छेदश्रुतान्तर्गता रहस्यवचनपद्धतिरुच्यते, सा प्रकीर्णा विक्षिप्ता येन स प्रकीर्णप्रज्ञः। तथा प्रकीर्णविद्यः यः सर्वमप्यादेरारभ्य पर्यन्तं यावत् छेदश्रुतमुत्सर्गापवादसहितमपरिणतानां कथयति स प्रकीर्णविद्यः, विद्याशब्देन चात्राऽखण्डं छेदश्रुतमभिधीयते ।५। यः पुनः सूत्रार्थतदुभयानि कस्यचित् पार्श्वे गृहीत्वा तमाचार्यं निह्नुते अपलपति । अपरं कमपि विख्यातगुणमाचार्यमुद्दिशति । अथवा ब्रूयात् मया स्वयमेवाभ्यूह्य श्रुतं निर्णीतं केवलं तैर्वाचनाचार्यैर्मम दिग्मात्रमेव दत्तमिति । अत्र परिव्राजकज्ञातं, तच्चेदम्— 'एगस्स ण्हाविअस्स छुरघरगं विज्जाए आगासे चिट्ठइ । तं च एगो परिव्वायगो बहूहिं उवासणाहिं आराहिऊण तस्स सगासे विज्जं गिण्हित्ता अन्नत्थ गंतुं तिदंडेणं आगासगएणं अच्छइ । तओ सो लोगेणं पूइज्जइ । अन्नया रन्ना पुच्छिओ—'भगवं ! किं विज्जाइसओ उआहु तवाइसओ ?' भणइ 'विज्जाइसओ'। 'कओ आगमिओ' त्ति ? भणइ—'हिमवंते पव्वए फलाहारनामस्स महरिसिस्स सगासाओ' त्ति भणिए तं 'तिदंडं खडत्ति पडिअं' एस दिट्ठंतो । अयमत्थोवणओ, जहा— सो ण्हाविअं विज्जायरिअं निण्हविंतो ओहावणं पत्तो' एवं अन्नेवि अप्पगासंपि वायणायरिअं निण्हविंता इहलोए चेव बहूणं समणसावगाईणं हीलणिज्जा भवंति, देवयाहि अ छलिज्जंतीति ।६। अत्र च तिन्तिणिक—चलचित्त—गाणङ्गणिक—दुर्बलचारित्रा—ऽऽचार्यपरिभाषि- वामावर्त्त—पिशुना—ऽकृतसामाचारीक—गर्वित—प्रकीर्ण—निह्नविन एकादशाऽपात्रभूताः

**A.** आदि + अदृष्टभावः । **B.** ज्ञानप्राप्तिविषयाम् ।

शिष्याः । आदिमादृष्टभावोऽप्राप्तः, तरुणधर्मा पुनरव्यक्तः । अनयोः स्वरुपं प्राक् प्रतिपादितम् । तत्रेदं तात्पर्यम्—**अव्यक्तो** द्विधा—पर्यायेण श्रुतेन च । तत्र पर्यायो द्विधा—जन्मतः प्रव्रज्यातश्च । तत्र जन्मतो यावत् षोडशवर्षाणि तावदव्यक्तः, प्रव्रज्यातस्तु यावत् त्रीणि वर्षाणि तावदव्यक्तः । प्रकल्पाध्ययनस्य यो वा यस्य श्रुतस्य कालः प्रोक्तस्तमप्राप्तोऽव्यक्तस्तस्य श्रुतस्य । श्रुतेन पुनरावश्यकेऽनधीते दशवैकालिकस्याव्यक्तः । दशवैकालिकेऽनधीते उत्तराध्ययनानामव्यक्तः । एवं सर्वत्र । अत्र पर्यायश्रुताभ्यां चतुर्भङ्गी कार्या । तद्यथा—पर्यायेण श्रुतेन च व्यक्तः प्रथमः, पर्यायेण व्यक्तः श्रुतेन त्वव्यक्तो द्वितीयः, पर्यायेणाव्यक्तः श्रुतेन तु व्यक्तस्तृतीयः, द्वाभ्यामप्यव्यक्तश्चतुर्थः । प्रथमभङ्गे व्यक्तः शेषेषु त्रिष्वपि भङ्गेष्वव्यक्तः । स एव च यथायोगमादिमादृष्टभावतरुणधर्मतयाऽवगन्तव्यः ।।२५।। अथैषां सूत्रार्थप्रदाने प्रायश्चित्तमाह—

**अव्वत्ते अप्पत्ते लहुगा लहुगा य हुंति अप्पत्ते ।**
**लहुगा य हुंति तिंतिणि रसतिंतिणि हुंतऽणुग्घाया ।।२६।।**

(नि०भा० ६२२९, बृ०क० ७८८)

व्याख्या—**अव्यक्तः** तरुणधर्मा तस्य, तथा **'अप्पत्ते'** त्ति । अपात्राणामेकादशसङ्ख्याकानां सूत्रार्थौ यदि ददाति तदा **चत्वारो लघुकाः** । **'लहुगा य हुंति अप्पत्ते'** त्ति । **अप्राप्त** आद्यदृष्टभावस्तस्य ददाति **चत्वारो लघुकाः** । अत्रैव विशेषमाह— **'लहुगा य हुंति तिंतिणि'** इत्यादि । **तिन्तिणिकस्य** शिक्षातिन्तिणिकस्य उपधितिन्तिणिकस्य शय्यातिन्तिणिकस्य ददाति **चत्वारो लघवः** । आहारतिन्तिणिकस्य पुनर्विशेषमाह— **'रसतिंतिणि हुंतऽणुग्घाया'** इति । **रसतिन्तिणिकस्य** **'व्याख्यातो विशेषप्रतिपत्ते'** राहारतिन्तिणिकस्य ददाति **चत्वारोऽनुद्घाता गुरव** इत्यर्थः । अयमुत्सर्गनिश्चयः—

**'मरिज्ज सह विज्जाए कालेणं आगए विदू । अप्पत्तं च न वाइज्जा पत्तं च न विमाणए'** ।।

(नि०भा० ६२३०)

कारणैः पुनरपवादपदेनैतानपि वाचयन्न प्रायश्चित्तभाग् भवति । तच्चापवादपदं निशीथादिमहाग्रन्थेषु विस्तरेणाभिहितं तत एवावसेयम् । इह तु ग्रन्थगौरवभयान्नोच्यते । एवं पूर्वमुद्दिष्टानामव्यक्ताऽपात्राऽप्राप्तानां विभागेन प्रायश्चित्तं प्रतिपादितम् ।।२६।।

अथ पूर्वोक्तपिशुनविषयं प्रसङ्गागतं विशेषमाह—

**पीईसुन्नणि पिसुणे गुरुगाइ चउण्ह जाव लहुगो उ ।**
**अहवा संतासंते लहुओ लहुगा गिहेसु गुरुगा ।।२७।।**

(नि०भा० ६२१२, बृ०क० ७७५)

व्याख्या— 'पीईसुन्नणि' त्ति । अलीकानि इतराणि वा परदूषणानि भाषमाणः **प्रीतिं शून्यां करोतीति पिशुनो**, **नैरुक्ती** शब्दनिष्पत्तिः । स च यद्याचार्यस्य पैशुन्यं करोति तदा चतुर्गुरु, उपाध्यायस्य करोति चतुर्लघु, भिक्षोः करोति मासगुरु, क्षुल्लकस्य करोति मासलघु इति कल्पचूर्ण्यभिप्रायः । निशीथचूर्ण्यभिप्रायेण तु यद्याचार्यः पैशुन्यं करोति तदा चत्वारो गुरवः, उपाध्यायः करोति चत्वारो लघवः, भिक्षुः करोति मासगुरु, क्षुल्लः करोति मासलघु । अमुमेवार्थं सञ्जिघृक्षुराह— '**गुरुगा**' इत्यादि । **चतुर्णा**माचार्योपाध्यायभिक्षुक्षुल्लकरूपाणां पैशुन्यकरणं विषयभूतानां कर्तृभूतानां वा यथाक्रमं **गुरुकादयो यावल्लघुको मासः** प्रायश्चित्तम् । **अथवे**ति प्रकारान्तरोपन्यासे । सामान्यतः संयतः संयतेषु पैशुन्यं करोति । तत्रासद्दूषणविषये पैशुन्ये चत्वारो **लघवः**। सद्दूषणविषये **लघुको** मासः । एते एव प्रायश्चित्ते गृहिषु **गुरुके** अवसातव्ये, तद्यथा—गृहस्थेषु असद्भिर्दोषैः पैशुन्यं करोति चत्वारो गुरवः । सद्भिः करोति गुरुमासः । एवं प्रासङ्गिकं प्रतिपादितम् ।।२७।।

सम्प्रति ज्ञानाद्युपसम्पन्निमित्तमागतः शिष्यो यैर्दोषैः प्रतीच्छनीयो न स्यादिति तानाह—

**एगे अपरिणए वा अप्पाहारे अ थेरए ।**
**गिलाणे बहुरोगी अ मंदधम्मे अ पाहुडे ।।२८।।**

(बृ०क० ५३९९, नि०भा० ५४९४)

व्याख्या—यदि **एक** एकाकी पश्चादाचार्यः । यदि वा **अपरिणतः** कथमपि गृहीतैरकल्पिकैर्वस्त्रादिभिः सहितः । अथवा तस्याचार्यस्य पार्श्वे ये तिष्ठन्ति, ते अपरिणता आहारवस्त्रपात्रशय्यास्थण्डिलानामकल्पिकास्तैः सहितः, स च कल्पिकवस्त्राद्युत्पादने लब्धिमान् । अथवा स आचार्योऽ**ल्पाधारः** अल्पस्य सूत्रस्यार्थस्य आधारः सूत्रार्थनैपुण(ण्य ?)विकलः शङ्कितसूत्रार्थो वा, सूत्रार्थकथननिपुणं तमेव शिष्यं पृष्ट्वा शेषसाधुभ्यो वाचनां ददाति । यदि वा आचार्यः परिवारो वा **स्थविरो** जरसा वृद्धशरीरोऽजङ्गमः, स च तेषां प्रतिजागरकः । अथवा पश्चात्तत्र गच्छे एको **ग्लानो**ऽधुनोत्पन्नरोगः, स च तस्य चिन्ताकारी । यदि वा एको **बहुरोगी**, बहुरोगी नाम चिरकालं बहुभिर्वा साधारणै रोगैर्जा(या)प्य[A]शरीरः, स च तस्य वर्त्तापकः । यदि वा पश्चात्तनाचार्यपरिवारः सर्वोऽपि **मन्दधर्मा** निर्धर्मा न गुर्वाज्ञां करोति, केवलं तद्भयात् किमपि करोति । तथा गुरुणा समं **प्राभृतं** कलहं कृत्वा समागतः । अथवा प्राभृतकारिणस्तस्य शिष्याः तस्यैव गुणेन प्राभृतं न कुर्वन्ति । तस्यैव वा संयतैर्गृहिभिर्वा सह प्राभृतमस्ति । यदि वा पश्चात्तत्र गुरोः केनापि सह प्राभृतमस्ति । स च क्रमेणापनयनतो गुरोः साहाय्यकारी। एवं प्राग् वर्त्तमाने यदि समागतः स्यात् । इदमुक्तं भवति— पश्चादेकाकिनम्, अपरिणतम्, अल्पाधारम्, स्थविरम्, गुरुं परिवारं वा ग्लानम्, बहुरोगिणम्, निर्द्धर्मपरिवारं वा आचार्यं विमुच्य प्राभृतं वा कृत्वा यदि समागतो भवेत्तर्हि स न प्रतिग्राह्यः ।।२८।। केवलमयमुपदेशस्तस्मै प्रदातव्यस्तमेवाह—

**A.** याप्यः चिकित्साकरणयोग्यः ।

**एआरिसं विउसज्ज विप्पवासो न कप्पई ।**
**सीसपडिच्छायरिए पायच्छित्तं विहिज्जई ।।२९।।**

(बृ०क० ५४००, नि०भा० ५४९५)

व्याख्या—**एतादृशमे**काक्यादि स्वरूपं गुरुमन्यं वा ग्लानादिकं **व्युत्सृज्य** परित्यज्य विशेषेण प्रवासोऽन्यत्र गमनं **विप्रवासो** भद्र ! तव **न कल्पते** । बहुगुणाधारो भवान् कथमीदृशं कृतवान् ? तस्माद्द्यापि प्रायश्चित्तं प्रतिपद्य पश्चाद्गच्छ । स च समागतस्तस्य प्राक्तनाचार्यस्य शिष्यो वा स्यात् प्रतीच्छको वा । एवमागतमुपसम्पद्यमानं योऽप्याचार्यः प्रतीच्छति सोऽपि प्रायश्चित्तभाक् । ततः शिष्यप्रतीच्छकाचार्याणां प्रायश्चित्तं विवक्षुरिदमाह—'**सीसपडिच्छायरिए**' इत्यादि । **शिष्ये प्रतीच्छके आचार्ये च प्रायश्चित्तं विधीयते** । प्रायश्चित्तदानविधिरुच्यत इति भावः ।।२९।। प्रतिज्ञामेव निर्वाहयति—

**एगे गिलाणि पाहुडि तिण्ह वि गुरुगाओ सीसमाईणं ।**
**सेसे सीसे गुरुगा लहुग पडिच्छे गुरुसरिसं ।।३०।।**

(नि०भा० ५४९६)

व्याख्या—**एकस्मिन्** एकाकिनि गुरौ, **ग्लाने** वा तत्र गच्छे तिष्ठति, **प्राभृते** वा केनापि सहाऽधिकरणे सति यदि समागतः शिष्यः, प्रतीच्छको वा आचार्येण वा तथा समागतः सन् यदि प्रतीच्छितः तदा **शिष्यादीनां** शिष्य—प्रतीच्छका—ऽऽचार्याणां त्रयाणामपि **गुरुकाश्चत्वारो** गुरुमासाः । यः पुनरन्यः **शेषो**ऽपरिणता—ऽल्पाधार—स्थविर—बहुरोग—मन्दधर्म—परिवारलक्षणस्तस्मिन् शेषे यदि समागतः **शिष्यस्तस्य** प्रायश्चित्तं **गुरुकाश्चत्वारो** गुरुमासाः । अथ **प्रतीच्छकः** समागतः तर्हि तस्य **लघुकाश्चत्वारो** लघुमासाः । **गुरु सरिस'**मिति गुरोरपि सदृशं प्रायश्चित्तम्, किमुक्तं भवति—यदि शिष्यं प्रतीच्छति ततः प्रायश्चित्तं चत्वारो गुरुमासाः । अथ प्रतीच्छकं तर्हि चत्वारो लघुका इति ।।३०।। अथवा **प्राभृते** इदं प्रायश्चित्तम्—

**सीसपडिच्छे पाहुडि छेओ राइंदिआणि पंचेव ।**
**आयरिअस्स उ गुरुगा दोवेए पडिच्छमाणस्स ।।३१।।**

(नि०भा० ६३४०)

व्याख्या— यदि **प्राभृते** गुरोः शिष्यस्य वा केनापि सहाधिकरणे वर्त्तमाने शिष्यः प्रतीच्छको वा समागतस्तदा **तस्य शिष्यस्य प्रतीच्छकस्य वा प्रायश्चित्तं पञ्च रात्रिंदिवानि पर्यायस्य छेदः** । **आचार्यस्य पुनर्द्वावप्येतौ प्रतीच्छतः** प्रतिगृह्णतः प्रायश्चित्तं **गुरुकाश्चत्वारो** गुरुमासाः । तथा यः समनोज्ञ उपसम्पदनार्थमागतस्तं यद्याचार्यः प्रथमदिवसे न पृच्छति, यथा—कुतः आगतः ?, कुत्र वा गमिष्यसि ?, किं निमित्तं वा समागतः ?

इति । ततस्तस्यैवमप्रच्छने प्रथमदिवसे मासलघु । द्वितीयदिवसेऽपि यदि न पृच्छति तदा मासगुरु । तृतीयदिवसेऽप्यप्रच्छने च चत्वारो लघुमासाः । चतुर्थेऽपि दिवसे यदि न पृच्छति तदा चतुर्गुरु । पञ्चमादिष्वपि दिवसेष्वप्रच्छने तदेव चतुर्गुरु । सोऽपि पृष्टः सन् यदि ब्रूते—कथयिष्यामि तदा तस्यापि प्रथमदिवसे मासलघु, द्वितीयदिवसे मासगुरु, तृतीयदिवसे चतुर्लघु, चतुर्थदिवसेऽप्यकथने चतुर्गुरु, पञ्चमादिष्वपि तदेव चतुर्गुरु । अथवा प्रथमदिवसे श्रान्त इति कृत्वा न पृष्टस्तत आचार्यः शुद्धः, कारणवशेनाऽप्रच्छनात् । द्वितीयदिवसे न पृच्छति मासगुरु, तृतीये न पृच्छति चतुर्लघु, चतुर्थे दिवसे चतुर्गुरु । एवं तेनोपसम्पद्यमानेन पृष्टेनाऽपृष्टेन वा आख्यातं यदहममुकेन कारणेन समागत इति । तत आगतश्चिन्तनीयः शुद्धोऽशुद्धो वा । अत्र चत्वारो भङ्गाः । तद्यथा— निर्गमनमप्यशुद्धमागमनमप्यशुद्धम् १, निर्गमनमशुद्धमागमनं शुद्धम् २, निर्गमनं शुद्धमागमनमशुद्धम् ३, निर्गमनमपि शुद्धमागमनमपि शुद्धम् ४ । तत्र निर्गमनं पूर्वोक्तैरेकाकिगुरुत्यागादिभिर्वक्ष्यमाणैश्चाधिकरणा—दिभिर्दोषैरशुद्धम् । आगमनं तु व्रजिकादिषु प्रतिबन्धेनाशुद्धम् । तत्रापि प्रतिबन्धनिमित्तं प्रायश्चित्तं सूत्रानुसारतो वक्तव्यम् । चतुर्थभङ्गस्तु निर्दोष इत्यादि । एतद्वक्तव्यता विस्तरतो निशीथादिमहाग्रन्थेभ्योऽवसेया ।।३१।।

एवं ज्ञानाद्युपसम्पन्निमित्तागतशिष्यदोषविषयं प्रायश्चित्तमुक्तम् । अथ नवप्रव्रजितशिष्याऽविध्युपस्थापनाविषयमाह—

**अप्पत्ते अकहित्ता जीवाजीवे अ बंधमुक्खं च ।**
**उवठावणि चउगुरुगा विराहणा जा भणिअपुव्विं ।।३२।।**

(नि०भा० ३७५२)

व्याख्या—उपस्थापना तावत् प्रव्रजितस्य स्यात् । प्रव्रज्या च योग्यानामेव देया, न त्वयोग्यानाम् । यत उक्तं—

**पव्वावणारिहा खलु जाईकुलरूवविणयसंपन्ना । तव्विवरीअगुणा खलु हुंति अपव्वावणाजुग्गा' ।।**

अथ चैतेऽष्टचत्वारिंशदयोग्याः प्रव्रज्यायाः ।

**अट्ठारस पुरिसेसुं वीसं इत्थीसु दस नपुंसेसु । पव्वावणा अणरिहा अनला अह इत्तिआ भणिआ ।।**

(नि०भा० ३५०५, बृ०क० ४३६५)

**बाले वुड्ढे नपुंसे अ जड्डे कीवे अ वाहिए । तेणे रायावगारी अ उम्मत्ते अ अदंसणे ।।**

(नि०भा० ३५०६, प्र०सा० ७९०)

**दासे दुट्ठे अ मूढे अ अणत्ते जुंगिए इअ । उबद्धये अ भयए सेहनिप्फेडिआइआ ।।**

(नि०भा० ३५०७, प्र०सा० ७९१)

**गुव्विणी बालवच्छा अ पव्वावेउं न कप्पइ । एएसिं तु परूवणा कायव्वा दुपयसंजुत्ता' ।।**

(नि०भा० ३५०८, पंचकल्पभाष्य — २००, २०१, २०२)

एतेषां लेशतोऽयमर्थः—पुरुषेषु मध्येऽष्टादश, स्त्रीषु विंशतिः, नपुंसकेषु दश, एतेऽष्टचत्वारिंशत् **प्रव्राजनाया अनर्हाः** । **अनला** अयोग्या **एतावन्तो भणिताः**, तद्यथा **बालः** सप्ताष्टौ वर्षाणि यावदत्राभिधीयते । सप्ततिवर्षेभ्य उपरि **वृद्धः** । अन्ये त्वाहुः—अर्वागपीन्द्रियादिहानिदर्शनात् षष्टिवर्षेभ्योऽप्युपरि **वृद्धो**ऽभिधीयते । न स्त्री, न पुमान् **नपुंसकम्** । **जड्डुस्तु** त्रिधा भाषया शरीरेण करणेन च । भाषाजड्डुः पुनरपि त्रिधा—जलमूको, मन्मनमूक, एलकमूकः । तत्र जलनिमग्न इव बुडबुडायमानो यो वक्ति स जलमूकः । यस्य वदतः खल्यमानमिव वचनं स्खलति, स मन्मनमूकः । यस्त्वेलक इवाव्यक्तं मूकतया शब्दमात्रमेव करोति, स एलकमूकः । यः पथि भिक्षाटने वन्दनादिषु वाऽतीव स्थूलतयाऽशक्तो भवति, स शरीरजड्डुः । करणं—क्रिया तस्यां जड्डुः करणजड्डुः समितिगुप्तिप्रतिक्रमणप्रत्युपेक्षणासंयमपालनादिक्रियां पुनः पुनरुपदिश्यमानामप्यतीव जड्डुतया यो ग्रहीतुं न शक्नोति, स करणजड्डु इत्यर्थः । यः स्त्रिभिर्भोगैर्निमन्त्रितोऽसंवृताया वा स्त्रियोऽङ्गोपाङ्गानि दृष्ट्वा, शब्दं च मन्मनालापादिकं तासां श्रुत्वा समुद्भूतकामाभिलाषोऽधिसोढुं न शक्नोति स **क्लीबः** । भगन्दरातीसारकुष्ठप्लीह[A]शूलार्शःप्रभृतिरोगैर्ग्रस्तो **व्याधितः** । क्षत्रखननमार्गपातनादिचौर्यनिरतः **स्तेनः** । श्रीगृह[B]ान्तःपुरनृपतिशरीरतत्पुत्रादिद्रोहविधायको **राजापकारी** । यक्षादिना प्रबलमोहोदयेन वा परवशतां नीत **उन्मत्तः** । न विद्यते **दर्शनं** दृग् **यस्येत्यदर्शनो**ऽन्धः स्त्यानर्द्धिनिद्रोदयवानप्यत्र द्रष्टव्यः । गृहदास्याः सञ्जातो, दुर्भिक्षादिष्वर्थादिना वा क्रीतः, ऋणादिव्यतिकरे वाऽवरुद्धो **दास** उच्यते । **दुष्टो** द्विधा—**कषायदुष्टो विषयदुष्टश्च** । तत्र **सर्षपभर्जिका**[C]भिनिविष्टसाध्वादिवद् उत्कटकषायः **कषायदुष्टः** । अतीव परयोषिदादिषु गृद्धो

---

**A.** उदररोगविशेषः । **B.** भाण्डार ।

**C.** एगेण साहुणा सासवभज्जिया (='सरसवनी भाजी' इति भाषायाम्) सुसंभिया लद्धा, तत्थ से अतीव गेही । आयरियस्स य आलोइयं । पडिदंसिए निमंतिए य आयरिएणं सव्वा वि समुद्दिट्ठा । इतरो पदोसमावण्णो । आयरिएणं लक्खियं, 'मिच्छामि दुक्कडं' कयं तहावि न उवसमइ, भणइ य—तुज्झ दंते भंजामि । गुरुणा चिंतियं— 'मा असमाहिमरणेण मारिस्सइ' त्ति गणे अन्नं गणहरं ठवेत्ता अन्नं गणं गंतूण भत्तपच्चक्खाणं कयं । समाहीए कालगया । इयरो गवेसमाणो सज्झंतिए पुच्छइ—कत्थ आयरिया ? तेहिं न अक्खायं । सो अन्नतो सोच्चा तत्थ गंतुं पुच्छइ—कहिं आयरिया ? ते भणंति—समाहीए कालगया । पुणो पुच्छइ—कहिं सरीरगं परिट्ठवियं ? आयरिएहि य पुव्वं भणियं—मा तस्स पावस्स मम सरीरपरिट्ठावणियाभूमिं कहेज्जाह, मा आगट्ठि—विगट्ठिं करेमाणो उड्डाहं काहिइ । तेहिं अकहिए अन्नतो सोउं तत्थ गंतुं उवट्ठियाओ गोलोवलं कड्ढिऊण दंते भंजंतो भणइ—एतेहिं तुमे सासवनालं खइयं । तं साहूहिं पडियरंतेहिं दिट्ठं ।।

**अथाक्षरगमनिका**—सर्षपनालविषयं 'छन्दनं' निमन्त्रणं गुरोः कृतम् । गुरुणा च सर्वं भुक्तम् । इतरस्य कोपः । गुरुणा क्षामणे कृतेऽपि स नोपशान्तः । ततोऽनुपशान्ते तस्मिन् **'गणिनम्' आचार्यं** स्थापयित्वा अन्यस्मिन् गच्छे **परिज्ञा** भक्तप्रत्याख्यानमङ्गीकृतम् । तस्य च शिष्याधमस्य 'गुरवः कुत्र गताः' ? इति पृच्छतोऽपि सज्झिलकसाधुभिर्नाख्यातम् । ततोऽन्यतः श्रुत्वा तत्र गत्वा 'कुत्र तेषां शरीरम्'? पृच्छा कृता । गुरुभिश्च पूर्वमेव तदीयो वृतान्तः कथित आसीत् । 'दायण' त्ति अकारप्रश्लेषात् ततस्तैराचार्यशरीरपरिष्ठापनाभूमिर्न दर्शिता । स चान्यतः श्रुत्वा गतो दन्तभञ्जनं कृतवान् । साधुभिश्च गुपिलस्थाने स्थितैः प्रतिचरणं कृतमिति ।।

(बृ०क० ४९८८, ४९८९ – टीका, नि०भा० ३६८३, ३६८४)

**विषयदुष्टः** । स्नेहाऽज्ञानादिपरतन्त्रतया यथास्थितवस्त्ववगमशून्यमानसो **मूढः** । यो राजादीनां हिरण्यादिकं धारयति स **ऋणार्त्तः** । जातिकर्मशरीरादिभिर्दूषितो **जुङ्गितः** । तत्र मातङ्गकौलिकवरुडसूचिकछिम्पका- दयोऽस्पृश्या जात्या जुङ्गिताः । स्पृश्या अपि स्त्रीमयूरकुक्कुटादिपोषकाः । वंशवरत्राऽऽरोहणनखप्रक्षालन- सौकरिकत्ववागुरिकत्वादिनिन्दितकर्मकारिणः कर्मजुङ्गिताः । करचरणकर्णादिवर्जिताः पङ्गुकुब्जवामनक- काणप्रभृतयः **शरीरजुङ्गिताः** । अर्थग्रहणपूर्वकं विद्यादिग्रहणनिमित्तं वा एतावन्ति दिनानि त्वदीयोऽहमित्येवं येनाऽऽत्मनः परायत्तता कृता भवति, **सोऽवबद्धः** । रूपकादिमात्रया **भृत्या**[A] धनिनां गृहे दिनपाटिकादिमात्रेण तदादेशकरणे प्रवृत्तो **भृतकः**[B] । **शिक्षकस्य** दीक्षितुमिष्टस्य **निःस्फेटिका** अपहरणं शिक्षकनिःस्फेटिका । तद्योगाद्यो मातापित्रादिभिरननुज्ञातोऽपहृत्य दीक्षितुमिष्यते, सोऽपि शिक्षकनिःस्फेटिका । इत्येतेऽष्टादश पुरुषेषु दीक्षाऽनर्हाः भेदाः । एतेषां बालादीनां दीक्षाप्रदाने प्रवचनमालिन्य- संयमात्मविराधनादयो दोषाः सुखावसेया एवेति न दर्शिताः । वैरस्वाम्यादीनां च प्रव्राजनेऽपवादपदं निशीथादवसेयम् । एते एव चाष्टादशभेदाः स्त्रीष्वपि, परं नपुंसकद्वारेऽयं विशेषः-यः पुरुषनपुंसकः स प्रतिसेवते प्रतिसेवापयति च । स्त्रीनपुंसिका पुनः स्त्रीवेदं नपुंसकवेदमपि वेदयति । अन्यावपि द्वाविमौ भेदौ भवतः, तद्यथा-**गुर्विणी** सगर्भा, **सबालवत्सा** सह बालेन स्तनपायिना वत्सेन वर्त्तत इति **सबालवत्सा**। एते सर्वेऽपि विंशतिः स्त्रीभेदा दीक्षाऽनर्हाः। नपुंसकाः पुनः षोडशभेदा भवन्ति, तद्यथा—

**पंडए वाइए कीवे कुंभी इस्सालुए इअ । सउणी तक्कमसेवी अ पक्खिआपक्खिए इअ ।।**

(बृ०क० ५१६६, नि०भा० ३५६१, प्र०सा० ७९३)

**सोगंधिए आसित्ते वद्धिए चिप्पिए इअ । मंतो-सहीउवहए इसिसत्ते देवसत्ते अ ।।**

(बृ०क० ५१६७, नि०भा० ३५६२, प्र०सा० ७९४)

पण्डकः, वातिकः, क्लीबः, कुम्भी, ईर्ष्यालुः, शकुनी, तत्कर्मसेवी, पक्षिकाऽपक्षिकः, सौगन्धिकः, आसिक्तः, वर्द्धितः, चिप्पितः, मन्त्रोपहत, औषध्युपहतः, ऋषिशप्तः, देवशप्तः । तत्र पण्डकस्येमानि षड् लक्षणानि—

**महिलासहावो सरवन्नभेओ मेंढं महंतं मउआ अ वाणी । ससद्दयं मुत्तमफेणगं च एआणि छप्पंडगलक्खणाणि'।।**

(बृ०क० ५१४४, नि०भा० ३५६७)

पुरुषाकारधारिणोऽपि **महिलास्वभावत्वं** पण्डकस्यैकं लक्षणं, तथाहि-गतिस्तस्य पदाकुला मन्दा भवति, सशङ्कं पृष्ठतोऽवलोकमानो गच्छति । शरीरं च शीतलं मृदु च भवति । योषिदिवाऽनवरतं हस्तोभकान् प्रयच्छन् उदरोपरि तिर्यग् व्यवस्थापितवामकरतलस्य उपरिष्टाद्दक्षिणकरकूर्परं विन्यस्य दक्षिणकरतले च मुखं

**A.** भृतिः = भाटिः ( 'मजुरी, भाडुं' इति भाषायाम् ) । **B.** कर्मकरः ।

कृत्वा बाहू च विक्षिपन् भाषते । अभीक्ष्णं च कटीहस्तकं ददाति । प्रावरणाभावे स्त्रीवद् बाहुभ्यां हृदयमाच्छादयति। भाषमाणश्च पुनः पुनः सविभ्रमं भ्रूयुगमुत्क्षिपति । केशबन्धनप्रावरणादिकं च स्त्रीवत् करोति । योषिदाभरणादिपरिधानं बहु मन्यते । स्नानादिकं च प्रच्छन्नं समाचरति । पुरुषसमाजमध्ये च सभयं शङ्कितस्तिष्ठति । स्त्रीसमाजे तु निःशङ्कितः प्रमदोचितं च रन्धनखण्डनपीषणादिकं कर्म प्रविदधाति इत्यादि महिलास्वभावत्वं पण्डकलक्षणम्। अपरं च **स्वरवर्णभेदः** । उपलक्षणत्वाद् गन्धरसस्पर्शाश्च स्त्रीपुरुषापेक्षया विलक्षणास्तस्य भवन्तीत्यर्थः । **मेंढ्रं** पुरुषचिह्नं महद्भवति । **मृद्वी च वाणी** ललनाया इव सञ्जायते । योषित इव **सशब्दं मूत्रमभिजायते फेनरहितं** च तद्भवति । **एतानि षट् पण्डकलक्षणानि** १ । **वातिको** नाम यस्य मोहकर्मोदयेन सागारिकं[A] सविकारं जातं सत् स्वभावस्थं न स्याद् यावदनाचारं नाऽचरति २। **क्लीबः** क्लीब्यते इति क्लीबो गुणनिष्पन्ननामा, यस्य मैथुनाभिप्राये अङ्गादानं विकारं भजति बीजबिन्दूँश्च गलति । यदि निरुणद्धि तदा कालान्तरेण तृतीयः स्यात् ३। यस्य तु वृषणौ श्वयतः शोफं भजतः स **कुम्भी** । स च द्विधा—वातदोषेण यस्य सागारिकं[A] वृषणौ वा श्वयति[B] स जातिकुम्भी—रोगीत्यर्थः । यस्य पुनर्मोहोत्कटतया सागारिकं वृषणौ वाऽसेवमानः श्वयति, स वेदकुम्भी ४। यस्य प्रतिसेवमानं दृष्ट्वा ईर्ष्याऽभिलाष उत्पद्यते, स **ईर्ष्यालुर्वेदोत्कटः** स्त्रीमलभमानस्तृतीयः स्यात् ५। वेदोत्कटतया अभीक्ष्णप्रतिसेवनासक्तो गृहचटक इव **शकुनी** भवति ६। यो मैथुनमासेवमानो बीजनिसर्गे जाते जिह्वया श्वान इव तदेव लेढि, स **तत्कर्मसेवी** सोऽप्यसेवकस्तृतीयः स्यात् ७। यस्य शुक्लपक्षे शुक्लपक्षे अतीव मोहोद्भवः स्यात् द्वितीयपक्षे त्वल्पः । अथवा शुक्लपक्षे कृष्णपक्षे वा पक्षं यावदतीवोदयः स्यात् तावन्मात्रमेव च कालमल्पोदयः स **पक्षिकापक्षिकः** ८। यः सागारिकं[A] जिघ्रति तन्मलित्वा हस्तं जिघ्रति, तद्गन्धं च शुभं मन्यते, स **सौगन्धिकः** ९। यः सागारिकं स्त्रीसागारिकेऽनुप्रवेश्य तिष्ठति, स **आसिक्तः**, सोऽपि मोहोत्कटतयातीव व्यसनी निरुद्धबस्तिः कालान्तरेण तृतीयः स्यात् १० । एते पण्डकादयो दश नपुंसका नगरमहादाहसमानकामाध्यवसायसम्पन्नत्वात् स्त्र्याद्यासेवामाश्रित्यातीवाशुभाध्यवसायवत्त्वाच्च दीक्षाऽनर्हाः। शेषाः पुनः षट् वर्द्धितादयो नपुंसका निशीथोक्तविशेषलक्षणसम्भवे प्रव्रज्यायोग्याः । तेषामिदं स्वरूपम्—आयत्यां राजान्तःपुरमहल्लकपद[C]—प्राप्त्यादिनिमित्तं यस्य बालत्वेऽपि छेदं दत्त्वा वृषणौ गालितौ भवतः, स **वर्द्धितकः** ११ । यस्य तु जातमात्रस्याङ्गुष्ठाङ्गुलिभिर्मर्दयित्वा वृषणौ द्राव्येते, स **चिप्पितः** १२ । एतयोश्चैवं कृते सति किल नपुंसकवेदोदयःसम्पद्यते । कस्यचित्तु **मन्त्रसामर्थ्या**दन्यस्य **त्वौषधि**सामर्थ्यात् पुरुषवेदे स्त्रीवेदे वा समुपहते सति नपुंसकवेदः समुदेति १३-१४ । अपरस्य तु मदीयतपःप्रभावान्नपुंसको भवत्विति **ऋषिशापा**दन्यस्य तु **देवशापा**त्तदुदयो जायते इति १५-१६। एतेषामष्टचत्वारिंशतः प्रव्रज्यानर्हाणामुत्सर्गापवादपदाभ्यां प्ररूपणा प्रकल्पे[D] प्रदर्शिता विस्तरेण सा तत एवावसेया । एतेभ्योऽपरे सर्वेऽपि जातिकुलविनयादिगुणसम्पन्ना

---

**A.** मेहनम् । **B.** वर्धते । **C.** कंचुकी' इति भाषायाम् । **D.** निशीथे ।

बहुक्षीणप्रायकर्मांशाः प्रव्रज्याया योग्या मन्तव्याः । यश्च प्रव्रज्यार्थमुपस्थितो भवति, स एवं पृच्छ्यते—कोऽसि त्वं ? किं निमित्तं प्रव्रजसि ? किञ्च ते वैराग्यमिति पृष्टो यदि शुद्धोऽवगतः, ततस्तस्याग्रे साधुचर्या एषा कथ्यते—यावज्जीवं गोचरचर्यया भिक्षामटित्वाऽचित्तस्यैषणाविशुद्धस्याहारस्य भोजनं कर्तव्यम् । तदपि बालवृद्धशैक्षकादिसंविभागेन । नित्यं चतुष्कालं स्वाध्यायो विधातव्यः । यावज्जीवं देशतः सर्वतश्चाऽस्नानम्। ऋतुबद्धे काले भूमौ शय्या, वर्षारात्रे फलकादिशयनम् । दिवसे न स्वप्तव्यम्, रात्रौ तृतीये यामे निद्रामोक्षः। अष्टादश शीलाङ्गसहस्रा धरणीयाः । लोचादिकाः क्लेशा अनेके कार्याः । एवमुक्ते यदि स सर्वमभ्युपगच्छति, तदा तस्य सूत्रोक्तविधिना प्रव्रज्या प्रदेया । ततस्तस्य प्रासुक आहारो दीयते । स च भिक्षां न हिण्डाप्यते किन्त्वहिण्डमान एव ग्रहणशिक्षामासेवनशिक्षां च ग्राह्यते । ग्रहणशिक्षा नाम पाठः । आसेवनाशिक्षा सामाचारीशिक्षणम् । यदा च द्विविधामपि शिक्षां ग्राहितोऽधीतषड्जीवनिकायाध्ययनश्च स स्यात् तदा तस्याग्रे तदर्थः कथ्यते । ततोऽधिगतोऽर्थोऽनेन सम्यक् श्रद्धानविषयीकृतश्च यदि तदानीं तस्येत्थं परीक्षा क्रियते, यथा—उच्चारप्रश्रवणादिपरिष्ठापनार्थमस्थण्डिलं सचित्तपृथिवीकायात्मकं दर्श्यते । यदि तत्र न परिष्ठापयति स्थाननिषदनादि च न करोति, तदा ज्ञायते सम्यक् परिणतोऽस्य धर्म इति । एवमप्कायविषये नदीतटाकाद्युदकसमीपे परीक्षा । तेजःकाये साऽग्निवसतौ प्रदीपमवष्वष्कय उत्ष्वष्कय वा । तथा वातविषये घर्मार्त्तो भण्यते—तालवृन्तादिना वातोदीरणां कुरु, अभिधारणं वा कुरु, यदि न करोति तदा परिणतः । हरितकाये त्रसेषु च पृथिव्यामिव परीक्षा कार्या । एवं गोचरगतोऽपि पृथिव्यादिभिः कायैः परीक्ष्यते, तद्यथा—सरजस्केनोदकार्द्रेण वा हस्तेन मात्रकेण वा भिक्षा ग्राह्यते, इत्यादि परीक्षया त्रिविधत्रिविधेन षड्जीवनिकायपरिहारी स यद्यवगम्यते तदा व्रतारोपणयोग्यः । ततो द्रव्यादौ प्रशस्ते तस्य आचार्येणात्मनो वामपार्श्वे स्थापितस्य व्रतारोपणरूपोपस्थापना यथाविधि विधेया । ततो दिग् निबध्यते द्विविधा त्रिविधा वा । तत्र साधोर्द्विविधा । तद्यथा—आचार्यस्योपाध्यायस्य च । व्रतिन्यास्त्रिविधा । तद्यथा—आचार्यस्यो—पाध्यायस्य प्रवर्त्तिन्याश्च । तथा—उपस्थापनानन्तरं तपः कार्यते । तच्चाऽभक्तार्थमाचाम्लं निर्विकृतिकं वा। तथा द्वौ पितापुत्रौ प्रव्रजितौ यदि द्वावपि युगपत् प्राप्तौ, तर्हि युगपदुपस्थाप्येते । अथ पुत्रः सूत्रादिभिरप्राप्तः स्थविरस्तु प्राप्तस्तर्हि तस्योपस्थापना विधेया । यदि पुनः पुत्रः प्राप्तः, स्थविरस्त्वप्राप्तः तर्हि यावदुपस्थापना—दिवसः शुद्धः समेति तावत् स्थविरः प्रयत्नेन शिक्ष्यते, यदि तावता प्राप्तो भवति, ततो द्वावपि युगपदुपस्थाप्येते। अथाऽऽदरेण शिक्ष्यमाणोऽपि न प्राप्तस्तदा स्थविरेणानुज्ञाते सति क्षुल्लक उपस्थाप्यते । अथ स्थविरो न मन्यते, तदा प्रज्ञापना कर्त्तव्या राजादिदृष्टान्तेन । स चैवम्— एगो राया रज्जपरिभट्ठो सपुत्तो अन्नरायाणमोलग्गिउं^A^माढत्तो । सो राया पुत्तस्स तुट्ठो । तं से पुत्तं रज्जि ठाविउमिच्छइ। किं सो पिआ नाणुजाणइ ? एवं तव जइ पुत्तो महव्वयरज्जं पावइ ता किं न मन्नसि ?' एवं प्रज्ञापितेन स्थविरेणानुज्ञाते

A. सेवितुमारब्धः ।

क्षुल्लकस्योपस्थापना कर्त्तव्या । अथ स यद्येवं प्रज्ञाप्यमानो नेच्छति तदा पञ्च दिवसान् यावत्तिष्ठन्ति । ततः पुनरपि प्रज्ञाप्यते । तथाऽप्यनिच्छायां पुनरपि पञ्चाहं तिष्ठन्ति। पुनः प्रज्ञाप्यते तथाऽप्यनिष्टौ भूयः पञ्चाहमवतिष्ठन्ते । एवं यदि त्रिपञ्चाहकालेन स्थविरः प्राप्तो भवति, तदा युगपदुपस्थापना । अतः परं स्थविरेऽनिच्छत्यपि क्षुल्लक उपस्थाप्यते । अथाऽहङ्कारी सन्नहं पुत्रादवमतरो भविष्यामीति विचिन्त्य कदाचिदुन्निष्क्रामेत् । गुरोः क्षुल्लकस्य चोपरि प्रद्वेषं गच्छेत् । एवं स्वरूपे ज्ञाते त्रयाणां पञ्चाहानामुपर्यपि क्षुल्लकः प्रतीक्षाप्यते यावत्तेनाऽधीतमिति । एवं राजाऽमात्ययोः, राज्ञा च सह श्रेष्ठिसार्थवाहयोरपि वक्तव्यम्। एवं संयतीमध्ये मातादुहित्रोर्द्वयोः, महादेव्यमात्यपत्न्योः, श्रेष्ठिसार्थवाहपत्न्योश्च निरवशेषं वाच्यम्। ते चोपस्थाप्यमाना गुरोर्वामपार्श्वस्था एकोऽनेको वा गजदन्तवदवनता भवन्ति । तत्र यदि ते गुरुसमीपमग्रतो वाऽभिसरन्ति तदा गच्छस्य वृद्धिर्ज्ञातव्या । यथाऽन्येऽपि बहवः प्रव्रजिष्यन्ति । अथ पश्चाद् बहिर्वाऽपसरन्ति तदा स उपस्थाप्यमानोऽन्यो वा उन्निष्क्रमिष्यति अपद्रविष्यति वेति निमित्तम् । तथा—आचार्य उपाध्यायो वा स्मरन् साधुरयमुपस्थापनार्हो जात इति जानानश्चतूरात्रमध्ये पञ्चरात्रमध्ये वा तन्नोपस्थापयति तत्र यदि तस्य कल्पाकस्य कश्चिन्माननीयः पिता भ्राता वा ज्येष्ठः स्वामी वा कल्पाको भावी पञ्चरात्रेण पञ्चदशरात्रेण वा ततो नास्ति तस्य प्रायश्चित्तम् । माननीयेऽनुपस्थापिते तस्योपस्थापनाया अयोगात् । अथ नास्ति तस्य कश्चिन् माननीयः कल्पाको भावी ततस्तस्याऽऽचार्यस्योपाध्यायस्य वा प्रायश्चित्तम् । अत्रादेशद्वयम्—एके प्राहुश्चतूरात्रात् परं यद्यन्यानि चत्वारि दिनानि नोपस्थापयति, तत आचार्यस्योपाध्यायस्य च प्रत्येकं प्रायश्चित्तं चतुर्गुरुकम् । अथ ततोऽप्यन्यानि चत्वारि दिनानि लङ्घयति, ततः षड्लघुकम् । ततोऽप्यन्यानि चेच्चत्वारि दिनानि ततः षड्गुरुकम् । ततोऽप्यन्यानि यदि चत्वारि दिनानि ततश्चतुर्गुरुकश्छेदः । परमन्यानि चत्वारि दिनानि यदि तर्हि षड्लघुकश्छेदः । ततोऽपि चेदन्यानि चत्वारि ततः षड्गुरुकश्छेदः । ततः परमेकैकदिवसातिक्रमे मूलानवस्थाप्यपाराञ्चितानि। द्वितीयादेशवादिनः प्राहुः—पञ्चरात्रात् परं यदि नोपस्थापयति ततश्चतुर्गुरुकं प्रायश्चित्तम् । परं यदि पञ्चदिनानि लङ्घयति ततः षड्लघुकम् । ततः परमपि पञ्चरात्रातिक्रमे षड्गुरुकम् । ततोऽपि परं यदि पञ्चदिनानि वाहयति ततश्चतुर्गुरुकश्छेदः । ततः परमन्यानि चेत् पञ्चदिनानि ततः षड्लघुकश्छेदः । ततोऽपि पञ्चरात्रातिवाहने षड्गुरुकश्छेदः । ततः परमेकैकदिवसातिवाहने मूलानवस्थाप्य—पाराञ्चितानि । अथ दर्पप्रमादव्याक्षेपग्लानत्वकारणैरस्मरन्नोपस्थापयति, तत्र व्यायामवल्गनादिषु व्यापृततया यो निष्कारणोऽनादरः स दर्पः, तेनानुपस्थापने प्रायश्चित्तं चत्वारो गुरुकाः। विकथादीनां पञ्चानां प्रमादानामन्यतमेन प्रमादेनानुपस्थापने चत्वारो लघुकाः । सीवनतुन्नस्वाध्यायध्यानपात्रलेपादिदानकार्यैर्यो व्याक्षेपः, तेनानुपस्थापने गुरुको मासः । ग्लानत्वेन त्वनुपस्थापने लघुमासः । अथ राज्ञो युवराजस्यामात्यादेर्वा प्रतिदिवसमागच्छतो धर्मकथा कथ्यते । परप्रवादी वा कश्चनाऽप्युपस्थितः स वादे निग्रहीतव्य इति तन्निग्रहणाय विशेषतः शास्त्राभ्यासे,

तेन सह वादे वा दीयमाने, यदि वाऽऽचार्यस्यान्यस्य वा साधोर्यो उपस्थाप्यः तस्य वाऽत्युत्कटे ग्लानत्वे जाते व्याकुलीभवनतः स्मरन्नस्मरन् वा यद्यपि नोपस्थापयति तथापि न तस्य प्रायश्चित्तम्, कारणतो व्याकुलीभवनात्। अथाऽऽचार्य उपाध्यायो वा यदा स्मरति तदा न साधकं नक्षत्रादिकम्, यदा तु साधकं नक्षत्रादिकं तदा बहु व्याक्षेपतो न स्मरति । एवं स्मरन्नस्मरँश्च कल्पाकं नोपस्थापयति । तत्र यदि तस्य कश्चिन्माननीयः कल्पाको भावी तदा तदपेक्षया तस्यानुपस्थापनेऽपि न प्रायश्चित्तम् । अथ नास्ति कश्चिन्माननीयः कल्पाको भावी तदा दशदिवसातिक्रमे चत्वारो गुरुकाः । ततः परं दशदिनातिक्रमे षड्लघुकम् । ततः परमपि दशदिनातिवाहने षड्गुरुकम् । ततोऽपि दश दिनातिक्रमे चतुर्गुरुकश्छेदः । ततोऽपि दशदिनातिक्रमे षड्लघुश्छेदः । ततोऽपि दशदिनातिक्रमे षड्गुरुकश्छेदः। तत एकैकदिनातिक्रमे मूलानवस्थाप्यपाराञ्चितानि । एष प्रथममादेशः, द्वितीयादेशे पुनस्तपसा छेदेन वाऽदम्यमानेऽथवा धृतिबलेन कायबलेन वा दुर्बले तपसश्छेदस्य वा दातुमशक्यतया संवत्सरं यावदाचार्यत्वहरणम्, गणो ह्रियते इति भावः । एवमुपस्थापनाविषयो विधिर्निशीथादौ विस्तरेणा—भिहितः । तदन्यथाकरणे प्रायश्चित्तम् । तच्च— **अप्पत्ते अकहित्ता**' इत्यादि प्रस्तुतगाथयाऽत्र प्रतिपाद्यते । इति सैव साम्प्रतं प्रतन्यते । अप्राप्ते श्रुतेन पूर्वकाले शस्त्रपरिज्ञाध्ययनपर्यन्तेन सम्प्रति षड्जीवनिकायपर्यन्तेन पर्यायेण वा षण्मासादिकेन। तथा—**अकथयित्वा जीवाऽजीवान् बन्धं मोक्षं च** । उपलक्षणमेतत् तेन पृथिव्यादयो जीवाः। धर्माधर्माऽस्तिकायादयोऽजीवा आश्रवो बन्धः पुण्यं पापं संवरो निर्जरा मोक्षश्च । एतान्नवपदार्थान् सभेदान् कर्मबन्धभेदहेतूँश्चाकथयित्वा । उपलक्षणत्वादनधिगते जीवाजीवादौ तथा षड्जीवनिकायरक्षाविषयपरीक्षाया अभावे । इदमुक्तं भवति—येन षड्जीवनिकायाध्ययनं पठितं, न च तस्यार्थः श्रुतः । अथ श्रुतः, परं नावगतः । अवगतोऽपि न श्रद्धानविषयीकृतः । यश्च षड्जीवनिकायरक्षाविषये न परीक्षितः तस्योपस्थापने क्रियमाणे **उपस्थापयितुः प्रायश्चित्तं चत्वारो गुरुकाः** । न केवलमेतत् प्रायश्चित्तं किन्त्वाज्ञादयो दोषाः । विराधना या पूर्वभणिता सा चेयम्—उपस्थापितो भिक्षादौ किल कल्पिको भवति । ततस्तस्य भिक्षादिप्रेषणे षण्णां जीवनिकायानां विराधना अपरिज्ञानात् । ततस्तन्निष्पन्नमपि प्रायश्चित्तं उपस्थापयितुरुपढौकते । स च महाव्रतानामयोग्योऽत्र मालया दृष्टान्तो, यथा—स्थाणौ शूलाप्राये पञ्चवर्णसुगन्धपुष्पमाला समारोप्यमाणा न शोभते। एवमयोग्येऽपि पञ्चमहाव्रतमाला न शोभते ।।३२।। एवं सूत्रार्थाप्राप्तोपस्थापनाविषयं प्रायश्चित्तमुक्तम्। अथ सूत्रार्थाऽऽशातनाविषयं तदाह—

**सामण्णेणं सुत्तासायणि चउलहुग चउगुरू अत्थे ।**
**लहुगुरुलहुगा वा तदुवगरणवन्नासु तिविहासु ।।३३।।**

व्याख्या—**सामान्येन** ओघेनाऽऽगाढाऽनागाढाद्यविशेषेण **सूत्राऽऽशातनायां सूत्रं** परमाप्तप्रणीताऽऽगमरूपं तस्याऽऽशातनायामविधिपाठादिरूपायां **चतुर्लघुकाः** प्रायश्चित्तम् । **अर्थे** अर्थविषयायामाशातनायामविधिश्रवणादि—रूपायां **चतुर्गुरवः** । तदुपकरणावज्ञासु त्रिविधासु । **तस्य ज्ञानस्योपकरणानि** पुस्तकपट्टिका^A^दीनि, तेषामवज्ञा—स्वाशातनासु त्रिविधासु जघन्यमध्यमोत्कृष्टभेदासु यथाक्रमं **लघुगुरुलघुका वा** । जघन्यावज्ञायां **लघुमासः**,

A. पाटी' इति भाषायाम् ।

मध्यमावज्ञायां **गुरुमासः**, उत्कृष्टावज्ञायां **चतुर्लघव** इत्यर्थः । अत्र **वाशब्दः** समुच्चये पूरणे वा ।।३३।।
अथाविधिसूत्रार्थग्रहणादिविषयं प्रायश्चित्तमाह—

**भूअपमज्जणुओग—काल—अविसज्जणाइसु अ भिन्नं ।**
**अक्खनिसिज्जअविहि चउ—गुरु(रू?) असमायारि लहु(हू?) सेसे ।।३४।।**

व्याख्या—**भूः** भूमिः सूत्रमण्डल्यर्थमण्डल्योः प्रक्रमात् भोजनमण्डल्याश्च स्थानं, तस्या **अप्रमार्जने अनुयोग—कालाविसर्जनादिषु** च । अनुयोगकालयोरविसर्जनम् अप्रतिक्रमणम्, आदिशब्दात् सम्पूर्णश्रुतस्कन्धपरावर्त्त—नान्तरं कायोत्सर्गाकरणम्, तेषु **भिन्नं** भिन्नमासः । **अक्षनिषद्याऽविधौ** अनुयोगकालेऽक्षाणामस्थापने गुरुयोग्याऽक्षयोग्यनिषद्ययोरकरणे **चतुर्गुरवः** । **शेषे अविधौ** अनुयोगग्रहणशेषविध्यकरणे **असमाचारीनिष्पन्नो लघुमासः** । तद्यथा—अनुयोगप्रारम्भे गुरूणां वन्दनकाऽदाने कायोत्सर्गाकरणे च लघुमासः ।।३४।।
अथ श्रुतोपचारयोगस्य भङ्गे प्रायश्चित्तमाह—

**आगाढणागाढस्स सव्वभंगे अ देसभंगे अ ।**
**जोगस्स कमा छल्लहु चउगुरुचउगुरुगचउलहुगा ।।३५।।**

व्याख्या—**योगो** द्विधा—**आगाढोऽनागाढश्च** । उभयोरपि **सर्वभङ्गोऽयं**—यदाऽऽचामाम्लं न करोति विकृतीर्भुङ्क्ते । **देशभङ्गस्तु**—योगसमाप्तौ विकृतीर्भुक्त्वा पश्चाद्विकृत्यादानकायोत्सर्गं करोति, स्वयमेव वा गुरोरसमक्षं विकृत्यादानकायोत्सर्गं करोति, स्वयमेव वा गुरोरसमक्षं विकृत्यादानकायोत्सर्गं कृत्वा भुङ्क्ते । अभणितोऽपि वा गुरून् भणति—सन्दिशत विकृत्यादिकायोत्सर्गं करोमि, एकपात्रके विकृतिमाचामाम्लप्रायोग्यं वाऽऽदत्ते । इह क्रमाद्—यथाक्रममागाढयोगस्य **सर्वभङ्गे षड्लघु** । **देशभङ्गे चतुर्गुरु** । **अनागाढयोगस्य सर्वभङ्गे चतुर्गुरुकाः** । **देशभङ्गे चतुर्लघुका** इति ज्ञानाचारातिचारप्रायश्चित्तमुक्तम् ।।३५।।
अधुना दर्शनाचारातिचारप्रायश्चित्ताधिकारः । तत्र दर्शनं—देवगुर्वादितत्त्वसम्यक्श्रद्धानलक्षणमतः प्रथमं देवगुर्वाद्याशातनाविषयं प्रायश्चित्तमाह—

**जिणजिणहरठवणगुरू गुरु—आवलियाण तिविहऽवन्नाए ।**
**लहु—गुरु—लहुगा ठवणा—यरियावलि—नासि लहुगुरुगा ।।३६।।**

व्याख्या—**जिना** जिनबिम्बानि **जिनगृहाणि** जिनप्रासादाः **स्थापनागुरवोऽक्षाद्या गुरवः** प्रत्यक्षा आचार्यप्रभृतयः **आवलिका** जपमाला । एतेषां **त्रिविधाऽवज्ञायां** त्रिविधाशातनायां जघन्यमध्यमोत्कृष्टभेदायां यथाक्रमं लघुगुरुलघुकाः । जिनबिम्बादीनां जघन्याशातनायां लघुमासः । मध्यमाशातनायां गुरुमासः । उत्कृष्टाशातनायां चत्वारो लघुका इत्यर्थः । **स्थापनाचार्यावलिकानाशे लघुगुरुकौ** स्थापनाचार्यनाशे **लघुमासः**, जपमालानाशे **गुरुमास** इति भावः । क्वचित्पुनरेवं—ठवणायरिआवलिआनासे गुरुगो अ आयामम् ।।३६।।
अथ दर्शनाचाराऽतिचारप्रायश्चित्तमाह—

**संकाइसु तिसु देसे गुरुगा मूलं तु सव्वहिं होइ ।**
**दिट्ठी(ट्ठि?)मोहे अपसंसणे अथिर अकरणे लहुगा ।।३७।।**

व्याख्या—इह दर्शनाचाराऽतिचारोऽष्टधा । तद्यथा—**शङ्का—ऽऽकाङ्क्षा विचिकित्साऽमूढदृष्टिरुपबृंहा स्थिरीकरणं वात्सल्यं प्रभावना चेति** । तत्र संशयकरणं **शङ्का** । सा द्विधा—देशतः सर्वतश्च । तत्र देशतः तुल्येऽपि जीवत्वे कथमेके भव्या अपरे त्वभव्या ? इत्यादि । सर्वतस्तु प्राकृतभाषानिबद्धमिदं श्रुतम्, न ज्ञायते किं सर्वज्ञेन प्रणीतं आहोश्वित् कुशलमतिना केनापि परिकल्पितमिति १ । अन्याऽन्यदर्शनग्रहण**माकाङ्क्षा** । साऽपि देशत एकं किञ्चित् कुतीर्थिकमतमाकाङ्क्षति । यथा—अस्मिन्नपि खल्वहिंसैव धर्मो मोक्षश्च फलमुच्यते । सर्वतः सर्वाणि—शाक्या—ऽऽजीवक—कपिल—बोटिको—लूक—वेद—तापसादिकुमतान्याकाङ्क्षति, कृषीबल इव सर्वधान्यवपनानि कदाचित् किञ्चित् फलतीति धिया २ । **विचिकित्सा** आत्मनः फलं प्रत्यनाश्वासः, यथा—आसीत्तादृशानुष्ठायिनां पुरातनानां महासत्त्वानां मोक्षः अस्मादृशानां त्वस्नानकेशलुञ्चनादिकं कष्टमेव मन्दसत्त्वत्वात् क्व मोक्षसम्भव ? इति देशतः स्तोकोऽनाश्वासः । सर्वतस्तु सर्वथाऽनाश्वासः । यद्वा—**'विदक् ज्ञाने'** विदन्तीति क्विब्लोपे **विदः** साधवः तेषां **जुगुप्सा** । देशतोऽहो ! मलदुर्गन्धा इमे मुनयो यद्युष्णोदकेन स्नायुस्तदा को दोषः स्यादि ? त्यादि। सर्वतस्तु मण्डल्यां नन्दिपात्रे मिथः संसृष्टभोजिनोऽमी गुप्तिगृहवासिन इव महामलीमसाङ्गवाससः प्रागदत्तदानत्वेनाऽऽजन्म भिक्षाचरा इत्यादि ३ । **मूढदृष्टिः** परतीर्थिनां राजादिकृतां पूजां मन्त्राद्यतिशयान् वा दृष्टवा, तदाऽऽगमान् वा श्रुत्वा मतिव्यामोहो देशतः स्तोकः । सर्वतस्तु सर्वथा ४ । **उपबृंहा प्रशंसा** । सा ज्ञान—दर्शन—तपः—संयम—वैयावृत्त्याद्युद्यतानां साध्वादीनामुत्साहवृद्धिहेतुः प्रशस्ता, मिथ्यादृशां—शाक्यचरकादीनां त्वसावप्रशस्ता ५ । **स्थिरीकरणं** सीदतश्चारित्रादिषु स्थैर्यहेतुः प्रशस्तम्, असंयमविषये पुनस्तदप्रशस्तम् ६ । **वात्सल्यम्** आचार्यग्लानप्राघुर्णकतपस्विसेहासहबालवृद्धादीनामाहारोपध्यादिना समाधिसम्पादनं प्रशस्तम्, गृहस्थपार्श्वस्थाद्युपष्टम्भरूपं तु तदप्रशस्तम् ७ । **प्रभावना च** तीर्थकरप्रवचनादिविषया प्रशस्ता, कुतीर्थिकविषया त्वप्रशस्ता ८ । इह चोपबृंहादीनां प्रशस्तानामकरणेऽतिचारता, अप्रशस्तानां तु करणे । देशसर्वभेदश्चोपबृंहादीनामपि शङ्कादीनामिव ज्ञेयः । इति दर्शनाचारातिचारस्याष्टौ भेदाः । तत्र **शङ्कादिषु** शङ्का—काङ्क्षा—विचिकित्सासु तिसृषु **देशतो गुरुकाश्चत्वारः**, **सर्वतः** पुनः शङ्कादिषु तिसृष्वपि **मूलं** सर्वपर्यायछेदो भवति । तपोऽर्हप्रायश्चित्ताधिकारेऽपि मूलमत्र लाघवार्थमभ्यधायि । **दृष्टिमोहे** मूढदृष्टौ **अप्रशंसने** ज्ञानदर्शनतपःसंयमादिगुणानामनुपबृंहायाम् अस्थिरीकरणे च चारित्रादिषु सीदतां स्थैर्यानापादने **चत्वारो लघुकाः** प्रायश्चित्तम् ।।३७।। अथाऽवात्सल्यप्रायश्चित्तं विषयविभागेनाऽऽह—

**गुरुगाऽऽयरिअगिलाणाऽवच्छल्ले लहुग खवगपाहुणए ।**
**गुरुगो अ बालवुड्ढे सेहे अ महोअरे लहुओ ।।३८।।**

व्याख्या—इह साधुना सर्वेषां साधर्मिकाणां साध्वादीनामाहारवस्त्रपात्रभेषजौषधपादशौचाऽभ्यङ्गनविश्रामणादिभिः सर्वस्थाम्ना वात्सल्यं कर्त्तव्यम्, गुरुग्लानादीनां तु विशेषतः । तेषां तदकरणे प्रायश्चित्तम्, यथा—**आचार्यग्लाना-ऽवात्सल्ये** आचार्यग्लानयोर्वात्सल्याऽकरणे प्रत्येकं **चत्वारो गुरुकाः** । **क्षपकप्राघुर्णकयोः क्षपकः** तपस्वी विकृष्टतपःकारी **प्राघुर्णको** ग्रामान्तरादागतस्तयोर्वात्सल्याऽकरणे **चत्वारो लघुकाः** । **बालवृद्धयोरवात्सल्ये गुरुको मासः** । **शैक्षे** अभिनवप्रव्रजिते **महोदरे च** बहुभोजिनि वात्सल्याऽविधाने **लघुको मासः** । **चशब्दात्** सामान्यतः साधर्मिकवात्सल्याऽकरणे लघुमासः ।।३८।। अथाऽप्रभावनाप्रायश्चित्तमाह—

**सामन्नेणं गुरुगा ससत्तिए अप्पभावणे अहवा ।**
**गुरुवसभभिक्खुथेरे खुड्डे गुरुगाइ भिन्नंतं ।।३९।।**

व्याख्या—इह यद्यपि प्रवचनं शाश्वतत्वात्तीर्थकरभाषितत्वात् सुरासुरनरनमस्कृतत्वाद् वा स्वयमेव दीप्यते तथापि गुणाधिकपुरुषाः स्वस्य दर्शनशुद्धये प्रवचनं प्रभावयन्ति, ते च प्रवचनप्रभावका अतिशय्यादयः । उक्तं च—

**अइसेसिइड्ढिधम्मकहिवाइआयरिअ खवगनेमित्ती । विज्जा रायगणसंमया य तित्थं पभाविंति ।'**
(व्य०सू० ६४, नि०भा० ३३)

अस्या अक्षरगमनिका—**अतिशयी** अवधि—मनःपर्यायज्ञानयुक्तोऽतिशय्यध्ययनो वा । **ऋद्धिग्रहणात्** राजामात्यादिः ऋद्धिमान् दीक्षाग्राहकः । आमर्षौषध्यादि **ऋद्धिप्राप्तो** वा । **धर्मकथी** आक्षेपणी—विक्षेपणी—निर्वेदनी—संवेदनीकथाभिर्यो धर्ममाख्याति । **वादी** वादलब्धिसम्पन्नः । **आचार्यः** स्वपरसिद्धान्तप्ररूपकः । **क्षपकः** तपस्वी । **नैमित्तिकः** अष्टाङ्गनिमित्तवेत्ता । **विद्याग्रहणात्** विद्यासिद्धः । **राजगणसंमताश्च** । **राजसंमता** मन्त्र्यादयः **गणसंमता** महत्तरादयः, **चशब्दाद्** दानश्राद्धादिपरिग्रहः । एते **तीर्थं** प्रवचनं **प्रभावयन्ति** । शक्तौ सत्यामेतस्याऽप्रभावने च प्रायश्चित्तम्, तद्यथा—**सामान्येन** अविशेषेण **स्वशक्तौ** स्वसामर्थ्ये सत्याम् **अप्रभावने** प्रवचनस्य **चत्वारो गुरुकाः** । **अथवा** पूर्वोक्ताः प्रभावकाः । एतेषां पञ्चानामाचार्यादीनामन्तर्गता अतस्तद्विभागेन दर्शयति—**गुरुवृषभभिक्षुस्थविरक्षुल्लेषु गुरुकादि भिन्नान्तं प्रायश्चित्तम्** । आचार्यस्य प्रवचनाऽप्रभावने चतुर्गुरुकाः । उपाध्यायस्य चतुर्लघुकाः । भिक्षोर्गुरुमासः । स्थविरस्य लघुमासः । क्षुल्लस्य भिन्नमास इत्यर्थः ।।३९।।

अथाऽप्रशस्तोपबृंहादिकरणे प्रायश्चित्तमाह—

**मिच्छत्तीणं उववूह—भत्ति—थिरकरण—वच्छलाईसु ।**
**खुड्डगभिक्खू—वसभाऽऽयरिए लहुगुरुलहुगगुरुगा ।।४०।।**

व्याख्या—**मिथ्यात्विनां** कुतीर्थप्रवृत्तजनानाम् **उपबृंहा** प्रशंसा, **भक्तिः** सेवा, **स्थिरीकरणं वात्सल्यम्, आदिशब्दात्** प्रभावना च । एतेषु **क्षुल्लकभिक्षुवृषभाऽऽचार्याणामनुक्रमेण लघुगुरुलघुकगुरुकाः** । क्षुल्लकस्य लघुमासः,

भिक्षोर्गुरुमासः, उपाध्यायस्य चतुर्लघु, आचार्यस्य चतुर्गुरु इत्यर्थः । इति दर्शनाचारातिचारप्रायश्चित्तम–भिहितम् ।।४०।। साम्प्रतं चारित्राचारातिचारप्रायश्चित्तमाह—

**समिईसु अ गुत्तीसु अ लहुगो ओहेण असमिइ अगुत्ते ।**
**आणाइविराहणया विसेसओ भण्णिही उवरिं ।।४१।।**

व्याख्या—इह **समितयः** पञ्च—ईर्यासमितिः, भाषासमितिः, एषणासमितिः, आदाननिक्षेपसमितिः, पारिष्ठा–पनिकासमितिः । गुप्तयस्तिस्रः—मनोगुप्तिः, वचनगुप्तिः, कायगुप्तिः । तत्र जन्तुजातरक्षानिमित्तं युगमात्र–भूमिकान्तरदत्तदृष्टेरव्याक्षिप्तचित्तस्य प्रतिपदं चक्षुषा विशोधयतः साधोः संयमोपकरणाद्यर्थं या गमनक्रिया सा ईर्यासमितिः । मृदुमधुरानवद्यहितमितवचनभाषणं भाषासमितिः । सूत्रानुसारेण रजोहरणवस्त्रपात्रा–ऽशनपाननिलयौषधान्वेषणम् एषणासमितिः । धर्मोपकरणानां प्रतिलेखनाप्रमार्जनापूर्वकमेव ग्रहणमोचन–मादाननिक्षेपसमितिः। मूत्रमलश्लेष्मपुरीषादीनां विवेकार्ह—संसक्तभक्तपानादीनां वा जन्तुविरहिते स्थण्डिले विधिना परिष्ठापनं पारिष्ठापनिकासमितिः । सावद्यमनःसङ्कल्पगोपनं मनोगुप्तिः । सावद्यवचनरोधनं मौनेन वाऽवस्थानं वाग्गुप्तिः । कायव्यापारनिवारणं कायगुप्तिः । ननु समितिगुप्त्योः कः प्रतिविशेषः ?, उच्यते—समितिर्व्यापाररूपा गुप्तिस्तु व्यापाराव्यापाररूपा । यदुक्तम्—

**समितीण य गुत्तीण य एसो भेओ उ होइ नायव्वो । समिई पयाररूवा गुत्ती पुण उभयरूवा उ ।।**
**समिओ नियमा गुत्तो गुत्तो समिअत्तणंमि भइअव्वो । कुसलवयमुदीरिंतो जं वयगुत्तो वि समिओ वि ।।**
**समिई पयाररूवा गुत्ती पुण हुंति उभयरूवा उ । कुसलवयमुदीरिंतो तेणं गुत्तो वि समिओ वि ।।**
**गुत्तो पुण जो साहू अप्पविआराइ नाम गुत्तीए । सो न समिओ त्ति वुच्चइ तीसे उ विआररूवत्ता' ।।**

(नि०भा० ३६ तः ३९)

एतासु **पञ्चसु समितिष्वसमिते तिसृषु गुप्तिष्वगुप्ते** च **ओघेन** सामान्येन **मासलघुकः** । **आज्ञाभङ्गादयो** **दोषा** आत्मसंयमविराधना च स्यात् । **विशेषतः** पुनश्चारित्राचारातिचारप्रायश्चित्तं पञ्चमहाव्रतादिक्रमेण **उपरिष्टाद्** **भणिष्यते** ।।४१।। तत्र प्रथममहाव्रतातिचारप्रायश्चित्तं त्रयोदशगाथाभिः प्रतिपादयति—

**पुढवाइएसु घट्टणम—गाढ—गाढपरिआवणु—द्दवणे ।**
**भिन्नं लहु—गुरु—चउलहु अणंति लहुगुरुलहुगगुरुगा ।।४२।।**

व्याख्या— **पृथिव्यादिषु** षष्ठीसप्तम्योरर्थं प्रत्यभेदात् पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां मनाक् स्पर्शनं **सङ्घट्टनम्**। अत्राह—ननु पृथिव्यादीनां चतुर्णां घटते सङ्घट्टनम्, अप्कायस्य तु कथं सङ्घट्टनं सम्भवति ? तस्य द्रवरूपत्वेन

स्पर्शमात्रेऽपि विनाशसम्भवात् । उच्यते—घटादिस्थस्याऽप्कायस्यापि मनाक्करचरणादिना चालने सङ्घट्टः सम्भवति। परितापनं द्विधा—अगाढं गाढं च । तत्र सम्मर्द्दनचालनाद्यैर्बहुतरपीडोत्पादनमगाढं बहुतमपीडोत्पादनं च गाढम् । उपद्रवणं सर्वथा जीवविनाशनं । तच्च पृथिव्यग्न्योरत्यन्तसम्मर्द्दनाद्यैः, अप्कायस्य तु वह्नितापन—दण्डाद्यभिघातनपानपादादिक्षालनादिना, वायोस्तालवृन्ताभिघातादिना, वनस्पतेः पत्रपुष्पाङ्कुरादित्रोटनादिभिः। ततश्चैतेषां पञ्चानामपि पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां प्रत्येकं घट्टने भिन्नमासः । अगाढपरितापने लघुमासः। गाढपरितापने गुरुमासः । उपद्रवणे चतुर्लघु इति क्रमेणावसेयम् । अनन्ते अनन्तकायविषये घट्टने लघुमासः। अगाढपरितापने गुरुमासः । गाढपरितापने चतुर्लघुकाः । उपद्रवणे चतुर्गुरुकाः ।।४२।।

**नववासवुट्ठिकिसलय—विराहणा जत्तिआणि दिवसाणि ।**
**तावइआ चउगुरुगा दसगं छप्पिआलसुइनासे ।।४३।।**

(सड्ढजीयकप्पो ९९)

व्याख्या—अभिनववर्षाकालवृष्टौ यानि किसलयान्यनन्तकायरूपाणि भवन्ति । तेषां विराधना यावन्ति दिनानि स्यात् तावन्तश्चतुर्गुरुकाः प्रायश्चित्तम् । अयमभिप्रायः—वर्षाकाले किल प्रथमवृष्टौ जातायां सत्यां दिनत्रयं यावत् सूक्ष्माङ्कुरा अन्तर्मुहूर्त्तमात्रकालमनन्तकायरूपाः प्रायः सर्वत्र भूतले प्रति क्षणं प्रादुर्भवन्तो भवन्ति । ते च दुर्लक्षतया परिहर्तुं दुःशकाः, अतस्तदानीं तद्विराधनाभीरवः साधवो दिनत्रयं यावत् तत्परिहाराय यथाशक्ति यतन्ते । यतमानानामपि च साधूनां नवीनाङ्कुरविराधना यावन्ति दिनानि स्यात् तावन्ति चतुर्गुरूणि भवन्ति । तथा षट्पद्यालयो यूकागृहं सूची सूचिकालयस्तयोर्नाशे प्रत्येकं दशकं प्रत्यासत्तेश्चतुर्गुरुकाणाम् ।।४३।।

**आऊतेऊविज्जुप्फुसणे उक्कोसमज्झिमजहन्ने ।**
**चउलहु—गुरु—लहुमासो चउगुरुवग्घार सुहुमे अ ।।४४।।**

व्याख्या—अप्तेजोविद्युताम् अप्कायतेजःकायविद्युदुद्योतानां स्पर्शने संस्पर्शे उत्कृष्टमध्यमजघन्ये उत्कृष्टे मध्यमे जघन्ये च क्रमेण चतुर्लघुः(घु?) गुरुमासः, लघुमासश्च । 'वग्घार' त्ति । वग्घारिअं या अविच्छिन्नधारा वृष्टिः, यस्यां वा वर्षाकल्पो नीव्रं वा श्च्योतति, वर्षाकल्पं वा भित्त्वान्तःकायमार्द्रयति या वृष्टिः । तत्र सूक्ष्मे च महिकारूपेऽप्काये गमने चतुर्गुरु ।।४४।।

**इगनइबहुसंघट्टे गुरुगो लहुगो अ एगसंघट्टे ।**
**लेवे लेवोवरि—कुंभ—तुंब—दइओडुगे लहुगा ।।४५।।**

व्याख्या—इह जलमार्गेण गच्छतां साधूनां संयमात्मविराधनादयोऽनेके दोषाः सम्भवन्ति । अतः कारणाभावे तन्मार्गेण न गन्तव्यम्, कारणेन तु यतनया गन्तव्यम् । तत्र चायं विधिः—नद्यादिजलं तावद् द्विधा स्ताघमस्ताघं च। यत्र नासिका न ब्रुडति तत् स्ताघं, यत्र तु नासिका ब्रुडति तदस्ताघम् । तत्र स्ताघजलं सङ्घट्टलेपलेपोपरिभिर्गम्यते।

अस्ताघजलं तु कुम्भतुम्बादिभिः । **यत्र** यस्मिन् जले उत्तरतां पादतलादारभ्य जङ्घाया अर्द्धं ब्रुडति, स **सङ्घट्टः**। तस्यैव सङ्घट्टस्योपरि यावन्नाभिरेतावद्यत्र प्रविशति, स लेपः । ततः परं नाभेरारभ्योपरि सर्वमपि लेपोपरिर्भण्यते। नदीं चोत्तरतां त्रयः पन्थानः । तद्यथा—सङ्क्रमः स्थलं नोस्थलं च । तत्र सङ्क्रम एकाङ्गिको वा स्यादनेकाङ्गिको वा । एकाङ्गिको य एकेन फलकादिना कृतः । अनेकाङ्गिकोऽनेकफलकादिनिर्मितः । सण्डेव[A]का अपि सङ्क्रमभेदा एव । ते च (द्विविधाः) तज्जाता अतज्जाता वा भवेयुः । तत्रैव जातास्तज्जाताः शिलादयः । अन्यतः स्थानादानीय स्थापिता अतज्जाता इट्टालकादयः । नद्या आकुण्टित[B]कूर्पराकारवलनं नदीकूर्परम्, जलोपरि कपाटानि मुक्त्वा पालिबन्धः क्रियते स वरणः । एताभ्यां यत्रोदकं परिहृत्य गम्यते तत्स्थलम् । नोस्थलं पुनश्चतुर्विधम् **उपलजलम्** अधः पाषाणा उपरि जलम् १, **वालुकाजलम्** अधो वालुका उपरि जलम् २, **शुद्धोदकम्** अधः शुद्धा मही उपरि जलम् ३, **पङ्कोदकम्** अधः कर्दम उपरि जलम् ४। एतेषां मध्ये पूर्वं निरपायस्थलेन गन्तव्यम् । तदभावे सङ्क्रमेण । तत्राऽप्येकाङ्गिकेन गन्तव्यम्, नाऽनेकाङ्गिकेन । एवं स्थिरेण, न चलेन । अपरिशाटिना—न परिशाटिना । सालम्बनेन न निरालम्बेन। सालम्बोऽपि द्विधा—एकतः सालम्बो द्विधा सालम्बश्च । पूर्वं द्विधा सालम्बेन, ततः एकतः सालम्बेनाऽपि । तथा निर्भयेन गन्तव्यम्, न सभयेन । एतेषामेकाङ्गिकादिनामभावे येऽनेकाङ्गिकादयस्तत्प्रतिपक्षास्तेष्वपि गमनं कर्त्तव्यम् । यत्राल्पतरा संयमात्मविराधना। सङ्क्रमाभावे नोस्थलेनाऽपि गन्तव्यम् । तत्र चतुर्विधे नोस्थले पूर्वमाक्रान्तनिष्प्रत्यपायेन उपलजलेन गन्तव्यम् । तदभावे अनाक्रान्तनिरपायेनाऽपि । उपलाद् वालुका अल्पसंहनना, तत उपलजलाभावे वालुकाजलेन गन्तव्यम् । वालुकायाः शुद्धपृथिवी स्वल्पतरसंहनना, ततो वालुकाजलाभावे शुद्धोदकेन गन्तव्यम्। सिकताजलादावप्याक्रान्ताऽनाक्रान्तादयो विशेषा अवगन्तव्याः । पङ्कजलं तु बहुप्रत्यपायम् अतः सर्वेषा—मुपलजलादीनामभावे तेन गम्यते, तत्राऽप्यगाधकर्द्दमे कण्टकादिरहितेऽपि न गम्यते । अस्ताघजलवत्तस्यापि गन्तुमशक्यत्वात् । एष सर्वोऽपि विधिः सचित्तपृथिव्याम् अचित्तपृथिव्यां पुनरप्कायादीनां संयोगाः कर्त्तव्यास्तद्यथा—पृथिवी सर्वत्राप्यचित्ता परमेकतोऽप्कायः अन्यतश्च वनस्पतिकायः । तत्र किमप्कायेन गम्यते किं वा वनस्पतिकायेन? ,उच्यते—अप्काये नियमाद् वनस्पतिरस्ति तस्मात्तेन न गम्यते, वनस्पतिना तु गम्यते । तत्रापि परीत्तयोनिकेन स्थिरसंहननेन आक्रान्तेन निष्प्रत्यपायेन । अत्र षोडश भङ्गाः । तद्यथा—प्रत्येकयोनिकः स्थिर आक्रान्तो निष्प्रत्यपायः एष प्रथमो भङ्गः । सप्रत्यपायेन द्वितीयः । अनाक्रान्तेऽप्येवमेव द्वौ विकल्पौ । एवं स्थिरे चत्वारो विकल्पा लब्धाः। अस्थिरेऽप्येवं चत्वारः । एते प्रत्येकयोनिकेनाष्टौ भङ्गा लब्धाः । अनन्तयोनिकेऽप्येवमेवाष्टौ । एवंसर्वसङ्ख्यया वनस्पतिकाये षोडश भङ्गाः । एवमप्कायस्य त्रसैर्द्वीन्द्रियादिचतुर्विधैः सह संयोगाः कार्याः । तद्यथा—आक्रान्ताः स्थिरा निष्प्रत्यपायाः । एतैस्त्रिभिः

---

**A.** जलमार्गे यत्पाषाणादेरन्यस्मिन् पाषाणादौ पादनिक्षेपः क्रियते स पाषाणादिः सण्डेवकः ।
**B.** वक्रीकृतकूर्पर = 'वांकी करायेली कोणी' इति भाषायाम्

पदैरष्टौ भङ्गा भवन्ति । एते च द्वीन्द्रियादिषु चतुर्ष्वपि प्रत्येकमष्टावष्टौ लभ्यन्ते । जाता द्वात्रिंशद् भङ्गाः । सान्तरनिरन्तरविवक्षया च चतुष्षष्टिः संयोगाः । अत्र चाऽऽक्रान्तस्थिरनिरपायैः सान्तरैस्त्रसैर्गन्तव्यम्, नाप्कायेन। अथ वनस्पतित्रसानां द्विकसंयोगे किं वनस्पतौ गम्यतामुत त्रसेषु ? उच्यते—त्रसेषु सान्तरेषु गन्तव्यम्, न पुनर्वनस्पतौ, तत्र हि नियमेन त्रसा भवेयुः । पृथिव्यप्कायवनस्पतित्रयसम्भवे कतमेन गम्यताम् ?, उच्यते—पूर्वं पृथिवीकायेन, ततो वनस्पतिकायेन, ततोऽप्कायेनाऽपि । पृथिव्युदकवनस्पतित्रसलक्षणचतुष्कसंयोगसम्भवे कतमेन गन्तव्यम् ?, उच्यते—पूर्वमचित्तपृथिव्यां प्रविरलत्रसेषु, ततः सचित्तपृथिव्यां, ततो वनस्पतिना, ततोऽप्कायेनाऽपि गम्यम् । तथा यदि स्थलपथ एव न स्यात्, स्थलपथे वा भिक्षा वसतिर्वा नास्ति, स्तेनश्वापदभयं वा तत्र, ततः स्थलपथं मुकत्वा पूर्वं सङ्घट्टेन गम्यते । तत्रेयं यतना— एकं पादं जले एकं पादं स्थले—आकाशे कृत्वा गन्तव्यम्'। उत्तरन्तं लोकं विलोक्य, प्रातिपथिकमन्यं वा पृष्ट्वा च यस्मिन् पार्श्वे नीचतरमुदकमवगम्यते तत्रोत्तरणीयम् । उत्तरणानन्तरं च नीरे निष्प्रगलिते तीरे ईर्यापथिक्याः कायोत्सर्गः कार्यः इति । एतत् प्रकृतोपयोगित्वाद् दर्शितम्। अथ प्रकृतमेव दर्श्यते—एवं यतनया **एकनदीबहुसङ्घट्टे** एकस्या एव नद्या बहून् वारान् सङ्घट्टे जाते सति **गुरुको मासः** प्रायश्चित्तम् । **एकसङ्घट्टे** एकवारं सङ्घट्टे **लघुकश्च मासः** । यत्र तु सङ्घट्टेन गन्तुं न शक्यते, तत्र लेपेन गम्यते । यत्र तु लेपेनाऽपि गन्तुं न पार्यते, तत्र लेपोपरिणापि गम्यते । तत्र चेयं यतना—यदि स साधुर्गृहिसार्थसहायस्तत उदकसमीपं गत्वोर्ध्वकायं मुखवस्त्रिकयाऽधःकायं रजोहरणेन प्रमार्ज्योपकरणमेकतः कृत्वा यदि चौरादिभयं न स्यात् ततो गृहस्थानां पश्चादुदकमवतरति । यथा यथा चोण्डमुण्डतरजलमवगाहते तथा तथोपर्युपरि चोलपट्टकमुत्सारयेत् येन न तीम्यते[A] । अथ तत्र सभयं अगाधं वा जलमतो यदा कियन्तोऽपि गृहस्था अग्रतोऽवतीर्णास्तदा मध्ये साधुना अवतरणीयं चोलपट्टकं च दृढं बध्नीयात् । एतेन विधिनोत्तीर्णस्य यदि चोलपट्टकोऽन्यद्वा किञ्चिदुपकरणजातं तीमितम्, तदाऽयं विधिः—उदकतीरे स्निग्धपृथिव्यामप्कायरक्षार्थं तावत्तिष्ठेद् यावच्चोलपट्टोन्यद्वोपकरणं निष्प्रगलं भवति । अथ तत्र चौरादिभयं ततः प्रगलन्तमेव तं चोलपट्टकं हस्ते दण्डके वा प्रलम्बमानं गृहीत्वा कायेनाऽस्पृशन् गच्छति । यदा च सार्थविरहित एकाकी साधुरुत्तरति, तदाऽयं विधिः—सर्वोपकरणमवतरणतीरे मुक्त्वा आत्मप्रमाणाच्चतुरङ्गुलातिरिक्तां यष्टिं गृहीत्वा तयाऽस्ताघतामनुमीय परतीरात् प्रत्यागत्य सर्वो—पकरणमेकत्र कृत्वा तेन परीक्षितजलपथेनोत्तरति । अस्ताघे च जले यत्र लेपोपरिणाऽपि गन्तुं न शक्यते, तत्र बाहुभ्यां न तरणीयं हस्तादिप्रक्षेपे बहूदकोपघातभावात् । किन्तु जलभावितैः कुम्भादिभिः सन्तरणं कार्यम् । तत्र प्रथमं **कुम्भेन** घटेन । अथवा घटैश्चतुष्काष्ठकोणकनिबद्धैः त्रापकेणेत्यर्थः । तदभावे **दृतिकेन** वातपूर्णेन । तदभावे **तुम्बेन** तुम्बकजालेनेत्यर्थः । तदभावे **उडुपेन**[B] कोट्टिम्बकेन । तदभावे पर्ण्यापर्णीमयभारकैः। तदभावे च नावा गन्तव्यं तथाविधकारणे समुत्पन्ने । एतेषां च विपर्यासग्रहणे **चतुर्लघुकाः** प्रायश्चित्तम् ।

**A.** भीनो न थाय' इति भाषायाम् **B.** द्रोण्या = लाकडीनुं बनेलु इंडाना आकारवाळुं एक पात्र विशेष वडे' इति भाषायाम्

**एएसि विवज्जासे चाउम्मासा भवे लहुगा'** इति निशीथभाष्यवचनात् । अथैतेषां लेपादीनामुत्तरार्द्धेन प्रायश्चित्तं दर्शयति । यथा—**लेपे** लेपगमने, **लेपोपरि** कुम्भ—तुम्ब—दृतिको—डुपे—लेपोपरिगमने, **कुम्भसन्तरणे, दृतिकसन्तरणे तुम्बसन्तरणे, उडुपसन्तरणे**, उपलक्षणत्वात् पर्णीभारकसन्तरणे च **चतुर्लघुकाः** प्रायश्चित्तम् । अत्र च तुम्बशब्दस्य दृतिकशब्दात् पूर्वं निबन्धो बन्धानुलोम्यात् । नौसन्तरणप्रायश्चित्तं त्वग्रे प्रतिपादयिष्यते । निष्कारणे सङ्घट्टनेन गमने मासलघु प्रथमवारायां, द्वितीयवारायां तु मासगुरु, एवं दशमवारायां पाराञ्चिकम् । अथ लेपेन गमने प्रथमवारायां चतुर्लघुकम् । अभीक्ष्णसेवयाऽष्टभिर्वाराभिः पाराञ्चिकम् । एवं लेपोपरि—कुम्भादिष्वपि चतुर्लघुकम् । अभीक्ष्णसेवयाऽष्टभिर्वाराभिः पाराञ्चिकं द्रष्टव्यमित्यादयो निशीथगता अनेकविशेषाः स्वयमवगन्तव्याः ।।४५।। अथ पूर्वदर्शितसङ्क्रमगमने प्रायश्चित्तमाह—

**थिरसंकमेण लहुगो लहुगा निपच्चवाय—अथिरेण ।**
**गुरुगा सपच्चवाए जले वि इअ लेवमाईहिं ।।४६।।**

व्याख्या—**स्थिरसङ्क्रमेण** निश्चलजलपरिहारमार्गेण गमने **लघुको मासः** । तेनैव सङ्क्रमेण **निष्प्रत्यपायेन** अपायरहितेन **अस्थिरेण** चलेन गमने **चत्वारो लघुकाः** । तस्मिन्नेव **सप्रत्यपाये** चत्वारो गुरुकाः प्रायश्चित्तम् । **जलेऽपि** सप्रत्यपाये **लेपादिभिर्गमने** इत्येवं **चतुर्गुरुकाः** ।।४६।।

अथ यत्र तथाविधकारणैर्नावा तीर्यते, तत्राऽयं विधिः—

**अडछगचउरदुगाओ अ वक्केण कमेण गंतु निरवाए ।**
**थल—घट्ट—लेव—लेवोवरि गमणं न उण नावाए ।।४७।।**

व्याख्या—अत्र **क्रमेण** यथासङ्ख्येन योजना । नावुत्तरणस्थानाद् यदि **अष्टगव्यूतवक्रेण गत्वा निरपाये** अपायाभावे **स्थलमार्गः** प्राप्यते, तदा तेन गम्यते । अथ स्थलपथो नास्ति, अस्ति वा परं सापायस्ततः **षड्गव्यूतवक्रमार्गेण सङ्घट्टेन** गम्यते । तदभावे **चतुर्गव्यूतवक्रेण लेपेन** गम्यते । तदभावे **द्विगव्यूतवक्रमार्गेण लेपोपरिणा गमनं** कार्यं, **न पुनर्नावा** ।।४७।। तथा—

**इअ छच्चउरदुगाउ अ गमणं लेवुवरि—लेव—संघट्टे ।**
**निरवायपरिरयासइ नावाइगमे वि चउलहुगा ।।४८।।**

व्याख्या—**एवमेव** लेपोपरिस्थानात् षड्गव्यूतपरिरयेण स्थलेन, चतुर्गव्यूतपरिरयेण **लेपेन, द्विगव्यूतपरिहारेण** वा **सङ्घट्टेन** गम्यताम्, न च लेपोपरिणा । लेपोत्तरणस्थानात् चतुर्गव्यूतपर्यवहारेण स्थलेन, द्विगव्यूतपरिहारेण वा सङ्घट्टेन गन्तव्यम्, न तु लेपेन । सङ्घट्टोत्तरणस्थानात् द्विगव्यूतपरिहारेण स्थलेन गन्तव्यम्, न पुनः सङ्घट्टेन । एतेषां परिहारपरिमाणानामभावे नावा लेपोपरिणा लेपेन सङ्घट्टेन वा कारणे यतनया गम्यते । अमुमेवार्थमुत्तरार्द्धेन

दर्शयति—**निरपायः** प्रत्यपायवर्जितो यः **परिरयो** जलपरिहारमार्गः पूर्वप्रतिपादितपरिमाणस्तस्याऽसति अभावे **नावादिगमेऽपि** नावा गमनेऽपि **चतुर्लघुकाः** । न केवलं लेपादिगमने किन्तु नावा गमनेऽपीत्यपिशब्दार्थः । नौसन्तरणे च या षट्कायविराधना स्यात्तन्निष्पन्नमपि प्रायश्चित्तमवगन्तव्यम् । अत्राह—ननु **'भावा नइसन्तारे पायच्छित्तं विउस्सग्गो'** इत्यत्र नौनदीसन्तारभेदेषु सर्वेष्वपि व्युत्सर्गः प्रायश्चित्तमभिहितमिह पुनस्तेष्वेव तपःप्रायश्चित्तं कथम् ? उच्यते—यत् व्युत्सर्गं प्रायश्चित्तं तत्राभिहितं तत्तदानीमेव करणीयतया यतनार्थं सामान्येनोक्तम् । तपःप्रायश्चित्तं तु अप्कायविराधनाविशुद्धिनिमित्तं विशेषतोऽभिधीयमानं न विरुद्ध्यते, उभयप्रायश्चित्तविशोध्यत्वादेतेषामिति। नावारोहणे चामूनि कारणानि—स्थलसङ्कट्टादिपथेषु शरीरोपधिस्तेनाः सिंहादयो वा श्वापदा भवेयुः, भैक्ष्यं वा न लभ्यते, आगाढं वा कारणमहिदष्टविषविशूचिकादिकं भवेत्, तत्र त्वरितमौषधान्यानेतव्यानि, कुलादिकार्यं वा अक्षेपेण करणीयमुपस्थितम् उपधेरुत्पादनार्थं वा गन्तव्यम्, लेपे लेपोपरौ वा मकरभयं ततो नौरारोढव्या । सा च नौ परार्था संयतार्था वा याति । तत्र परार्थायां गन्तव्यम्, तदभावे संयतार्थायामपि । सा द्विविधा—नवा पुराणा च । नवायां गन्तव्यम्, न पुराणायां सप्रत्यपायत्वात् । नवापि द्विविधा—उदकभाविता अभाविता च । उदके या क्षिप्तपूर्वा सा उदकभाविता, इतराऽभाविता। तत्र भावितायां गन्तव्यम्, नाभावितायामुदकविराधनासम्भवात् । उदकभाविताऽपि द्विधा—तदुदकभाविता अन्योदकभाविता च । तदुदकभावितायां गन्तव्यम्, नेतरस्याम्, मा भूदुदकशस्त्रमिति कृत्वा । तदुदकभाविताऽपि द्विविधा—आर्द्रा शुष्का च । आर्द्रायां गन्तव्यम्, नेतरस्यामुदकाकर्षणभयात् । नावं चाऽऽरोढुकामेन एकान्तमुपक्रम्योपकरणं प्रत्युपेक्षणीयम्, ततोऽधःकायं रजोहरणेनोपरिकायं मुखानन्तकेन प्रमृज्य, भाजनान्येकत्र बद्ध्वा तेषामुपरिष्टादुपधिं सुनियन्त्रितं करोति । ततो यदि भद्रका नाविकादयः स्थिरा च नौर्न दोलायते ततः पूर्वमारोढव्यम् । अथ प्रान्तास्ततः पूर्वं नारुह्यते । मा अमङ्गलमिति कृत्वा प्रद्वेषं गमन् । तेषां प्रान्तानां भावं ज्ञात्वा समकं पश्चाद् वा आरोहणीयम् । नौशिरसि च न स्थातव्यं देवतास्थानं तदितिकृत्वा । मार्गतोऽपि न स्थातव्यं निर्यामकस्तत्र तिष्ठतीति कृत्वा । मध्येऽपि यत्र कूपकस्थानं तत्र न स्थातव्यम् । तन्मुक्त्वा यदपरं मध्ये स्थानं तत्र स्थेयम् । अथ मध्ये नास्ति स्थानं ततः शिरसि पृष्ठतो वा यत्र ते स्थापयन्ति तत्र निराबाधे स्थीयते । साकारं भक्तं प्रत्याख्याय नमस्कारस्मरणप्रवणस्तिष्ठति । उत्तरन्नपि न पूर्वमुत्तरति न वा पश्चात् किन्तु मध्ये उत्तरति । सारोपधिश्च पूर्वमेवाल्पसागारिका क्रियते, यदन्तप्रान्तं चीवरं तत्प्रावृणोति । यदि च तरपण्यं[A] नाविको मार्गयति तदा धर्मकथा अनुशिष्टिश्च क्रियते । अथ न मुञ्चति । ततो द्वितीयपदे यदन्तप्रान्तमुपकरणं तद्यतनया दातव्यम् । अथ तन्नेच्छति निरुणद्धि वा ततोऽनुकम्पया यद्यन्यो ददाति तदा न वारणीयः । नौश्च चतुष्प्रकारा—समुद्रगामिनी १, अनुस्रोतोगामिनी २, प्रतिस्रोतोगामिनी ३, तिर्यग्गामिनी च ४ ।

---

**A.** 'भाडुं' इति भाषायाम् ।

एतासामेकतरयाऽपि नावा अर्धयोजनगमने चतुर्लघु। अतः परम् अर्धयोजनवृद्ध्याऽग्रेतनप्रायश्चित्तानि क्रमेण स्युः । तद्यथा—योजने चतुर्गुरु, सार्द्धयोजने षड्लघु, योजनद्वये षड्गुरु, सार्द्धयोजनद्वये छेदः, योजनत्रये मूलम्, सार्द्धयोजनत्रये अनवस्थाप्यम्, योजनचतुष्टये पाराञ्चिकम् । अभीक्ष्णसेवायां पुनरष्टवाराभिः पाराञ्चिकमिति दर्पिकासेवायां प्रकल्पे ।।४८।।

**गंतीकमणीभोगे अचक्खुभूवणदगग्गिफुसणगमे ।**
**गाउअलहुगाढत्तं बत्तीसं जोअणे चरिमं ।।४९।।**

(नि०भा० १८४)

व्याख्या—**गन्त्री** शकटं **क्रमणी** उपानत् तयो**र्भोगे** परिभोगे । **अचक्षुः** यत्र चक्षुर्न विद्यते व्याप्रियमाणतया प्रसृमरान्धकारनिकरेण, यत्र **चक्षुषा** लोचनेन निर्मलेनाऽपि स्थूला अपि जन्तवो निरीक्षितुं न शक्यन्ते इति भावः । सोऽचक्षुः अचक्षुर्विषयः प्रदेशः, भूः सचित्ता पृथिवी '**वण**' त्ति वनस्पतिकायिकाः प्रत्येकशरीरिणः । '**दग**' त्ति उदकम्, तच्च द्विधा—भूम्युदकं नद्यादिषु, अन्तरिक्षोदकं च मेघवृष्टौ । **अग्निः** वह्निस्तस्य स्पर्शनं अग्निस्पर्शनम् । एतेषु **गमे** गमने **गव्यूतलघुकाऽऽरब्धं** प्रायश्चित्तम् । **द्वात्रिंशद्योजनेषु चरमं** पाराञ्चिकं स्याद् । अयमर्थः—साधुर्गन्त्र्यामुपविष्टः क्रमण्यौ वा परिधाय अचक्षुर्विषये सचित्तपृथिव्यां प्रत्येकवनस्पतिकायिकेषु अप्काये अग्निस्पर्शनि वा यद्येकगव्यूतमात्रं मार्गं गच्छति, तदा तस्य चतुर्लघुकाः प्रायश्चित्तम्, गव्यूतद्वयं यदि गच्छति तदा चतुर्गुरु, योजनं यदि याति तदा षड्लघु, योजनद्वयं यदि याति ततः षड्गुरु, योजनचतुष्कं चेद् गच्छति तदा छेदः, योजनाष्टकं यदि प्रयाति तदा मूलम्, षोडशयोजनानि यदि व्रजति तदाऽनवस्थाप्यम्, द्वात्रिंशद्योजनानि यदि पुनः प्रयाति तदा पाराञ्चिकम् । एवं गव्यूते चतुर्लघुकादारभ्य स्थानद्विगुणवृद्ध्या द्वात्रिंशद्योजनेष्वष्टमवारायां पाराञ्चिकं स्यात् । सचित्तपृथिव्यादीनामभीक्ष्णसेवायां पुनरित्थं प्रायश्चित्तम् । तद्यथा—सचित्तपृथिव्यादिषु द्वितीयवारायां गच्छतो गव्यूते चतुर्गुरुकादारभ्य यावत् षोडशयोजनस्थाने पाराञ्चिकम्। तृतीयवारायां षड्लघुकादारभ्य अष्टयोजनपदे पाराञ्चिकम् । एवं यावदष्टमवारायां गव्यूते एव पाराञ्चिकम्, उपलक्षणत्वात् सचित्तपृथिव्यादौ स्थानं निषदनं त्वग्वर्त्तनं वा कुर्वाणस्य चतुर्लघुकम् । अभीक्ष्णसेवायामष्टमवारायां पाराञ्चिकम् । तथा च सचित्तपृथिव्यामधोऽङ्गुलचतुष्कखनने चतुर्लघुकम्, ततोऽप्यधोऽङ्गुलचतुष्कखनने चतुर्गुरुकम्। एवं तृतीयचतुष्के ६, चतुर्थचतुष्के ६ी, ततो द्विके छेदो, द्विके मूलम्, द्विकेऽनवस्थाप्यं पुनर्द्विके पाराञ्चिकम्। एवमधश्चतुर्विंशत्यङ्गुलखनने अष्टमस्थाने पाराञ्चिकं स्यादिति भावः । अभीक्ष्णखननेऽष्टमवारायां पाराञ्चिकम् । तथा **कलः**चणकस्तावन्मात्रात् खण्डादारभ्य यावदार्द्रामलकप्रमाणं सचित्तपृथ्वीकायखण्डम् अप्कायरूपकरक—हिमपिण्डादिखण्डं वनस्पतिकायखण्डं वा यदि गृह्णाति, तदा चतुर्लघुकम् । आर्द्रामलकद्विकप्रमाण—

**A.** निशीथसूत्रे

पृथिवीकायादिखण्डग्रहणे चतुर्गुरु । एवं स्थानद्विगुणवृद्ध्या यावदष्टमवारायामष्टाविंशत्युत्तरशतार्द्रामलक– प्रमाणपृथिवीकायाऽप्कायवनस्पतिकायखण्डग्रहणे पाराञ्चिकम् । एवं द्रवोदकेऽपि ज्ञातव्यं, परमार्द्रामलकस्थाने अञ्जलिर्द्रष्टव्यः । अष्टाविंशत्युत्तरशताञ्जलिजलग्रहणे पाराञ्चिकं स्यादित्यर्थः ।।४९।। तथा—

**इअ महिअणंततसगमि चउगुरुगा सोलजोयणे चरिमं ।**
**बीओसे मीसेसु अ लहुमासा अट्ठवीससए ।।५०।।**

व्याख्या— **इअ**' एवं यथा पूर्वगाथायां सचित्तपृथिव्यादिगमने गव्यूतादिषु पाराञ्चिकान्तं प्रायश्चित्तमुक्तं तथा अत्र महिकादिगमने ज्ञातव्यम् । **महिका** धूमरी **अनन्ता** अनन्तकायवनस्पतयः **त्रसा** द्वीन्द्रियादयः, तेषु **गमे** गमने गव्यूते **चतुर्गुरुकाः** । ततो द्विगुणद्विगुणवृद्ध्या मार्गगमने अग्रेतनानि प्रायश्चित्तानि तावद्वाच्यानि यावत् षोडशयोजनेषु चरमं **पाराञ्चिकं** भवति । अयमभिप्रायः—**महिकायां** पतन्त्याम् **अनन्तकायव्याप्तमार्गे द्वीन्द्रियादि– त्रसजीवसङ्कुले** च **मार्गे एकगव्यूतगमने** चतुर्गुरु, गव्यूतद्वयगमने षड्लघु, योजने षड्गुरु, योजनद्वये छेदः, योजनचतुष्टये मूलम्, योजनाऽष्टके अनवस्थाप्यम्, **षोडशयोजनेषु पाराञ्चिकम्** । तथा—**बीजानि** द्विधा—प्रत्येक– वनस्पतिबीजानि अनन्तकायबीजानि च । **ओस**' त्ति । **अवश्यायः** तुषारः । स चाऽधस्तादुपरि च स्यात्तेषु **मिश्रेषु च** । अत्र बहुवचनेन मिश्रपृथ्वी—मिश्रोदक—मिश्रवनस्पतिकाया एते त्रयोऽपि गृह्यन्ते । तेषु च गमने गव्यूते लघुमासादारभ्य द्विगुणद्विगुणवृद्ध्या यावद**ष्टाविंशत्युत्तरशत**योजनेषु चरमं पाराञ्चिकं स्यात् । अयमत्र भावः—प्रत्येकाऽनन्तबीजराशिव्याप्ते पथि, अवश्याये भूमौ निपतिते निपतति वा, मिश्रपृथिव्यां मिश्रोदके मिश्रहरितादिवनस्पतिकाये च गच्छतो गव्यूते लघुमासः । गव्यूतद्वये गुरुमासः । योजने चतुर्लघु । योजनद्वये चतुर्गुरु । योजनचतुष्टये षड्लघु । योजनाष्टके षड्गुरु । षोडशयोजनेषु छेदः । द्वात्रिंशद्योजनेषु मूलम् । चतुःषष्टियोजनेष्वनवस्थाप्यम् । अष्टाविंशत्युत्तरशतयोजनेषु पाराञ्चिकम् । एवं स्थानद्विगुणवृद्ध्या दशमवारायां पाराञ्चिकं प्रायश्चित्तम् । अत्र महिकाऽनन्तकाय—त्रससंसक्तमार्गाभीक्ष्णसेवायां सप्तवाराभिः पाराञ्चिकम्। बीजावश्यायमिश्राभीक्ष्णसेवायां पुनर्दशवाराभिः पाराञ्चिकम्, परं मिश्रानन्तकायाऽभीक्ष्णसेवायां नववाराभिः पाराञ्चिकम् । यतस्तत्र प्रथमवारायां गुरुमासस्यैवापत्तिः । तथा मिश्रपृथिवीकायादौ स्थानोपवेशनशयनानि कुर्वाणस्य प्रत्येकं मासलघु । अभीक्ष्णसेवायां दशमवारायां पाराञ्चिकम् । तथा तेजःकायविराधनायामित्थं प्रायश्चित्तं प्रकल्पे प्रदर्शितम्। तद्यथा—उत्तराधरारणिकाष्ठमथनप्रयोगेणाभिनवमग्निं जनयति यस्तस्य मूलम् । स्वयं प्रज्वालिते चाऽग्नौ पृथिव्यादीनां त्रसकायपर्यन्तानां सङ्घट्टने ४, परितापने ४ी, अतिपातने मूलम् । एतत् प्रायश्चित्तं कायनिष्पन्नम् । तथा परप्रज्वालितं वह्निं स्वस्थानस्थितमेवाऽसङ्घट्टेन सेवमानस्य चतुर्लघु । यावतश्च वारान् हस्तादि परावर्त्त्य तापयति तावन्तश्चतुर्लघुकाः । तापने च षट्पदिकाविराधना, इन्धनप्रक्षेपे त्रसादिजन्तुविराधना

च स्यात् तन्निष्पन्नमपि तस्य प्रायश्चित्तम् । तथा—असार्वरात्रिकप्रदीपयुक्तवसतावववस्थाने लघुमासः । सार्वरात्रिकप्रदीप—सार्वरात्रिकाऽसार्वरात्रिकाऽपरज्योतिसहितवसतौ चतुर्लघु । साग्निवसतौ चोपकरण—प्रतिलेखने मासलघु । अथाऽग्नौ छेदनकानि[A] निपतन्ति तदा चतुर्लघु। अथाग्निविराधनाभयान्न प्रतिलेखयति ततोऽसामाचारीनिष्पन्नं मासलघु उपधिनिष्पन्नं वा । वसतिं गमनागमने वा यदि न प्रमार्जयति तदा मासलघु । अथ प्रमार्जयति तदापि मासलघु । अथ प्रमार्जने छेदनकैरग्निर्विराध्यते ततश्चतुर्लघु । तथा सूत्रपौरुष्यकरणे १, अर्थपौरुष्यकरणे १ी, सूत्रनाशे ४, अर्थनाशे ४ी, तयोः करणे पुनरग्निविराधना । सज्योतिर्वसतौ रागे चतुर्गुरु । द्वेषे चतुर्लघु । आवश्यके च यावत उत्सर्गान्न करोति तावन्तो मासाः । सर्वं वाऽऽवश्यकं न करोति चतुर्लघु । अथ करोति ततो यावन्त उत्सर्गास्तावन्तश्चतुर्लघुकाः । सर्वस्मिन्नप्यावश्यके कृते चतुर्लघुकमेव । यतिवन्दनानि स्तुतीर्वा न ददाति, तति लघुमासाः । अथ ददाति तदा तदेव मासलघु । सन्दंशकयोः[B] प्रमार्जनेऽप्रमार्जनेऽपि लघुमासः । आवश्यकीनैषेधिक्योः करणे पञ्चकमसामाचारीनिष्पन्नं वा, अकरणे तु प्रत्येकं पञ्चकम् । ऽआसज्जे' त्यभणने मासलघु भणने चाग्निनिष्पन्नम्। साग्निवसतौ प्रस्खलने पठने वा चतुर्लघु षड्जीवनिकायविराधनानिष्पन्नं च । अतस्तथाविधकारणैः साग्निवसतावववस्थाने यतनेयं क्रियते—कटं चिलिमिणिकां वाऽन्तरा दत्त्वा प्रतिलेखनादीनि कुर्वन्ति, तदभावे बहिः कुर्वन्ति। बहिः स्थानाभावे चावश्यकं स्तुतिवन्दनकहीनं मौनेन यतनया वर्षाकल्पप्रावृताः कुर्वन्ति । गमनागमने च प्रमार्जनावश्यकीनैषेधिकीर्न कुर्वन्ति इत्यादि तेजःकायविषया यतना तत एवावसेया, ग्लानादिकार्यविषयाऽपि च । वायुकायविराधनायां पुनरेवं प्रायश्चित्तम्—घर्माभिभूतो निलयाऽभ्यन्तराद् बहिर्निर्गच्छति, अनिलाऽभिधारणनिमित्तं[C] वा बहिः स्थितः शब्दयति, यथा—एहि एहि इतः शीतलो वायुरिति । पूर्वकृतछिद्रेषु वायुं प्रतिसेवते । अपूर्वाणि वा छिद्राणि वाताऽभिधारणनिमित्तं करोति । घर्मार्त्तः स्वाङ्गं फूत्करोति । उष्णं वा भक्तपानं फूत्करोति । पूर्वकृतं द्वारं कपाटं वोद्घाटयति । अपूर्वं वा द्वारमुद्घाटयति । उच्छाडं[D] वाऽपसारयति । गृहछिंडिकायां वा याति । वस्त्रं वा चतुरस्रं कृत्वा वायुं करोति । तालवृन्त—वस्त्राञ्चल—पत्र—मात्रक—हस्तादिभिर्वायुं करोति । हस्तशङ्खं शङ्खदृतिकादि वा वायुना पूरयति । क्षुतकासितोच्छ्वसितनिःश्वसितानि वा अविधिना करोति। तत्र निर्गमन—फूत्करण—हस्त—मात्रक—पत्र—वस्त्राञ्चलवायुकरणेषु मासलघु प्रायश्चित्तम् । अभीक्ष्णासेवायां च दशवाराभिः पाराञ्चिकम् । शेषेसु पदेषु चतुर्लघु, अभीक्ष्णासेवायां चाष्टवाराभिः पाराञ्चिकम् । क्षुतादिषु पुनः पञ्चकम् । अभीक्ष्णासेवायां चतुर्विंशतिवाराभिः पाराञ्चिकम् । छिद्राणि पुनर्यावन्ति करोति तावन्तो लघुमासाः यावत् त्रीणि । ततः परं चतुर्लघु स्यात् । पूर्वकृतछिद्रेष्वेवं प्रायश्चित्तम् । ननु वाताभिधारणादिषु कथं प्रायश्चित्तापत्तिः स्यात् ? उच्यते—वायुकायजीवविराधनासद्भावात् । यदुक्तम्—

**A.** पक्ष्माणि भाषायां पुमाटा इत्यर्थः (पातळो दोरो)।

**B.** ऽसाणसी' इति भाषायाम् ।

**C.** ऽपवन खावा माटे' इति भाषायाम् ।

**D.** ओछाड = ढांकवा के पाथरवानुं लूगडुं' इति भाषायाम् ।

वासंसिसिरेसु वाओ बहिआ सीओ गिहेसु तु स उण्हो । विवरीओ पुण गिम्हे दिअराई सत्थमन्नुन्नं ।।
एमेव देहवाओ बाहिरवायस्स होइ सत्थं तु । विअणादिसमुत्थो वि अ सउप्पत्ती सत्थमन्नस्स' ।।
(नि०भा० २४१, २४२)

'सउप्पत्ती' ति स्वेन स्वेन विधानेनोत्पन्न इति । एवमन्यदप्येतद्विराधनाविषयं प्रायश्चित्तं प्रकल्पतोऽवसेयम् इति ।।५०।। पृथिवीकायाद्येकेन्द्रियविराधनाविषयं प्रायश्चित्तमुक्तम् । सम्प्रति विकलेन्द्रियादिविराधनागोचरं तदाह—

**विगलाण घट्टणाइसु लहुगुरुचउलहु अ चउगुरु हुंति ।**
**गुरुगाइ छल्लहुंतं पंचिंदिअघट्टणाईसु ।।५१।।**

व्याख्या—**विकलानां** विकलेन्द्रियाणां द्वीन्द्रिय—त्रीन्द्रीय—चतुरिन्द्रियाणामित्यर्थः । **घट्टनादिषु** सङ्घट्टनाऽगाढ—परितापगाढपरितापोपद्रवणेषु यथासङ्ख्यं **लघुगुरुचतुर्लघुचतुर्गुरुका भवन्ति** । विकलेन्द्रियाणां सङ्घट्टने लघुमासः । अगाढपरितापे गुरुमासः । गाढपरितापे चतुर्लघु । उपद्रवणे चतुर्गुरु स्यादिति भावः । **पञ्चेन्द्रियाणां घट्टनादिषु गुरुमासादि षड्लघुकान्तं** प्रायश्चित्तं भवति । पञ्चेन्द्रियाणां सङ्घट्टस्तदहर्जातमूषकगृहोलिकादिविषयो द्रष्टव्यस्तत्र गुरुमासः । अगाढपरितापे चतुर्लघु । गाढपरितापे चतुर्गुरु । उपद्रवणे षड्लघुकम् ।।५१।। अथैतेषामेव वधविषयं प्रायश्चित्तं प्रकारान्तरद्वयेनाह—

**इगबितिचउपंचिंदिअवहंमि गुरुगाइ बारसंतं वा ।**
**इगबितिचउरपणिंदिसु इगबितिचउपंचकल्ला वा ।।५२।।**

व्याख्या—**वा** विकल्पार्थः । **एकद्वित्रिचतुष्पञ्चेन्द्रियवधे गुरुकादि द्वादशान्तं** क्रमेण स्यात् । एकेन्द्रियवधे चतुर्गुरु । द्वीन्द्रियवधे षड्लघु । त्रीन्द्रियवधे षड्गुरु । चतुरिन्द्रियवधे दशमम् । पञ्चेन्द्रियवधे द्वादशं भवतीति भावः । एकोऽयमादेशः । **वा** अथवा **कल्यं** कल्याणकं तच्चेदम्—नि०पु०ए०आ०उ० । तत एकेन्द्रियवधे एवंविधमेकं कल्यम् । द्वीन्द्रियवधे द्वे कल्ये । त्रीन्द्रियवधे त्रीणि कल्यानि । चतुरिन्द्रियवधे चत्वारि कल्यानि । पञ्चेन्द्रियवधे पञ्च कल्यानि । अयं द्वितीयादेशः । एतौ द्वावादेशौ दानप्रायश्चित्ततया प्रकल्पे भणितौ ।।५२।। अथैतेषां बहुलविराधनाविषयं प्रायश्चित्तमाह—

**जलतेअबहुलफुसणे छग्गुरु दसगं तु विगलबहुलवहे ।**
**दुतिचउकल्ला व कमा बितिचउरिंदीण बहुलवहे ।।५३।।**

व्याख्या—**जलम्** अप्कायः **तेजः** अग्निकायस्तयोः **बहुलस्पर्शने** बहुविराधनायां प्रत्येकं **षड्गुरुकं** प्रायश्चित्तं स्यात् । **विकलानां** विकलेन्द्रियाणां **बहुलवधे** पुनर्दशकं चतुर्थानामिति शेषः । **वा** अथवा **क्रमाद्** अनुक्रमेण **द्वीन्द्रियाणां बहुलवधे द्वे कल्ये । त्रीन्द्रियाणां बहुलवधे त्रीणि कल्यानि । चतुरिन्द्रियाणां बहुलवधे चत्वारि कल्यानि** । अथ प्रकारान्तरेण बहुलविराधनाविषयं प्रायश्चित्तमाह—

**इग–विगल–पणिंदिसु वा बहुमद्दणि छलहु–छगुरु–दसगाणि ।**
**दसपु(प?)रओ दसगं चिअ पणिंदि इक्केवि दप्पेणं ।।५४।।**

व्याख्या–**वा** अथवा **एकेन्द्रिय–विकलेन्द्रिय–पञ्चेन्द्रियाणां बहुमर्दने** बहुलविराधनायां क्रमेण **षड्लघु–षड्गुरु–दशकानि** । एकेन्द्रियाणां पञ्चविधानामपि बहुलविराधनायां षड्लघु । विकलेन्द्रियाणां त्रिविधानामपि बहुलविराधनायां षड्गुरु । पञ्चेन्द्रियाणां बहुलवधे दशकमभक्तार्थानामिति शेषः । **दशपरतो** दशभ्यः **परतो**ऽग्रत एकादशादिषु प्रभूतेष्वपि पञ्चेन्द्रियेषूपहतेषु दशकमेव क्षपणानां नाधिकम् । पञ्चेन्द्रिये एकस्मिन्नपि दर्पेण हते दशकमेव । अथवा **'एगाइदसंतेसु'** (अस्य ग्रन्थस्य गाथा १५६) इत्यादिगाथया पिण्डाधिकारे वक्ष्यमाणया द्वीन्द्रियादीनां बहुलविराधनाविषयं प्रायश्चित्तं प्रकारान्तरेण दर्शयिष्यते, तदपि प्रकारान्तरमत्राऽवगन्तव्यम् । पूर्वजीतकल्पवृत्ता–वत्राधिकारे तस्य प्रकारस्य दर्शितत्वात् । एवं षड्विधजीवनिकायविराधनाप्रायश्चित्तप्रतिपादनेन प्रथममहाव्रता–तिचारप्रायश्चित्तमभिहितम् ।।५४।। अथ द्वितीय–तृतीय–पञ्चममहाव्रतातिचारप्रायश्चित्तं सामान्येनाह—

**मोसाइसु मेहुणवज्जिएसु दव्वाइवत्थुभिन्नेसु ।**
**हीणे मज्झुक्कोसे कमेण गुरुलहुगचउगुरुगा ।।५५।।**

व्याख्या–मृषावादादत्तादानपरिग्रहाश्चतुर्विधा–द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र द्रव्यतो मृषावादो धर्मास्ति–कायादिसर्वद्रव्यविषयः । अदत्तादानं ग्राह्य–धारणीयवस्तुविषयम् । परिग्रहश्च सचित्ताचित्तमिश्रसर्वद्रव्यविषयः । क्षेत्रतो लोकालोकविषयौ मृषावादपरिग्रहौ । अदत्तादानं ग्रामनगराद्याश्रयम् । कालतस्त्रयोऽपि दिवा वा रात्रौ वा । भावतस्त्रयोऽपि रागेण वा द्वेषेण वा ततश्चतुर्विधेष्वपि मृषावादादत्तादानपरिग्रहेषु विषये **क्रमेण हीने** जघन्येऽतिचारे **गुरुमासः** । **मध्ये** मध्यमेऽतिचारे **चतुर्लघु** । **उत्कृष्टे** पुनश्चतुर्गुरु । मैथुनविषयप्रायश्चित्तं विशेषतो द्वितीयादिमहाव्रतातिचारप्रायश्चित्ताभिधानाधिकारे क्रमप्राप्तमग्रे प्रतिपादयिष्यते । अतोऽत्र **मृषादिषु मैथुनवर्जिते–ष्वि**त्यभिहितम् ।।५५।। एवं समुदितद्वितीयतृतीयपञ्चममहाव्रतातिचारप्रायश्चित्तं सामान्येनाभिधाय विशेषतो द्वितीयमहाव्रतातिचारप्रायश्चित्ताभिधित्सयाऽऽह—

**आयरिओ आयरिअं आगाढं वयइ पावइ छेयं ।**
**वसहे छग्गुरु भिक्खुंमि छल्लहु खुड्डगे गुरुगा ।।५६।।**

(नि०भा० २६२२)

व्याख्या–इह क्रोध–मान–माया–लोभ–हास्य–भय–मौखर्य–विकथोपयुक्तस्य वाक्यं मृषा भवति । यदुक्तम्—

**कोहे माणे अ मायाए लोभे अ उवउत्तया । हासे भय–मोहरिए विगहासु तहेव य ।।**
**एआइं अट्ठ ठाणाइं परिवज्जित्तु संजये । असावज्जं मिअं काले भासं भासिज्ज पन्नवं' ।।**
(सं०प्र० ५१८, ५१९)

अत **आगाढवचनं** मृषावादरूपं क्रोधादिजन्यत्वात् । तच्चात्यर्थं गाढम्—**आगाढम्** खरपरुषनिष्ठुरजकारादिरूपम् अन्यस्याऽऽख्यातुं यन्न शक्यते, येन चोक्तेन शरीरस्योष्मा जायते तदागाढं द्विधा—सूचया असूचया च स्यात्। तत्र सूचा स्वव्यपदेशेन परदोषाविष्करणम् । असूचा तु प्रकटमेव परदोषभाषणम् । तत **आचार्य** आचार्यं प्रति एवंविधमागाढं यदि **वदति**, तदा **छेदं** छेदाख्यं प्रायश्चित्तं प्राप्नोति । **वृषभे** वृषभविषये यद्यागाढं वदति, तदा **षड्गुरु** । एवं भिक्षुविषये **षड्लघु** । क्षुल्लकविषये **गुरुकाश्चत्वारः** ।।५६।। तथा—

**वसभे छग्गुरुगाई छल्लहुगा भिक्खु खुड्डि गुरुगाई ।**
**वसभाइसु अंति कमा लहु गुरुगो अ लहुगो अ ।।५७।।**
(नि०भा० २६२३)

व्याख्या—**वृषभस्याऽऽचार्यादिषु** चतुर्षु विषये आगाढभाषणे **षड्गुरुकादि** चतुर्लघुकान्तं प्रायश्चित्तम् । **भिक्षोः षड्लघुकादि** गुरुमासान्तम् । क्षुल्लकस्य **चतुर्गुरुकादि** लघुमासान्तम् । पूर्वार्द्धोक्तादिप्रायश्चित्तोत्तरार्द्धोक्तान्त–प्रायश्चित्तयोः **क्रमेण** योजनादेवमर्थघटना । इदमुक्तं भवति—वृषभस्याऽऽचार्यं प्रति आगाढभाषणे षड्गुरु। **वृषभं**[A] प्रति षड्लघु । भिक्षुं प्रति चतुर्गुरु । क्षुल्लकं च प्रति चतुर्लघु । क्षुल्लकस्याऽऽचार्यं प्रति चतुर्गुरु । **वृषभं**[A] प्रति चतुर्लघु । भिक्षुं प्रति **गुरुमासः** । क्षुल्लकस्य क्षुल्लकं च प्रत्यागाढभाषणे **लघुमासः** ।।५७।। एवमाचार्यादीनामागाढभाषणविषयं प्रायश्चित्तमुक्तम् । अथाधिकरणकारिसाधूपेक्षादिरूपं तदाह—

**लहुगो अ उवेहाए गुरुगो से चेव उवहसंतस्स ।**
**उत्तुअमाणे लहुगा सहायगत्ते सरिसदोसो ।।५८।।**
(बृ०क० २६९९, नि०भा० २७८०)

व्याख्या—**अधिक्रियते** नरकगतिगमनयोग्यतां प्राप्यते आत्मा अनेनेत्य**धिकरणं** कलहः । साधूनां च तदुत्पत्ति–कारणान्यमूनि—अन्यस्याऽऽभाव्यं शैक्षादिकं विपरिणमय्य यदि परः कश्चिदाचार्यो गृह्णाति, ततो मूलाचार्यो ब्रवीति— **किमिति मदीयमाभाव्यं गृह्णासि** ?' पूर्वगृहीतं वा शैक्षकादिकं याचितो **मदीयमाभाव्यं किं न प्रयच्छसि?'** इति मार्ग्यमाणमपि विप्रतिपत्त्या न ददाति, तदाधिकरणं भवति । एवमपरापरघटमानाऽऽलापकश्लोकादि–योजनारूपव्यत्याम्रेडनया सूत्रं परावर्त्तयन्, हीनाधिकाक्षरं वा उच्चरन्, स्थापनाकुलानि वा निष्कारणं प्रविशन्, भक्त–स्त्री–देश–राजकथां वा कथयन् साधुर्द्वितीयेन साधुना नोदितो यदा प्रतिवक्ति प्रद्विष्ट इव तदाऽधिकरणं स्यात् । एवमादिकारणैः समुत्पन्ने चाधिकरणे यः साधुर्यस्य साधोः प्रज्ञापनया उपशाम्यति तस्य तेन साधुना

**A.** उपाध्यायम् ।

उपशमनं कर्त्तव्यम् । यः पुनरुपेक्षां करोति तस्य प्रायश्चित्तम् । तच्चानया गाथया प्रतिपाद्यते। **यथा—उपेक्षायां लघुको मासः** । अधिकरणं कुर्वतो दृष्ट्वा मध्यस्थभावेन तिष्ठति, अन्येषामप्युपदेशं प्रयच्छति—परप्रत्ययः कर्मबन्धोऽस्माकं न भवति, परकृतस्य कर्मण आत्मनि सङ्क्रमाभावात् । अधिकरणनिवारणेन च स्वाध्याय—ध्यानादेः स्वार्थस्य भङ्गपातो भवतो भवति । अतो ज्ञानदर्शनचारित्ररूपे पारमार्थिके स्वकार्ये एव यतध्वम्, मा परकार्ये अधिकरणोपशमनादौ स्वार्थपरिमन्थकारित्वात् परार्थकरणस्येत्यादिरूपा उपेक्षा तत्र **लघुमासः** । **उपहसतो** ऽधिकरणं कुर्वतो दृष्ट्वा उपहासवचनानि भाषमाणस्य अट्टहासैरुपहासं कुर्वाणस्य च स एव **मासो गुरुकः** स्यात् । **उत्तुदत उत्** प्राबल्येन **तुदतः** प्रेरयतोऽधिकरणे उत्तरदानशिक्षापणमुत्तेजनं च कुर्वाणस्येत्यर्थः **लघुकाश्चत्वारः** । **सहायकत्वे सदृशदोषः** । द्वयोः कलहायमानयोर्मध्यादेकस्य पक्षे भूत्वा यः कोऽपि वाचा हस्ताभ्यां पद्भ्यां दन्तैर्लगुडादिभिर्वा साहाय्यं करोति, सोऽधिकरणकारिणा सह समानदोषः । ततो यत्प्रायश्चित्तमधिकरणकारिणः स्यात्, साहाय्यकारिणोऽपि तत् स्यात् समानदोषत्वादिति भावः ।।५८।।

अधिकरणकारिणस्तु प्रायश्चित्तमिदम्—

**चउरो चउगुरु अहवा विसेसिआ हुंति भिक्खुमाईणं ।**
**अहवा चउगुरुगाई हवंति उ छेअनिट्ठवणा ।।५९।।**

(बृ०क० २७००)

व्याख्या—**भिक्षुवृषभोपाध्यायाचार्याणामधिकरणं कुर्वतां प्रत्येकं चतुर्गुरुकं** ततश्चत्वारश्चतुर्गुरुका भवन्ति । अथवा त एव चतुर्गुरुकाः तपःकालविशेषिता भवन्ति । तद्यथा—भिक्षोश्चतुर्गुरुकं तपसा कालेन च लघुकम् । वृषभस्य तदेव कालगुरुकम् । उपाध्यायस्य तपोगुरुकम् । आचार्यस्य तपसा कालेन च गुरुकम् । अथवा चतुर्गुरुकादारभ्य छेदे निष्ठापना कर्त्तव्या । तद्यथा—भिक्षुरधिकरोति[A] ततस्तस्य चतुर्गुरुकम् । वृषभस्य षड्लघुकम्, उपाध्यायस्य षड्गुरुकम्, आचार्यस्याधिकरणं कुर्वाणस्य छेदः । एवमधिकरणकरणे आदेशत्रयेण प्रायश्चित्तमुक्तम् । तथा साहाय्यकरणेऽपि द्रष्टव्यम् । अधिकरणानुपशमने दोषदर्शनार्थमिदमुदाहरणम्—अरण्णमज्झे एगं अगाहजलं सव्वओ वणसंडमंडिअं महंतं सरं अत्थि । तत्थ य बहूणि जलचर—थलचर—खचर—सत्ताणि अच्छंति । तत्थ एगं महल्लं हत्थिजूहं परिवसइ । अन्नया य गिम्हकाले तं हत्थिजूहं पाणिअं पाउण्हाउत्तिण्णं मज्झण्हकाले सीअलरुक्खछायाए सुहंसुहेणं चिट्ठइ । तत्थ य अदूरदेसे दो सरडा भंडिउमारद्धा । वणदेवताए अ ते दट्ठुं सव्वेसिं सभासाए आघोसिअं—भो हत्थिणो ! भो जलयरा ! भो थलयरा ! मा एए सरडे[B] भंडंते उवेक्खह, वारेह तुब्भे । एवं भणिआ वि ते जलयराइणो चिंतंति—किं अम्हं एते सरडा[B] भंडंता काहिंति ? तत्थ य एगो सरडो भंडंतो भग्गो पिल्लिओ सो धाडिज्जंतो सुहपसुत्तस्स एगस्स जूहाहिवस्स बिलं ति काउं नासापुडं पविट्ठो । बिइओ वि तस्स पिट्ठओ चेव पविट्ठो । ते सिरकपाले जुद्धुं संपलग्गा । तस्स हत्थिस्स महती अरई

**A.** कलहं करोति **B.** 'काचंडाओ' इति भाषायाम्

जाया । तओ वेअणट्टो महईए असमाहीए पवट्टमाणो उट्टिता तं वणसंडं चूरेइ । बहवे तत्थ वसंता सत्ता घाइआ । जलं च आडोहिंतेण जलयरा घाइआ । तलागपाली भेइआ । तलागं विणट्ठं ताहे जलयरा सव्वे विणट्ठा । एष दृष्टान्तः । अथ अर्थोपनयः—यथा तेषामुपेक्षमाणानां तत् पद्मसरः सर्वेषामप्याश्रयभूतं विनष्टम्, तस्मिँश्च विनश्यमाने तेऽपि विनष्टाः। एवमत्राप्याचार्यादीनामुपेक्षमाणानां महान् दोष उपजायते । यतस्तावधिकरणकारिणावुपेक्षितौ परस्परं मुष्टामुष्टि वा दण्डादण्डि वा युध्येताम् । ततश्च परम्परया राजकुलज्ञाते सञाते सति, स राजादिः तेषां साधूनां बन्धनं वा ग्रामनगरादेर्निष्कासनं वा कटकमर्दं वा कुर्यात् ।।५९।।

किं चान्यत्—

**तावो भेओ अयसो हाणी दंसणचरित्तनाणाणं ।**
**साहुपओसो संसारवड्ढणो साहिगरणस्स ।।६०।।**

(बृ०क० २७०८, नि०भा० २७८७)

व्याख्या—**तापो भेदोऽयशो हानिर्दर्शनज्ञानचारित्राणां** तथा **साधुप्रद्वेषः संसारवर्द्धनो** भवति । एते **साधिकरणस्य** दोषा भवन्ति । तत्र **तापो** द्विधा—प्रशस्तोऽप्रशस्तश्च । तत्रातिभणिते सति चिन्तयति धिग् मां येन तदानीं स साधुर्बहुविधैरसभ्याख्यानैरभ्याख्यातः । इत्थमित्थं चाक्रुष्टः । एष प्रशस्तस्तापः । अथ तथाविधं तस्य संमुखं तदानीं न भणितं, ततश्चिन्तयति—हा ! मन्दभाग्यो विस्मरणशीलोऽहं यन्मया तदीयं जात्यादिमर्मनिकुरम्बं न प्रकाशितम्। एषोऽप्रशस्तस्तापः । तथा भेदो जीवितभेदश्चरणभेदो वा स्यात् । कलहं कृत्वा पश्चात्तापतप्तचेतसो विहायसादिमरणमभ्युपगच्छेयुः, उन्निष्क्रमणं वा कुर्युरिति भावः । कलहेन गणभेदो वा भवति । लोकोऽपि ब्रूयाद्—अहो ! अमीषां श्रमणानां बहिः प्रशान्ताकारं रूपं यादृशमवलोक्यते तादृशं शीलं मनःप्रणिधानं नास्ति । यद्वा—लज्जनीयं किमप्यनेन कृतं सम्भाव्यते, येनैवं प्रम्लानवदनो दृश्यते । एवमादिकमयशः समुच्छलति। कलहकरणोत्तरकालमपि कषायकलुषितः पश्चात्तापतप्तमानसो वा यन्न पठति एषा **ज्ञानहानिः** । साधुप्रद्वेषतः साधर्मिकवात्सल्यं विराधितं स्यात्ततो **दर्शनहानिः** । यथा यथा च क्रोधादीनां कषायाणां वृद्धिस्तथा तथा **चारित्रस्याऽपि हानिः** । विशुद्धसंयमस्थानप्रतिपातेनाविशुद्धसंयमस्थानेषु गमनं स्यादित्यर्थः । एतच्च व्यवहारनयेन, निश्चयनयेन पुनः कषायसहितः संयत एव न भवति चारित्रशून्यत्वात् । **अकसायं खु चरित्तं कसायसहिओ न संजओ होइ'** इति वचनात् । तथा **साधूनामुपरि यः प्रद्वेषः** तेनाऽसौ **संसारं दीर्घतरं** करोति । यत एते दोषाः तत उपेक्षा न विधेया किन्तु कलहायमानावुपशमयितव्यौ । गुरुभिरुपशमनार्थमित्थमभिधातव्यम्—आर्याः! उपशाम्यतोपशाम्यत। अनुपशान्तानां कुतः संयमः ? कुतो वा स्वाध्यायः ? तस्मादुपशमं कृत्वा स्वाध्यायं कुरुत । किमेवं द्रमकवत्

कनकरसस्य शाकपत्रैः परित्यागं कुरुथ ? कः पुनरयं द्रमकः ? उच्यते—जहा एगो परिव्वायगो दमगपुरिसं चिंतासोगसागरावगाढं पासइ पुच्छति अ। किमेवं चिंतापरो ? तेण से सब्भावो कहिओ 'दारिद्दाभिभूओमि'त्ति। तेण भणिअं इस्सरं तुमं करोमि। जतो भणामि ततो गच्छाहि, जं च भणामि तं सव्वं कायव्वं। ताहे ते संबलं घित्तुं पव्वयनिगुंजं पविट्ठा। परिव्वायगेण य भणितो—एस कणगरसो सीयवायातवपरिस्समं अगणंतेहिं तिसा—खुधावेअणं सहंतेहिं बंभयारीहिं अचित्तकंदमूलपत्तपुप्फफलाहारीहिं समीपत्तपुडेहिं भावओ अरुस्समाणेहिं घित्तव्वो। एस से उवयारो। तेण दमगेण सो कणगरसो उवचारेण गहिओ। तुंबयं भरिअं। ततो निअत्ता तेण परिव्वायगेण भणिअं सुरुट्ठेण वि तुमे एस सागपत्तेण न छड्डिअव्वो। ततो सो परिव्वायगो गच्छंतो तं दमगपुरिसं पुणो पुणो भणइ—मम पभावेण इस्सरो भविस्ससि। सो अ पुणो पुणो भण्णमाणो रुट्ठो भणति—जं तुज्झ पसाएण इस्सरत्तं तेण मे न कज्जं, तं कणगरसं सागपत्तेण छड्डेति। ताहे परिव्वायगेण भणिअं—हा हा ! दुरात्मन् (दुरप्पा ?) ! किमेयं तुमे कयं—

**'जं अज्जिअं समीखल्लएहिं तवनिअमबंभमइएहिं। तं दाणि पेच्छ नाहिसि छड्डुंतो सागपत्तेहिं'** ॥

(बृ०क० २७१४, नि०भा० २७९२)

**यदर्जितं शमीसम्बन्धिभिः खल्लकैः पत्रपुटैस्तपोनियमब्रह्मयुक्तैस्तदिदानीं शाकपत्रैः परित्यजन् पश्चात्** परित्यागकालादूर्ध्वं परितप्यमानो ज्ञास्यसि, यथा—दुष्टं मया कृतं यच्चिरसञ्चितः कनकरसः शाकपत्रैरुत्सिच्य परित्यक्तः। एवं परिव्राजकेन द्रमक उपालब्धः। एवमाचार्यः तावधिकरणकारिणावुपालभते। आर्याः ! यच्चारित्रं कनकरसस्थानीयं तपोनियमब्रह्मचर्यमयैः शमीखल्लकैरर्जितं परीषहोपसर्गादिश्रममगणयद्भिश्चिरात् कथंकथमपि मीलितं तदिदानीं शाकपत्रसदृशैः कषायैः परित्यजन्तः पश्चात् परितप्यमानाः स्वयमेव ज्ञास्यथ, यथा—हा ! बहुकालोपार्जितेन संयमकनकरसेन तुम्बकस्थानीयं स्वजीवं बहुपूर्णं कृत्वा पश्चात् कलहायमानैः शाकवृक्षपत्रस्थानीयैः कषायैरुत्सि—च्योत्सिच्याऽयमात्मा रिक्तीकृतः शिरस्तुण्डमुण्डनादिश्च प्रव्रज्याप्रयासो मुधैव विहित इति। कषायैः पुनश्चि—रसञ्चितस्यापि चारित्रस्य नाशो भवेत्। यदुक्तम्—

**'जं अज्जिअं चरित्तं देसूणाए पुव्वकोडीए। तं पि कसायितमित्तो नासेति नरो मुहुत्तेणं'** ॥

(बृ०क० २७१५, नि०भा० २७९३)

एवमाचार्येण सामान्यतः तयोरनुशिष्टिर्दातव्या नत्वेकमेव कञ्चन विशेष्य भणनीयम् ।।६०।। यत आह—

**आयरिओ एगं न भणे अह एगं निवारि मासिअं लहुअं ।**
**रागद्दोसविमुक्को सीअघरसमो अ आयरिओ ।।६१।।**

(बृ०क० २७१६, नि०भा० २७९४)

व्याख्या—**आचार्यो नैकमधिकरणकारिणं भणति** अनुशास्ति । अथाऽऽचार्य **एकमेव निवारयति** अनुशास्ति, न द्वितीयं ततो **मासिकलघुकमापद्यते** । असमाचारीनिष्पन्नमिति भावः । तस्मादाचार्यो **रागद्वेषविमुक्तः शीतगृहसमो** भवेत् । शीतगृहं नाम वर्द्धकिरत्ननिर्मितं चक्रवर्त्तिगृहम् । तच्च वर्षासु निर्वातप्रवातम्, शीतकाले सोष्म, ग्रीष्मकाले शीतलम् । यथा तच्चक्रवर्त्तिनः सर्वर्त्तुक्षमं तथा द्रमकादेरपि प्राकृतपुरुषस्य तत्सर्वर्त्तुक्षममेव भवति । एवमाचार्यैरपि निर्विशेषैर्भवितव्यम् । अथ विशेषं करोति, तत इमे दोषाः । आचार्य आत्मीयोऽयमिति बुद्ध्या अमुं वारयति, मां तु परबुद्ध्या पश्यन्न वारयति । एवं पक्षरागेण क्रियमाणेनाऽननुशिष्यमाणः साधुर्बाह्यभावं गच्छति । यद्वा—सोऽननुशिष्यमाणो गाढतरमधिकरणं कुर्यात् । अथवा तमाचार्यं परिस्फुटमेव ब्रूयात्—त्वं मामेवैकं बाह्यतया प्रेक्षसे, ततश्चात्मानमुद्बध्य यदि मारयति । तत आचार्यस्य पाराञ्चिकम् । अथोन्निष्क्रामति ततो मूलम् । तस्माद् द्वावपि समदृशाऽनुशासनीयौ अनुशिष्टौ च यद्युपशान्तौ ततः सुन्दरम् । अथैक उपशान्तो न द्वितीयस्तेन चोपशान्तेन गत्वा स स्वापराधप्रतिपत्तिपुरःसरं क्षामितः परमसौ नोपशाम्यति । आह—कथमेतदवगम्यते यथा नोपशान्त इति । उच्यते—यदा वन्द्यमानोऽपि वन्दनकं न प्रतीच्छति, यदि वा अवमरात्निकोऽसौ ततस्तं रत्नाधिकं न वन्दते । आद्रियमाणोऽपि वा नाद्रियते । एवमनुपशान्त उपलक्ष्यते । ततोऽनुपशान्तेऽपि य उपशान्तो भूत्वा आदरम् अभ्युत्थानं वन्दनं सम्भोजनं संवासं च करोति तस्याऽऽराधनाऽस्ति । यस्त्वेतानि न करोति अनुपशान्ततया तस्याऽऽराधना नास्ति । उपशमैकनिबन्धनत्वादाराधनायाः ।।६१।।

अथोपशान्तमपि अधिकरणं ये पुनरुदीरयन्ति तेषां प्रायश्चित्ताभिधित्सया स्वरूपमाह—

**खामिअविउसविआइं अहिगरणाइं च जे उईरंति ।**
**ते पावा नायव्वा तेसिं आरोवणा इणमो ।।६२।।**

व्याख्या—**क्षामितानि** वचसा मिथ्यादुष्कृतप्रदानेन शमितानि, **व्युपशमितानि विविधम्** अनेकधा मनसा व्युत्सृष्टानि, क्षामितानि तानि व्युपशमितानि चेति **क्षामितव्युपशमितानि** । एवंविधान्यधिकरणानि **ये** भूय **उदीरयन्ति, ते पापाः** साधुधर्मबाह्या **ज्ञातव्यास्तेषां चेयमारोपणा** प्रायश्चित्तमित्यर्थः ।।६२।।

**उप्पायगउप्पन्ने संबद्धे कक्खडे अ बाहू अ ।**
**आपिट्टणा स(सं?)मुच्छण समुघा(ग्घा?)यइवायणा चेव ।।६३।।**

**लहुगो लहुगा गुरुगा छम्मासा हुंति लहुगगुरुगा य ।**
**छेओ मूलं च तहा अणवट्ठप्पो अ पारंची ।।६४।।**

व्याख्या—इदं पूर्वगाथाप्रतिपादितेषु नवसु स्थानकेषु द्वितीयगाथोक्तानि नव प्रायश्चित्तानि क्रमेणावगन्तव्यानि । तद्यथा—द्वौ साधू पूर्वं कलहं कृतवन्तौ । ततश्च क्षामितव्युत्सृष्टेऽपि तस्मिन्नधिकरणेऽन्यदा तयोरेक एवं भणति—अहं नाम त्वया तदानीमित्थमित्थं च भणितः । एष **उत्पादकः उच्यते** । अस्य च मासलघु । इतरोऽपि ब्रूते अहमपि त्वया तदानीं किं स्तोकं भणितः ? एवमुक्ते उत्पादकः प्राह—यदि तदानीं त्वमभणिष्यस्तदा किमहमेवमेव त्वाममोक्ष्यम् ? एवमधिकरणमुत्पन्नमुच्यते । तत्र **द्वयोरपि**[A] **चतुर्लघु** । **सम्बद्धं** नाम वचसा परस्परमाक्रोशनं कर्तुमारब्धम् **तत्र चतुर्गुरु** । **कर्कशं** नाम तटस्थितै[B]रुपशम्यमानावपि नोपशाम्यतः तदा **षड्लघु**। '**बाहु**' त्ति । रोषभरपरवशतया बाहूबाहवि युद्धं कर्तुं लग्नौ तत्र **षड्गुरु** । **आपिट्टना** नाम एकेनापरो निहत्य पातितस्तत्र छेदः । योऽसौ निहतः **सम्मूर्च्छां** यदि प्राप्तस्तदा **मूलम्** । **मारणान्तिकसमुद्घातेन** समवहते **अनवस्थाप्यम्** । **अतिपातना** मरणं तत्र **पाराञ्चिकम्** ।।६३-६४।।

अत्र प्रकरणे सर्वत्र लघुगुरुप्रायश्चित्तमिति तत्परिज्ञापनोपायमाह—

**अद्धेण छिन्नसेसं पुव्वद्धेणं तु संजुअं काउं ।**
**दिज्जाहि लहुअदाणं गुरुदाणं तत्तिअं चेव ।।६५।।**

व्याख्या—इह प्रायश्चित्तानि पञ्चकादीनि षाण्मासिकान्तानि एकादश भवन्ति । तानि च लघुगुरुविवक्षया द्वाविंशतिः स्युः । एतानि चैतद्गाथोक्तप्रकारेणावगन्तव्यानि । यथा दशकस्यार्द्धच्छिन्नस्य शेषं दिनाः ५, दशकापेक्षया पूर्वस्य पञ्चकाख्यप्रायश्चित्तस्याऽर्द्धेन सार्धद्वयरूपेण संयुक्तं कृतं सार्द्धसप्तदिनसङ्ख्यानिष्पन्नं लघुदशकं भवति। एवंविधप्रक्रियया सर्वाण्यपि प्रायश्चित्तानि षाण्मासिकान्तानि लघूनि ज्ञेयानि, पञ्चकस्य तु पूर्वं प्रायश्चित्तं नास्ति, यदर्द्धं तस्यार्द्धीकृतस्य मध्ये क्षिप्यते, अतोऽस्यार्द्धमेव सार्द्धदिनद्वयरूपं लघुपञ्चकमित्युच्यते । गुरूणि च सर्वाण्यपि यथास्वप्रमाणान्येव । स्थापना चेयम्— ।।६५।।

| | | | | | | |
|---|---|---|---|---|---|---|
| लघु | पञ्चकम् २¹/₂ | दशकम् ७¹/₂ | पञ्चदशकम् १२¹/₂ | विंशम् १७¹/₂ | पञ्चविंशम् २२¹/₂ | एतानि सर्वाण्यपि भिन्नमास इत्युच्यन्ते । |
| गुरु | " ५ | " १० | " १५ | " २० | " २५ | |

| | | | | | | |
|---|---|---|---|---|---|---|
| लघु | मासिकम् २७¹/₂ | द्विमासिकम् ४५ | त्रिमासिकम् ७५ | चतुर्मासिकम् १०५ | पञ्चमासिकम् १३५ | षाण्मासिकम् १६५ |
| गुरु | " ० | " ०० | " ००० | " ०००० | " ००००० | " ०००००० |

A. अधिकरणोदीरकयोः । B. मध्यस्थनरैः ।

इह पञ्चकादीनि षाण्मासिकान्तानि प्रायश्चित्तानि लघूनि गुरूणि च दर्शितानि तेषां च सङ्ग्रहगाथा इमाः—

**दो सड्ढदिवस पणगं सग सड्ढा दसग सड्ढबारसगं ।**
**पनरस सड्ढसतरस वीसं दिण सड्ढबावीसं ।।६६।।**
**पणवीस सड्ढसगवीस तीस पणचत्त सट्टि पणसयरी ।**
**नवइ दिण पणहिअसयं सउवीसं पंचतीससयं ।।६७।।**
**सड्ढसयं पणसट्ठं असीइसयमिअ दुवीसठाणेहिं ।**
**पणगाइ छग्गुरुंतं लहु गुरु पणगाइ पच्छित्तं ।।६८।।**

व्याख्या—एतास्तिस्रोऽपि स्पष्टाः ।।६६-६७-६८।।

अथाऽप्रीतिकम् असङ्खडं निष्कासनम् उपधिहरणं प्रान्तापनम् । एतानि **पञ्च सम्पत्त्यसम्पत्तिभ्यां** कृत्वा दश, उपद्रावणं चैकादशम् एतान्येकादश **कषायस्थानानि** । एतेषु क्रमेण प्रायश्चित्तं गाथाचतुष्टयेनाह—

**सहसा व पमाएणं अप्पडिवंदे कसाइए लहुओ ।**
**अहमवि अ न वंदिस्सं असंप संपत्ति लहुगुरुगो ।।६९।।**

(नि०भा० १०९)

व्याख्या—एकेन साधुना कश्चिदपरः साधुरभिमुखो दृष्टः, स च तेन वन्दितः, तेन च **सहसा** अन्यक्रियाव्यापारोप—युक्तेनाऽन्यतरप्रमादसहितेन वा स न **प्रतिवन्दितः** । ततोऽप्रतिवन्दे अप्रतिवन्दने सति 'अहमनेन वन्दितो न' इति कृत्वा स **कषायितः** । एवमप्रीतिकमुत्पन्नं तस्यैवं कषायितमात्रस्यैव **लघुकः** । तदनन्तरं स कषायित एवं चिन्तयति—यदा एष वन्दिष्यते तदाहमपि **चैनं न प्रतिवन्दिष्ये** । तस्याऽ**सम्पतौ** तत्करणावसराऽप्राप्तौ **मासलघु**। **सम्पत्तौ** तदवसरप्राप्तौ **मासगुरु** ।।६९।।

**एमेव संखडेवी असंपगुरुगो अ लहुग संपत्ते ।**
**निच्छुभणमसंपत्ते लहुगं च्चिअ नीणिए गुरुगा ।।७०।।**

(नि०भा० ११०)

व्याख्या—**एवमेव** यथाऽप्रीतिके तथैवाऽसङ्खडेऽपि वाचिककलहेऽपि । **असम्पत्तौ गुरुको** मासः । **सम्पत्तौ चतुर्लघु** । **निच्छुभणं** निष्कासनं यस्योपरि कोपः स्यात् तस्य गच्छान्निष्कासनोपायकरणमित्यर्थः । तत्राऽप्य—**सम्पत्तौ चतुर्लघुका** एव । नीणिए गच्छान्निष्कासिते **चतुर्गुरुकाः** ।।७०।।

**उवहीहरणे गुरुगा असंपसंपत्तिए अ छल्लहुगा ।**
**पंतावणसंकप्पे छल्लहुगा अचलमाणस्स ।।७१।।**

व्याख्या—**उपधिहरणे** यस्योपरि रोषः स्यात् तस्य साधोः परिभोग्यस्य **उपधेः** उपकरणस्य **हरणम्** अपहरणमपहारणं वा, तत्राऽसम्पत्तौ **चतुर्गुरुकाः**, **सम्पत्तौ च षड्लघुकाः** । **प्रान्तापनं** यष्टिमुष्ट्यादिप्रहारैर्हननं, तस्य **सङ्कल्पः** चिन्तनं तस्मिन् सति **'अचलमाणस्स'** अचलतः तदवस्थस्यैव कायक्रियामप्रयुञ्जानस्य **षड्लघुकाः** ।।७१।।

**पहरणमग्गणि छग्गुरु छेओ दिट्ठंमि अट्ठमं गहिए ।**
**उग्गिन्न दिन्न अमए नवमं उद्दावणे चरिमं ।।७२।।**

(नि०भा० ११२)

व्याख्या—**प्रहरणं** लकुटादि तस्य **मार्गणमितस्ततो** गवेषणं तस्मिन् **षड्गुरु** । तेन च मार्गयता प्रहरणे **दृष्टे** चक्षुर्निपाते कृतमात्रे एव **छेदः** । गत्वा तस्मिन् प्रहरणे हस्तेन **गृहीते सत्यष्टमम्**, मासलघुकाद् गण्यमानं **मूलमष्टमं** भवति । यस्य रुष्टस्तस्योपरि प्रहरणे उद्गीर्णे उत्पाटिते सति **नवमं** भवति । दत्ते प्रहारे यदि **न मृतस्तदापि नवममेवानवस्थाप्यमित्यर्थः** । प्रहारे दत्ते यदि **मृतस्तदा चरमं** पाराञ्चिकं भवति ।।७२।।

अथाधिकरणं कृत्वा कश्चिदनुपशान्त एव गच्छे तिष्ठति तस्य विधिमाह—

**गच्छा अणिग्गयस्सा अणुवसमं तस्सिमो विही होइ ।**
**सज्झाय—भिक्ख—भत्तट्ठ—वासए चउर हिक्किक्के ।।७३।।**

(नि०भा० २७९६, बृ०क० ५७६२)

व्याख्या—**गच्छादनिर्गतस्यानुपशाम्यतोऽयं विधिर्भवति** सूर्योदयकाले यः **स्वाध्यायः** क्रियते तदवसरे प्रथममसौ नोद्यते[A] । द्वितीयं **भिक्षावतरण**वेलायाम् । तृतीयं **भक्तार्थ**काले । चतुर्थं प्रादोषिकाऽऽ**वश्यक**वेलायाम् । एवं **चतुरो** वारा**नेकैकस्मिन्** दिने नोद्यते । तच्चाधिकरणं प्रभाते प्रतिक्रान्तानां स्वाध्याये अप्रस्थापिते एवमादिकारणे उत्पद्येत— दोषदुष्टां प्रतिलेखनां कुर्वन्, अप्रतिलेखयन्, असामाचार्या वा प्रतिलेखयन्नोदितो यदि सम्यग् न प्रतिपद्यते ततोऽधिकरणं भवेत् । उत्पन्ने चाधिकरणे यदि स्वाध्याये अप्रस्थापिते स्वयमेवोपशान्तस्ततो लष्टम् । अथ नोपशान्तस्ततो यः प्रस्थापनार्थमुपतिष्ठते स वारणीयो यथा—तिष्ठतु तावद्यावत् सर्वेऽपि मिलन्ति । तत आगतेषु सर्वेषु सूरयो ब्रुवते—आर्योपशाम्य इमे साधवः स्वाध्यायं न प्रस्थापयन्ति । स पृष्टोत्तरं प्रयच्छति—अवश्यं कालो न शुद्धः, परिजितं वा साधूनां सूत्रश्रुतं ततो न प्रस्थापयन्ति । एवं भणतस्तस्य मासगुरु । साधवश्च सर्वेऽपि प्रस्थापयन्ति स्वाध्यायं च कुर्वन्ति । काले प्रतिक्रान्ते भिक्षावेलायां जातायां पुनराचार्या भणन्ति—आर्य! साधवस्त्वदीयेनानुपशमनेन भिक्षां नावतरन्ति, उपशमं कुरु । स पृष्टोत्तरं ददाति—नूनमभक्तार्थिनः, न वा भिक्षावेला । एवमुक्ते सर्वेऽप्यवतरन्ति तस्यानुपशान्तस्य द्वितीयं मासगुरु । भिक्षानिवृत्तेषु साधुषु गुरवो

**A.** प्रेर्यते ।

भणन्ति—आर्य ! साधवो न भुञ्जते, स प्राह—नूनं साधूनां न जीर्णम् । एवमुक्ते सर्वे समुद्दिशन्ति तस्य पुनस्तृतीयं मासगुरु । भूयोऽपि प्रतिक्रमणवेलायां भणन्ति—आर्य ! साधवो न प्रतिक्रामन्ति, उपशमं कुरु । स प्रत्युत्तरमाह—नूनं निरतीचाराः श्रमणास्तेन न प्रतिक्रामन्ति । एवमुक्ते सर्वेऽपि प्रतिक्रामन्ति । तस्य पुनश्चतुर्गुरुकम् । एवं प्रभातकालेऽधिकरणे उत्पन्ने विधिरुक्तः । अथाऽन्यदा स्वाध्याये प्रस्थापिते यदि पठतामधिकरणमुत्पन्नं ततस्त्रयो नोदनाकालाः । द्वौ मासगुरुकौ । भिक्षां हिण्डमानानामधिकरणे उत्पन्ने द्वौ नोदनाकालौ, एकं मासगुरु । भुक्तानामधिकरणे उत्पन्ने एको नोदनाकालः । अत्र नास्ति मासगुरु । अनुपशान्तस्य प्रतिक्रमणे कृते चतुर्गुरुकमेव भवति ।।७३।।

**एवं दिवसे दिवसे चाउक्कालं तु सारणा तस्स ।**
**जइ वारि न सारेई गुरूण गुरुगो अ ततिवारे ।।७४।।**

(नि०भा० २८००, बृ०क० ५७६६)

व्याख्या—एवमनुपशान्तस्य दिवसे दिवसे चतुष्कालं स्वाध्यायप्रस्थापनादिरूपं तस्य सारणा कर्त्तव्या । यति यावतो वारान् आचार्यो न सारयति, तति तावतो वारान् गुरूणामाचार्याणां मासगुरुका भवन्ति । एवं दिने दिने सारणाविधिरगीतार्थस्य कर्त्तव्यो यस्तु गीतार्थः स यद्येकदिनं स्वाध्यायभिक्षा—ऽभक्तार्था—ऽऽवश्यकलक्षणेषु चतुर्षु स्थानेषु सारितस्तदा परतस्तमसारयन्नपि गुरुः शुद्धः । यदि पुनस्तमगीतार्थं गीतार्थं वा गुरुर्न सारयति, ततो द्वयोरप्याऽऽचार्यस्यानुपशाम्यतश्च प्रायश्चित्तम् । अन्ये ब्रुवते—अगीतार्थस्यानुपशाम्यतोऽपि नास्ति प्रायश्चित्तम् । यस्तु गुरुरगीतार्थं न नोदयति तस्य प्रायश्चित्तम् ।।७४।।

**गच्छो उ दुन्नि मासे पक्खे पक्खे इमं परिहरेइ ।**
**भत्तट्ठं सज्झायं वंदणऽ(णाऽऽ ?)लावं तउ परेणं ।।७५।।**

(नि०भा० २८०२, बृ०क० ५७६८)

व्याख्या—एवमनुपशाम्यन्तं गच्छो द्वौ मासौ सारयति । इदं पुनः पक्षे पक्षे गच्छः परिहरति । तद्यथा—अनुपशान्तस्य पक्षे गते गच्छस्तेन सार्द्धं भक्तार्थं न करोति, न गृह्णाति न वा किमपि तस्य ददातीत्यर्थः । द्वितीये पक्षे गते स्वाध्यायं तेन समं न करोति । तृतीये पक्षे गते वन्दनं न करोति । चतुर्थोऽपि पक्षो यदा गतो भवति, ततः परमालापमपि तेन सार्द्धं वर्जयति ।।७५।।

**आयरिओ चउमासे भुंजइ चउरो उ देइ सज्झायं ।**
**चउरो वंदणलावं तेण परं मूलनिच्छुभणा ।।७६।।**

(नि०भा० २८०३, बृ०क० ५७६९)

व्याख्या—आचार्यः पुनश्चतुरो **मासान्** सर्वैरपि प्रकारैस्तेन समं **सम्भुङ्क्ते** । ततः परं **चतुरो मासान्** भक्तार्थं वर्जयति, **स्वाध्यायं तु ददाति** । ततश्चतुरो मासान् स्वाध्यायं परिहृत्य **वन्दनाऽऽलापौ** ददाति । ततः परं वर्षे पूर्णे सांवत्सरिके प्रतिक्रान्ते उपशान्तस्य **मूलम्** । अनुपशान्तस्य तु **गणान्निष्कासनं** कर्त्तव्यम् । एवं द्वादशमास्याम—प्यनुपशाम्यतो द्वयोरादिममासयोर्यावद् गच्छेन विसर्जितस्तावत्तपःप्रायश्चित्तमेव, शेषेषु दशसु मासेषु पञ्चरात्रिं—दिवच्छेदो यावत् सांवत्सरिकं पर्व प्राप्तं भवति । पर्युषणारात्रौ प्रतिक्रान्तानामधिकरणे उत्पन्ने एष विधिरुक्तः । भाद्रपदशुद्धपञ्चम्यामनुदिते आदित्ये यदाऽधिकरणमुत्पद्यते ततः पर्युषणायामप्यनुपशान्ते संवत्सरो भवति । षष्ठ्यामुत्पन्ने एकदिवसोनः संवत्सरः । सप्तम्यां दिनद्वयोनः संवत्सर एवमेकैकदिनहान्या तावत् ज्ञेयं यावत् पर्युषणादिवसः । तत्रानुदिते रवौ कलहे उत्पन्ने एवमेव नोदना कर्त्तव्या । प्रथमं स्वाध्यायप्रस्थापनं कर्तुकामाः सारयन्ति, ततश्चैत्यवन्दनार्थं गन्तुकामाः सारयेयुः, तत्राऽप्यनुपशान्ते प्रतिक्रमणवेलायां सारयन्ति । एवं तस्मिन् पर्युषणादिवसे त्रिषु स्थानेषु नोदितस्याऽनुपशान्तस्य त्रीणि मासगुरूणि भवन्ति ।।७६।। ततः किमित्याह—

**मूलं तु पडिक्कंते पडिक्कमंते वि हुज्ज अहिगरणं ।**
**संवच्छरमुस्सग्गे कयंमि मूलं न सेसाइं ।।७७।।**

(नि०भा० २८०६, बृ०क० ५७७२)

व्याख्या—पर्युषणादिने सर्वेषामधिकरणानां व्यवच्छित्तिः कर्त्तव्येति कृत्वा **प्रतिक्रान्ते** समाप्ते आवश्यके यदि नोपशान्तस्ततो **मूलं** भवति । एष पर्युषणादिनोत्पन्नाधिकरणे विधिः । अथ **प्रतिक्रमणं कुर्वतामेवाधिकरणं** भवेत् । ततः **सांवत्सरिके कायोत्सर्गे कृते मूलमेव** केवलं, **न शेषाणि** प्रायश्चित्तानि । एवमाचार्यस्तं रुष्टं संवत्सरं यावत् प्रयत्नेन रक्षति । किमर्थम् ?, उच्यते—यदि नाम उपशाम्येत । अथ संवत्सरेणापि यदि नोपशाम्यति, ततः पर्वतराजीसदृशरोषः स मन्तव्यः । वर्षादूर्ध्वं च मूलाचार्यसमीपान्निर्गतं तमन्यौ द्वावाचार्यौ क्रमेणैकैकं वर्षमनेनैव विधिना प्रयत्नेन संरक्षतः । तन्मध्याद् येनोपशमितस्तस्यैवाऽसौ शिष्यः । ततो वर्षत्रयादूर्ध्वमेष गृहीक्रियते—सङ्घस्तस्य लिङ्गमपहरतीत्यर्थः । द्वितीयपदेन राजप्रव्रजितस्य लिङ्गं न ह्रियते । एवं भिक्षोर्विधिरुक्तः । उपाध्यायाचार्ययोरप्येष एव विधिः । नवरमुपाध्यायस्यानुपशाम्यतो गच्छे वसतस्त्रीन् पक्षांस्तपःप्रायश्चित्तम्, परतश्छेदः । आचार्यस्यानुपशाम्यतो द्वौ पक्षौ तपः, परतश्छेदः । ततो ये उपाध्यायस्य त्रयः पक्षास्ते दिवसीकृताः पञ्चचत्वारिंशद्दिवसा भवन्ति । ततः पञ्चचत्वारिंशद्दिवसाश्चतुर्धा क्रियन्ते । चतुर्भागे च सपादा एकादश दिवसा भवन्ति । तत्र गच्छ उपाध्यायेन सममेकादश दिनानि भक्तार्थं करोति । एवं स्वाध्यायवन्दनालापानपि प्रत्येकमेकादश

दिनानि यथाक्रमं करोति, परतस्तु परिहापयति । पञ्चचत्वारिंशद्दिवसानन्तरं चोपाध्यायस्य दशकच्छेदः । आचार्यस्तथैवोपाध्यायमपि चतुर्भिश्चतुर्भिर्मासैर्भक्तार्थादीनि परिहापयन् संवत्सरं सारयति । आचार्यस्य द्वौ पक्षौ दिवसीकृतौ त्रिंशद्दिवसा भवन्ति । ततश्चतुर्धा विभक्ता चतुर्थभागे चार्द्धाष्टमा दिवसा भवन्ति। तत्र गच्छ आचार्येण सहार्द्धाष्टमानि दिनानि भक्तार्थं करोति । एवं स्वाध्यायवन्दनालापानपि यथाक्रममर्द्धाष्टमैर्दिवसैः प्रत्येकं हापयति, ततः परं गच्छेन चतुर्भिरपि भक्तार्थादिभिः पदैर्विवर्जित आचार्यस्तत आचार्यस्य पञ्चदशकच्छेदो भवति । अत्राह—ननु सदृशापराधेऽप्याचार्योपाध्यायभिक्षूणां कथं विषमं प्रायश्चित्तं प्रदीयते ? उच्यते—कुमारदृष्टान्तोऽत्रावगन्तव्यः । स चाऽयम्—एगस्स रण्णो तिण्णि पुत्ता जिट्ठो मज्झिमो कणिट्ठो । तेहि अ तिहिं वि सामत्थिअं पिअरं मारित्ता रज्जं तिहा विभयामो । तं च रण्णा नायं । तत्थ जिट्ठो जुवराया एस पहाणवत्थुत्ति काउं किमेरिसं अज्झवसति ? त्ति तस्स भोगहरण—बंधणताडणादिआ सव्वे दंडप्पगारा कया । मज्झिमो एस अपहाणोत्ति काउं तस्स भोगहरणं न कयं बंधवहखिंसाइआ कया । अव्वत्तो कणिट्ठो एएहिं विआरिउत्ति काउं कण्णचवेटयदंडो खिंसा दंडो अ कओ, न भोगहरणबंधणदंडा कया । अयमर्थोपनयो—यथा सदृशेऽप्यपराधे युवराजस्य भोगहरणं बन्धनादिको महान् दण्डः कृतः । मध्यमस्य बन्धवधादिको, न भोगहरणम्। कनिष्ठस्य कर्णामोटनादिकः, न भोगहरणादिकः । तथा लोकोत्तरेऽप्युत्कृष्टमध्यमजघन्येषु पुरुषवस्तुषु बृहत्तमो लघुर्लघुतरश्च यथाक्रमं दण्डः क्रियते । यतः प्रमाणभूते पुरुषे अक्रियासु वर्त्तमाने अप्रत्ययादयो दोषा भवन्ति । अथ भिक्षुरुपाध्याय आचार्यो वा यदा स्वगच्छेन भक्तार्थादिभिश्चतुर्भिः पदैर्वर्जितस्तदा परगणं सङ्क्रामति । ततस्तस्य परगणाचार्यो वन्दनालापाभ्यां द्वाभ्यां पदाभ्यां सम्भुञ्जानः स्वाध्यायादिभिः पदैर्दिने दिने सारणां तथैव वर्षं यावत्करोति । परगणे चानुपशाम्यतो भिक्षोः प्रतिदिनं दशकच्छेदः । उपाध्यायस्य पञ्चदशकच्छेदः । आचार्यस्य विंशच्छेदः। परगणे अन्यसाम्भोगिकेषु पुनः सङ्क्रान्तस्य भिक्षोरनुपशाम्यतः पञ्चदशकच्छेदः । उपाध्यायस्य विंशच्छेदः। आचार्यस्य पञ्चविंशच्छेदः । अवसन्नेषु च सङ्क्रान्तस्य भिक्षोर्विंशच्छेदः । उपाध्यायस्य पञ्चविंशच्छेदः । आचार्यस्य त्रिंशद्रात्रिंदिवच्छेदः।

| | स्वगणे | परगणे साम्भो० | परगणे अन्य० | अवसन्नेषु |
|---|---|---|---|---|
| भिक्षोः | ५ | १० | १५ | २० |
| उपा० | १० | १५ | २० | २५ |
| आ० | १५ | २० | २५ | ३० |

अत्र शिष्यः प्रेरयति—रागद्वेषिणो यूयं यत् स्वगणे स्तोकं छेदप्रायश्चित्तं दत्तम्, परगणे तु प्रभूतम्। एवं स्वगणे भवतां रागः, परगणे द्वेषः। गुरुराह-इदं छेदनानात्वं कुर्वतो वयं न रागद्वेषिणः। तथा चात्र दृष्टान्तः—एगस्स गिहिणो चउरो भज्जाओ। ताओ अ तेण कम्हि एगे अवराहे कए पंतावित्ता नीहरह मम गिहाउत्ति निच्छूढा। तत्थेगा कम्हिइ परघरंमि गया। बिइआ कुलघरं। तईआ भत्तुणो एगसरीरो वयंसो त्ति तस्स घरं गया। चउत्थी निच्छुभंती वि बारसाहाए लग्गा। हम्ममाणि वि न गच्छइ। भणति अ कओ वच्चामि ? नत्थि मे अन्नो गइविसओ। जइ वि मारेसि तहावि तुमं चेव गई सरणं तत्थेव ठिआ। तओ तुट्ठेण चउत्थी घरसामिणी कया। तइआए घाडिअंघरं[A] जंतीए सो चेव अणुवत्तिओ। विगयरोसेण खरंटिआ आणिआ य। बिइआए कुलघरं जंतीए पिउगिहबलं गहिअं गाढतरं रुट्ठेण अन्नेहिं भणिए विगयरोसेण खरंटिआ दंडिआ य। दूरनट्ठ त्ति न ताए किंचि पओअणं महंतेण वा पच्छित्तदंडेण दंडिउं आणिज्जइ। एवं उवसंहारो—परघरसंठाणीआ उसन्ना। कुलघरसंठाणीआ अन्नसंभोइआ घाडिअसमा संभोइआ। अनिग्गमे सघरसमो सगच्छो जाव दूरतरं ताव महंततरो दंडो भवइ। एवमादिकोऽधिकरणविषयो वाच्यविस्तरो निशीथादितः स्वयमवसेयो विस्तरप्रियैः ।।७७।।

अथाधिकरणादिदोषैर्गणान्निर्गत्य यो भिक्षुरुपसम्पदनार्थं समागतः स्यात् स परिहरणीय इति दर्शयति—

**अहिगरणविगइजोगे पडिणीए थद्धलुद्धनिद्धम्मे।**
**अलस अणुबद्धरोसे सच्छंदमई पयहिअव्वो ।।७८।।**

(नि०भा० ६३२७, व्य०सू० २४८)

व्याख्या—यदि स उपसम्पद्यमानः साधुः साधुभिर्गृहिभिर्वा सहाधिकरणं कृत्वा स्वस्थानान्निर्गतः। **विगइ**' त्ति विकृतिलाम्पट्यात्। **जोग**' त्ति योगोद्वहनभीरुतया। **पडिणीए**' त्ति प्रत्यनीकोऽत्र मे साधुरितिबुद्ध्या। तथा **थद्धलुद्ध**' इत्यादि। **स्तब्ध** इति वा, **लुब्ध** इति वा, **निर्द्धर्मा** इति वा, **अलस** इति वा, **अनुबद्धवैर** इति वा, **स्वच्छन्दमतिरि**ति वा विनिर्गतस्ततस्तस्य निर्गमनमशुद्धमिति कृत्वा **पयहिअव्वो**' त्ति। परिहर्त्तव्यः। नन्वधिकरणादिदोषतो विनिर्गतास्ते कथमवसीयन्ते ? उच्यते—तथाविधतदुक्तिवशात्। तथाहि—विकृतिदोषविनिर्गतः पृष्टोऽपृष्टो वा वक्ति—स आचार्यो विकृतिं—घृतादिकां ग्रहीतुं न ददाति। तथा योगवाहिभिर्योगोत्तीर्णैः कायोत्सर्गकरणतो गृहीतायां विकृतावन्यैश्च भुक्तायामपि या उद्धरिता विकृतिस्तामपि नानुजानाति। किंच भगवन् ! नवेक्षुतुल्यो मम देहो। यथा स इक्षुः पानीयेन विना शुष्यति तथा ममापि देहो विकृतिं विना सीदति। अन्यच्चाहं स्वभावेन दुर्बलः, न विकृतिमन्तरेण बलिको भवामि। तथा सर्वदैव विकृत्या भावितदेहस्ततस्तद्भावितस्य सतो ममेदानीं तस्या

---

**A.** वयस्यगृहं।

अभावे न बलम्, न च सूत्रस्यार्थस्य वा ग्रहणमशक्तत्वात् पूर्वगृहीतस्य तु सूत्रार्थस्यावधारणं कुतः ? ततोऽशक्त्या सर्वं दूरत एव विस्मृतं ततोऽहं विनिर्गतः । योगभीरुर्ब्रूते—तस्याचार्यस्य गच्छे योग एकान्तरोपवासेनोह्यते एकान्तराचाम्लेन वा । तथा योगवाहिनो योगोत्तीर्णस्यापि ते आचार्या विकृतिं न विसृजन्ति । ततः कर्कशास्तत्र योगा इति विनिर्गतः । प्रत्यनीकत्रस्तोऽभिधत्ते—तत्र गच्छे मम प्रत्यनीकोऽस्ति स कथञ्चित् सामाचारीयोगे विस्मृते स्खलिते दुष्प्रत्युपेक्षणादिके मां गृह्णाति, अत्यर्थं खरण्टयति । अथवा चुक्कस्खलितेषु जातेषु तानि चुक्कस्खलितानि अपराधपदे छिद्राणीव गृह्णाति गृहीत्वा च गुरूणां कथयति । पश्चाद् गुरवो मां खरण्टयन्ति । ततो विनिर्गतः । अथ स्तब्धो ब्रूते—यद्याचार्याश्चङ्क्रमणं कुर्वन्ति, कायिक्यादिभूमिं गच्छन्त्यागच्छन्ति वा तदा(था)ऽप्युत्थातव्यास्तेषां नायकत्वात् । तत एवं चङ्क्रमणादावभ्युत्तिष्ठतामस्माकं कटी वातेन गृह्यते, भूयोभूय उत्थाने च पलिमन्थभावात् सूत्ररूपस्यार्थरुपस्य वा स्वाध्यायस्य हानिः । अथ नाऽभ्युत्थीयन्ते तत आचार्याः प्रायश्चित्तं ददन्ति खरण्टयन्ति च ततोऽहं विनिर्गतः । लुब्धः पुनरेवं ब्रूते—यत्किमपि उत्कृष्टं शिखरिणी—मोदकादि तदाचार्यः स्वयं भुङ्क्ते न त्वस्मादृशेभ्यो ददाति, अन्येभ्यो वा बालवृद्धदुर्बलप्राघूर्णकिभ्यो ददाति । तत एवमसहमानोऽहं निर्गतः । यो निर्द्धर्मा स एवं भाषते—यदि कथमपि निर्गच्छन् प्रविशन् वा आवश्यकीं नैषेधिकीं च न करोति, दण्डादिकं वा गृह्णन् निक्षिपन् वा न प्रमार्जयति, तत आचार्या निरनुकम्पाः सन्त उग्रं प्रायश्चित्तं दण्डं प्रयच्छन्ति । ततोऽहं दण्डभयाद्विनिर्गतः । यः पुनरलसः स एवं ब्रूते—बालवृद्धादीनामर्थाय तस्मिन् गच्छे दीर्घा भिक्षाचर्या । क्षुल्लकं कर्कशं वा तत्क्षेत्रं ततः प्रतिदिवसमन्यत्र ग्रामान्तरे गत्वा भिक्षाऽऽनीयते । तथा यदि कथमप्यपर्याप्ते समागम्यते ततो गुरुः खरण्टयति—किं वसतौ महानसमस्ति ? येनाऽपर्याप्तः समागतः । तस्माद् भूयोऽपि व्रज भिक्षार्थं यतः कालोऽद्यापि बहुः प्राप्यः क्षेत्रं भाजनं चास्तीति ततोऽहं निर्गतः । अनुबद्धवैरो भणति—कलहमपि कृत्वा तत्र संयता एकत्र भुञ्जते । यथा चण्डालाः शुनका वा परस्परं भण्डित्वा तत्क्षणादेवैकत्र भुञ्जते नवरं मिथ्यादुष्कृतं परस्परं दाप्यन्ते इति विशेषः । अहं पुनर्न शक्नोमि हृदयस्थेन शल्येन तैः सहैकत्र समुद्देष्टुमिति विनिर्गतः । स्वच्छन्दमतिः पुनरेवं भाषते—तत्र गच्छे एकाकिनः सतः स्तोकमपि चलितुं न लभ्यं सञ्ज्ञाभूमावप्येकाकिनः सतो गन्तुं न प्रयच्छन्ति, किन्त्वेवं ब्रुवते—नियमात् सङ्घाटकरूपतया केनापि सहितेन गन्तव्यं ततस्तमसहमानोऽहमत्रागतः । एतान्यधिकरणादीनि पदान्याचार्यः श्रुत्वा तं परित्यजति ।।७८।।

एतैश्चाधिकरणादिपदैरागतस्य तस्योपसम्पद्यमानस्य प्रतीच्छतश्चाचार्यस्येदं प्रायश्चित्तम्—

**समणहिगरणे पडिणीअ लुद्ध अणुबद्धरोसि चउगुरुगा ।**
**सेसाण हुंति लहुगा एमेव पडिच्छमाणस्स ।।७९।।**

(नि०भा० ६३३४, व्य०सू० २५५)

व्याख्या—यः **श्रमणैः सहाधिकरणं** कृत्वा समागतः, यश्च तत्र मे **प्रत्यनीकः** साधुरिति कृत्वा समायातः, यश्च **लुब्धो यश्चानुबद्धरोषः** । एतेषां चतुर्णां प्रायश्चित्तं **चत्वारो गुरुमासाः** । **शेषाणां** षण्णां विकृतिलम्पट—योगभीरु—स्तब्ध—निर्द्धर्मा—ऽलस—स्वच्छन्दमतीनां गृहिभण्डनकारिणश्च **चतुर्लघुकाः** । यः पुनराचार्यस्तदाचार्याननुज्ञया प्रायश्चित्तदानमन्तरेण च **प्रतीच्छति** तस्यापि प्रायश्चित्तमेवमेव । तद्यथा श्रमणाधिकरणकारि—प्रत्यनीक—लुब्धा—ऽनुबद्धरोषान् प्रतीच्छतश्चत्वारो गुरुमासाः । शेषान् षट् प्रतीच्छतश्चत्वारो लघुमासाः ।।७९।।

अथाधिकरणादियथोक्तदोषरहितो यः समागतो भवेत् सोऽपि त्रीणि दिनानि परीक्ष्य सङ्ग्रहीतव्यः, यदि पुनः परीक्षां न कुर्वन्ति ततश्चतुर्लघु। अन्याचार्याभिप्रायेण वा मासलघु । सा च परीक्षा उभयथापि । शिष्य आचार्यं परीक्षते, आचार्यः शिष्यम् । सा पुनः परीक्षा यैः पदैः क्रियते तान्याह—

**आवस्सय सज्झाए पडिलेहण भुंजणे अ भासाए ।**
**वीआरे गेलन्ने भिक्खग्गहणे परिच्छंति ।।८०।।**

(नि०भा० ६३४३, व्य०सू० २६५)

व्याख्या—**आवश्यके स्वाध्याये प्रतिलेखने भोजने भाषायां वीचारे** बहिर्भूमौ **ग्लाने भिक्षाग्रहणे** च परस्परमाचार्यशिष्यौ **परीक्षेते** । **तत्रावश्यके** शिष्यमित्थं परीक्षन्ते आचार्याः—आवश्यकं हीनं करोति, हीनं नाम यत् कायोत्सर्गसूत्राणि मन्दं मन्दमुच्चार्य शेषसाधुषु चिरकालं कायोत्सर्गस्थितेषु पश्चात् कायोत्सर्गे तिष्ठति इत्यादि । अधिकं वा करोति। अधिकं नाम कायोत्सर्गसूत्राण्यतित्वरितमुच्चार्यानुप्रेक्षाकरणार्थं पूर्वमेव कायोत्सर्गे तिष्ठति । रत्नाधिकेन चोत्सारिते कायोत्सर्गे पश्चाच्चिरेण स्वं कायोत्सर्गमुत्सारयति इत्यादि । विपरीतं वा करोति, विपरीतं नाम प्रादोषिकान् कायोत्सर्गान् प्राभातिकानिव करोति, प्राभातिकान् प्रादोषिकानिव । अथवा सूर्येऽस्तमितमात्रे एव निर्व्याघाते सर्वैरपि साधुभिराचार्येण सह प्रतिक्रमितव्यम् । यदि पुनराचार्यस्य श्राद्धादिधर्मकथादिभिर्व्याघातस्ततो बालवृद्धग्लाना—सहान् निषद्याधरं च मुक्त्वा शेषैः सूत्रार्थस्मरणार्थं कायोत्सर्गेण स्थातव्यम् । ये पुनः सत्यपि बले पूर्वं कायोत्सर्गे न तिष्ठन्ति तान् पूर्वमतिष्ठतो नोदयन्त्याचार्याः । यः पुनः परीक्ष्यते तं प्रमाद्यन्तमपि न शिक्षयन्ति, ततो यदि स एवं व्यवस्यति—यथाऽऽत्मीयान् प्रमाद्यतो नोदयन्ति, न मामिति सुखमिह वस्तुमिति । स इत्थम्भूतः पञ्जरभग्नो ज्ञातव्यो न प्रतीच्छनीयः । यः पुनरप्रतिनोद्यमानः सन्नेवं चिन्तयति—येषु स्थानेष्वहं प्रमाद्यामि तेष्वेव स्थानेष्वात्मीयान् शिष्यान् प्रमाद्यतो नोदयन्त्याऽऽचार्या न माम् । अहो ! अहमनाथः परित्यक्त एतैरिति चिन्तयित्वा संविग्नविहारमिच्छन् स्वयमेव ततः प्रमादस्थानान्निवर्त्तते । अथवा छिन्नमुक्तावलीप्रकाशान्यश्रूणि विमुञ्चन् आचार्याणां पादयोः पतित्वा शिक्षां मार्गयति—यथा मामप्यत्यादरेण भगवन्तः शिक्षयन्तां मा मां

शरणमुपागतं परित्यजत, युष्मच्छरणमागतोऽप्यहं युष्माभिः शिक्षाया अप्रसादतस्त्यक्तः । न चैतद् भगवतां परमकरुणापरीतचेतसामुचितं तस्मात् प्रसादमाधाय मामपि सीदन्तं शिक्षयध्वमित्येष इत्थम्भूतः प्रतिग्राह्यः । एषाऽऽवश्यकमधिकृत्य परीक्षा । एवं स्वाध्यायेऽपि हीनमधिकं विपरीतं च करोति । **स्वाध्याये** च हीनता नाम यद्यप्राप्तायामपि कालवेलायां कालप्रतिक्रमणं करोति । अधिकता च यद्यतिक्रान्तायामपि कालवेलायां कालं न प्रतिक्रामति । वन्दनादिक्रियां वा तदनुगतां हीनाधिकां करोति । विपरीतता तु पौरुषीपाठ्यमतिक्रान्तायां पौरुष्यां पठति । उत्कालिकं पौरुष्यामिति । **प्रतिलेखने**ऽप्येवमेव कालतो हीनामधिकां वा प्रतिलेखनां करोति । खोटकादिभिर्वा हीनाधिकां विपरीतां वा करोति । विपरितता नाम प्रभाते यन्मुखपोतिकादिक्रमेण न प्रत्युपेक्षते किन्तु स्वेच्छया, यदि वा पूर्वाह्णे रजोहरणं निष्पश्चिमं प्रत्युपेक्षते अपराह्णे तु सर्वप्रथममित्यादि । तथा **भोजने** आलोकादिविधिना सूत्रोक्तेन न भुङ्क्ते, दोषैर्वा काकशृगालखादितादिभिः, असुरसुरं अचवचवं अद्दुअमविलम्बिअमित्यादिविपरीत—रूपैर्वा भुङ्क्ते । **भाषायां** या गृहस्थभाषा ढड्ढर[A]भाषा स्थूरस्वरभाषा च तां भाषते । **वीचारे** स्थण्डिले सामाचारीं पादप्रमार्जनडगलकग्रहणदिगालोकनादिरूपां विलुम्पति । तथा **ग्लानं** न प्रतिजागर्ति, नाऽपि ग्लानस्य खेलमल्लकादिकं समर्पयति । **भिक्षाग्रहणे** च अभणितः सन् भिक्षां न हिण्डते, भणितोऽपि वा अर्द्धे हिण्डिते प्रतिनिवर्त्तते, अनेषणीयां वा भिक्षां गृह्णाति, कोण्ट[B]लेन वोत्पादयति । एतेषु च स्थानेषु स्वशिष्यान्नोदयन्ति न तु तं परीक्ष्यमाणमित्यादि प्राग्वत् । स चोपसम्पद्यमानः संविग्नेभ्यः पार्श्वस्थादिभ्यो वा समागतो भवेत् । तत्र यः संविग्नेभ्यः समागतः स ज्ञानदर्शनार्थं पञ्जरभग्नो वा समागतः । यः पुनः पार्श्वस्थादिभ्यः समायातः स चारित्रार्थमुद्यन्तुकामोऽनुद्यन्तुकामो वा ज्ञानदर्शनार्थमायातः । अथवा संविग्नेभ्यो यः समागतः स पञ्जरभग्नः । यः पुनः पार्श्वस्थादिभ्यः समायातः स पञ्जराभिमुखः । एतयोर्द्वयोरपि समागतयोरावश्यकादिभिः पदैराचार्येण परीक्षा कर्त्तव्या । एवं शिष्येणाऽप्यावश्यकादिभिः पदैराचार्यस्य परीक्षा कर्त्तव्या । सा चैवम्—**आवश्यकादिषु** पदेषु मध्ये क्वापि यदि गच्छवासिनः कानपि सीदतः पश्यति, तत आचार्येभ्यः कथयति, तेन कथिते सति यद्याचार्याः सम्यक् प्रतिपद्य तान् प्रमादिनः प्रतिनोदयन्ति प्रायश्चित्तं च प्रयच्छन्ति । ततस्तत्रोपसम्पत्तव्यम् । अथ कथितेऽप्याचार्यास्तूष्णीं तिष्ठन्ति, भणन्ति वा किं तव ? यद्येते न सम्यग्वर्त्तन्ते, तर्हि अन्यत्र गच्छान्तरे उपसम्पत्तव्यं न तत्र । पञ्जरस्य चेदं स्वरूपम्—

**पणगाइसंगहो होइ पंजरो जा य सारणान्नुण्णं । पच्छित्तचमढणाहिं निवारणं सउणिदिट्ठंतो'** ।।

(नि०भा० ६३५०, व्य०सू० २७२)

**पञ्चकं** नाम आचार्योपाध्यायप्रवर्त्तिस्थविरगणावच्छेदकरूपम्, आदिशब्दात् भिक्षवो वृषभाः क्षुल्लका वृद्धाः परिगृह्यन्ते । तेषां सङ्ग्रहः **पञ्चकादिसङ्ग्रहो भवति पञ्जरः** । अथवा या आचार्यादीनामन्योऽन्यं परस्परं सारणा,

---

**A.** महाध्वनिभाषा । **B.** कोंटलय (देश्यशब्दः) ज्योतिषसम्बन्धिसूचना, शकुनादिनिमित्तसम्बन्धिसूचना ।

किमुक्तं भवति—आचार्यादयः परस्परं यन्मृदुमधुरभाषया सोपालम्भं वा शिक्षयन्ते एष वा पञ्जरः । यदि वा यत् **प्रायश्चित्तचमढनाभिरसामाचार्या** [A] **निवारणं** पूर्वं खरपरुषैस्तर्जयित्वा पश्चात् प्रायश्चित्तप्रदानेन यदसामाचारीतो निवर्त्तनं तत्पञ्जरः । अत्रार्थे **शकुनिदृष्टान्तः** यथा पञ्जरे शकुनेः शलाकादिभिः स्वच्छन्दगमनं निवार्यते तथा आचार्यादि–पुरुषगच्छपञ्जरे सारणाशलाकया असामाचारीरूपोन्मार्गगमनं निवार्यते । अत्र ये संविग्नेभ्यो ज्ञानदर्शनार्थमागता ये च पार्श्वस्थादिभ्यश्चारित्रार्थमागतास्ते सङ्ग्रहीतव्याः । ये पुनः पञ्जरभग्ना ज्ञानदर्शनार्थमागता ये च पार्श्वस्थादिभ्यो ज्ञानदर्शनार्थमागतास्ते न सङ्ग्रहीतव्याः । न च स्फुटं प्रतिषेध्यन्ते । तेषां चेयं प्रतिषेधयतना—यदेतत् सूत्रमर्थं वा यूयमिच्छत तदस्माकं नास्ति । अथ भणति—मयाऽन्यसमीपे श्रुतं यथा युष्माकमेतदस्ति, अथवा भणति—मयैव यूयं वाचनां ददाना श्रुताः । तत आचार्या भणन्ति—सत्यम्, परमिदानीं तदस्माकं शङ्कितं जातं न च शङ्कितं सूत्रमर्थो वा दीयते आगमे प्रतिषिद्धत्वात् । ततोऽन्यत्र गच्छत यत्र निश्शङ्कितं श्रुतं लभध्वे । उक्तं च—

**नत्थेअंमि जमिच्छह सुअं मए आमसंकिअं तं तु । न य संकिअं तु दिज्जइ निस्संकसुए गवेसाहि ।।**

(नि०भा० ६३५४, व्य०सू० २७६)

एवं पूर्वोक्ता अप्यधिकरणादिदोषनिर्गता यतनया प्रतिषेध्याः । तथाहि—यः सङ्घाटकोद्विग्नः समागतः स भण्यते—अस्माकमपीदृशी सामाचारी—न सङ्घाटकेन विना सञ्ज्ञाभूम्यादावपि गन्तुं लभ्यते । योऽनुबद्धवैरः स भण्यते—अस्माकमप्यवश्यं मण्डल्यां समुद्देष्टव्यम् । सूत्रार्थमण्डलीभग्नो भण्यते—अस्माकमियं सामाचारी सूत्रार्थमण्डलीषु यद्यपि न पठति न शृणोति वा तथापि मण्डल्यामुपविष्टस्तिष्ठति न स्वच्छन्देन स्थातुं लभ्यते । आलस्यवान् भण्यते—अस्माकमत्र क्षेत्रे बालग्लानवृद्धा हिण्डन्ते, ततो यदि दिने दिने बहिर्भिक्षाचर्यां करोषि तदा तिष्ठ । यो निर्द्धर्मा स भण्यते—अस्माकमपि यदि दुष्प्रमार्जितादीनि करोति तदा हाडहडं प्रायश्चित्तं प्रदीयते । हाडहडं नाम यत् तत्कालमेव दीयते, न कालहरणं क्रियते । विकृतिलम्पटो भण्यते—अस्माकं योगवाहिना अयोगवाहिना वा विकृतिर्न ग्राह्या । अथवा स यद्यत् कारणं दीपयति तस्य तत्तत् प्रतिलोममुपदिश्यते । उक्तं च—

**इक्कल्लेण न लब्भा वीआरादी वि जयण सच्छंदे । भोअण सुत्तेमंडलि अपढंतेवी निओअंति' ।।**

(नि०भा० ६३५५, व्य०सू० २७७)

**अलसं भणंति बाहिं जइ हिण्डसि अम्ह इत्थ बालाई । पच्छित्तं हाडहडं अविउस्सग्गं तहा विगई' ।।**

(नि०भा० ६३५६, व्य०सू० २७८)

---

**A.** **प्रवचनोक्तैर्वचनैः खिसनं करोति ।**

अत्राह—ननु एवं प्रतिषेधं कुर्वाणस्य माया मृषावादश्च भवति, ततः कथं संयमशुद्धिः ? उच्यते—नात्र मायामृषावादौ, यतः कारणे तावप्यनुज्ञातौ । कारणं चेदं—तेषां निर्गमनमशुद्धं तेनोपायेनायं प्रतिषेधः कृतः । अगीतार्थानामेषा यतना । गीतानां पुनः स्फुटमेव भण्यते यतस्ते सामाचारीं जानन्तः कथमप्रीत्यादिकं कुर्वन्ति ? तेष्वपि यन्माया—मृषावादकरणं युज्यते तत् कर्त्तव्यम् । अगीतार्थानां पुनः स्फुटं भण्यमानं विद्वेषकरं स्यात् । ते च चिन्तयन्ति—एते च मत्सरेण न ददति श्रुतम्, ततोऽयशः सम्पद्यते । एतेषां च प्रतीच्छनेऽयमपवादः। यस्य निर्गमोऽशुद्धः स यतनया निषिद्धो भणति— मिथ्या मे दुष्कृतं न पुनरेवं करिष्ये, यद्वा भणत तत् करोमि, मुक्तो मया पापभावो दुर्गतिनिबन्धनमिहलोकेऽपि गर्हितः' । एवमुपस्थितः सङ्ग्रहीतव्यः । तत्राऽप्येते न सङ्ग्राह्याः—योऽधिकरणं कृत्वा समागतः यश्च प्रत्यनीको मेऽत्रेत्यागतः, यश्चानुबद्धरोषः येन वाऽऽचार्य एकाकी त्यक्तः । प्रत्यनीके पुनरपि भजना । गृहस्थप्रत्यनीको ग्राह्यः । संयतप्रत्यनीको न सङ्ग्राह्यः । गत्वा तं क्षामयेति वा भणितव्यः । यदि न क्षामयति तदा न सङ्ग्राह्यः । यदि क्षामयति तदा सङ्ग्राह्यः ।।८०।। एतत् प्रासङ्गिकमभिधाय पुनः प्रस्तुतद्वितीयमहाव्रतातिचार—प्रायश्चित्तशेषमाह—

**सावज्जसुबहुपडिणीअ—भासणे विगहकलहकंदप्पे ।**
**चउलहु सेसे सव्वहिं लहु असमायारिनिप्फन्नं ।।८१।।**

व्याख्या—**सावद्यानि** सपापानि यानि वचनानि पापनिबन्धनानि भवन्तीत्यर्थः । **अतिबहूनि** निरर्थकानि असम्बद्धानि यानि, **प्रत्यनीकानि** चाऽऽचार्यादि प्रति प्रतिकूलानि यानि हीला—खिंसादिरूपाणि तेषां **भाषणे** । **विकथाश्चतुर्विधाः** स्त्रीभक्तदेशराजकथारूपाः । तत्र **स्त्रीकथा** जातिकुलरूपलावण्यलीलागतिभाषाशृङ्गारवर्णनादिरूपा । तस्यां चात्मपरमोहोदीरणोड्डाहस्वाध्यायसंयमयोगपरिहाणि—ब्रह्मव्रताऽगुप्तिप्रसङ्गादयो दोषा भवेयुः । **भक्तकथा** नानाप्रकारशाकरसवतीघृतादि—प्रमाणादिवर्णनरूपा । अस्यां चाऽऽहारगृद्धिलोकापवादरसनेन्द्रियाऽजयषड्जीव—निकायवधानुमोदनादयो दोषा भवन्ति । **देशकथा** नानाविधदेशाचारनेपथ्यभोजनविधिवापीकूपसरोवरादिवर्णनरूपा। एतस्यां च रागद्वेषोत्पत्तिस्वपक्षाधिकरणादयो दोषा प्रादुष्ष्यन्ति । **राजकथा** बलवाहनकोशकोष्ठागार—प्रमाणनिर्गमप्रवेशशोभावर्णनादिरूपा । अस्यां च चौरहेरिकादिशङ्काकौतुकनिदानादयो दोषाः स्युः । एतासु चतुर्विधास्वपि विकथासु । अथवा **विरुद्धा** पापानुबन्धिनी **कथा विकथा** । सा च सामान्येनेयम्—

**इत्थिकहा भत्तकहा रायकहा चोरजणवयकहा य । नडनट्टजल्लमुट्ठिअ कहाओ एसा भवे विकहा' ।।**

एवंविधायां विकथायाम् । **कलहे** कलहकारिवचने । यानि वचनानि कामोद्दीपनानि हास्यगर्भाणि परेषां हास्योत्पादकानि वा तानि **कन्दर्पः** तस्मिन् कन्दर्पे **चतुर्लघु** । एतेषु सर्वेष्वपि स्थानेषु प्रत्येकं चतुर्लघु

प्रायश्चित्तं भवतीत्यर्थः । स्त्रीविकथायां तु निशीथे **चतुर्गुरु** । शेषे उक्तेभ्योऽवशिष्टे द्वितीयव्रतातिचारे सूक्ष्ममृषावादलक्षणे सर्वत्र **लघुमासोऽसामाचारीनिष्पन्नः** । एवमन्यत्रापि सर्वत्राऽसामाचार्यां **लघुमासो** मन्तव्यः । एतेषु पुनः स्थानेषु मृषावादोऽपि न दोषाय । यथा—

**'उड्डाहरक्खणट्ठा संजमहेउं व बोहिगे तेणे । खित्तम्मि व पडिणीए सेहे वा खिप्पलोए वा'** ।।

(नि०भा० ३२१ तथा ८८५)

यदि धिग्जात्यादयः पृच्छन्ति—यूयं कथं भुञ्जीध्वम् ? तदा वक्तव्यं वयं भुञ्जीमहि कमढकादिषु । कमढकं नाम करोडकाकारं काष्ठमयं भाजनम् । एवमादिको मृषावाद उड्डाहरक्षार्थं वक्तव्यः । यदि केचिल्लुब्धकादयः पृच्छन्ति—कुतोऽत्र भगवन् ! दृष्टा मृगाः शूकरा वा ? दृष्टेष्वपि न दृष्टा इति, न शृणोमीति वा वक्तव्यं तूष्णीको वा तिष्ठति । एवं संयमहेतोर्मृषा वक्तव्यम् । बोधिकगृहीतो वा अब्राह्मणोऽपि ब्राह्मणोऽहमिति ब्रवीति । स्तेनगृहीतो वा भणति—एष सार्थ एति तान् चौरान् भणति नश्यत इति । रक्तपटपरिव्राजकादिप्रत्यनीकभाविते क्षेत्रे उपासकाः शठतया परमार्थेन वा पृच्छन्ति भगवन् ! यद् वयं रक्तपटादीनां दानं दद्मः, एतस्य फलं किमस्ति न वा ? एवं पृष्टो भणति—दानस्य नास्ति नाश इति । यद्यपि तेषां दानं दत्तमफलं तथाप्येवं वक्तव्यं मा ते रुष्टा अनर्थं कुर्युरिति कृत्वा । शैक्षो वा प्रव्रज्याभिमुख आगतः प्रव्रजितो वा तं च स्वजनाः पृच्छन्ति, तत्र जानन्तोऽपि भणन्ति—न जानीमो न वा दृष्ट इति । शैक्षस्य वा अनधिसहिष्णोर्लोचे क्रियमाणे बहावपि तिष्ठति एवं वक्तव्यम्—एष समाप्तो लोचः स्तोकं तिष्ठति । अन्यच्च साधोर्लोचे क्रियमाणे तत्रस्थित एव शक्रो देवराजश्छत्रमभिधारयति । एषा कल्पिका सेवा । इत्युक्तं द्वितीयमहाव्रतातिचारविषयं प्रायश्चित्तम् ।।८१।।

सम्प्रति तृतीयमहाव्रतातिचारप्रायश्चित्तं किञ्चिद्विशेषेणाह—

**तण—डगल—छार—मल्लग पणगं लेवित्तरेसु लहुगो उ ।**
**दव्वादविदिन्ने पुण जिणेहिं उवही उ निप्फन्नं ।।८२।।**

(नि०भा० ३३२)

व्याख्या—इह अदत्तादानं द्विधा—लौकिकं लोकोत्तरं च । तत्र लौकिकं द्रव्य—क्षेत्र—काल—भावभेदैश्चतुर्द्धा । लोकोत्तरं तु द्विधा—सूक्ष्मं बादरं च । तत्र **सूक्ष्मं** स्वल्पं **बादरं** नाम बहुकम् । अथवा यत्र पञ्चकं प्रायश्चित्तं स्यात् तत्सूक्ष्मम्, शेषं बादरम् । अनयोः क्रमेण प्रायश्चित्तम्, तद्यथा—**तृणानि** कुशादीनि, **डगलकानि** उपलादीनि, **क्षारो** भस्म, **मल्लकः** शरावः, एतेषु अदत्तेषु गृहीतेषु **पञ्चकाख्यं** प्रायश्चित्तं भवति । **लेपो** येन भाजनं लिप्यते तस्मिन्नदत्ते गृहीते । **'इत्तरेसु'** त्ति । पन्थानं व्रजन् यत्र वृक्षाधोभागच्छायादिषु विश्रामं गृहीतुकामस्तत्रावग्रहं

नानुज्ञापयति, तत्र **चेत्वरे** अल्पकालावस्थानेऽप्यवग्रहाननुज्ञापने **लघुको** मासः **तु**शब्दात् कुटमुखादिष्वदत्तेषु गृहीतेषु । **दव्वादविदिन्ने पुण**' त्ति । द्रव्ये प्रतिविशिष्टे अदत्ते गृहीते । **पुनः**शब्दः पूर्वाभिहितप्रायश्चित्ताद्विशेषणे । **जिनैः** तीर्थकरैरुपधिनिष्पन्नं प्रायश्चित्तं भणितं तच्चेदम्—मुखपोतिकादिके जघन्ये पञ्चकम् । चोलपट्टादिके मध्यमे लघुमासः । वर्षाकल्पादावुत्कृष्टे चतुर्लघवः ।।८२।।

अथ **अविदिण्ण**' त्ति । अस्य पदस्य व्याख्यामाह—

**लद्धुं न निवेएई परिभुंजइ वा निवेइअमदिण्णं ।**
**तत्थोवहिनिप्फन्नं अणवट्ठप्पो व आएसा ।।८३।।**

व्याख्या—कोऽपि साधुर्भिक्षादिविनिर्गत उपकरणादिजातं **लद्धुं** लब्ध्वा **न निवेदयति** गुरूणां न कथयति । अथवा **परिभुङ्क्ते** अनिवेदितम्, अथवा **निवेदितं** परं गुरुभिर्नानुज्ञातं ततो **अदत्तमेव परिभुङ्क्ते** । एवमदत्तादानं भवति । **तत्रोपधिनिष्पन्नं** प्रायश्चित्तं तच्च प्रागुक्तमेव । अथवा **आदेशात्** सूत्रादेशात् अनिवेदिताऽदत्तवस्त्राद्युप—करणग्राहकः साधुरनवस्थाप्यो भवति । एवं प्रातिहारिकं वस्त्राद्युपकरणं तेषां गृहिणां यदि न प्रत्यर्पयति, शय्यातरसत्कं वा किमप्यदत्तं परिभुङ्क्ते, तत्राऽप्यदत्ते उपधिनिष्पन्नं प्रायश्चित्तम् । वर्षाकाले च भगवता नानुज्ञातमुपधिग्रहणम् । अतस्तत्र तद् ग्रहणं कुर्वाणस्य तीर्थंकराऽदत्तं भवति, तत्र चतुर्गुरु । तथा परक्षेत्रे यद्यचित्तं द्रव्यमुपकरणरूपं गृह्णाति तदा तस्योपधिनिष्पन्नं प्रायश्चित्तम् । अथ सचित्तं शिष्यादिरूपं गृह्णाति तदा चतुर्गुरुकं यदि वा मिश्रं सोपधिकं शिष्यादिरूपं गृह्णाति तदा संयोगप्रायश्चित्तं भवति । अचित्ते उपधिनिष्पन्नं सचित्ते चतुर्गुरुकमित्यर्थः । तथा साधर्मिका लिङ्ग—प्रवचनाभ्यां त्रि(द्वि)धा भवन्ति । तेषामप्यदत्तसचित्तवस्तुग्रहणे चतुर्गुरुकम् । अचित्तवस्तुग्रहणे पुनरुपधिनिष्पन्नम् । अन्यधार्मिकसत्कादत्तादानेऽप्येतदेव प्रायश्चित्तम् । यत् साधर्मिकादत्तादाने कुलस्तैन्येऽप्येतदेव कालतपोगुरुकं ज्ञेयम् । गणस्तैन्ये च तपोगुरु काललघु । सङ्घस्तैन्ये तु कालगुरु तपोलघु । **आदेशेन पुनः सर्वत्राऽनवस्थाप्यम्** । कारणैः पुनरदत्तग्रहणेऽपि शुद्धः । यदुक्तम्—

**'पत्तं वा उच्छेदे गिहि—खुड्डगमादिगं तु वुग्गाहे । निद्धम्मखुड्डगमखुड्डगं व जयउ त्ति एमेव' ।।**

(नि०भा० ३४९)

सूत्रार्थोभयव्युच्छेदे **गृहिणां क्षुल्लकं** बालम् आदिशब्दादबालमपि साधर्मिकाऽन्यधार्मिकाणां वा **पात्रं** सूत्रार्थ—तदुभयग्रहणधारणक्षमं **व्युद्ग्राहयेत्** विपरीतं ग्राहयेत्, सूत्रार्थोभयव्युच्छेदे शिशुमितरं वा योग्यं सन्तमपहरतीत्यर्थः । **निर्द्धर्मणः** पार्श्वस्थाः तेषां सत्कं **क्षुल्लकमक्षुल्लकं** वा । **एवमेव** यथा गृहस्थानां तथा व्युद्ग्राहयेत् संयमयोगेषु **यततामयमित्यालम्बनेन** पार्श्वस्थानां शिष्यं संयमार्थमपहरतीत्यर्थः । ननु यत् सूत्रार्थोभयव्युच्छेदे गृहस्थादिक्षुल्ल—काद्यपहरणं तद्युक्तं यत् पुनः पार्श्वस्थशिष्यापहरणं तत्कथं न स्तैन्यम् ? उच्यते—

**तेसु उ तमणुण्णायं अणणुण्णायगहणे विसुद्धो उ । किं तेण्णं असंजमपंकेखुत्तं तु कड्ढंते'** ।।

**तेषु** पार्श्वस्थेषु **तं** शिष्यमनुज्ञातं पूर्वं गृह्णन्ति । **अननुज्ञातग्रहणेऽपि विविधं** सर्वप्रकारेण शुद्धो **विशुद्धः** अत्रोत्तरार्द्धेन हेतुमाह—अपि च—

**'सुहसीलतेणगहीए भवपल्लिं तेण जगडिअमणाहे । जो कुणइ कूविअत्तं सो वन्नं कुणइ तित्थस्स'** ।।

(नि०भा० ३५१)

एवमनया दिशा अदत्तविषया कल्पिकासेवा प्रकल्पादवसेया । इत्यभिहितं तृतीयमहाव्रतातिचारप्रायश्चित्तम् ।।८३।।

अथ चतुर्थमहाव्रतातिचारप्रायश्चित्तमाह—

**पडिबद्धसिज्ज दव्वे भावे दव्वंमि पिठवंसाई ।**
**पासवणठाणरूवे सद्दे भावे लहुग दव्वे ।।८४।।**

व्याख्या—इह साधूनां दुरपोहमोहव्यपोहपरायणानामपि कदाचित्कर्मवशेन मोहोदयो भवेत् । स च सनिमित्तोऽनिमित्तो वा स्यात् । तत्र गीतादिविषयशब्दश्रवणेन स्त्रीरूपालिङ्गनादिदर्शनिन पूर्वक्रीडितस्मरणेन च यो मोहोदयो भवति स सनिमित्तः । यस्तु केवलकर्मोदयेनाऽऽहारेण शरीरोपचयेन वा स्यात् सोऽनिमित्तो बाह्यनिमित्तानपेक्षत्वात्। विषयशब्दश्रवणादीनि च मोहोदयनिमित्तानि प्रतिबद्धशय्यादौ भवेयुः । अतस्तत्र न स्थातव्यम् । तत्रावस्थाने च प्रायश्चित्तं तच्चात्र गाथाद्वयेन प्रतिबद्धशय्यास्वरूपप्ररूपणपूर्वकं प्रतिपाद्यते, यथा—**प्रतिबद्धा** युक्ता संश्लिष्टेत्यर्थः । **शय्या** वसतिः । सा च प्रतिबद्धा द्विधा—**द्रव्ये** भावे च । तत्र **द्रव्ये पृष्ठिवंशादि** । **पृष्ठिवंशो** वलधरणं येन काष्ठेन तिर्यक्संस्थापितेन वला ध्रियन्ते तेन प्रतिबद्धा । एकशिखरा लोकगृहैः सहेत्यर्थः । **आदि**शब्दादपरेण वा केनापि देशेन प्रतिबद्धा । एषा द्रव्यप्रतिबद्धा वसतिरवगन्तव्या । **भावप्रतिबद्धा** पुनश्चतुर्द्धा—**प्रस्रवणप्रतिबद्धा, स्थानप्रतिबद्धा, रूपप्रतिबद्धा, शब्दप्रतिबद्धा** च । तत्र **प्रस्रवणम्**, प्रस्रवन्ति कायिकां कुर्वन्त्य—स्मिन्नित्यधिकरणाऽनटि **प्रस्रवणं** कायिकाभूमिस्तेन प्रतिबद्धा । **स्थानं** यत्र स्त्रियस्तिष्ठन्ति तेन प्रतिबद्धा । यत्र वसतिस्थितैः स्त्रीरूपं दृश्यते सा **रूपप्रतिबद्धा** । यत्र वसतिस्थितैः स्त्रीणां भाषाभूषणरहस्यशब्दाः श्रूयन्ते सा **शब्दप्रतिबद्धा** । अत्र द्रव्यभावपदाभ्यां चतुर्भङ्गी स्यात् । तद्यथा—द्रव्यतः प्रतिबद्धा भावतोऽपि प्रतिबद्धा । द्रव्यतः प्रतिबद्धा न भावतः । भावतः प्रतिबद्धा न द्रव्यतः । न द्रव्यतो न भावतः । अत्र चतुर्थभङ्गः शुद्धो द्विधाऽप्यप्रतिबद्धायां वसतावस्थाने दोषाभावात् । **दव्वे'** त्ति । द्रव्यतः प्रतिबद्धा न भावत इत्येवंविधद्वितीयभङ्गे या वसतिः स्यात् तत्रावस्थाने **चतुर्लघुकाः** प्रायश्चित्तम् । आज्ञानवस्थामिथ्यात्वविराधनाश्च भवन्ति । इमे चाऽन्ये दोषाः साधूनां संशब्देन विबुद्धा असंयताः पानीयहारिका—पशुपाल—कौटुम्बिक—पथिक—लोहकार—

यान्त्रिक— मत्स्यबन्धकादयो लोकाः तेषु तेषु नानाप्रकारपापव्यापारेषु प्रवर्त्तन्ते । अथाऽधिकरणभयाद्यदि साधवः तूष्णीकास्तिष्ठन्ति तदा सूत्रार्थहान्यादयो दोषा भवन्ति । तस्माद् द्रव्यप्रतिबद्धायां वसतौ न स्थातव्यम् । अथ द्रव्यभावाऽप्रतिबद्धवसत्यलाभे द्रव्यप्रतिबद्धायामपि वसतौ साधवः स्थितास्तदा शब्दे यतनां कुर्वन्ति । यथा— असंयता न जाग्रति ।।८४।।

अथ भावतः प्रतिबद्धा न द्रव्यत इति तृतीयभङ्गे या वसतिर्भवति तस्या भेदकथनपुरस्सरं प्रायश्चित्तमाह—

**भावपडिबद्धि पासवणमाइपयचउगि भंगसोलसगं ।**
**पनरसपएसु चउगुरु दोसा आणाइ सविसेसा ।।८५।।**

व्याख्या—**भावप्रतिबद्धायां** वसतौ, मकारस्यालाक्षणिकत्वात् **प्रस्रवणादिपदचतुष्केन भङ्गषोडशकं** भवति । तद्यथा— प्रस्रवणप्रतिबद्धा, स्थानप्रतिबद्धा, रूपप्रतिबद्धा, शब्दप्रतिबद्धा एष प्रथमो भङ्गः । प्रस्रवणप्रतिबद्धा, स्थानप्रतिवद्धा, रूपप्रतिबद्धा, न शब्दप्रतिबद्धा अयं द्वितीयः । एवं चारणिकाक्रमेण षोडशभङ्गाः कर्त्तव्याः । तत्राऽऽद्येषु **पञ्चदशभङ्गकेषु** पञ्चदशभङ्गभावप्रतिबद्धवसतिष्वित्यर्थः । तिष्ठतां साधूनां **चतुर्गुरु** प्रायश्चित्तं भवति । आदेशेन वा प्रथमभङ्गे चत्वारश्चतुर्गुरुकाः । एवं यत्र भङ्गे यावन्ति पदानि विरुद्धानि तत्र तावन्ति चतुर्गुरूणि भवन्ति । षोडशो भङ्गः शुद्धः । तथा **आज्ञादयो दोषाः सविशेषा** द्रव्यप्रतिबद्धवसतिसकाशात् भावप्रतिबद्धवसतौ सविशेषतरा भवन्तीत्यर्थः । तथाहि—यत्र साधूनामसंयतीनां च एका कायिकाभूमिः सा प्रस्रवणप्रतिबद्धा । तत्रेमे दोषाः—साधुः स्त्रियं दृष्ट्वा क्षुभ्यति, स्त्री वा साधुं दृष्ट्वा क्षुभ्यति । अन्योऽन्यं वा क्षुभ्यतः । ततो यदि स्त्री साधौ क्षुभ्यति तां च यदि प्रतिसेवते ततो व्रतभङ्गः । अथ नेच्छति तदोड्डाहं करोति । एवमुभयथापि दोषः । अथ साधुः स्त्रियां क्षुभ्यति ततः सा स्त्री सेच्छाऽनिच्छा वा स्यात् । यद्यनिच्छा ततो उड्डाहं करोति । अथ सेच्छा ततो व्रतभङ्ग एव । कायिकाभूमौ च स्त्रीप्रविष्टा पश्चात्साधुरपि प्रविष्टोऽन्येन केनापि दृष्टः ततोऽनाचारशङ्का । ततो वसत्यादेर्व्युच्छेदं करोति, प्रद्विष्टो वा ग्रहणकर्षणव्यवहारादि कुर्यात् । यत्र स्त्रीणां संयतानां च एकं स्थानं तत्रेमे दोषाः । दुष्प्रावृतं छन्नमङ्गमूर्वादि दृष्ट्वा भुक्तभोगस्य साधोः स्मृतिकरणं भवति । तस्य वा साधोः सागारिकं[A] दृष्ट्वा स्त्री क्षुभ्यति शङ्कते वा एष साधुः सागारिकं दर्शयति किं मां प्रार्थयति । ब्रह्मचर्यस्य चाऽगुप्तिः स्यात् । परस्परं च लज्जानाशः, अभीक्ष्णदर्शनेन वा प्रीतिवृद्धिः । लोक उत्प्रासवचनेन[B] ब्रवीति साधु[C] तपोवनवासः, राजादिर्वा निवारयति—मा एतेषां मध्ये कोपि प्रव्रजतु । एवं तीर्थव्युच्छेदः । रूप प्रतिबद्धायां पुनः साधुः स्त्रीणां सविलासचङ्क्रमणस्थानप्रेक्षितप्रहसितसविस्मितमुखादीन् बहुविधानाकारान् पश्यति । ततो भुक्तभोगस्य स्मृतिकरणं भवति । अभुक्तभोगस्य तु कौतुकं नैव मया

**A.** पुंश्चिह्नम्, मेहनम् । **B.** नर्मवचनेन । **C.** सुन्दरः ।

मानुष्यकाः कामभोगा भुक्ता एवं तेषामुन्निष्क्रमणादयो दोषा भवन्ति । ताः स्त्रियो वा तत्रस्थितान् साधून् दृष्ट्वा एवं चिन्तयेयुः । अहो ! जल्लमलमलिनदेहानामप्येतेषां साधूनां कीदृशी लावण्यश्रीः । गृहवासे पुनरभ्यङ्गादिसंस्कारेणास्याः सकाशात् शतगुणा आसीदिति । शब्दप्रतिबद्धायां तु स्त्रीणां गीतानि पठितानि सविकारहसितानि मञ्जुलालापान् वलयनूपुरादिभूषणशब्दान् मैथुनशब्दाँश्च श्रुत्वा साधूनां मनः क्षुभ्यति । तत उन्निष्क्रमणं करोति । स्वलिङ्गस्थितो वाऽनाचारमाचरति हस्तकर्म वा करोति । तस्मादेतद्दोषपरिहरणार्थं न स्थातव्यं भावप्रतिबद्धवसतौ । अथ शुद्धा वसतिर्न लभ्यते ततो द्रव्यप्रतिबद्धायां स्थातव्यम्, तदभावे ज्योतिष्प्रतिबद्धायां वसतौ स्थेयम्, तदभावे बहिर्वृक्षस्याऽधस्तात् । अथ बहिः स्तेनश्वापदभयं वृष्टिर्वा ततो भावप्रतिबद्धायामपि वसतौ तिष्ठन्ति । तत्रापि प्रथमं रूपप्रतिबद्धायां तत्र च पूर्वभणितदोषपरिहरणार्थमन्तरे कटादिकं ददति । तस्या अप्यभावे प्रस्रवणप्रतिबद्धायाम्, तत्रापि पूर्वभणितदोषपरिहाराय मात्रके व्युत्सृज्यान्यत्र परिष्ठापयन्ति । मात्रकाभावे अन्यस्थानाभावे च वृन्देन बोलं कुर्वन्तः कायिकाभूमौ प्रविशन्ति । तासां च या वेला तां वर्जयन्ति । प्रस्रवणप्रतिबद्धाया अप्यभावे शब्दप्रतिबद्धायां तिष्ठन्ति । तत्रापि प्रथमं भूषणशब्दप्रतिबद्धायां पश्चाद् भाषाशब्दप्रतिबद्धायां तत्रापि पूर्वोक्तदोषपरिहाराय समुदिता महता शब्देन स्वाध्यायं कुर्वन्ति, ध्यानसलब्धयो वा ध्यानं ध्यायन्ति । तदभावे स्थानप्रतिबद्धायां तिष्ठन्ति । तत्रापि पूर्वोक्तदोषपरिहरणार्थमुपकरणं विप्रकीर्णं तथा स्थापयन्ति यथा तासां स्थानं न स्यात् । स्वयं वा विप्रकीर्णास्तिष्ठन्ति । स्थानप्रतिबद्धाया अप्यभावे रहस्यशब्दप्रतिबद्धायां तिष्ठन्ति । तत्रापि दोषपरिहाराय वैराग्यकरं श्रुतं पठन्ति, यथा तं शब्दं न शृण्वन्ति । अथवा यदस्खलितं श्रुतं यस्याऽऽगच्छति स तद्गुणयति, ध्यानसलब्धिर्ध्यानं ध्यायति । ध्याने पाठे वा योऽलब्धिः स कर्णौ स्थगयति, तथापि यदि शब्दं शृणोति तदा शब्दं करोति तथा यथा तयोर्लज्जितयोर्मोहो नश्यति । तथापि यदि न तिष्ठत्यनाचारसेवनात् तदा जनज्ञातं करोति । इति तृतीयभङ्गवसतौ दोषयतना । अथ द्रव्यतो भावतः प्रतिबद्धा वसतिरिति प्रथमभङ्गः । तत्र द्रव्यप्रतिबद्धभावप्रतिबद्धोभयपक्षोक्ता दोषा यतना चाऽवगन्तव्या। एवं पशुपण्डकसंसक्तवसतावपि दोषा यतना च स्वयमवसातव्याः । अथवा वसतिस्त्रिधा—युक्तप्रमाणा अतिरिक्तप्रमाणा हीनप्रमाणा च । तत्र साधुभिस्त्रिहस्तभूमिखण्डरूपसंस्तारकप्रमाणं गृह्णानैर्या सर्वापि व्याप्यते सा युक्तप्रमाणा । या न व्याप्यते साऽतिरिक्तप्रमाणा । यत्र सम्बाधया तिष्ठन्ति सा हीनप्रमाणा । एतासु तिसृष्वपि विद्यमानासु प्रथमायां स्थातव्यम् । तदभावे हीनप्रमाणायाम्, तदलाभेऽतिरिक्तप्रमाणायाम् । तत्रातिरिक्तप्रमाणघङ्घशालादिवसतौ स्थिताः साधवो भूमौ वस्त्र—पात्राणि संस्तारकानर्दवितर्दान् तथा कुर्वन्ति यथा तानि दृष्ट्वा स्थातुमनसोऽपि

न तिष्ठन्ति । एषा दिवा यतना । अथ रात्रौ वेश्यादिस्त्रीसहितः पुरुषः आगच्छति, ततोऽनुकूलप्रतिकूलवचनप्रकारै— र्निवारणीयः । अथ न निवारयन्ति ततश्चतुर्लघुकम् । दोषाश्चाज्ञादयः । अथ वेश्यादिर्न निर्गच्छति तदा साधुभिर्निर्गन्तव्यमन्यत्र शून्यगृहादौ स्थातव्यम् । तदभावे वृक्षमूलादावपि स्थेयम् । अथ बहिः स्तेनश्वापदभयं वर्षं वा वर्षति ततस्तत्रैव यतनया तिष्ठन्ति । अथवा भिक्षादिनिमित्तं वसतेर्बहिर्निर्गतस्य साधोः स्त्रीणां भाषाभूषणपरिचारशब्दान् श्रुत्वा रूपालिङ्गनविविधविलासान् प्रतिसेवनां कुर्वतो वा दृष्ट्वा अचेतनानि वा काष्ठ—पुस्त—चित्रकर्मादिविनिर्मितानि स्त्रीरूपाणि समीक्ष्य स्त्रीभिः सह पूर्वं यानि रतिक्रीडितानि तानि वा स्मृत्वा मोहोदयो भवेत् । तत्रापि वैराग्यभावनया दृष्टिप्रतिसंहरणादिना च यतना कर्त्तव्या । एष सनिमित्तो मोहोदयः । अथाऽनिमित्तो यो मोहोदयः स त्रिविधः—कर्मोदयत आहारतः शरीरोपचयतश्च । तत्र क्षुधार्त्तस्य पिपासापीडितस्य स्वभावेन ग्लानत्वेन वा कृशशरीरस्य यो बाह्यशब्दादिनिमित्तमन्तरेण मोहो जायते स कर्मोदयतः । प्रणीताऽऽहारादिभोजनाद् यो मोहोदयः स्यात् स आहारतः । आहारतो रसस्योपचयः, ततो रुधिरस्य, ततो मांसस्य, ततो मेदसः, ततोऽस्थ्नां ततो मज्जायाः ततोऽपि शुक्रस्योपचयस्तस्माच्च मोहोदयः । एवं यो मोहोदयो भवेत् स शरीरोपचयतः। एवमनिमित्तो मोहोदयो भवेत् । तत्राऽपि वक्ष्यमाणा निर्विकृत्या— दियतनाऽवगन्तव्या ।।८५।।

एवं यतमानस्यापि कस्यापि हीनसत्त्वस्य साधोः कामाग्निः सन्दीप्यते, ततः कौतुकादयो दोषा भवेयुस्तानाह—

**कोऊहलं व गमणं सिंगारे कुड्डछिड्डुकरणे अ ।**
**दिट्ठी परिणय करणे भिक्खू मूलं दुवे इअरे ।।८६।।**

(नि०भा० ५६३, बृ०क० ४११८)

व्याख्या—**कुतूहलं** तस्य उत्पद्यते कथमनाचारं सेवन्ते ? इति । अथ **तस्याऽभिप्रायो** जायते आसन्ने गत्वा पश्यामि शब्दं वा शृणोमि । एतदत्र साक्षादनुक्तमपि **वाशब्दसूचितमवगन्तव्यम्** । एवमभिप्राये उत्पन्ने तत्र **गमनं** कुर्यात् । ततः **शृङ्गारशब्दान्** कुड्यकटान्तरे शृणुयात् विलोकनाय वा **कुड्ये छिद्रकरणं** तेन च छिद्रेणानाचारं सेवमानानां **दृष्टिः** दर्शनम्, ततोऽनाचारं दृष्ट्वाऽहमप्येवं करकर्म करोमीति सोऽपि तद्भावपरिणतो भवेत् । ततः **करकर्मकरणम्** । एतेष्वष्टस्वपराधपदेषु भिक्षोर्मूलं यावत् प्रायश्चित्तम् । **'दुवे'** त्ति । **द्वयोरुपाध्यायाचार्ययोरितरे** अनवस्थाप्यपाराञ्चिके क्रमेण चरमपदे भवतः ।।८६।। इदमेव व्यक्त्या दर्शयति—

**लहुगुरु लहुगा गुरुगा छल्लहु छग्गुरुगमेव छेओ ।**
**करकम्मस्स य करणे भिक्खू मूलं दुवे इअरे ।।८७।।**

(नि०भा० ५६४)

व्याख्या—कुतूहले उत्पन्ने **लघुमासः**, अभिप्राये **गुरुमासः**, गमने **चतुर्लघुकाः**, शृङ्गारशब्दश्रवणे **चतुर्गुरुकाः**, कुड्यस्य छिद्रकरणे **षड्लघुकाः**, छिद्रेणानाचारविलोकने **षड्गुरुकाः**, करकर्मकरणपरिणामे **छेदः**, करकर्मकरणे च **मूलम्**। एवं भिक्षोः प्रायश्चित्तम्। **उपाध्यायस्य** मासगुरुकादारब्धमनवस्थाप्ये **पर्यवस्यति**। **आचार्यस्य** चतुर्लघुकादारब्धं **पाराञ्चिके तिष्ठति**॥८७॥ एवं सनिमित्तस्यानिमित्तस्य वा मोहोदयस्य ध्यानाऽध्ययनादिभिरधिसहनं कर्त्तव्यं तथाऽप्यनिवृत्तावेषा चिकित्सा कार्या—

**निव्विगइ निब्बलोमे तव उद्धट्ठाणमेव उब्भामे।**
**वेआवच्ची हिंडण मंडलि कप्पट्ठिआहरणं॥८८॥**

(नि० भा० ५७४)

व्याख्या—मोहोदये जाते सति तन्निवृत्त्यर्थं **निर्विकृतिक**माहारमाहारयति, तथाप्यनुपशमे **निर्बलानि** वल्लचणकादीन्याहारयति। एवमप्यनिवृत्ताव**वमौदरिकां** करोति। तथाप्यनुपरमे चतुर्थादि यावत् षाण्मासिकं **तपः** करोति। पारणके च निर्बलमाहारमाहारयति। यद्युपशाम्यति तदा सुन्दरम्। अथ नोपशाम्यति तदा **ऊर्ध्वस्थानं** महान्तं कायोत्सर्गं करोति। तथाऽप्यनुपशमे **उद्भ्रामे** भिक्षाचर्यायां गच्छति। अथवा साधूनां विश्रामणादि**वैयावृत्त्यं** कार्यते। अथवा **देशहिण्डकानां** सहायो दीयते। एवमगीतार्थस्य यतना। गीतार्थः पुनः सूत्रार्थमण्डलीं दाप्यते। अथवा गीतार्थस्यापि निर्विकृतिकादिविधिर्द्रष्टव्यः। नोदकः प्राह—ननु यदि तावदगीतार्थस्य निर्विकृत्यादितपोविशेषादुपशमो न भवति, ततो गीतार्थस्य कथं शीतलछायादिस्थितस्योपशमो भविष्यति? गुरुः प्रत्याह—

**'पैशाचिकमाख्यानं श्रुत्वा गोपायनं च कुलवध्वाः। संयमयोगैरात्मा निरन्तरं व्यापृतः कार्यः'**॥१॥

(नि० भा० ५७४ टीका)

**कल्पस्थिका** बालिका तस्या **आहरणं** उदाहरणम्। तच्चेदम्—एगस्स कुडुंबिगस्स धूआ नियकम्मवावारा सुहासणत्था अच्छइ। तस्स अब्भंगुव्वट्टणण्हाणविलेवणादिपरायणाए मोहुब्भवो **अम्मधातिं**[A] भणाति—आणेहि मे पुरिसं। तीए अम्मधातीए माउए से कहिअं। तीए वि पिउणो। पिउणा वाहरिया भणिआ पुत्तीए—एताओ दासीओ सव्वं धन्नादि अवहरंति, तुमं कोट्ठायारं पडिअरसु, तहत्ति पडिवन्नं। सा जाव अन्नस्स भत्तयं देइ। अन्नस्स वित्तिं, अन्नस्स तंदुला, अन्नस्स आयं देक्खति अन्नस्स वयं। एवमादि किरिआसु वावडाए दिवसो गतो। सा अतीव खिन्ना रयणीए निव्विण्णा अम्मधातीए भणिता—आणेमि ते पुरिसं। सा भणति न मे पुरिसेण कज्जं निद्दं लहामि। एवं गीतार्थस्यापि सूत्रार्थपौरुषीं ददानस्यातीव सूत्रार्थेषु व्यापृतस्य कामसङ्कल्पो न जायते। भणितं च—

**'काम! जानामि ते मूलं सङ्कल्पात् किल जायसे। तमेव न करिष्यामि येन मे प्रभविष्यसि'**॥

(नि० भा० ५७४ तः ५७७, महाभारते)

---

**A.** अम्बधात्रीं = 'धावमाताने' इति भाषायाम्

एवं निर्विकृत्यादिप्रकारेण यतमानस्य कस्यापि साधोर्मोहोपशमो भवेत् कस्यापि तु न भवेत् । यथा गिरिनद्यां पूर्णायां कृतप्रयत्नोऽपि कश्चित् पुरुषः तीक्ष्णेनोदकवेगेन ह्रियते । अथवा निम्नोन्नते तथाविधकर्दमे वा कृतप्रयत्नोऽपि कश्चिद्यथा पतनं प्राप्नोति ।।८८।। एवं सर्वप्रयत्नेन यतमानस्याऽपि कस्यचित् साधोः कर्महेतुका चारित्रविराधना भवेत्। एवं स उदीर्णमोहोऽदृढधृतिरसमर्थोऽधिसोढुं ततो हस्तकर्म करोतीति तद्विषयं प्रायश्चित्तमाह—

**पढमाइ पोरिसीए बिअ—तइअ—चउत्थिआइ करकम्मे ।**
**मूलं छेअं छम्मासमेव चत्तारि जा गुरुगा ।।८९।।**

(नि०भा० ५७८, बृ०क० ४९३१)

व्याख्या—रात्रौ **प्रथमपौरुष्यां** मोहोद्भवो जातः । तस्यामेवादृढधृतिर्यदि **हस्तकर्म करोति** तदा **मूलम्** । अथ प्रथमपौरुषीमधिसह्य **द्वितीयायां पौरुष्यां करोति** तदा **छेदः** । द्वे पौरुष्यावधिसह्य **तृतीयायां** करोति तदा **षड्गुरुका** मासाः । तिस्रः पौरुषीरधिसह्य **चतुर्थ्यां** कुर्वाणस्य **चत्वारो गुरुकाः** । एवं **पौरुषी** पौरुषीसहने एकैकं प्रायश्चित्तस्थानं ह्रसति । उपलक्षणत्वादिदमप्यवगन्तव्यम् । रात्रौ चतुरो यामानधिसह्य द्वितीयदिवसे प्रथमपौरुष्यां करकर्म कुर्वाणस्य मासगुरुकम् । ततः परं सर्वत्रापि मासगुरुकमेव । लघूनि तु प्रायश्चित्तान्यत्र न भवन्ति । करकर्मसेवनस्यानुद्घातिमत्त्वात् ।।८९।।

एतद्विषयमेव प्रायश्चित्तं पुनः प्रकारान्तरेणाह—

**सेवामि त्ति अ मिहुणं चउगुरुगं छग्गुरुअ करकम्मे ।**
**तंमि वि बहुवारकए पच्छित्तं पंचकल्लाणं ।।९०।।**

व्याख्या—**मैथुनं सेवामि** मैथुनसेवां करोमीति सङ्कल्पे **चतुर्गुरुकं** तेन सङ्कल्पेनोदीर्णकामो भवेत्ततोऽदृढधृतितया—ऽधिसोढुमशक्तो यदि करकर्म करोति तदा **षड्गुरुकम्** । **तस्मिन्नपि** करकर्मणि **बहुवारकृते** असकृत् कृते **प्रायश्चित्तं पञ्चकल्याणं** पूर्वोक्तमेव तानि पञ्च भवन्ति ।।९०।। तथा—

**मूलं इत्थितिरिक्खिनपुंसनरआसपोससेवाए ।**
**थीवयवफासि लहुगा अंचलतिरिफासणे पणगं ।।९१।।**

व्याख्या—**स्त्री—तिर्यञ्ची—नपुंसकनराणां आसपोषसेवायाम्** आस्यपोषाभ्यां या सेवाऽनाचाररूपा तस्यां विहितायां **मूलं** प्रायश्चित्तं भवति । **स्त्रीणामवयवाः** शरीरप्रदेशा हस्तादयः तेषां स्पर्शे निरन्तरे लघुकाश्चत्वारः । स्त्रीणामञ्चलेन परिधानादिवस्त्रप्रान्तेन स्पर्शने सान्तरे **तिर्यक्स्त्रीणां** गोमहिष्यादीनां स्पर्शने च **पञ्चकं** पञ्चकाऽऽख्यं प्रायश्चित्तं स्यात् ।।९१।। अथवा—

**पुरिसस्सित्थीफासे चउलहु इत्थीइ होइ चउगुरू(रु?)अं ।**
**लहुगं संतरफासे अंचलतिरिफासणे भिन्नं ।।९२।।**

व्याख्या—**पुरुषस्य** संयतस्य स्त्रीस्पर्शे निरन्तरे **चतुर्लघुकम्** । स्त्रियास्तु संयत्या निरन्तरे पुरुषस्पर्शे चतुर्गुरुकं भवति । संयतस्य संयत्याश्च **सान्तरे** विपक्षस्पर्शे **लघुमासः** । **वस्त्राञ्चलाभ्यामेव स्पर्शने** परम्परास्पर्शने इत्यर्थः । **तिर्यञ्चीनां** च **स्पर्शने भिन्नं** भिन्नमासः प्रायश्चित्तं भवति । इत्यभिहितं चतुर्थमहाव्रतातीचार—प्रायश्चित्तम् ।।९२।। अथ पञ्चममहाव्रतातिचारप्रायश्चित्तमाह—

**सुहुमो अ बायरो वा दुविहो लोउत्तरो समासेणं ।**
**कागाइसाणगोणे कप्पठगरक्खणममत्ते ।।९३।।**
**सेहाई पडिकुट्टे सचित्तेणेसणाइ अचित्ते ।**
**ओरालिए हिरण्णे छक्काय परिग्गहे जं च ।।९४।।**

व्याख्या—परिग्रहो द्विविधो—लौकिको लोकोत्तरश्च । तत्र लौकिको द्रव्य—क्षेत्र—काल—भावभेदाच्चतुर्द्धा । लोकोत्तरः पुनः **समासेन** सङ्क्षेपेण **द्विधा सूक्ष्मो बादरश्च** । तत्रेषन्ममत्वभावः**सूक्ष्मः** परिग्रहः । तीव्रो ममत्वभावो **बादरः** परिग्रहः । एष द्विविधोऽपि परिग्रहः पुनश्चतुर्द्धा—द्रव्ये क्षेत्रे काले भावे च । तत्र द्रव्ये काकादि पश्चार्द्धम् । आत्मनः पानकादि काकमपराध्यन्तं निवारयति । आदिग्रहणात् श्वानशृगालादिकम्, श्वानं वा दशन्तं **गोणं** वा बलीवर्दं वसत्यादिष्वपराध्यन्तं शय्यातरादीनां वा **कल्पस्थकं** बालकमन्यापदेशेन **रक्षति** । **स्वजनादिषु** वा **ममत्वं** करोति । **शैक्षा** वा **प्रतिक्रुष्टाः** प्रव्रज्याऽयोग्याः पूर्वमुपदर्शिता अष्टचत्वारिंशत् प्रव्राजयतः परिग्रहो भवति । **अनाभाव्यं** वा अप्रव्राजनीयं **सचित्तं** शिष्यादि वस्तु प्रव्राजयतः परिग्रहो भवति । आदिशब्दो भेदवाचकः । **अनेषणीयं** वा अचितभक्तादि गृह्णानस्य परिग्रहः स्यात् । आदिशब्दो भेदवाचकः आदिशब्दाद्वा वस्त्रपात्रशय्या गृह्यन्ते । अचित्तग्रहणाद्वाऽतिरिक्तोपधिग्रहणं करोति । स चानुपकारित्वात् परिग्रहो भवति । **ओरालियं** घटितरूपं द्रविणम्, अघटितरूपं **हिरण्यं** एतानि गृह्णतः परिग्रहो भवति । **षट्कायान्** जीवनिकायान् सचित्तपृथिवीकायादिकान् गृह्णानस्य **परिग्रहो** भवति ।।९३-९४।।

**जं च**' त्ति । यच्च एतेषु काकादिषु प्रायश्चित्तं तच्च द्रष्टव्यम् । तदेव दर्शयति—

**पंचाई लहुगुरुगा एसणमाईसु जेसु ठाणेसु ।**
**गुरुगा हिरण्णमाई छक्कायविराहणे जं च ।।९५।।**

व्याख्या—**पञ्चकादीनि** प्रायश्चित्तानि **लघूनि गुरूणि** वा **एषणादिषु येषु** येषु **स्थानेषु** यानि सम्भवन्ति तानि दातव्यानि । अथवा पञ्चकमादौ कृत्वा चतुर्लघु चतुर्गुरु येषु स्थानेषु यत् प्रायश्चित्तं सम्भवति तद्दातव्यम् । **आदिशब्दादुत्पादनोद्गमौ** गृह्येते । **हिरण्यं** गृह्णानस्य **चतुर्गुरुकाः** । आदिशब्दादोरालिकेऽपि **चतुर्गुरुकाः** । **षट्कायविराधने यत्** प्रायश्चित्तं तत् षट्कायपरिग्रहे द्रष्टव्यम्, तच्च पुरापि प्रतिपादितम् ।।९५।।

इममेवार्थं स्पष्टतरं व्याख्यानयति—

**गिहिणोऽवरज्झमाणे सुणमज्जाराइ अप्पणो वावि ।**
**वारेऊण न कप्पइ जिणाण थेराण उ गिहीणं ।।९६।।**

व्याख्या—**गृहिणो** गृहस्थस्यापराध्यन्ति अपराधं कुर्वन्ति **श्वा मार्जारो** वा । आदिशब्दात् **गोणादयो** वा । **आत्मनो वा** एते भक्तादिष्वपराध्यन्ति । तेऽपराध्यन्तोऽपि **निवारयितुं न कल्पन्ते जिनानां** जिनकल्पिकानाम् । **स्थविराः** स्थविरकल्पिका गच्छवासिनो ये साधवस्तेषां पुनर्गृहिणां गृहेषु श्वानमार्जारादयोऽपराध्यन्तोऽपि **निवारयितुं न कल्पन्ते** । आत्मनस्तु भक्तादिषु वारयितुं कल्पन्त इत्यर्थः ।।९६।। एतेष्वेव काकादिषु प्रायश्चित्तं भणति—

**कागनिवारणि लहुओ जाव ममत्तं तु लहुग सेसेसु ।**
**मज्झ सवासा इत्ति व तेण लहुग रागिणो गुरुगा ।।९७।।**

व्याख्या—**काकनिवारणे लघुको** मासः । **शेषेषु** श्वानगोणादिषु निवारितेषु **यावत् शय्यातरममत्वेन** कल्पस्थक-रक्षणेऽपि चतुर्लघुकाः । **मम सवासा** एकग्रामवासिनः स्वजना वा **तेन** सज्ञातिकादिषु ममत्वेन कल्पस्थकं रक्षति तथाऽपि चतुर्लघुकम् । अथ कल्पस्थकं **रागेण** रक्षति तदा **चतुर्गुरुका रागिणः** । एवं प्रतिक्रुष्टशिष्यपरिग्रहे सामान्यतश्चतुर्गुरु । अनाभाव्यसचित्तग्रहणेऽपि चतुर्गुरुकमेव । अनेषणीयभक्तादिप्रायश्चित्तं तु अग्रे भणिष्यते। वस्त्रादीनि धर्मोपकरणानि तु परिग्रहो न भवति । तान्येव समधिकानि बहुमूल्यानि मूर्च्छया वा परिभुज्यमानानि परिग्रहः स्यात् तत्र चतुर्गुरु । एवं द्रव्यपरिग्रहप्रायश्चित्तमुक्तम् ।।९७।। अथ क्षेत्रपरिग्रहप्रायश्चित्तमाह—

**ओगासे संथारुवसयकुलगामनगरदेसरज्जे अ ।**
**चत्तारि छच्च लहु गुरु छेओ मूलं तह दुगं च ।।९८।।**

व्याख्या—**अवकाशः** प्रतिश्रयदेशः प्रवातादिको रमणीयः तस्मिन् ममत्वं करोति । **संस्तारकः** संस्तारभूमिः तस्यां ममत्वं करोति । **उपाश्रयो** वसतिः तत्र ममत्वं करोति । एवं **कुले** कुलं—कुटुम्बं **ग्रामनगरदेशाः** प्रसिद्धाः तेषु, राणकभुक्ती **राज्यम्**, सा पुनर्भुक्तिरेकविषयो(या ?)ऽनेकविषयो(या ?) वा भवेत् । तत्र ममत्वं करोति । एतेष्ववकाशादिषु ममत्वकरणे क्रमेण प्रायश्चित्तमिदमुत्तरार्द्धोक्तमवगन्तव्यम् । यथा—**अवकाशममत्वे चतुर्लघु**। **संस्तारकममत्वे चतुर्गुरु** । **उपाश्रयममत्वे षड्लघु** । **कुलममत्वे षड्गुरु** । **ग्राममममत्वे छेदः** । **नगरममत्वे मूलम्** । **देशममत्वे अनवस्थाप्यम्**। **राज्यममत्वे पाराञ्चिकम्** । एतत् क्षेत्रपरिग्रहप्रायश्चित्तम् । एवं कालपरिग्रहप्रायश्चित्त-मत्रानुक्तमप्यनया गाथया ज्ञेयम्—

**कालातीते काले कालविवच्चास कालउ अकाले । लहुओ लहुआ गुरुगा सुद्धपदे सेवए जं च'।।**

कालतोऽतीतं **कालातीतम्** ऋतुबद्धे **मासातिरिक्तम्**, **वर्षासु चातिरिक्तम्** एकत्र स्थाने वसतः **काले** कालपरिग्रहो भवति, नियतवासदोषाश्च भवन्ति । **कालस्य विपर्यासो** विपर्ययः तं करोति, कथम् ? **कालतः** काले ऋतुबद्धे न विहरति, **अकाले** वर्षाकाले विहरति । अथवा दिवा न विहरति, रात्रौ विहरति । अत्रेदं प्रायश्चित्तम्—**ऋतुबद्धे मासातिरिक्ताऽवस्थाने मासो** लघुकः । **वर्षातिरिक्तावस्थाने** चतुर्लघुकाः । **कालविपर्यासे** चतुर्गुरुकाः । एतानि प्रायश्चित्तानि **शुद्धपदे** भवन्ति । शुद्धपदं नाम यद्यप्यपराधं न प्राप्तस्तथापीत्यर्थः । यच्चात्म—संयम—प्रवचनविराधनं **सेवते** तन्निष्पन्नं प्रायश्चित्तं द्रष्टव्यम् ।।९८।।

अथ भावपरिग्रहप्रायश्चित्तमाह—

**उवहिममत्ते लहुगा तेणभया निक्खिवंति ते चेव ।**
**ओसन्नगिहिसु लहुगा सच्छंदित्थीसु चउगुरुगा ।।९९।।**

व्याख्या—भावपरिग्रहो रागेण द्वेषेण च भवति । तत्रोप**धिरौ**घिक औपग्रहिकश्च । तस्मिन् द्विविधेऽप्युप**धौ ममत्वं** ममीकाररूपं तस्मिन् **चतुर्लघुकाः** प्रायश्चित्तम् । **स्तेनभयात्** चौरभयादुपधिं **निक्षिपति** गोपायति, विनाशभयाद्वा बद्धमेव स्थापयति ततः **ते चेव** त एव **चतुर्लघुकाः** । **अवसन्नाः** पार्श्वस्थादयो **गृहिणो** गृहस्थाः श्राद्धाः स्वजना वा तेषु विषये **ममत्वे चतुर्लघुकाः** । **स्वच्छन्दा** यथाछन्दाः तेषु स्त्रीषु च ममत्वे चतुर्गुरुकाः ।।९९।।

ननु अवसन्नादिषु ममत्वं किमर्थं करोति ? इत्याह—

**परिवाराइनिमित्तं ममत्तपरिपालणाइ—वच्छल्ले ।**
**साहम्मिय त्ति संजमहेउं वा सव्वहिं सुद्धो ।।१००।।**

व्याख्या—**परिवारः** सहायरूपः, **आदिशब्दादाहारोपधिशय्याः तेषां निमित्तम्** । अयमाशयः—पार्श्वस्थाद्यानुकूल्येन सहायाऽऽहारोपधिशय्या लभ्यन्त इति कृत्वा पार्श्वस्थावसन्नकुशीलसंसक्तयथाछन्दादिषु श्रावकस्वजनादिषु च विषये ममत्वपरिपालनादिवात्सल्ये, **ममत्वं** प्रतिबन्धरूपं **परिपालनमौषधाद्यैः आदिशब्दात्** संभोगसंवाससूत्रार्थ—दानानि । इत्यादिके **वात्सल्ये** कृते सति पूर्वगाथोक्तं प्रायश्चित्तं भवति । यदि वा जीतोक्तं पुरुषविभागेन प्रायश्चित्तमत्रावगन्तव्यम् । यथा—भिक्षोर्भिन्नमासः । वृषभस्य लघुमासः । उपाध्यायस्य गुरुमासः । आचार्यस्य चतुर्लघु । अथ पुनः **साधर्मिक इति** समानधार्मिकोऽसाविति **संयमं वा**ऽसौ मत्संसर्गात् करिष्यतीति हेतोः । **वा**शब्दात् कुलगणसङ्घग्लानादिकार्येषु साहाय्यादिकं करिष्यतीत्यादिबुद्ध्या **सर्वस्मिन्** ममत्वादिके वात्सल्ये कृतेऽपि शुद्धः । इत्युक्तं पञ्चममहाव्रतातिचारप्रायश्चित्तम् ।।१००।।

अथ षष्ठव्रतातिचारप्रायश्चित्तमाह—

**लेवाडसुक्कसंनिहिभोगे गुरुगा घयाइए छलहु ।**
**दिअगहिअ दिआभुत्ते अ छग्गुरू सेसभंगतिगे ।।१०१।।**

व्याख्या—**लेपकृत्** द्रव्योपलिप्तस्य पात्रबन्धतुम्बकादेः पर्युषितत्वे, **शुष्कसन्निधिभोगे** शुष्कानां शुण्ठी—हरीतकी—बिभीतकादीनां **सन्निधिः** साधुनिश्रया रात्रौ स्थापनम्, तद्भोगे च **चतुर्गुरुकाः** । **घृतादिके** आर्द्रवस्तुनि पर्युषिते गृहीते **षड्लघु**, आदिशब्दात् गुड—कक्कब—तैलादीनि गृह्यन्ते । इह रात्रिभोजने चतुर्भङ्गी भवति । दिवा गृहीतं रात्रौ परिवास्य दिवैव भुक्तमिति प्रथमो भङ्गः । दिवा गृहीतं रजन्यां भुक्तमिति द्वितीयः । रजन्यां गृहीतं दिवा भुक्तमिति तृतीयः । रजन्यां गृहीतं रजन्यामेव भुक्तमिति चतुर्थः । तत्र **दिवा गृहीतं दिवा भुक्तमिति** प्रथमभङ्गे च **षड्लघु** । **शेषभङ्गत्रिके** द्वितीय—तृतीय—चतुर्थभङ्गेषु **षड्गुरु** ।।१०१।।

**तुसभूइबिंदुमित्ताहारे परिवासिअंमि चउगुरुगा ।**
**लहुगा निंबाइतयाइ मोअतिफलाइऽणाहारे ।।१०२।।**

व्याख्या—**तुषभूतिबिन्दुमात्राहारे परिवासिते** भुक्ते **चतुर्गुरुकाः** । तिलतुषत्रिभागमात्रमप्याहारमशनादिकं रात्रिस्थापितं **यद्याहरति** सक्तुकादीनां शुष्कचूर्णानामेकस्यामङ्गुलौ यावती भूतिमात्रा लगति, तावन्मात्रमपि परिवासितं यद्यश्नाति। तथा पानीयस्य बिन्दुमात्रमपि यदि पिबति, तदा चतुर्गुरुका इत्यर्थः । **निम्बादयो** ये वृक्षा **आदिशब्दात्** कटुकादिवृक्षपरिग्रहः, तेषां **त्वगादि—त्वक्** छल्ली । **आदिशब्दान्मूलफलादिग्रहः** । **मोकं** कायिकी, **त्रिफला** आमलकहरीतकबिभीतकफलत्रयसंयोगरूपा । **आदिशब्दादन्यदपि** यन्निरास्वादं जिह्वाया अनिष्टम् । अयं सर्वोऽप्यनाहारः । तस्मिन्ननाहारे परिवासिते गृहीते **चतुर्लघुकाः** ।।१०२।। तथा—

आगाढाऽनागाढग्लानत्वादिकारणमन्तरेण प्रासुकादिवस्तुपरिवासने प्रायश्चित्तं दर्शयति—

**फासुअ अफासुए वाऽचित्तसचित्ते परित्तणंते अ ।**
**असिणेह—सिणेहगएऽणहारहारे लहुगगुरुगा ।।१०३।।**

व्याख्या—**प्रासुकम्** एषणीयं रात्रौ यदि स्थापयति तदा **चतुर्लघु** । **अप्रासुकम्** अनेषणीयं स्थापयति तदा **चतुर्गुरु** । **अचित्ते** स्थाप्यमाने **चतुर्लघु** । **सचित्ते चतुर्गुरु** । **परीत्ते चतुर्लघु** । **अनन्ते चतुर्गुरु** । **अस्नेहे चतुर्लघु** । **स्नेहगते** स्नेहावगाढे **चतुर्गुरु** । **अनाहारे चतुर्लघु** । **आहारे चतुर्गुरु** । इति व्रतषट्क—कायषट्कविराधनाविषय—प्रायश्चित्तप्रतिपादनेन मूलगुणविषयप्रायश्चित्तमभिहितं । सम्प्रति **'वयछक्ककायछक्कं'** इत्यादि—गाथोक्त—क्रमेणोत्तरगुणविषयं प्रायश्चित्तमुच्यते । तत्रोत्तरगुणा अकल्पपरिहारादयः । **अकल्पश्च** पिण्डशय्यावस्त्रपात्र—चतुष्टयविषयः । एतेषां च क्रमेण प्रायश्चित्तमत्र प्रतिपादयिष्यते । तत्र प्रथमं पिण्डः । स च सप्तचत्वारिंशद्—दोषदुष्टोऽकल्प्यः, ते चामी दोषाः—

**'सोलस उग्गमदोसा सोलस उप्पायणाइ दोसा उ । दस एसणाइ दोसा संजोअणमाइ पंचेव'** ।।
**षोडशोद्गमदोषा** आधाकर्मादयः । ततः **षोडशोत्पादनादोषा** धात्र्यादयः । अथ दशैषणादोषाः शङ्कितादयः । तदनु **पञ्च ग्रासैषणादोषाः** संयोजनादयः । एतेषां च विस्तरव्याख्या पिण्डनिर्युक्तितोऽवसेया । लेशतश्चात्रापि यथास्थानं दर्शयिष्यते । यथा तद्विषयं प्रायश्चित्तं सुज्ञातं भवति ।।१०३।।

तत्र प्रथमं षोडशोद्गमदोषाणां क्रमेण प्रायश्चित्तं प्ररूपयति—

**आहाकम्मे चउगुरु दुविहं उद्देसिअं विआणाहि ।**
**ओहविभागे अ तहिं मासलहू ओहउद्देसे ।।१०४।।**

व्याख्या—यत् साध्वर्थमेव सचित्तमचित्तीक्रियते तदाधाकर्म, तस्मिन्नाधा**कर्मणि चतुर्गुरु** । आधाकर्मदोष—दुष्टमाहारं गृह्णानस्य साधोश्चतुर्गुरु प्रायश्चित्तं भवतीत्यर्थः । एवं सर्वत्र ज्ञेयम् । **औद्देशिकं द्विविधम्—ओघतो विभागतश्च** । तत्र स्वकुटुम्बार्थं पच्यमाने भक्ते पाखण्डिनां गृहिणां वा मध्ये यः कोऽपि समेष्यति, तस्य भिक्षादानार्थं कतिपयानधिकतरान् तन्दुलान् ओघेन—सामान्येन एतावत् स्वार्थं एतावच्च भिक्षादानार्थमित्येवं विभागरहितेन गृहनायको यत् क्षिपति, **एतदोघौद्देशिकम्** । तस्मिन्नोघौद्देशिके गृहीते **मासलघु** ।।१०४।।

**बारसविहं विभागे चउहुद्दिट्ठं कडं च कम्मं च ।**
**उद्देस—समुद्देसा—ऽऽदेस—समाएसभेएणं ।।१०५।।**

व्याख्या—वीवाहप्रकरणादिषु यदुद्धरितं तत् पृथक् कृत्वा दानाय कल्पितमेतत् विभागेनस्वसत्तातः पृथक्करणेनौद्देशिकं **विभागौद्देशिकम्** । तच्च प्रथमतस्त्रिधा—उद्दिष्टं कृतं कर्म च । तत्र स्वार्थमेव निष्पन्नमशनादिकं भिक्षाचराणां दानाय यत् पृथक्कल्पितं तदुद्दिष्टम् । यत् पुनरुद्धरितं सत् शाल्योदनादिकं भिक्षादानाय करम्बादिरूपतया कृतं तत् कृतमित्युच्यते । यत् पुनर्वीवाहप्रकरणादावुद्धरितं मोदकचूर्ण्यादि तद्भूयोऽपि भिक्षाचराणां दानाय गुडपाकदानादिना मोदकादि कृतं तत्कर्म । यदुक्तम्—

**'संखडिभत्तुव्वरिअं चउण्हमुद्दिसइ जं तमुद्दिट्ठं । वंजणमीसाइ कडं तमग्गितविआइ पुण कम्मं'** ।।
एकैकं पुनश्चतुर्द्धा—**उद्देशसमुद्देशादेशसमादेशभेदेन** । तत्र यद् उद्दिष्टं कृतं कर्म वा यावन्तः केऽपि भिक्षाचराः पाखण्डिनो गृहस्था वा समेष्यन्ति तेभ्यः सर्वेभ्योऽपि दातव्यमिति सङ्कल्पितं तद् **उद्देशम्** । पाखण्डिनां देयत्वेन कल्पितं **समुद्देशम्** । श्रमणानामादेशम् । निर्ग्रन्थानां **समादेशम्** । यदुक्तम्—

**'जावंतिअमुद्देसं पासंडीणं भवे समुद्देसं । समणाणं आएसं निग्गंथाणं समाएसं'** ।।

ततश्चैवं भेदाभिधानम्—उद्दिष्टोद्देशम् उद्दिष्टसमुद्देशम् उद्दिष्टादेशम् उद्दिष्टसमादेशम् । कृतोद्देशं कृतसमुद्देशं कृतादेशं कृतसमादेशम् । कर्मोद्देशं कर्मसमुद्देशं कमदिशं कर्मसमादेशम् । एवं विभागे—विभागविषय**मौद्देशिकं द्वादशविधं भवति** ।।१०५।। अथैतेषां द्वादशानां भेदानां प्रायश्चित्तमाह—

**चउभेए उद्दिट्ठे लहुमासो अह चउव्विहंमि कडे ।**
**गुरुमासो चउलहुअं कम्मुद्देसे अ नायव्वं ।।१०६।।**

व्याख्या—**चतुर्भेदे** चतुष्प्रकारे **उद्दिष्टे** पूर्वोक्तस्वरूपे गृहीते **लघुमासः** । अथ चतुर्विधे कृते **गुरुमासः** । **कर्मोद्देशे** च **चतुर्लघुकं** ज्ञातव्यम् ।।१०६।।

**कम्मसमुद्देसाइसु तिसु चउगुरुअं भणंति समयन्नू ।**
**दुविहं तु पूइकम्मं उवगरणे भत्तपाणे अ ।।१०७।।**

व्याख्या—**कर्मसमुद्देशादिषु त्रिषु** भेदेषु—कर्मसमुद्देश—कमदिश—कर्मसमादेशेषु चतुर्गुरुकं प्रायश्चित्तं **भणन्ति समयज्ञाः** श्रुतधरा—गणधरादयः । पूतिकर्म सूक्ष्मं बादरं च भवति । तत्र सूक्ष्ममाधाकर्मिकगन्धाग्निधूमादिभिः स्यात्, तददुष्टम् आचीर्णत्वादशक्यपरिहारत्वाच्च । **बादरं** तु पूतिकर्म **द्विविधम्—उपकरणे भक्तपाने** च । तत्रोपकरणं चू(चु?)ल्लीस्थालीदर्व्यादिरूपम् । चुल्ली च या कियता शुद्धेन कियता चाऽऽधाकर्मिकेण कर्दमेन निष्पादिता सा इत्थम्भूता **उपकरणपूतिः** । अनया दिशा अन्यस्याऽप्युपकरणस्य पूतित्वं भावनीयम्। आधाकर्मिकचुल्लीस्थाल्यादिषु राद्धं स्थापितं वा आधाकर्मभक्तादिखरण्टितस्थाल्यादौ स्थापितं वा आधाकर्मभक्तादिलवेनाऽपि मिश्रं वा भक्तं पानं वा स्वरूपतः शुद्धमपि **पूति** अपवित्रं स्यात् । यथा अशुचिलवेनाऽशनादि । एतद् भक्तपानपूतिकर्म ।।१०७।।

**उवगरणपूइ मासलहु मासगुरु भत्तपाणपूइंमि ।**
**जावंतिअ—जइ—पासंडि मीसजायं भवे तिविहं ।।१०८।।**

व्याख्या—**उपकरणपूतौ मासलघु** । **भक्तपानपूतौ मासगुरु** प्रायश्चित्तम् । अथ **मिश्रजातं त्रिविधं** भवति । **यावदर्थिकमिश्रं पाखण्डिमिश्रं यतिमिश्रं** च । यत् स्वस्य तेषां च योग्यं प्रथमतोऽप्यग्निज्वालनाऽधिश्रयणदानाद्यैरशनादि मिश्रितमेव राद्धुमारभ्यते तन्मिश्रमेव जातमुत्पन्नं मिश्रजातम् ।।१०८।।

**जावंति मिसि चउलहु चउगुरु पासंडि सघरमीसंमि ।**
**चिर—इत्तरभेएणं निद्दिट्ठा ठावणा दुविहा ।।१०९।।**

व्याख्या—**यावदर्थिकमिश्रजाते चतुर्लघु । पाखण्डिमिश्रजाते** सुष्ठु अतिशयेनाऽगृहाः **स्वगृहा** अनगारास्तैः सह **मिश्रजातम् । तस्मिँश्चतुर्गुरु । स्थापना द्विविधा निर्दिष्टा** तीर्थकरादिभिः—**चिरेत्वरभेदेन** चिरस्थापना इत्वरस्थापना च । यत् साध्वर्थं स्थापयित्वा मुञ्चति सा **चिरस्थापना** । गृहपङ्क्त्यामेकः साधुरेकत्र गृहे भिक्षां सम्यगुपयोगेन परिभावयन् गृह्णाति, द्वितीयस्तु द्वयोः पार्श्वस्थितगृहयोर्हस्तगते द्वे भिक्षे परिभावयति, ततो गृहत्रयात् परतो गृहान्तरे साधुनिमित्तं या हस्तगता भिक्षा सा **इत्वरस्थापना** तत्रोपयोगाऽसम्भवात् ।।१०९।।

**चिरठविए लहुमासो इत्तरठविअंमि देसिअं पणगं ।**
**पाहुडिआ वि अ दुविहा बायरसुहुमप्पयारेहिं ।।११०।।**

व्याख्या—**चिरस्थापिते** चिरस्थापनादोषे **लघुमासः । इत्वरस्थापिते** इत्वरस्थापनादोषे **पञ्चकं देशितं** कथितम् । **प्राभृतिकाऽपि च द्विविधा बादरसूक्ष्मप्रकाराभ्यां** बादरप्राभृतिका सूक्ष्मप्राभृतिका च । तत्र गुर्वागमनं ज्ञात्वा कोऽपि श्रावको विवाहादेरुपसर्पणमपसर्पणं वा यत्करोति सा **बादरा** । यत्तु पुत्रादौ भोजनमर्थयमाने सति साध्वर्थमुत्थिता तवापि दास्यामीति ब्रूते गृहस्था सा सूक्ष्मा ।।११०।।

**बायरपाहुडिआए चउगुरु सुहुमाइ पावए पणगं ।**
**पायडपयासकरणं तं बिंति पाउअरं दुविहं ।।१११।।**

व्याख्या—**बादरप्राभृतिकायां** बादरप्राभृतिकादोषदुष्टाऽऽहारग्रहणे **चतुर्गुरु । सूक्ष्मायां प्राभृतिकायां** साधुः **पञ्चकं प्राप्नोति । प्रादुष्करणं द्विविधं ब्रुवते** समयविदः **प्रकटकरणं प्रकाशकरणमि**त्यमुना प्रकारेण । तत्रान्धकारादपसार्य बहिः सप्रकाशप्रदेशे साध्वर्थमन्नादि स्थापनं **प्रकटकरणम्** । सान्धकारस्थानस्थितस्यैवाऽन्नादेर्मणि—प्रदीप—गवाक्ष—कुड्य—छिद्राद्यैरुद्योतकरणं **प्रकाशकरणम्** ।।१११।।

**मासलहु पयडकरणे पगासकरणे अ चउलहुं लहइ ।**
**अप्पपरदव्वभावेहि चउविहं कीयमाहंसु ।।११२।।**

व्याख्या—**प्रकटकरणे मासलघु । प्रकाशकरणे चतुर्लघुप्रायश्चित्तं लभते साधुः । क्रीतं चतुर्विधमवोचन्ननूचानाः**[A] । कथम् ? **आत्मपरद्रव्यभावैः** आत्मद्रव्यक्रीतम्, आत्मभावक्रीतम्, परद्रव्यक्रीतम्, परभावक्रीतं चेति । तत्राऽऽत्मना स्वयमेव द्रव्येणोज्जयन्तभगवत्प्रतिमाशेषादिरूपेण प्रदानतः परमावर्ज्य यद् भक्तादि गृह्यते **तदात्मद्रव्यक्रीतम्**। यत् पुनरात्मना स्वयमेव भक्ताद्यर्थं धर्मकथादिना परमावर्ज्य भक्तादि ततो गृह्यते **तदात्मभावक्रीतम्** । तथा परेण यत् साधुनिमित्तं द्रव्येण क्रीतं **तत्परद्रव्यक्रीतम्** । यत् पुनः परेण साध्वर्थं निजविज्ञानप्रदर्शनेन धर्मकथादिना वा परमावर्ज्य ततो गृहीतं **तत्परभावक्रीतम्** ।।११२।।

---

**A.** विद्वांसः ।

**अप्पपरदव्वकीए सभावकीए अ होइ चउलहुअं ।**
**परभावक्कीए पुण मासलहुं पावए समणो ।।११३।।**

व्याख्या—आत्मद्रव्यक्रीते परद्रव्यक्रीते स्वभावक्रीते च चतुर्लघुकं भवति। परभावक्रीते पुनर्मासलघु प्राप्नोति श्रमणः ।।११३।।

**अह लोउत्तरलोइअभेएणं दुविहमाहु पामिच्चं ।**
**लोउत्तरि मासलहू चउलहुअं लोइए होइ ।।११४।।**

व्याख्या—अथ प्रामित्यं द्विविधमाहुः लोकोत्तर—लौकिकभेदेन । यदुद्धारकेण वस्त्राद्यानीय साधुभ्यो ददाति गृहस्थस्तल्लौकिकं प्रामित्यम् । साधुरेव वस्त्राभावे साध्वन्तरपार्श्वाद्यदुद्धारके गृह्णाति तल्लोकोत्तरम् । तत्र लोकोत्तरे मासलघु । लौकिके चतुर्लघुकं भवति ।।११४।।

**परिअट्टिअं पि दुविहं लोउत्तरलोइअप्पगारेहिं ।**
**लोउत्तरि मासलहू चउलहुअं लोइए होइ ।।११५।।**

व्याख्या—परिवर्तितमपि द्विधा लौकिकलोकोत्तरप्रकाराभ्याम् । तत्र यदन्यदीयं वस्त्राद्यात्मीयैः परावर्त्य गृही साधुभ्यो ददाति तल्लौकिकम् । साधव एव यन्मिथः परिवर्त्तयन्ति तल्लोकोत्तरम् । तत्र लोकोत्तरे परिवर्त्तिते मासलघु । लौकिके चतुर्लघुकं भवति ।।११५।।

**अभिहडमुत्तं दुविहं सगामपरगामभेअओ तत्थ ।**
**चरमं सपच्चवायं अपच्चवायं च इअ दुविहं ।।११६।।**

व्याख्या—अभ्याहृतम्—अभि—सम्मुखं स्वस्थानात् साधुसमीपे दानायाहृतम्—आनीतमभ्याहृतम् । तच्च द्विविधमुक्तं स्वग्रामपरग्रामभेदतः । स्वग्रामाऽभ्याहृतं परग्रामाऽभ्याहृतं चेत्यर्थः । तत्र तयोर्मध्ये चरमं पाश्चात्यं परग्रामाऽभ्याहृतं पुनर्द्विविधं सप्रत्यपायमप्रत्यपायं चेति ।।११६।।

**सपच्चवायपरगाम आहडे चउगुरुं लहइ साहू ।**
**निपच्चवायपरगामआहडे चउलहु जाण ।।११७।**

व्याख्या—परस्माद् अन्यस्माद् ग्रामाद् यत् साधुदाननिमित्तम् आहृतम् आनीतं तत् परग्रामाहृतम् । तस्मिन् परग्रामाहृते सप्रत्यपाये अनर्थसहिते गृहीते चतुर्गुरुकं लभते साधुः । परग्रामाहृते निष्प्रत्यपाये चतुर्लघुकं प्रायश्चित्तं जानीहि ।।११७।।

**मासलहु सग्गामाहडम्मि तिविहं च होइ उब्भिन्नं ।**
**जतुछगणाइविलित्तुब्भिन्नं तह दद्दरुब्भिन्नं ।।११८।।**

**तह य कवाडुब्भिन्नं लहुमासो तत्थ दद्दरुब्भिन्ने ।**
**चउलहुअं सेसदुगे तिविहं मालोहडं तु भवे ।।११९।।**

व्याख्या—यस्मिन् ग्रामे साधुर्भवति तस्मादेव ग्रामादाहृतं साधुसमीपे दानायानीतं **स्वग्रामाहृतं** तस्मिन् **स्वग्रामाहृते मासलघु प्रायश्चित्तम्** । उद्भिन्नं पुनस्त्रिविधं भवति—**लिप्तोद्भिन्नं दर्दरोद्भिन्नं कपाटोद्भिन्नं** च । तत्र जतुछगणादिलेपेन विलिप्तं घृतघटादिमुखं साधूनां दानार्थमुद्भिद्य घृतादि यद्दीयते **तल्लिप्तोद्भिन्नम्** । दर्दरः कुतुपादेर्मुखबन्धनं वस्त्रचर्मादिखण्डं तं दर्दरमुद्भिद्य यद्दीयते तद्दर्दरोद्भिन्नम् । तथा यत् पिहितं कपाटमुद्भिद्य उद्घाट्य साधुभ्यो दीयते **तत्कपाटोद्भिन्नम्** । तत्र **दर्दरोद्भिन्ने लघुमासः** । **शेषद्विके** लिप्तोद्भिन्नकपाटोद्—भिन्नलक्षणे **चतुर्लघुकम्** । **मालापहृतं** मालं प्रासादोपरितलं तस्मादपहृतं मालापहृतम् । उपलक्षणत्वात् करदुर्ग्राह्यं यद् दात्री ददाति तत् सर्वं मालापहृतं ।।११९।। तत् पुनस्त्रिविधं भवति । कथम् ?

**उक्किट्ठजहन्नमज्झिम—भेअओ तत्थ चउलहुक्किट्ठे ।**
**लहुमासो अ जहन्ने गुरुमासं मज्झिमे जाण ।।१२०।।**

व्याख्या—जघन्यमध्यमोत्कृष्टभेदत्रयान्मालापहृतं त्रिधा । तत्र भून्यस्ताभ्यां पादयोरग्रभागाभ्यां पार्ष्णिभ्यां चोत्पातिताभ्यामूर्ध्वविलगितसिक्ककादिस्थितं दात्र्या दृष्टेरगोचरं यद्दीयते **तज्जघन्यं मालापहृतम्** । मञ्चकादिकमारुह्य यद्दीयते **तन्मध्यमम्** । निःश्रेण्यादिकमारुह्य प्रासादोपरितलादानीय यद्दीयते तदुत्कृष्टं मालापहृतम् । तत्रोत्कृष्टे मालापहृते गृहीते चतुर्लघु । जघन्ये मालापहृते लघुमासः । मध्यमे मालापहृते गुरुमासं जानीहि ।।१२०।।

**सामिपहुतेणकए तिविहे वि अ चउलहुं तु अच्छिज्जे ।**
**साहारण—चुल्लग—जड्डभेअओ तिविहमणिसिट्ठं ।।१२१।।**

व्याख्या—आच्छेद्यं त्रिधा—स्वामिप्रभुस्तेनभेदात् । **स्वामी** ग्रामादिनायकः **प्रभुः** गृहाधिपः तौ स्वायत्तमानुषेभ्यः । **स्तेनाः** चौरास्ते सार्थिकादिभ्यो बलादाच्छेद्य उद्दाल्य यत् साधुभ्यो ददाति तदाच्छेद्यम् । तस्मिन् **त्रिविधेऽपि** स्वामिप्रभुस्तेनकृते आच्छेद्ये गृहीते **चतुर्लघुकम्** । अनिसृष्टं त्रिविधं **साधारण—चोल्लक— जड्डभेदतः** । तत्र साधारणराद्धं भक्तं सर्वाननुज्ञातमेकादेर्ददतः **साधारणानिसृष्टम्** । **चोल्लको** भोजनं यत् कौटुम्बिक—प्रेषितहालिकयोग्यचोल्लकमध्यात् कौटुम्बिकाननुज्ञया चोल्लकवाही साधवे ददाति **तच्चोल्लकानिसृष्टम्** । **जड्डो** हस्ती तस्य सत्कं पिण्डादिकं राज्ञा गजेन वाऽननुज्ञातं **जड्डानिसृष्टम्** ।।१२१।।

**तिविहे वि तत्थ चउलहु तओ अज्झोअरं विआणाहि ।**
**जावंति – अजइपासंडि – मीसभेएण तिविगप्पं ।।१२२।।**

व्याख्या—तत्र **त्रिविधेऽपि** अनिसृष्टे गृहीते **चतुर्लघु** । **ततोऽध्यवपूरकं विजानीहि यावदर्थिक–यतिपाखण्डि–मिश्रभेदेन त्रिविकल्पं** त्रिविधम् । यत्राऽग्निसन्धुक्षणस्थालीजलप्रक्षेपाद्यारम्भे यावदर्थिकाद्यागमनात् पूर्वमेवात्मार्थं निष्पादिते पश्चाद्यथासम्भवं त्रयाणां यावदर्थिकादीनामर्थायाधिकतरास्तन्दुलाः सह राद्धुं स्थाल्यां प्रक्षिप्यन्ते **सोऽध्यवपूरकः**। अत एव चास्य मिश्रजाताद् भेदः । यतो मिश्रजातं तदुच्यते यत् प्रथमत एव यावदर्थिकाद्यर्थमात्मार्थं च मिश्रं निष्पाद्यते । यत् पुनः प्रथमतः स्वार्थमारभ्यते पश्चात् प्रभूतानर्थिनः पाखण्डिनः साधून् वा समागतानवगम्य तेषामर्थायाधिकतरजलतन्दुलादि प्रक्षिप्यते सोऽध्यवपूरक इति मिश्रजातादस्य भेदः । स **त्रिधा यावदर्थिकमिश्रः पाखण्डिमिश्रः यतिमिश्रश्च** ।।१२२।।

**मासलहु पढमभेए मासगुरुं चरमंमि जाण भेअदुगे ।**
**इअ उग्गमदोसाणं पायच्छित्तं मए वुत्तं ।।१२३।।**

व्याख्या—**प्रथमभेदे** अध्यवपूरकस्य यावदर्थिकरूपमिश्ररूपे **मासलघु** । **चरमे** पाश्चात्ये **भेदद्विके** पाखण्डि–मिश्रयतिमिश्ररूपे **मासगुरु प्रायश्चित्तं जानीहि** । इत्यमुना प्रकारेण उद्गमदोषाणां षोडशानां **प्रायश्चित्तं मया प्रोक्तं** प्रतिपादितम् । एतेषु षोडशोद्गमदोषेषु केचन दोषा विशुद्धकोटिरूपाः केचन पुनरविशुद्धकोटिरूपाः। तत्र यद्दोषदुष्टे भक्ते तावन्मात्रेऽपनीते शेषं कल्पते स दोषो विशुद्धकोटिः । शेषस्त्वविशुद्धकोटिः । तत्राधाकर्म, औदेशिकचरमभेदत्रयम्, भक्तपानपूतिः मिश्रजातान्त्यभेदद्वयम्, बादरप्राभृतिका, अध्यवपूरकान्त्यभेदद्वयं चाविशुद्धकोटिः । पुरीषलवेनेव तदवयवेनापि स्पृष्टं सर्वमभोज्यम्, शेषास्तु विशुद्धकोटयः । तत्सम्पृक्तं चान्नादि संस्तरे साधवः सर्वं त्यजन्ति । असंस्तरे तु विविच्य तदेव त्यजन्ति । घृतादिकमपि तावन्मात्रमेव त्यजन्ति, न शेषम् । यद्यपि तदवयवयोगस्तथापि शुद्धत्वमिति ।।१२३।।

अथोत्पादनादोषाणां षोडशानां क्रमेण प्रायश्चित्तमाह—

**धाईउ पंच खीराईभेअओ चउलहु तु तप्पिंडे ।**
**चउलहु दूईपिंडे सगामपरगामभिन्नंमि ।।१२४।।**

व्याख्या—**धात्र्यो** बालकपरिपालिकाः ताश्च **क्षीरादिभेदतः पञ्च** भवन्ति । बालस्य क्षीर–मज्जन–मण्डन–क्रीडना–ऽङ्कधात्र्यः । तासां कर्म धात्रीत्वं तेन लब्धः पिण्डो धात्रीपिण्डस्तस्मिन् **धात्रीपिण्डे चतुर्लघु** । दूती परसन्दिष्टार्थ–कथिका, तस्याः कर्म दौत्यम्, तेन दौत्येन स्वग्रामे परग्रामे वा सन्दिष्टार्थकथनरूपेण प्राप्तः पिण्डो दूतीपिण्डस्तस्मिन् **दूतीपिण्डे स्वग्रामपरग्रामभेदभिन्ने चतुर्लघु** ।।१२४।।

**तिविहो निमित्तपिंडो तिकालभेएण तत्थ तीयंमि ।**
**चउलहु अह चउगुरुअं अणागए वट्टमाणे अ ।।१२५।।**

व्याख्या—**निमित्तम्** अतीताद्यर्थसूचकं शुभाशुभचेष्टादि तत्कथनेन प्राप्तः पिण्डो **निमित्तपिण्डस्त्रिविधस्त्रिकाल-भेदेनातीतानागतवर्त्तमानलक्षणकालत्रयभेदेन । तत्रातीतकालविषयनिमित्तकथनेन** प्राप्ते पिण्डे **चतुर्लघु । अनागतकालविषयनिमित्तकथनेन वर्त्तमानकालविषयनिमित्तकथनेन** च लब्धे पिण्डे **चतुर्गुरुकम्** ।।१२५।।

**जाइकुलसिप्पगणकम्मभेअओ पंचहा विणिद्दिट्ठो ।**
**आजीवणाइपिंडो पच्छित्तं तत्थ चउलहुगा ।।१२६।।**

व्याख्या—**आजीवनापिण्डो जातिकुलशिल्पगणकर्मभेदतः पञ्चधा विनिर्दिष्टः** । तत्र **जातिः** ब्राह्मणादिका, **कुलम्** उग्रादि । अथवा मातुः समुत्था **जातिः**, पितृसमुत्थं **कुलम्** । शिल्पं तूर्णनसीवनादि । **गणो** मल्लादिवृन्दम्, **कर्म** कृष्यादि । अथवा अप्रीत्युत्पादकं कर्म, प्रीत्युत्पादकं तु शिल्पम् । अन्ये **त्वाहुः** अनाचार्योपदिष्टं कर्म, आचार्योपदिष्टं तु शिल्पमिति । एतैर्जातिकुलशिल्पगणकर्मभिरात्मनो गृहस्थस्य च तुल्यरूपताख्यापनेन लब्धः पिण्डः आजीवनापिण्डः । **तत्राऽऽजीवनापिण्डे प्रायश्चित्तं चतुर्लघुकाः** ।।१२६।।

**चउलहु वणीमगपिंडे तिगिच्छपिंडं दुहा भणंति जिणा ।**
**बायरसुहुमं च तहा चउलहु बायरचिगिच्छाए ।।१२७।।**

व्याख्या—**वनीपको** भिक्षाचरः तद्वत् पिण्डार्थं श्रमणातिथिब्राह्मणकृपणश्वानादिभक्तानां दायकानामात्मानं तत्तद्भक्तं दर्शयन् यल्लभते स **वनीपकपिण्डस्तस्मिन् चतुर्लघु । चिकित्सापिण्डं द्विधा भणन्ति जिना** वीतरागा **बादरं सूक्ष्मं च** । तत्र वैद्यवत् स्वयं वमनविरेचनादि रोगप्रतीकारविधापनं बादरचिकित्सा, तयाऽवाप्तः पिण्डो बादरचिकित्सापिण्डः । वैद्यौषधादिसूचनेन सूक्ष्मा चिकित्सा तया लब्धः पिण्डः सूक्ष्मचिकित्सापिण्डः । **तत्र बादरचिकित्सापिण्डे चतुर्लघु** ।।१२७।।

**सुहुमाए मासलहू चउलहुआ कोहमाणपिंडेसु ।**
**मायाए मासगुरुं चउगुरु तह लोभपिंडंमि ।।१२८।।**

व्याख्या—**सूक्ष्मचिकित्सापिण्डे लघुमासः** । क्रोधमानमायालोभैर्लब्धाः पिण्डाः क्रोधमानमायालोभपिण्डाः । तत्र साधोर्विद्याप्रभावमुच्चाटनमारणादिकम्, तपःप्रभावं शापदानादिकम्, राजकुले वल्लभत्वम्, क्रोधफलं वा ज्ञात्वा गृहस्थेन यः पिण्डो दीयते स **क्रोधपिण्डः** । अभिमानेन हठादपि यः पिण्डो गृह्यते स **मानपिण्डः** । नानाविधविप्रतारणप्रकारैर्यः पिण्डो लभ्यते स **मायापिण्डः** । वल्लचनकादिकमसारं लभ्यमानमपि प्रतिषिध्य यन्मोदकादि सारमेव प्रतिगृह्णाति अथवा प्रचुरं मधुरस्निग्धादि वस्तु लभ्यमानं दृष्ट्वा यद्बहु गृह्णाति स **लोभपिण्डः** । तत्र **क्रोधमानपिण्डयोश्चतुर्लघुकाः** ।**मायापिण्डे गुरुमासः** । **तथा लोभपिण्डे चतुर्गुरु** ।।१२८।।

**पुव्विंपच्छासंथवमाहु दुहा पढममित्थ गुणथुणणे ।**
**मासलहु तत्थ बीअं संबंधे तत्थ चउलहुअं ।।१२९।।**

व्याख्या—संस्तवं द्विविधमाहुः—**प्रथमं गुणस्तवने । द्वितीयं सम्बन्धे ।** एकैकमपि **द्विधा पूर्वं पश्चाच्च ।** अयमर्थः—संस्तवो द्विविधः—श्लाघारूपः परिचयरूपश्च । तत्र श्लाघारूपो वचनसंस्तवः, परिचयरूपः सम्बन्धिसंस्तवः । एकैकोऽपि द्विधा—पूर्वसंस्तवः पश्चात्संस्तवश्च । तत्र पूर्वं यद्दातारं स्तुत्वा याचते, लब्धे वा पश्चात् स्तौति स **पूर्वसंस्तवः पश्चात्संस्तवश्च** श्लाघारूपः । सम्बन्धिसंस्तवो मात्रादिनात्रकयोजनं पूर्वसंस्तवः, श्वश्र्वादिसम्बन्धयोजनं पश्चात्संस्तवः । तत्र **गुणस्तवनरूपसंस्तवे द्विविधेऽपि मासलघु । सम्बन्धिसंस्तवे द्विविधेऽपि चतुर्लघुकम्** ।।१२९।।

**विज्जामंते चुन्ने जोगे चउसु वि लहेइ चउलहुअं ।**
**मूलं च मूलकम्मे उप्पायणदोसपच्छित्तं ।।१३०।।**

व्याख्या—**विद्या** ससाधना स्त्रीदेवताऽधिष्ठिता च, मन्त्रोऽसाधनः पुंरूपदेवताधिष्ठितश्च, **चूर्णमञ्जनादि, योगः** पादप्रलेपादिः । तत्प्रयोगेण लब्धाः पिण्डा **विद्यामन्त्रचूर्णयोगपिण्डाः । एतेषु चतुर्ष्वपि पिण्डेषु** गृहीतेषु **चतुर्लघुकं लभते** साधुः । **मूलकर्मणि** गर्भाधानपरिशाटादिकरणरूपे **मूलं च** मूलाख्यमष्टमप्रायश्चित्तं लभते साधुः । इत्युत्पादनादोषप्रायश्चित्तमुक्तम् ।।१३०।।

सम्प्रति ग्रहणैषणादोषाणां दशानामपि क्रमेण प्रायश्चित्तमाह—

**संकिअदोससमाणं आवज्जइ संकिअंमि पच्छित्तं ।**
**दुविहं मक्खिअमुत्तं सचित्ता—ऽचित्तभेएणं ।।१३१।।**

व्याख्या—इह शङ्कितदोषे चत्वारो भङ्गाः—शङ्कितग्राही शङ्कितभोजी, शङ्कितग्राही निःशङ्कितभोजी, निःशङ्कितग्राही शङ्कितभोजी, निःशङ्कितग्राही निःशङ्कितभोजी च । अत्र द्वितीयचतुर्थौ भङ्गौ शुद्धौ, द्वयोरपि भोजनस्य निःशङ्कितत्वेन निर्दोषत्वात् । द्वितीयभङ्गभाविनश्च शङ्कितग्रहणदोषमात्रस्योत्तरशुभपरिणामेन शुद्धिसम्भवात्, शेषभङ्गद्वयमध्ये पुनः शङ्किते सति शङ्कितदोषसमानं प्रायश्चित्तमापद्यते । आधाकर्मादीनां षोडशोद्गमदोषाणां म्रक्षितादीनां च नवैषणादोषाणां मध्ये यं दोषं ग्रहणे भोजने वा शङ्किते तस्मिन् दोषे यत् प्रायश्चित्तं भवति, तत् शङ्कितदोषे प्राप्नोतीत्यर्थः । **म्रक्षितं द्विविधमुक्तं सचित्ताऽचित्तभेदेन** । सचित्तम्रक्षितम् अचित्तम्रक्षितं च । तत्र यत् **सचित्तेन** पृथ्वीकायादिना **म्रक्षितम्** अवगुण्ठितं तत् **सचित्तम्रक्षितम्** । यत् पुनरचित्तेन पृथिवीरजःप्रभृतिनाऽवगुण्ठितं तद**चित्तम्रक्षितम्** ।।१३१।।

तत्र सचित्तम्रक्षितं त्रेधा । एतदेव दर्शयति—

**भूदगवणमक्खिअम्मिअ तिविहं सचित्तमक्खिअं बिंती ।**
**पुढवीमक्खिअमित्थं चउव्विहं बिंति गीअत्था ।।१३२।।**

व्याख्या—**सचित्तम्रक्षितं त्रिविधं ब्रुवते भूदकवनम्रक्षितमिति** अनेन प्रकारेण पृथ्वीकायम्रक्षितम् अप्कायम्रक्षितं वनस्पतिकायम्रक्षितं चेत्यर्थः । तत्र पृथिवीम्रक्षितमित्थमनेन वक्ष्यमाणप्रकारेण **चतुर्विधं ब्रुवन्ति गीतार्थाः** समयविदः ।।।१३२।। एतदेव व्याख्यानयति—

**ससरक्खमक्खिअं तह सेडिअकासाइमक्खिअं चेव ।**
**निम्मीसमीसकद्दममक्खिमिअ पुढविमक्खिअं चउहा ।।१३३।।**

व्याख्या—**सरजस्कं** सचित्तपृथिवीरजोऽवगुण्ठितं देयमात्रकहस्तादि तच्च तत् म्रक्षितं च **सरजस्कम्रक्षितम्** । तथा **सेटिकाकाषादिम्रक्षितमेव** ऊषमृत्तिकाहरितालहिङ्गुलकमनःशिलाञ्जनलवणगैरिकसेटिकातुवरिकादिपृथ्वीकाय—म्रक्षितमित्यर्थः । **निर्मिश्रो**ऽपरिणतः सचेतनः, **मिश्रः** सचित्ताऽचित्तरूपः, एवंविधो यः **कर्दमस्**तेन म्रक्षितं **निर्मिश्रकर्दमम्रक्षितं मिश्रकर्दमम्रक्षितं** चेत्यर्थः । इति **पृथिवीम्रक्षितचतुर्द्धा** ।।१३३।। तत्र क्रमेण प्रायश्चित्तमाह—

**तत्थ कमेणं पणगं लहुमासो चउलहु अ मासलहु ।**
**दगमक्खिअं पि चउहा पच्छाकम्मं पुरेकम्मं ।।१३४।।**

व्याख्या—**तत्र** पृथिवीकायम्रक्षिते चतुर्विधेऽपि **क्रमेणेदं** प्रायश्चित्तम् । तद्यथा—**सरजस्कम्रक्षिते पञ्चकम्** । **सेटिकादिपृथ्वीकायम्रक्षिते लघुमासः** । **निर्मिश्रकर्दमम्रक्षिते चतुर्लघु** । **मिश्रकर्दमम्रक्षिते मासलघु** । **दकम्रक्षितमपि** अप्कायम्रक्षितमपि **चतुर्द्धा** । तद्यथा—पुरःकर्म, पश्चात्कर्म, सस्निग्धम्, उदकार्द्रं च । तत्र दानात् पूर्वं हस्तमात्रकयोः क्षालने **पुरःकर्म** । दानानन्तरं क्षालने तु **पश्चात्कर्म** ।।१३४।।

**ससिणिद्धं उदउल्लं चउलहु चउलहु अ पणग लहुमासा ।**
**वणमक्खिअं तु दुविहं पत्तेआणंतभेएण ।।१३५।।**

व्याख्या—**सस्निग्धम्** ईषल्लक्ष्यमाणजलखरण्टितं हस्तादि । उदकार्द्रं स्पष्टोपलभ्यमानजलसंसर्गम् । अत्र क्रमेण प्रायश्चित्तमिदम्—**पुरःकर्मणि चतुर्लघु, पश्चात्कर्मणि चतुर्लघु, सस्निग्धे पञ्चकम्, उदकार्द्रे लघुमासः** । **वनस्पतिकायम्रक्षितं तु द्विविधं प्रत्येकानन्तभेदेन** । प्रत्येकवनस्पतिकायम्रक्षितमनन्तकायम्रक्षितं च ।।१३५।। तत्र प्रत्येकम्रक्षितं त्रिधा, तदेवाह—

**उक्कट्ठपिट्ठकुक्कुसभेआ पत्तेअमक्खिअं तिविहं ।**
**तिविहे वि हु लहुमासो गुरुमासो णंतमक्खिअए ।।१३६।।**

व्याख्या—**उत्कृष्टपिष्टकुक्कुसभेदात् प्रत्येकम्रक्षितं त्रिविधम्** । तत्र **उत्कृष्टं** कलिङ्गाऽऽमवालुङ्क्यादिफलादीनां श्लक्ष्णीकृतानि खण्डानि अम्लिकापत्रसमुदायो वा उदूखलखण्डितः । **पिष्टम्** आमतन्दुलक्षोदादि । **कुक्कुसाः** प्रतीताः । तैर्म्रक्षितं प्रत्येकवनस्पतिम्रक्षितम् । **त्रिविधेऽपि** प्रत्येकवनस्पतिम्रक्षिते **लघुमासः** । हुशब्दः पूरणे । कुट्टितानामनन्तकायानां पनसफलादीनां श्लक्ष्णखण्डैर्म्रक्षितम**नन्तकायम्रक्षितं** तस्मिन् **गुरुमासः** । शेषैस्तु

तेजःकायादिभिः म्रक्षितं न सम्भवति, लोके तथा प्रतीत्यभावात् ।।१३६।।

एवं त्रिविधस्यापि सचित्तम्रक्षितस्य सप्रभेदस्य प्रायश्चित्तमभिहितम् । अथाचित्तम्रक्षितस्य तदाह—

**गरहिअइअरेहिं अचित्तमक्खिअं दुविहमाहु साहुवरा ।**
**गरहिअअचित्तमक्खिअ—दोसेण लहइ चउलहुअं ।।१३७।।**

व्याख्या—**गर्हितेतरैः** गर्हितागर्हितैरचित्तम्रक्षितं **द्विविधमाहुः साधुवरा** जिनाः । तत्र **गर्हितैः** मांसवसाशोणितसुरा—मूत्रोच्चारादिभिः शिष्टजनस्याऽभक्ष्याऽपेयैर्म्रक्षितं गर्हिताचित्तम्रक्षितं तेन **गर्हिताचित्तम्रक्षितदोषेण चतुर्लघुकं लभते** साधुः ।।१३७।।

**अगरहिसंसत्त—अचित्तमक्खिअम्मि वि लहेइ चउलहुअं ।**
**निक्खित्तं पुढवाइसु अणंतरपरंपरं ति दुहा ।।१३८।।**

व्याख्या—**संसजन्ति** विलगन्ति सलेपत्वात् कीटिकामक्षिकादयो जन्तवो येषु तानि संसक्तानि, **तैरगर्हितैरचित्तै**—र्म्रक्षितम् **अगर्हितसंसक्ताचित्तम्रक्षितं** तस्मिन्न**गर्हितसंसक्ताचित्तम्रक्षितेऽपि चतुर्लघुकं लभते** यतिः । इत्युक्तं म्रक्षितदोषप्रायश्चित्तम् । अथ निक्षिप्तदोषप्रायश्चित्ताभिधित्सया तत्स्वरूपं दर्शयत्युत्तरार्द्धेन—**निक्षिप्तं पृथिव्यादिषु** स्थापितं **द्विधा अनन्तरपरम्परमिति** । देयं वस्तु पृथिव्यादिषु निरन्तरं सान्तरं वा स्थापितं भवतीति **द्विधा निक्षिप्तमित्यर्थः** ।।१३८।। एतत्प्रायश्चित्तमाह—

**ठविए सचित्त भूदगसिहिपवणपरित्तवणस्सइतसेसु ।**
**चउलहु अ मासलहुआ अणंतरपरंपरेसु कमा ।।१३९।।**

व्याख्या—**सचित्तभूदकशिखिपवनपरीत्तवनस्पतित्रसेषु** सचित्तपृथ्वीकायाऽप्कायतेजःकायवायुकायप्रत्येक—वनस्पतिकायत्रसकायेषु **अनन्तरम्** अव्यवधानेन **परम्परं** व्यवधानेन **स्थापिते** निक्षिप्ते देयेऽशनाद्याहारे गृहीते **क्रमात्** प्रायश्चित्तं **चतुर्लघुकमासलघुकौ**। अनन्तरनिक्षिप्ते चतुर्लघु, परम्परनिक्षिप्ते लघुमास इत्यर्थः ।।१३९।।

**अइरपरंपरठविए मीसेसु तेसु मासलहुपणगा ।**
**अइरपरंपरठविए पणगं पत्तेअणंतबीएसु ।।१४०।।**

व्याख्या—**तेषु** पृथ्वीकायाऽप्कायतेजःकायवायुकायप्रत्येकवनस्पतिकायत्रसकायेषु **मिश्रेषु** सचित्ताचित्तरूपेषु । **अतिरःपरम्परस्थापिते** तिरो व्यवधाने, न तिरोऽतिरोऽव्यवधानम् अनन्तरमित्यर्थः । **अतिरोऽव्यवधानेन स्थापिते मासलघु** । **परम्परेण** व्यवधानेन स्थापिते **पञ्चकं** क्रमादवगन्तव्यम् । **प्रत्येकानन्तबीजेषु** प्रत्येकवनस्पतिकायबीजेषु अनन्तवनस्पतिकायबीजेषु **अतिरःपरम्परस्थापिते** निरन्तरं सान्तरं स्थापिते **पञ्चकम्** । **प्रत्येकबीजेषु** अनन्तर—परम्परस्थापिते **पञ्चकं** लघु । **अनन्तबीजेषु** निरन्तरपरम्परस्थापिते **पञ्चकं** गुरु स्यादित्यर्थः । एवमन्यत्राऽप्यनन्त—काये पञ्चकं गुरुकं ज्ञातव्यम् ।।१४०।।

**सचित्तणंतकाए अणंतरपरंपरेण निक्खित्ते ।**
**चउगुरु मासगुरु कमा मीसे गुरुमास पणगा य ।।१४१।।**

व्याख्या—**सचित्तेऽनन्तकाये अनन्तरपरम्परेण निक्षिप्ते** निरन्तरनिक्षिप्ते सान्तरनिक्षिप्ते **क्रमाच्चतुर्गुरु मासगुरु** भवति । **मिश्रे** पुनरनन्तकाये निरन्तरनिक्षिप्ते **गुरुमासः** । सान्तरनिक्षिप्ते तु **पञ्चकं गुरुकं** स्यात् ।।१४१।।

अथ पिहितं त्रिधा स्यात् तदेव दर्शयति—

**तह गुरुअचित्तपिहिअं सचित्तपिहिअं च मीसपिहिअं च ।**
**पिहिअं तिहा अभिहिअं चउगुरुमचित्तगुरुपिहिए ।।१४२।।**

व्याख्या—तथा **पिहितं** देयमशनादि वस्तु यत् केनाऽप्यपरेण वस्तुना स्थगितं भवति तत् **पिहितं त्रिधाऽभिहितं** जिनैः । **गुर्वचित्तपिहितं सचित्तपिहितं मिश्रपिहितं** च । तत्र **गुरुणा** महाभारेणाऽचित्तेन पाषाणखण्डादिना यद्देयवस्तु भाजनादि पिहितं स्यात् **तद्गुर्वचित्तपिहितम्** । सचित्तेन पृथिवीकायादिना पिहितं **सचित्तपिहितम्** । मिश्रेण पृथ्वीकायादिना पिहितं **मिश्रपिहितम्** । **तत्राऽचित्तगुरुद्रव्यपिहिते चतुर्गुरु** ।।१४२।।

**पिहिए सचित्तभूदगसिहिपवणपरित्तवणस्सइतसेहिं ।**
**चउलहुअमासलहुआ अणंतरपरंपरेहिं कमा ।।१४३।।**

व्याख्या—**सचित्तभूदकशिखिपवनपरीत्तवनस्पतित्रसैः** सचित्तैः पृथ्वीकायाऽप्कायतेजःकायवायुकायप्रत्येकवनस्पति—कायत्रसकायैः **पिहिते अनन्तरपरम्पराभ्यां** स्थगिते **क्रमाच्चतुर्लघुकमासलघुके** एतैर्निरन्तरपिहिते चतुर्लघु । सान्तरपिहिते लघुमास इत्यर्थः ।।१४३।।

**अइरपरंपरपिहिए मीसेहिं तेहिं मासलहुपणगा ।**
**अइरपरंपरपिहिए पणगं पत्तेअणंतबीएहि ।।१४४।।**

व्याख्या—**तैः** पृथ्वीकायादिभि**र्मिश्रैः** सचित्ताऽचित्तरू**पैरतिरःपरम्परपिहिते** निरन्तरसान्तरपिहिते निरन्तरपिहिते **मासलघु** । सान्तरपिहिते **पञ्चकम्** । **प्रत्येकानन्तबीजैरतिरः**परम्परपिहिते—निरन्तरसान्तरपिहिते **पञ्चकम्** ।।१४४।।

**सचित्तअणंतेणं अणंतरपरंपरम्मि पिहिअम्मि ।**
**चउगुरु मासगुरु कमा मीसेणं मासगुरुपणगा ।।१४५।।**

व्याख्या—**सचित्तेनानन्तेन** अनन्तकायेनानन्तरपरम्परपिहिते **क्रमाच्चतुर्गुरु मासगुरु** । निरन्तरपिहिते चतुर्गुरु । सान्तरपिहिते गुरुमास इत्यर्थः । **मिश्रेण** सचित्ताऽचित्तरूपेणानन्तकायेनानन्तरपरम्परपिहिते **क्रमान्मास—गुरुपञ्चके** ।।१४५।। अथ संहृतदोषप्रायश्चित्तमाह—

साहरिअ सजिअ–भूदगसिहिपवणपरित्तवणस्सइतसेसु ।
चउलहुअमासलहुआ अणंतरपरंपरेसु कमा ।।१४६।।

व्याख्या–इह येन हस्तेन मात्रकेण वा कृत्वा दात्री साधोरशनादिकं दातुमिच्छति, तत्रान्यददातव्यं किमपि सचित्तमचित्तं मिश्रं वाऽस्ति, ततस्तदन्यत्र भूम्यादौ सचित्ते, अचित्ते, मिश्रे वा क्षिप्त्वा तेन हस्तेन मात्रकेण वा यद्ददाति तत् **संहृतम्** । अत्र सचित्ताचित्तमिश्रपदैस्तिस्रश्चतुर्भङ्ग्यो भवन्ति । तथाहि–एका चतुर्भङ्गी सचित्तमिश्रपदाभ्याम् , द्वितीया सचित्ताचित्तपदाभ्याम् , तृतीया मिश्राचित्तपदाभ्याम् । तत्र सचित्ते सचित्तं संहृतम् , मिश्रे सचित्तम् , सचित्ते मिश्रम् , मिश्रे मिश्रमिति प्रथमा चतुर्भङ्गी । तथा सचित्ते सचित्तं संहृतम्, अचित्ते सचित्तम् , सचित्ते अचित्तम् , अचित्ते अचित्तमिति द्वितीया । तथा मिश्रे मिश्रं संहृतम् , अचित्ते मिश्रम्, मिश्रे अचित्तम् , अचिते अचित्तमिति तृतीया । अत्र प्रथमचतुर्भङ्ग्याः सर्वेष्वपि भङ्गेषु न कल्पते । द्वितीयतृतीयचतुर्भङ्ग्योस्त्वाद्येषु त्रिषु त्रिषु भङ्गेषु प्रतिषेधः । चरमे भजना । अत्र च सचित्तः पृथ्वीकायः सचित्ते पृथ्वीकाये संहृतः, सचित्ताऽप्काये वा संहृत इत्यादि षड्जीवनिकायचारणिकया स्वस्थानपरस्थानापेक्षया चतुर्भङ्गीत्रयभङ्गेष्वेकैकस्मिन् भङ्गे षट्त्रिंशत् षट्त्रिंशद् भङ्गा भवन्ति । सर्वसङ्ख्यया चत्वारि शतानि द्वात्रिंशदधिकानि भङ्गानाम् । एते च सर्वेऽपि भङ्गा नैरन्तर्येण पारम्पर्येण वा भवन्ति । तत्र चैतेषु सर्वेष्वपि निरन्तरपरम्परसंहृतभङ्गेषु यत्र सचित्तसङ्घट्टनादिदोषः स्यात् तत्र न कल्पते । एतत् सर्वं निक्षिप्ते पिहितेऽपि स्वयमवगन्तव्यम् । अथैतेषु निरन्तरपरम्परसंहृतसर्वभङ्गेषु प्रायश्चित्तं प्रदर्श्यते । **सजीवाः** सचित्ता ये **भूदकशिखिपवनपरीत्तवनस्पतित्रसाः** पृथ्वीकायाऽप्कायतेजःकायवायुकायप्रत्येकवनस्पतिकायत्रसकायास्तेषु **अनन्तरपरम्परेषु** संहृत्याऽन्यद्वस्तु क्षिप्त्वाऽशनादिके दीयमाने गृहीते **क्रमाच्चतुर्लघुकमासलघुके** । अनन्तरसंहृते चतुर्लघुकं परम्परसंहृते मासलघुकं भवतीत्यर्थः ।।१४६।।

अइरतिरोसाहरिए मीसेसु तेसु मासलहुपणगा ।
अइरतिरोसाहरिए पणगं पत्तेअणंतबीएसु ।।१४७।।

व्याख्या–**तेषु** पृथ्वीकायादिषु पूर्वोक्तेषु **मिश्रेषु** सचित्ताऽचित्तरूपेषु **अतिरस्तिरःसंहृते** अनन्तरपरम्परसंहृते **क्रमेण मासलघुपञ्चके** । **प्रत्येकानन्तबीजेषु** प्रत्येकसाधारणवनस्पतिबीजेषु **अतिरस्तिरःसंहृते** अनन्तरपरम्परसंहृते पञ्चकम् ।।१४७।।

सच्चित्तअणंतेसु अणंतरपरंपरम्मि साहरिए ।
चउगुरुमासगुरु कमा मीसेसु मासगुरुपणगा ।।१४८।।

व्याख्या—**अनन्तेषु** अनन्तकायरूपेषु कन्दादिषु **सचित्तेषु** सजीवेषु **अनन्तरपरम्परसंहृते क्रमाच्चतुर्गुरुमासगुरुके।** अनन्तरसंहृते **चतुर्गुरु,** परम्परसंहृते **मासगुरु । मिश्रेषु** सचित्ताऽचित्तरूपेषु पुनरनन्तकायेषु अनन्तरपरम्परसंहृते **क्रमान्मासगुरुपञ्चके** स्याताम् ।।१४८।।

**चउगुरु अचित्तगुरुसाहरिए अह दायगत्ति थेराई ।**
**थेरपहुपंडवेविर जरि अंधऽव्वत्त मत्त उम्मत्ते ।।१४९।।**

व्याख्या—**अचित्ते** निर्जीवे **गुरुणि** बहुभारे शिलापुत्रकादिद्रव्ये दर्वीकरोटिकादेरुपरिभागात् **संहृते** अथवा देयवस्तु—भाजनस्योपरिभागान्महति भाजने अचित्तबहुभारे **संहृते** उत्पाट्याऽन्यत्र स्थापिते चतुर्गुरु । एवं सचित्ताऽचित्त—मिश्रविषयसंहृतदोषप्रायश्चित्तमभिहितम् । **अथ** एतदनन्तरं **दायकः स्थविरादिरित्येवंविधो दोषः** स्थविरादि—भिर्दीयमाने दायकदोषो भवेदित्यर्थः । अतस्तेषां स्थविरादीनां नामग्राहं प्रतिपादनार्थमाह— **थेरबहुपंडवेविरे'** त्यादि । **स्थविरो** वृद्धः सप्ततिवर्षाणां मतान्तरापेक्षया षष्टिवर्षाणां वा उपरिवर्त्ती । स्थविरस्य च हस्तेन भिक्षाग्रहणे निपतन् षड्जीवनिकायविराधनादिदोषा भवेयुः । अतस्तद्धस्तेन उत्सर्गतो न गृह्यते १ । तथा **अप्रभुः** दीयमानभक्तादेः अस्वामी भृतकादिस्तेन दीयमाने प्रभोरप्रीतिः स्यात् २ । **पण्डः** पण्डको नपुंसकस्तस्मिन् दायके लोकापवादशङ्कादिदोषाः ३ । **वेपमानः** कम्पमानशरीरः, तद्दाने परिशाटनभाजनभङ्गादिदोषाः ४ । **ज्वरितो** ज्वररोगपीडितः, ततो भिक्षाग्रहणे ज्वरसङ्क्रमणजनापवादादयो दोषाः ५ । **अन्धः** चक्षुर्विकलः,तस्य हि भिक्षां ददतः कायवधस्खलनपतनभाजनबहिर्भक्तक्षेपणजनवचनीयतादयो दोषाः ६ । **अव्यक्तो** बालो, जन्मतो वर्षाष्टकाभ्यन्तरवर्ती, तेन दीयमाने तज्जनन्यादेः प्रद्वेषः ७। **मत्तः** पीतमदिरादिः, स चाशुचित्वाऽऽलिङ्गनहननभाजनभङ्गकरणादिदोषदुष्टत्वात् साधुभिक्षादानाऽयोग्यः ८। **उन्मत्तो** दृप्तो ग्रहगृहीतो वा, सोऽपि मत्तवद् दुष्टः ९।।१४९।। तथा—

**छिन्नकरचरणगुव्विणिनिअलंडुअबद्धबालवच्छाए ।**
**खंडइ पीसइ भुंजइ जिमइ विरोलइ दलइ सजिअं ।।१५०।।**
**ठवइ बलिं उवउत्तइ पिढराइ तिहा सपच्चवाया जा ।**
**साहारणचोरिअगं देइ परक्कं परट्ठं वा ।।१५१।।**

व्याख्या—**छिन्नकरः** कर्त्तितहस्तः **छिन्नचरणो** लूनपादः, एताभ्यां च सकाशात् भिक्षा न ग्राह्या, दानाऽसमर्थ—त्वाल्लोकापवादादिदोषसम्भवाच्च १०-११ । **गुर्विणी** आपन्नसत्त्वा, तत्सकाशाद् गच्छनिर्गता जिनकल्पिकादयः प्रथमदिनादारभ्य भिक्षा न गृह्णन्त्येव । स्थविरकल्पिकास्त्वष्टौ मासान् यावत् गृह्णन्ति,

नवममासे तु न गृह्णन्ति निषदनोत्थानाभ्यां गर्भपीडासम्भवात् १२। **निगडेन** लोहमयपादबन्धनेन बद्धः **अण्डुकेन** काष्ठमयकरबन्धनेन बद्धः। एताभ्यां सकाशात् परितापनादिदोषसम्भवाद् भिक्षा न ग्राह्या १३-१४। **बालवत्सा** स्तन्योपजीविशिशुका । तया दीयमानं न कल्पते, निक्षिप्तबालस्य मार्जारादिभ्यो विनाशसम्भवात् । निक्षिप्यमाणस्योत्क्षिप्यमाणस्य चातिसुकुमारत्वेन परितापनासम्भवात् १५। अग्रेतनगाथास्थितो याशब्दोऽत्र प्रत्येकमभिसम्बध्यते । ततश्च या काचिन्महिला **खण्डयति** उदूखलक्षिप्तानि शाल्यादिबीजानि मुसलघातैः श्लक्ष्णीकरोतीत्यर्थः । तया दीयमाना भिक्षा न ग्राह्या । बीजसङ्घट्टनाद्यारम्भसम्भवात् १६। तथा **पिनष्टि** शिलायां तिलामलककुस्तुम्बुरुलवणजीरकादि मृद्नातीति भावः । अनयापि दीयमानं न कल्पते, तिलादिसङ्घट्टनसद्भावात् १७। तथा **भृज्जति** चनकयवगोधूमादीन् अग्निप्रतप्तकडिल्लकादौ स्फोटयतीत्यर्थः । तया दीयमानं न कल्पते, कडिल्लकादिप्रक्षिप्तस्य तस्य चनकादेर्दाहसम्भवात् १८। तथा **जेमति** भुङ्क्तेऽभ्यवहरतीत्यर्थः । भुञ्जाना हि आचमनं विधाय यदि साधुभ्यो दद्यात् तदाऽप्कायविराधना । अथैतद्दोषभयात्तदकृत्वैव वितरेत् तदोच्छिष्टमप्येते न त्यजन्तीत्यादिजनाऽपवादः स्यात् । तत्र च महान् दोषः। यदाह—

**छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं । आहारे निहारे दुगुंछिए पिंडगहणे वि'** ।।

(ओ०नि० ४४३)

इत्यतो न कल्पते १९। तथा **विरोलयति** करमन्थानादिना दध्यादिकं मथ्नाति । सा हि संसक्तदध्यादिलिप्तकरा भिक्षां ददती सत्त्ववधं विदध्यादिति न गृह्यते २०। तथा **दलति सजीवं** सचित्तं गोधूमादिधान्यं घरट्टेन पिनष्टि । इयं हि भिक्षादानायोत्तिष्ठन्ती बीजानि सङ्घट्टयति, दत्त्वा च करौ प्रक्षालयतीति न गृह्यते २१। तथा या काचिन्नारी साधुदानायोद्यता सती मूलस्थालीतः समाकृष्य स्थगनिकादौ **बलिमुपहारमग्रकूरमित्यर्थः स्थापयति** तया दीयमाना भिक्षा न कल्पते, प्रवर्त्तनादिदोषसम्भवात् २२। तथा **उद्वर्त्तयति** साधुदानबुद्ध्या परावर्तयति **पिठरादि** स्थाल्यादि नमयतीत्यर्थः । अत्र च कीटिकादिसत्त्वोपघातः स्यात् २३। तथा **त्रिधा** ऊर्ध्वाऽधस्तिर्यग्लक्षणैस्त्रिभिः प्रकारैः सप्रत्यपायकोष्ठकण्टकगवादिभ्यः सकाशात् सम्भाव्यमानाभिघाताद्यनर्था या काचिद् **वनिता स्यात्** । **'सहा सपच्चवाया जा'** इति पाठे तु, तथा सप्रत्यपाया या दात्री कूलवालकमुनिव्रतत्याजयित्री मागधिकावेश्येव शाकिन्यादिर्वा, तया दीयमानं न कल्पते २४। तथा **साधारणं** बह्वायत्तं तद्ददातीति योगः । तत्र साधारणानिसृष्टवद्दोषा वाच्याः २५। तथा **चोरितकं** चौरिकया गृहीतं साधुभ्यो ददाति । तत्र च दोषाः प्रतीता एव २६। तथा **पाराक्यं** परसत्कं परकीयमिदमित्युक्त्वा ददाति । अथवा **परार्थं** परनिमित्तं कार्पटिकादिदानाय कल्पितमित्यर्थः। तद्ददाति । अत्र च परसत्के तत् स्वामिनाऽननुज्ञाते परदानाय कल्पिते च दीयमाने अदत्तादानान्तरायादयो दोषाः २७।।१५०-१५१।।

अथैतेषु दायकेषु ददानेषु भिक्षां गृह्णानस्य साधोः प्रायश्चित्तमाह—

**दिंतेसु एसु चउलहु चउगुरु पगलंत पाउआरूढे ।**
**कत्तइ लोढइ पिंजइ विक्खिणइ मद्दए अ मासलहु ।।१५२।।**

व्याख्या—**एतेषु** सप्तविंशतिसङ्ख्येषु दायकेषु भिक्षां ददत्सु गृहीतुः साधोश्चतुर्लघु प्रायश्चित्तं भवति । तथा **प्रगलन्** गलत्कुष्ठः, ततो भिक्षाग्रहणे हि साधोरपि कुष्ठरोगसङ्क्रान्तिः स्यात् । तदीयोच्छवासत्वक्संस्पर्श—स्वेदमलमूत्रोच्चाराहारलालादिभिः शरीरान्तरे तत् सङ्क्रमणस्याभिहितत्वात् ततो न ग्राह्या । तथा **पादुकारूढः** काष्ठादिमयोपानत्समारूढः । स हि भिक्षां प्रयच्छन् दुर्व्यवस्थित्वात् कदाचित् पतति, कीटिकादिसत्त्वविराधनां च करोतीत्यतोऽसावपि परिह्रियते । अनयोर्दायिकयोर्[A]भिक्षां ददानयोर्गृह्णानस्य साधोश्चतुर्गुरु प्रायश्चित्तं स्यात् । तथा या **कर्त्तयति** रूतं सच्चक्रेण सूत्रं करोति । तथा **लोढयति** कार्पासं लोढिन्यां कनकेन[B] निरस्थिकं करोतीत्यर्थः । तथा **पिञ्जयति** रूतं पिञ्जनेन मृदूकरोति । तथा **विक्खिणइ**'ति । **विकीर्णयति** रूतं कराभ्यां पौनःपुन्येन श्लक्ष्णयति । एताभिश्चतसृभिरपि दीयमानं न कल्पते, कर्पासास्थिकसङ्घट्टनदेयवस्तुखरण्टित—हस्तधावनदोषसम्भवात् । एताभ्यश्चतसृभ्यो दायिकाभ्यः सकाशाद् भिक्षाग्रहणे **मर्द्दके च** प्रमर्द्दनप्रवृते दातरि च **मासलघु** प्रायश्चित्तं भवति । अथ षट्कायान् विराधयन्ती या दात्री ददाति ।।१५२।। तद्विषयं प्रायश्चित्तमाह—

**छक्कायवग्गहत्था समणट्ठा निक्खिवित्तु ते चेव ।**
**घट्टंती गाहंती आरंभंती अ सट्ठाणं ।।१५३।।**

व्याख्या—**षट्कायव्यग्रहस्ता** षट्काययुक्तहस्ता । इह षट्कायव्यग्रहस्ता सा उच्यते यस्या हस्ते सजीवं लवणमुदक—मग्निर्वायुपूरितो दृतिकः फलादिकं बीजपूरादि मत्स्यादयो वा विद्यन्ते । ततः सा **श्रमणार्थं** श्रमणभिक्षादानार्थ—मुत्थाय षट्कायान् भूम्यादौ **निक्षिप्य** पुनस्तानेव **घट्टयन्ती** तत् सङ्घट्टं कुर्वाणा । तानेव **गाहमाना** विलोडनेन इतस्ततो विक्षेपणेनाऽगाढं गाढं वा परितापयन्ती । तानेव **आरभमाणा** च षट्कायोपद्रवकरमारम्भं कुर्वाणा खननमर्दनादिना पृथ्वीकायं मज्जनवस्त्रधावनादिनाऽप्कायं उल्मुकघट्टनादिनाऽग्निं अग्न्यादेः फूत्करणादिना मारुतं फलादेः कर्त्तनादिना वनस्पतिं स्फुरन्मत्स्यादिछेदनादिना त्रसकायं च विराधयन्तीत्यर्थः । एवंविधा दात्री यदि ददाति, ततो गृहीतुः साधोः **स्वस्थानं** प्रायश्चित्तं भवति । अयमभिप्रायो—जीतकल्पेऽस्यापराधस्य यत् प्रायश्चित्तमुक्तमस्ति तत् तस्य स्वस्थानम् ।।१५३।। एतदेव स्वस्थानप्रायश्चित्तं गाथायुगलेन व्यक्तमेव दर्शयति—

**भूजलसिहिपवणपरित्तघट्टणागाढगाढपरिआवे ।**
**उद्दवणे वि अ कमसो पणगं लहु गुरु अ मास चउलहुआ ।।१५४।।**

व्याख्या—**पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां** सङ्घट्टाऽगाढपरितापगाढपरितापोपद्रवान् कुर्वाणा यदि दात्री ददाति तदा **क्रमशः** क्रमेण साधोरिदं प्रायश्चित्तं भवति । यथा—सङ्घट्टे **पञ्चकम्** । अगाढपरितापे **लघुमासः** । गाढपरितापे **गुरुमासः** । उपद्रवे **चतुर्लघुकाः** ।।१५४।।

---

**A.** गलत्कुष्ठपादुकारुढयोः । **B.** शलाकया ।

**लहुमासाई चउगुरुअंतं विगलेसु तह अणंतवणे।**
**पंचिंदिसु गुरुमासाइ जाव कल्लाणगं एगं ।।१५५।।**

व्याख्या—**विकलेन्द्रियाणां** द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणां तथा **अनन्तवनस्य** अनन्तकायवनस्पतेः सङ्घट्टाऽगाढ—परितापगाढपरितापोपद्रवान् चेत् कुर्वती दात्री भिक्षां ददाति तदा गृह्णानस्य **साधोर्लघुमासादि चतुर्गुर्वन्तं** प्रायश्चित्तं क्रमेण भवति। सङ्घट्टे लघुमासः। अगाढपरितापे गुरुमासः। गाढपरितापे चतुर्लघु। उपद्रवे चतुर्गुरु स्यादित्यर्थः। तथा **पञ्चेन्द्रियाणां** सङ्घट्टाऽगाढपरितापगाढपरितापोपद्रवान् कुर्वत्या दात्र्याः सकाशाद् भिक्षां गृह्णतो गुरुमासादि यावत् कल्याणकमेकं प्रायश्चित्तं भवति। सङ्घट्टे **गुरुमासः**। अगाढपरितापे **चतुर्लघु**। गाढपरितापे **चतुर्गुरु**। उपद्रवे **एकं कल्याणकमिति** भावः।।१५५।। अथाऽनेकद्वीन्द्रियाद्युपघातप्रायश्चित्तं स(सा?)माचारीगतगाथया दर्शयति—

**एगाइदसंतेसुं एगाइदसंतयं सपच्छित्तं।**
**तेण परं दसगं चिअ बहुएसुवि सगलविगलेसु ।।१५६।।**

व्याख्या—कयाचिद् दात्र्या साधोर्भिक्षां ददत्या प्रमादवशेन **एकादयो दशान्ता** द्वीन्द्रियादयो—द्वीन्द्रियत्रीन्द्रियचतुरि—न्द्रियपञ्चेन्द्रिया व्यापादिताः, ततस्तत्र भिक्षां गृह्णानस्य **साधोरेकादिषु दशान्तेषु** द्वीन्द्रियादिषूपहतेषु **एकादिदशान्तं स्वप्रायश्चित्तं** भवति। अयमर्थः यद्यस्य द्वीन्द्रियादेरुपघातेऽत्र जीतकल्पे प्रायश्चित्तं भणितमस्ति तत्तस्य स्वप्रायश्चित्तमुच्यते। तच्चैकस्य द्वीन्द्रियादेरुपघाते एकं स्वप्रायश्चित्तं भवति। द्वयोरुपघाते द्वे स्वप्रायश्चित्ते भवतः। त्रयाणामुपघाते त्रीणि तानि भवन्ति। यावद् दशानामुपघाते दश स्वप्रायश्चित्तानि स्युः। '**तेने**' ति। पञ्चम्यर्थत्वात् तृतीयायाः। ततः **परमेकादशादिषु बहुष्वपि** यावदसङ्ख्येष्वपि **सकलविकलेषु** पञ्चेन्द्रिय—विकलेन्द्रियेषूपहतेषु **दशकमेव** दशैव स्वप्रायश्चित्तानि दातव्यानि भवन्तीति भावः।।१५६।।

एवं दायकदोषप्रायश्चित्तमुक्तम्। अथोन्मिश्रदोषप्रायश्चित्तमाह—

**पुढवाइजिउम्मीसे चउलहु पणगं तु बीअउम्मीसे।**
**मिस्सपुढवाइमीसे मासलहुं पावए साहू ।।१५७।।**

व्याख्या—इह साधूनां दानयोग्यमोदनादि, अयोग्यं तु सचित्तं फलादि, **मिश्रम्** आमपक्वपृथुकादि। **अचित्तं** च तुषादि। ते द्वे अपि वस्तुनी अनाभोगादिना मिश्रयित्वा गृहस्थो यद्ददाति तदुन्मिश्रम्। तत्र सचित्तेन मिश्रेण वा वस्तुना मिश्रीकृत्य यद्देयद्रव्यं ददाति तन्न कल्पते। अचित्तवस्तुमिश्रितदेयद्रव्ये तु भजना। सचित्तोन्मिश्रे मिश्रोन्मिश्रे च प्रायश्चित्तमिदम्—**पृथिव्यादिजीवोन्मिश्रे**। **पृथिव्यादयः** पृथिवीकायादयः, आदिशब्दादप्तेजोवायु—प्रत्येकवनस्पतित्रसा गृह्यन्ते। एवंविधा ये जीवाः **तैरुन्मिश्रे** एकत्र मीलिते देयद्रव्ये गृहीते **चतुर्लघु** प्रायश्चित्तं **प्राप्नोति साधुः**। **बीजोन्मिश्रे** तु प्रत्येकानन्तबीजोन्मिश्रे पुनः **पञ्चकम्** आद्यप्रायश्चित्तम्। **मिश्रपृथिव्यादिमिश्रे**। मिश्रैः सचित्ताऽचित्तरूपैः पृथिव्यादिभिर्मिश्रिते आहारे गृहीते **मासलघु** प्रायश्चित्तं **प्राप्नोति साधुः**।।१५७।।

**चउगुरु सचित्तअणंतमीसिए मिस्सेणं तु उम्मीसे ।**
**मासगुरु दुविहं पुण अपरिणयं दव्वभावेहिं ।।१५८।।**

व्याख्या—**सचित्तानन्तमिश्रिते** सचित्तेनाऽनन्तकायेन मिश्रिते आहारे गृहीते **चतुर्गुरु** । **मिश्रेणानन्तकायेनोन्मिश्रे मासगुरु**। अथाऽपरिणते दोषस्वरूपं दर्शयति **अपरिणतं** पुनर्द्विविधं **द्रव्यभावाभ्यां** द्रव्यापरिणतं भावापरिणतं चेतिभावः । तत्र **द्रव्यापरिणतं** यद्दातव्यद्रव्यमेवापरिणतम् अप्रासुकं भवति । **भावो**ऽध्यवसायः । स च द्वयोः स्वामिनो मध्यादेकस्यापरिणतो दानेऽनभिमुखोऽथवा भिक्षागतसाधुसङ्घाटकमध्यादेकतरस्य साधोर्मनसि एतल्लभ्य—मानमशनादि निर्दोषमित्यध्यवसायः, द्वितीयस्य तु न तथाऽध्यवसायः ।।१५८।।

ततो भावेन दातृसत्केन गृहीतृसत्केन वा **अपरिणतं** भावापरिणतं द्विविधेऽप्यपरिणते प्रायश्चित्तमाह—

**ओहेण दव्वभावापरिणयभेएसु दुसुवि चउलहुअं ।**
**दव्वापरिणमिए पुण जं नाणत्तं तयं सुणह ।।१५९।।**

व्याख्या—**द्रव्यभावापरिणतभेदयोर्द्वयोरपि ओघेन चतुर्लघुकं** द्रव्यापरिणते भावापरिणतेऽप्याहारे गृहीते सामान्येन चतुर्लघुकं प्रायश्चित्तं भवतीति भावः । **द्रव्यापरिणते पुनर्यन्नानात्वं** विशेषः **तकत्** तत् **शृणुत** निशमयत यूयमिति शिष्यान् सावधानीकृत्य ।।१५९।। तदेव नानात्वमाह—

**अपरिणमंत छकाए चउलहु पणगं च बीअअपरिणए ।**
**मीसछकायापरिणय दोसे लहुमास माहंसु ।।१६०।।**

व्याख्या—**अपरिणमन्तो**ऽचित्तपरिणाममव्रजन्तोऽप्रासुका इत्यर्थः । एवंविधा ये **षट्कायाः** पृथिव्यप्तेजोवायु—प्रत्येकवनस्पतित्रसकायरूपाः, तेषु षट्कायेष्वपरिणतेषु यथासम्भवं गृहीतेषु **चतुर्लघु** । **बीजापरिणते** अपरिणतानि—अप्रासुकानि यानि प्रत्येकानन्तवनस्पतिबीजानि तेषां ग्रहणे **पञ्चकं** प्रथमप्रायश्चित्तमित्यर्थः । **मिश्रषट्काया—परिणतदोषे** । **मिश्राः** सचित्ताऽचित्तरूपा ये **षट्कायाः** पृथिव्यादयः तानाश्रित्यापरिणतदोषे अप्रासुकीभूत—मिश्रषट्कायग्रहणे इत्यर्थः । **लघुमासं** प्रायश्चित्त**मुक्तवन्तः** तीर्थकरगणधराः ।।१६०।।

**सचित्तणंतकाए अपरिणए चउगुरुं मुणेअव्वं ।**
**मीसाणंतपरिणए गुरुमासो भासिओ गुरुणा ।।१६१।।**

व्याख्या—**सचित्तः** सजीवो यो**ऽनन्तकायः** तस्मिन्न**परिणते** अप्रासुके गृहीते **चतुर्गुरु** प्रायश्चित्तं **मुणितव्यं** ज्ञातव्यम् । **मिश्रः** सचित्ताचित्तरूपो यो**ऽनन्तकायः** तस्मिन्न**परिणते गृहीते गुरुमासो भाषितः** प्रतिपादितो **गुरुणा** जगद्गुरुणा जिनेन इति ।।१६१।। अपरिणतदोषप्रायश्चित्तमभिधाय लिप्तदोषप्रायश्चित्तमाह—

**चउलहुअं लहइ मुणी लित्ते दहिमाइलित्तकरमत्ते ।**
**छड्डिअमिह पुढवाइसु अणंतरपरंपरंति दुहा ।।१६२।।**

व्याख्या—इह दधिक्षीरघृततैलतीमनप्रभृतिद्रव्यस्य यस्य लेपः करभाजनादौ लगति तल्लेपकृत् लिप्तमुच्यते । तच्च कारणं विना न ग्राह्यम् । यदाह—

**घित्तव्वमलेवकडं लेवकडमाहु पच्छकम्माई । न य रसगेहिपसंगो न य भुत्ते बंभपीडा य' ।।**

इह साधुना सदैवाऽलेपकृद् वल्लचणककुल्माषशुष्कोदनादि ग्रहीतव्यम्, मा भूवन् लेपकृति गृह्यमाणे **पश्चात्कर्मादयो** दोषा दध्यादिलिप्तहस्तादिक्षालनादिरूपाः । न च सदैवाऽलेपकृद्ग्रहणे **रसगृद्धिप्रसङ्गो** रसाऽभ्यवहारलाम्पट्यवृद्धिः । न च तादृशे भुक्ते **ब्रह्मपीडा** ब्रह्मव्रतस्य बाधा, तादृशस्य नीरसाहारस्य दर्पोत्पादकत्वाभावात् । अत्राह नोदको—ननु यदि लेपकृद्ग्रहणे पश्चात्कर्मप्रभृतयो दोषा भवन्ति ततः तन्न गृह्यते, तर्हि मा कदाचनापि साधुर्भुङ्क्ताम् । एवं हि सर्वेषां दोषाणां मूलत एवोत्थानं निषिद्धं भवति । गुरुराह—सर्वकालं क्षपणमेव कुर्वतः साधोश्चिरकालभावितपोनियमसंयमानां हानिर्भवति, तस्माद्यावज्जीवं क्षपणं न कार्यम् । पुनः प्राह—यदि सर्वकालं क्षपणं कर्तुमशक्तः तर्हि षण्मासक्षपणं कृत्वा पारणकमलेपकृता विधत्ताम् । गुरुराह—यद्येवं तपः कुर्वन् संयमयोगान् कर्त्तुं शक्नोति तर्हि करोतु, न कोऽपि तस्य निषेद्धा । पुनरप्याह—यदि षण्मासक्षपणं कर्त्तुं न शक्नोति तर्हि एकदिनोनं षण्मासक्षपणं कृत्वा आचाम्लेन पारयतु । एवमेकैकदिनहान्या तावदात्मानं तोलयेत् यावच्चतुर्थं कृत्वा आचाम्लेन पारणकं करोतु । एवमप्यसामर्थ्ये दिवसे दिवसे गृह्णात्वाचाम्लं निर्लेपम् । गुरुराह—करोत्वेवं तपः यदि प्रत्युपेक्षणादिसंयमयोगभ्रंशो न भवति । केवलं सम्प्रति सेवार्त्तसंहननानां नास्ति तादृशी शक्तिरिति न तथोपदेशो विधीयते । पुनः परः प्राह—ननु महाराष्ट्राः कोशलदेशोद्भवाः सदैव सौवीरकूरमात्रभोजिनः तेऽपि च सेवार्त्तसंहननाः । ततो यदि तेऽपीत्थं यापयन्ति यावज्जीवं तर्हि तथा सौवीर—कूरमात्रभोजनेन किं न यतयो मोक्षगमनैकबद्धकक्षा यापयन्ति ? तैः सुतरामेवं यापनीयं प्रभूतगुणसम्भवात् । गुरुराह—

**तिअ सीअं समणाणं तिअमुण्ह गिहीण तेणणुन्नायं । तक्काइणं गहणं कट्टरमाइसु भइअव्व' ।।**

**त्रिकं** वस्तुत्रयं **श्रमणानां शीतं** भवति, तेन प्रतिदिवसमाचाम्लकरणे तक्राद्यभावत आहारपाकासम्भवेनाऽ—जीर्णादयो दोषाः प्रादुःष्यन्ति । **तदेव त्रिकमुष्णं गृहिणां**, तेन सौवीरकूरमात्रभोजनेऽपि तेषामाहारपाक—भावतो नाजीर्णादिदोषा जायन्ते । ततः तेषां तथा यापयतामपि न कश्चिद् दोषः । साधूनां तूक्तनीत्या दोषः । तेन कारणेन **तक्रादिग्रहणं साधूनामनुज्ञातम्** । इह प्रायो यतिना विकृतिपरिभोगपरित्यागेन सदैवाऽऽत्मशरीरं

यापनीयं कदाचिदेव च शरीरस्यापाटवे संयमयोगवृद्धिनिमित्तं बलाधानाय विकृतिपरिभोगः । तथा चोक्तं सूत्रे— '**अभिक्खणं निव्विगई गया य**' इति । निर्विकृतिपरिभोगे च तक्राद्येवोपयोगीति **तक्रादिग्रहणं कट्टरादिषु** घृतवटिकोन्मिश्रतीमनादिषु **ग्रहणं भाज्यं** विकल्पनीयं ग्लानत्वादिप्रयोजनोत्पत्तौ कार्यम्, न शेषकालमिति भावः । तेषां बहुलेपत्वात् गृद्ध्यादिजनकत्वाच्च । अथ किं तत् त्रिकम् ? इति उच्यते—आहार उपधिः शय्या । एतानि त्रीण्यपि गृहिणां शीतकालेऽप्युष्णानि भवन्ति । तेन तेषां तक्रादिग्रहणमन्तरेणापि बाह्याभ्यन्तरोष्णतापेनाहारो जीर्यति । तत्राऽभ्यन्तरो भोजनवशात्, बाह्यः शय्योपधिवशात् । एतान्येवाऽऽहारोपधिशय्यारूपाणि त्रीणि वस्तूनि यतीनां ग्रीष्मकालेऽपि शीतानि भवन्ति । तत्राऽऽहारस्य शीतता भिक्षाचर्यायां प्रविष्टस्य बहुषु गृहेषु स्तोकस्तोकलाभेन बृहद्वेलालगनात् । उपधेरेकमेव वारं वर्षाकालादर्वाक् प्रक्षालनेन मलिनत्वात् । शय्यायास्तु प्रत्यासन्नाग्निकरणाभावेन । तेन कारणेन ग्रीष्मकालेऽप्याहारादीनां शीतत्वसम्भवरूपेणोपहन्यते जाठरोऽग्निः । तस्माच्चाऽग्न्युपघातादजीर्णबुभुक्षामान्द्यादयो दोषा जायन्ते । ततस्तक्रादिग्रहणं साधूनामनुज्ञातम्, तक्रादिनापि हि जाठरोऽग्निरुद्दीप्यते, तेषामपि तथास्वभावत्वात् । एतत्सर्वं प्रासङ्गिकम् । प्रस्तुतं तु **लिप्तम्** । तत्र च दातुः सम्बन्धी हस्तः संसृष्टोऽसंसृष्टो वा भवति, येन च कृत्वा भिक्षां ददाति तदपि **मात्रं संसृष्टमसंसृष्टं** वा, **द्रव्यमपि सावशेषं निरवशेषं** वा । एतेषां च त्रयाणां पदानां परस्परं संयोगतोऽष्टौ भङ्गा भवन्ति । ते चामी—संसृष्टो हस्तः संसृष्टं मात्रं सावशेषं द्रव्यम् १, संसृष्टो हस्तः संसृष्टं मात्रं निरवशेषं द्रव्यम् २, संसृष्टो हस्तोऽसंसृष्टं मात्रं सावशेषं द्रव्यम् ३, संसृष्टो हस्तोऽसंसृष्टं मात्रं निरवशेषं द्रव्यम् ४, असंसृष्टो हस्तः संसृष्टं मात्रं सावशेषं द्रव्यम् ५, असंसृष्टो हस्तः संसृष्टं मात्रं निरवशेषं द्रव्यम् ६, असंसृष्टो हस्तोऽसंसृष्टं मात्रं सावशेषं द्रव्यम् ७, असंसृष्टो हस्तोऽसंसृष्टं मात्रं निरवशेषं द्रव्यम् ८। एतेषु चाष्टसु भङ्गेषु मध्ये विषमेषु—प्रथमतृतीयपञ्चमसप्तमेषु भङ्गेषु कल्पते, सावशेषद्रव्ये सति पश्चात्कर्मासम्भवात् । समेषु पुनर्न कल्पते, निरवशेषद्रव्ये सति अवश्यं पश्चात्कर्मसम्भवात् । इह च **लिप्ते** लिप्तदोषे दध्यादिलिप्तकरमात्ररूपे **चतुर्लघुकं लभते मुनिः** । अथ **छर्दितम्** उज्झितं त्यक्तमित्यर्थः । तच्चेह **द्विधा पृथिव्यादिषु अनन्तरपरम्परमिति** । यदशनादौ दात्र्या दीयमाने पृथिव्यादिषु षड्जीवनिकायेषु परिशाटिर्निरन्तरं पतति तदनन्तरछर्दितम्, यत् पुनः सान्तरं निपतति तत् परम्परछर्दितम् । छर्दितग्रहणे च षड्जीवनिकायविराधनादयोऽनेके दोषाः सम्भवन्ति । तत्र च मधुबिन्दूदाहरणं तच्च प्रसिद्धमेव ।।१६२।। अथाऽनन्तरपरम्परछर्दितप्रायश्चित्तमाह—

**छड्डिअ सचित्तभूदगसिहिपवणपरित्तवणस्सइतसेसु ।**
**चउलहु अ मासलहुआ अणंतरपरंपरेसु कमा ।।१६३।।**

व्याख्या—**सचित्तेषु पृथिव्यप्तेजोवायुप्रत्येकवनस्पतित्रसेषु मध्येऽनन्तरछर्दिते परम्परछर्दिते क्रमाच्चतुर्लघुमासलघुकौ** स्याताम् ।।१६३।।

**अइरतिरोछड्डिअए मीसेसु अ तेसु मासलहुपणगा ।**
**अइरतिरोछड्डिअए पणगं पत्तेअणंतबीएसु ।।१६४।।**

व्याख्या—**मिश्रेषु** सचित्ताऽचित्तरूपेषु पृथिव्यप्तेजोवायुप्रत्येकवनस्पतित्रसेषु मध्ये **अतिरस्तिरश्छर्दिते** निरन्तरसान्तरछर्दिते **मासलघुपञ्चके** भवतः । **प्रत्येकानन्तबीजविषये अतिरस्तिरश्छर्दिते** निरन्तरपरम्परोज्झिते **पञ्चकं** प्रायश्चित्तं भवति ।।१६४।।

**सचित्तणंतकाये अणंतरपरंपरेण छड्डिअए ।**
**चउगुरुमासगुरु कमा मीसे गुरुमासपणगा य ।।१६५।।**

व्याख्या—**सचित्ते** सजीवेऽनन्तकाये कन्दादिरूपे विषये **अनन्तरपरम्परेण छर्दिते चतुर्गुरुमासगुरुकप्रायश्चित्ते क्रमाद्** भवतः । **मिश्रे** पुनरनन्तकाये निरन्तरपरम्परछर्दिते **गुरुमासपञ्चकाख्ये** प्रायश्चित्ते स्याताम् ।।१६५।।

अथ ग्रहणैषणादोषोपसंहारं कृत्वा ग्रासैषणादोषपञ्चकप्रायश्चित्तमाह—

**इअ एसणदोसाणं पायच्छित्तं निरूविअं इत्तो ।**
**संजोअणाइ चउगुरु अइपमाणम्मि चउलहुअं ।।१६६।।**

व्याख्या—**इति** उक्तप्रकारेण **एषणादोषाणां** ग्रहणैषणादोषाणां दशानां **प्रायश्चित्तं** विशुद्धिनिबन्धनं वस्तु **निरूपितं** प्रदर्शितम् । **इत** ऊर्ध्वं **ग्रासैषणादोषपञ्चकप्रायश्चितं** प्रदर्श्यते—तत्र पूर्वं **संयोजना** । सा च द्विधा बाह्या अभ्यन्तरा च । तत्र वसतेर्बहिरेव भिक्षामटन् साधू रसगृद्ध्या दुग्धदध्योदनादीनां द्रव्याणामनुकूलद्रव्यैः सह संयोजनं रसविशेषोत्पादनाय यत् करोति सा बाह्या संयोजना । अभ्यन्तरा पुनर्यद्वसतावागत्य भोजनवेलायां संयोजयति । सा च त्रिधा—पात्रे कवले वदने च । तत्र यद् द्रव्यं यस्य द्रव्यस्य रसविशेषाधायि तत् तेन सह पात्रे रसगृद्ध्या संयोजयति । यथा सुकुमारिकादिकं खण्डादिना सह । एषा पात्रेऽभ्यन्तरा संयोजना । यदा तु हस्तगतमेव कवलतयोत्पाटितं सुकुमारिकादि चूर्णं खण्डादिना सह संयोजयति तदा **कवले** । यदा पुनर्वदने कवलं प्रक्षिप्य ततः शालनकं प्रक्षिपति, यद्वा—मण्डकादिकं पूर्वं प्रक्षिप्य पश्चात् गुडादिकं प्रक्षिपति तदा **मुखे** । रसगृद्ध्या च बाह्यद्रव्याणां संयोजनां कुर्वन् आत्मनो ज्ञानावरणीयादिकर्मपुद्गलसमूहैः सह संयोजनां करोतीति निषिद्धा संयोजना । वर्द्धिष्णुघृतादिनिगमनार्थं तु संयोगोऽनुज्ञातः तीर्थकृतादिभिः । वर्द्धिष्णु हि घृतादि न खण्डादिकमन्तरेण मण्डकादिभिरपि सह भोक्तुं शक्यते, प्रायस्तृप्तत्वात् । न च परिष्ठापनं युक्तम्, घृतादिपरिष्ठापने स्निग्धत्वात् पश्चादपि कीटिकादिसत्त्वव्याघातसम्भवेन बृहत्तरप्रायश्चित्तसम्भवात् । ततो वर्द्धिष्णुघृतादिनिगमनार्थं खण्डादिभिरपि तस्य संयोजनं न दोषाय । एवं ग्लानाद्यर्थमपि संयोजना न दुष्टा । यदाह—

**रसहेउं संयोगो पडिसिद्धो कप्पए गिलाणट्ठा । जस्स व अभत्तच्छंदो सुहोचिओऽभाविओ जो अ' ।।**
(पिं०नि० ६७७)

पिण्डाधिकाराच्च पिण्डविषयैवैषा संयोजनाऽभिहिता । एव**मुपकरणविषयापि** साऽवगन्तव्या । तस्यां च **संयोजनायां** क्रियमाणायां **चतुर्गुरु** प्रायश्चित्तं साधोः स्यात् । **अथातिप्रमाणदोषः** तत्र साधोर्यावन्मात्रेण द्वात्रिंशत्कवलादि— प्रमाणेनाहारेण भुक्तेन धृतिबलसंयमयोगा न हीयन्ते, तावन्मात्रमाहारप्रमाणं भोजने विज्ञेयम् । कुर्कुट्यण्डप्रमाण— कवलापेक्षं पुनरेवमाहारमानमभिधीयते—

**बत्तीसं किर कवला आहारो कुच्छीपूरओ भणिओ । पुरिसस्स महिलिआए अट्ठावीसं भवे कवला' ।।**
(पिं०नि० ६७८)

उदरभागापेक्षं त्वेवम्—

**अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भागे । वाउपविआरणट्ठा छब्भागं ऊणगं कुज्जा' ।।**

प्रकामनिकामप्रणीतभक्तपानातिबह्वाहारातिबहुवारभोजने च प्रमाणातिक्रमदोषः स्यात् । यदुक्तम्—

**पगामं च निगामं च पणीअं भत्तपाणमाहारे । अइबहुअं अइबहुसो पमाणदोसो मुणेअव्वो'।।**
(पिं०नि० ६८०)

तत्र द्वात्रिंशदादिकवलेभ्यः परतो भुञ्जानस्य **प्रकामभोजनम्**, तदेव च प्रत्यहं क्रियमाणं **निकामभोजनम्** । गलत्स्नेहं भोजनं **प्रणीतम्** , अतिशयेन निजप्रमाणातिरेकेण बहु **अतिबहु** । त्रीन् वारान् त्रिभ्यो वा वारेभ्यः परतो भोजन**मतिबहुशः** । अतिप्रमाणे च भोजने वमनातिसारमरणादयो दोषा भवन्ति, अतः प्रमाणातिक्रमो न कर्त्तव्यः। प्रमाणयुक्तमेव च भोक्तव्यं तस्यैव गुणावहत्वाद् । यदाह—

**अप्पाहारस्स न इंदिआइं विसएसु संपयट्टंति । नेव किलंमइ तवसा रसिएसु न भुज्झए आवि' ।।**
(पं०व० १३१२)

तथा—

**हिआहारा मिआहारा अप्पाहारा य जे नरा । न ते विज्जा चिगिच्छंति अप्पाणं ते चिगिच्छगा' ।।**
(पिं०नि० ६८४)

**अतिप्रमाणे** दोषे च **चतुर्लघुकं** प्रायश्चित्तं भवति ।।१६६।।

**इंगाले चउगुरुगा चउलहु धूमे अकारणाहारे ।**
**तह कारणाऽण(णा?)हारे इअ पायच्छित्तमक्खायं ।।१६७।।**

व्याख्या—यन्निर्दोषमप्याहारं भुञ्जानः तद्गतविशिष्टगन्धरसास्वादवशतो जाततद्विषयमूर्च्छः सन्नहो ! मृष्टमहो ! सुसम्भृतमहो ! सुस्निग्धं सुपक्वं सुरसमित्येवं प्रशंसति तद्भोजनमङ्गारम्, चरणेन्धनस्य प्रदीप्तरागाग्निना

अङ्गारसन्निभत्वापादनात् । यत् पुनस्तद्गतविरूपरसगन्धास्वादतो जाततद्विषयद्वेषः सन्नहो ! विरूपं कुथितमपक्वमसंस्कृतमलवणं चेति निन्दति, तद्भोजनं **धूमं** द्वेषाग्निना चरणेन्धनस्य सधूमोपमत्वकरणात् । आह च—

**'तं होइ सइंगालं जं आहारेइ मुच्छिओ संतो । तं पुण होइ सधूमं जं आहारेइ निंदंतो'** ।।

(पिं०नि० ६९१)

तत्राङ्गारदोषे **चतुर्गुरुकाः**, धूमदोषे **चतुर्लघुकाः** प्रायश्चित्तं भवति । इह साधूनामाहारग्रहणकारणानि षड् भवन्ति । तानि चामूनि—

**'वेअणवेआवच्चे इरिअट्ठाए अ संजमट्ठाए । तह पाणवत्तिआए छट्ठं पुण धम्मचिंताए'** ।।

(पं०व० ३६५, पिं०नि० ६९८)

अस्या अर्थः—**वेदना** बुभुक्षारूपा पीडा तदुपशमनाय । यदुक्तम्— **'नत्थि छुहाइसरिसिया वेअणा भुंजिज्ज तप्पसमणट्ठा'**। तथा आचार्यादीनां **वैयावृत्त्यकरणाय** । यदाह— **'छाओ वेआवच्चं न तरइ काउं अओ भुंजे'** । तथा **ईर्यापथसंशोधनार्थम्**, बुभुक्षितो हि ध्यामललोचनत्वादित ईर्यापथं शोधयितुं न शक्नोति । तथा **संयमः** प्रत्युपेक्षणाप्रमार्जनादिलक्षणः **तदर्थं** तत्परिपालननिमित्तम् । तथा **प्राणप्रत्ययार्थं** प्राणसन्धारणार्थम्, **षष्ठं पुनः** कारणं **धर्मचिन्तार्थं** सूत्रानुचिन्तनादिरूपधर्मध्यानाभिवृद्ध्यर्थं भुञ्जीतेति क्रियासम्बन्धः । षड्भिस्तु कारणैः साधुर्न भुञ्जीत । तानि चेमानि—

**'आयंके उवस्सग्गे तितिक्खया बंभचेरगुत्तीसु । पाणिदया—तवहेउं सरीरवुच्छेअणट्ठाए'** ।।

(पिं०नि० ७०२)

अस्या अर्थः—**आतङ्के** ज्वराजीर्णादावुत्पन्ने सति नाश्नीयात् । तथा **उपसर्गे** राजस्वजनादिकृते देवमनुष्यतिर्यक्कृते वा सञ्जाते सति **तितिक्षार्थम्** उपसर्गसहनार्थं न भुञ्जीत । तथा **'ब्रह्मचर्यगुप्ति'** ष्वित्यत्र षष्ठ्यर्थे सप्तमी । ततोऽयमर्थः—**ब्रह्मचर्यगुप्तीनां परिपालनाय** न जेमेत् । तथा **प्राणिदयाहेतोः** वर्षे वर्षति महिकायां वा पतन्त्यां प्राणिदयार्थं नाश्नीयात् । सूक्ष्ममण्डूकादिसंसक्तायां वा भूमौ प्राणिदयार्थमटनं परिहरन्न भुञ्जीतेति भावः । तथा **तपश्चतुर्थादिलक्षणं तद्धेतोः** तत्करणनिमित्तं नाद्यात् । तथा शिष्यनिष्पादनादिसकलकर्त्तव्यतानन्तरं पश्चिमे **काले** पाश्चात्यवयसि संलेखनाकरणेन यावज्जीवानशनप्रत्याख्यानकरणस्यात्मानं योग्यं कृत्वा शरीरव्यवच्छेदार्थं भोजनं परिहरेन्नान्यथा । यतः—शिष्यनिष्पादनाद्यभावे प्रथमे द्वितीये वा वयसि संलेखनामन्तरेण वा शरीरपरित्यागार्थमशनप्रत्याख्यानकरणे जिनाज्ञाभङ्गः । ततश्च यानि षड् आहारग्रहणकारणान्यभिहितानि तानि विनापि बलरूपादिनिमित्तं रसगृद्ध्या वा य आहारो गृह्यते सोऽकारणाहारः । तस्मिन्न**कारणाहारे** गृह्यमाणे पूर्वोक्तमेव **चतुर्लघु प्रायश्चित्तं भवति** । तथा **कारणाऽनाहारे** कारणानि यान्याहारविषये प्रदर्शितानि तेषु समुत्पन्नेष्वपि आहाराऽग्रहणे **चतुर्लघुप्रायश्चित्तमापद्यते यतिः** ।

ननु आहाराग्रहणं तपोरूपं तपश्च परमपदप्रापणप्रवणकारणगणाग्रेसरम् । अतः कथं तस्मिन् विधीयमाने प्रायश्चित्तमापद्यते ? भवानुबन्धिसावद्यव्यापारनिबन्धनत्वात्, प्रायश्चित्तापत्तेः सत्यम्, परं तपोऽपि जिनाज्ञयैव विधीयमानं सिद्धिनिबन्धनं सम्पद्यतेऽन्यथा तु क्रियमाणं तदपि भवानुबन्ध्येव भवेत् । अतस्तस्मिन् तथाविधे प्रायश्चित्तमपि सङ्गच्छते। **इति** अमुना प्रदर्शितप्रकारेण प्रायश्चित्तं ग्रासैषणादोषपञ्चकविषय**माख्यातं** प्ररूपितम् ।।१६७।।

एवमाहारविषयसप्तचत्वारिंशद्दोषप्रायश्चित्तं प्ररूप्य पुनराहारानुगतकियद्दोषान्तरप्रायश्चित्तं प्रदर्शयन्नाह—

**गच्छगयनिग्गयाणं लहुगा गुरुगा गिहेलुगस्संतो ।**
**भिक्खट्ठपविट्ठाणं निच्छुभणाणाइदोसा य ।।१६८।।**

व्याख्या—**गच्छगता** गच्छवासिनः स्थविरकल्पिकाः साधवः, **गच्छनिर्गताः** प्रतिमाप्रतिपन्नादयस्तेषां **गच्छगत—निर्गतानां** साधूनां **गृहस्य** लोकसदनस्य य **एलुक** उम्बरो द्वारे काष्ठादिमयस्त**स्यान्तः** मध्ये **भिक्षार्थं** भिक्षानिमित्तं **प्रविष्टानाम्,** उपलक्षणमेतत् तेनैलुकं विष्कम्भयताम्—एलुकस्यासन्नप्रदेशे वा तिष्ठतां क्रमेण चतुर्लघुकाः चतुर्गुरुका भवन्ति । **गच्छवासिनां चतुर्लघु, गच्छनिर्गतानां चतुर्गुरु** प्रायश्चित्तं भवतीत्यर्थः । **निष्कासनाऽऽज्ञाभङ्गादयो दोषाश्च** भवन्ति । तथाहि—एलुकात् परतो यदि साधुर्गच्छति तदा स्तैन्ये मैथुने वा शङ्का स्यात् । तत्र गृहमध्ये गृहस्वामी हिरण्यादेर्निधानं करोति उत्खननं वा, तत्र स्तेनोऽयमिति शङ्का भवेत् । यस्या गृहमभ्यन्तरमतिगतस्तस्या विषयेऽस्य साधोरिच्छा येनेत्थमभ्यन्तरं सहसा प्रविष्ट इति लोकस्य चतुर्थव्रतविषये शङ्का स्यात् । ततः स्तेनपारदारिकबुद्ध्या ग्रहणम्, ततो राजकुलं प्रति कर्षणम्, तदनन्तरं राजकुले व्यवहरणम्, ततः पश्चात्कृतकरणम् । एवं च सति महान् प्रवचनस्योड्डाहः । तथा निर्विषयत्वकरणम् । तथा अतिभूमिप्रवेशनं तीर्थकृद्भिर्गृहस्थैश्चाननुज्ञातं ततोऽदत्तादान दोषः । तथा कस्मादतिभूमिमेष प्रविष्टः ? इति प्रद्विष्टः सन् गृहस्थोऽधिकरणं कुर्यात् । तथा हीलना यथा— **एते वराका अलभमाना मध्ये प्रविशन्ति'** । तथा गलके गृहीत्वा बहिःकर्षणं कुर्वन्त्यगारिणः । अगारिणी वा मध्ये अप्रावृता दुर्निविष्टा वा भवेत्, ततः सहसा साधोरभ्यन्तर—प्रवेशे तस्या लज्जा स्याद्, एवमादयोऽनेकदोषाः प्रादुःष्यन्ति। ततः साधुना सहसा गृहाऽभ्यन्तरे न प्रवेष्टव्यम् ।।१६८।।

**निअअग्गपिंडि लहुगो सनिकायनिमंति सागरिअपिंडे ।**
**अमणुन्नं च इअ मणुन्नं भुंजणे भत्तपाणस्स ।।१६९।।**

व्याख्या—**नियतो** ध्रुवः शाश्वत इत्यर्थः । **योऽग्रो** वरः प्रधानः, अथवा यः प्रथमं दीयते **स नियताऽग्रपिण्डः** । अथवा **'नीअग्गे'**तिपाठः । ततो **नित्यम्** अनवरतं **योऽग्रपिण्डः** तत्क्षणोत्तीर्णौदनस्थाल्या अव्यापारितायाः शिखाकूरलक्षणः तस्मिन्**नियताग्रपिण्डे नित्याऽग्रपिण्डे** वा गृहीते **लघुमासः** । निकाचनं **निकाचो** निबन्धः ।

निमन्त्रणं **निमन्त्रो** निमन्त्रणा ततः सह निकाचेन वर्त्तते यो निमन्त्रः स **सनिकाचनिमन्त्रः** । अयमर्थः— गृही साधुं निमन्त्रयति—यथा भगवन् ! अनुग्रहं कुरु मम गृहे भक्तं गृहाण । ततः साधुर्भणति—करोम्यनुग्रहं परं किं दास्यसि ? गृही भणति—येन तेऽर्थः, ततः साधुरुत्पीलनं कुर्वन् भणति—गृहं गतस्य दास्यसि न वा ? गृहिणा दास्यामीति भणिते साधुः परिमाणं कारयन् भणति—कियत् परिमाणं कियच्चिरं वा कालं दास्यसि ? ततो गृही भणति यावन्मात्रेण भक्तेन तेऽर्थो यावन्तं वा कालं तेऽर्थः, किं बहुना भणितेन ? यत्तुभ्यं रोचते द्रव्यं यावत्परिमाणं यावन्तं वा कालं तदपरिहीणमहमवश्यं दास्यामीत्येवंविधा या निमन्त्रणा सा **सनिकाचाऽवगन्तव्या**। निकाचशब्देन चात्रोत्पीलनपरिमाणे गृह्येते । ततो **निमन्त्रणोत्पीलनपरिमाणेषु** त्रिष्वपि **मासलघु** प्रायश्चित्तं भवति । अथवा प्रतिदिनं तवैतावन्मात्रं दास्यामि मद्गृहे नित्यमागन्तव्यमिति निमन्त्रितस्य नित्यं गृह्णतः सनिकाचनिमन्त्रणापिण्डो नित्यपिण्ड इत्यर्थः । ततः **सनिकाचनिमन्त्रे** सनिकाचनिमन्त्रणापिण्डे **लघुमासः** । नन्वत्र स्वभावनिष्पन्नेऽप्याहारे गृह्यमाणे किं दूषणम् ? येन प्रायश्चित्तापत्तिः । उच्यते, आत्मार्थनिष्पन्नोऽप्याहारो नियतदाननिमन्त्रणादिभिः सदोषः स्यात् । स्थापनादीनां दोषाणां सम्भवात् । ततो निमन्त्रणादिपिण्डस्त्याज्यः । **सागारिकः** शय्यातरः । **शय्यया** साधुसमर्पितगृहलक्षणया भवार्णवं तरतीतिव्युत्पत्तेः । तस्य पिण्डो वक्ष्यमाण—लक्षणो न भोक्तव्यः । तस्मिन् **सागारिकपिण्डे** गृहीते **लघुमासः** प्रायश्चित्तं भवति ।

अथ कोऽयं [१] शय्यातरः ? कदा च [२] शय्यातरो भवति ? कतिविध[३]स्तत्पिण्डः ? कदा वा अशय्या[४]तरो भवति ? कस्य च सम्ब[५]न्ध्यसौ वर्जनीयः ? के च तत्पिण्ड[६]ग्रहणे दोषाः ? कदा च तत्पि[७]ण्डो गृह्यते ? क्व च शय्या[८]तरो भवतीत्यष्टौ द्वाराणि । **तत्राद्यद्वारे** यतिप्रदत्तोपाश्रयप्रभुः, तेन यत्कृतप्रमाणतया निर्दिष्टो वा शय्यातरः । अत्र चैको वा बहवो वा शय्यातरा वर्ज्याः । अपवादपदे पुनर्बहुषु शय्यातरेषु एकं शय्यातरं स्थापयित्वा वर्जयेत् । शेषेषु तु प्रविशेत् । **द्वितीयद्वारे** यदा शय्यातरगृहे रात्रौ सुप्त्वा जागरित्वा वा प्राभातिकप्रतिक्रमणं कुर्वन्ति तदाऽसौ शय्यातरः । अथैतच्छय्यायां सकलां रात्रिं जागरित्वा प्राभातिकप्रतिक्रमणमन्यत्र कुर्वन्ति, तदा मौलः शय्यातरो न भवति, किन्तु यद्गृहे प्रतिक्रमणं कृतं स एव । अथ मौलशय्यायां रात्रौ सुप्त्वाऽन्यत्र प्रातः प्रतिक्रामन्ति, तदा मौलोऽन्यश्च द्वावपि शय्यातरौ । यदा तु वसतिसङ्कीर्णतादिकारणादनेकोपाश्रयेषु साधवस्तिष्ठन्ति, तदा यत्राऽऽचार्यः स्थितः स एव शय्यातरो नाऽन्यः । **तृतीयद्वारे** द्वादशधा तत्पिण्डः । तदुक्तम्—

**असणाईआ चउरो पाउंछण वत्थ पत्तकंबलयं । सूइछुरकन्नसोहण नहरणिआ सागरिअपिंडो'** ।।

अयं तु तदपिण्डः—

**तणडगलछारमल्लगसिज्जासंथारपीठलेवाई । सिज्जायरपिंडो सो न होइ सेहो अ सोवहिओ'** ।।

(नि०भा० ११५४, बृ०क० ३५३५)

**चतुर्थद्वारे** अहोरात्रात् परतोऽशय्यातरो भवति । तदुक्तम्— **'वुत्थे वज्जिज्जहोरत्तं'** । इदमत्र हृदयम्—यत्रोषितास्ततः स्थानाद् यस्यां वेलायां निर्गता द्वितीयदिने तावत्या वेलायाः परतः शय्यातरो न भवति । **पञ्चमद्वारे** साधुगुणविरहितस्य लिङ्गमात्रावशेषस्यापि सम्बन्धी शय्यातरो वर्जनीयः । **षष्ठद्वारे—**

**'तित्थंकरपडिकुट्ठो आणाण्णाउग्गमो वि अ न सुज्झे । अविमुत्ति अलाघवया दुल्लहसिज्जाइवुच्छेओ'** ।।

(नि०भा० ११५९, बृ०क० ३५४०)

अस्या व्याख्या—आद्यन्तवर्जैर्मध्यमैर्महाविदेहजैश्च तीर्थकरैः वरमाधाकर्म कथञ्चिदुक्तम्, न पुनः शय्यातरपिण्डो—ऽतस्तत् **प्रतिक्रुष्टत्वाद्वर्जनीयोऽयम्** । **'आण'** त्ति । तं च गृह्णता तीर्थकराऽऽज्ञा न कृता स्यात् । **'अण्णाउ'** त्ति । यत्र स्थितस्तत्रैव भिक्षां गृह्णता अज्ञातोञ्छं च न कृतं स्यात् । **'उग्गमो वि अ न सुज्झे'** त्ति । आसन्नादिभावतः पुनः पुनस्तत्रैव भैक्षपानकादिनिमित्तं प्रविशत उद्गमदोषाश्च स्युः । स्वाध्यायश्रवणादिभ्यश्च प्रीतः शय्यातरः क्षीरादि स्निग्धद्रव्यं ददाति तच्च गृह्णता **'अविमुक्तिः'** गार्द्ध्याभावो न कृतः स्यात् । **'अलाघवय'** त्ति । शय्यातरतत्पुत्रपितृव्यादिभ्यो बहूपकरणं स्निग्धाहारं च गृह्णत उपकरणशरीरयोर्लाघवं न स्यात् । तत्रैवाहारादि गृह्णतः शय्यातरवैमनस्यादिकारणात् **शय्या दुर्लभा** स्यात् **सर्वथा** वा **तद्व्यवच्छेदः** स्यात् । अतस्तत्पिण्डो वर्जनीयः । **सप्तमद्वारे—**

**'दुविहे गेलन्नम्मी निमंतणा दव्वदुल्लहा असिवे । ओमोदरिअ पओसे भए अ गहणं अणुण्णायं'** ।।

(नि०भा० ११६९, बृ०क० ३५५०)

व्याख्या—आगाढाऽनागाढे **द्विविधग्लानत्वे** सूत्रोक्तविधिना शय्यातरपिण्डोऽपि ग्राह्यः । **निमन्त्रणे** च शय्यातरनिर्बन्धे सकृत् तं गृहीत्वा पुनः प्रसङ्गो निवारणीयः । **दुर्लभे** च क्षीरादिद्रव्येऽन्यत्रालभ्यमाने तत्रैव गृह्णन्ति । **'पओसि'** त्ति । राज्ञा प्रद्विष्टेन सर्वत्र भैक्षे निवारिते प्रच्छन्नं तद्गृहेऽपि गृह्णन्ति । **तस्करादिभये** चान्यत्र तत्रापि स्वीकुर्वन्ति । **शेषं सुगमम्** । **अष्टमद्वारे** स्वस्थाने वसन् शय्यातरो भवति देशान्तरे गतो न भवत्यपि । केवलं भद्रकप्रान्तदोषात् पिण्डस्तत्रापि वर्जनीयः । भद्रको हि मम तावत् स्वगृहावस्थितस्यामी न किञ्चिद् गृह्णन्ति, ततोऽत्र यदि गृह्णन्ति तथापि शोभनमिति विचिन्त्य अनेषणीयमपि कृत्वा दद्यात् । प्रान्तस्तु मम स्वगृहस्थितस्यामी न किञ्चिद् गृह्णन्ति । अत्र तु सर्वं गृह्णन्ति । तत् किमिदानीमहमन्यः सञ्जातः ? तस्मान्मायाविन एते इति विचिन्त्य वसत्युच्छेदादि कुर्यादेवं शय्यातरसम्बन्धिनां भ्रातृमातुलकादीना—मुपाश्रयस्य प्रभूणामपि सम्बन्धी पिण्डो वर्जनीयो भद्रकप्रान्तादिदोषादित्यलं विस्तरेण । तदर्थिना तु कल्पतृतीयोद्देशको निशीथद्वितीयोद्देशकोवाऽन्वेष्यः । अथ **मनोज्ञं** मनसो रुचितं यद्विशिष्टवर्णगन्धरसस्पर्शैरुपेतं **भक्तं** भोजनमशनादि । **पानं** पानीयं गन्धरसोपेतमच्छं च मनोज्ञं तद्विपरीतममनोज्ञम् । सरसमपि दुर्गन्धममनोज्ञम् । अरसमपि सुगन्धं मनोज्ञं ततो मनोज्ञामनोज्ञे भक्तपानीये गृहीत्वा यदमनोज्ञं भक्तं पानीयं वा तत् त्यक्त्वा परिष्ठाप्य मनोज्ञस्य भक्तपानस्य भोजने विधीयमाने साधोर्लघुमासो भवति । आज्ञाभङ्गादयश्च दोषाः ।

इमे चापरे दोषाः—मनोज्ञभोजिनो रसगृद्धिः स्यात् । अपरसाधुभ्यः प्रमाणतो वाऽधिकभक्षणं स्यात्, विभज्य केवलमनोज्ञस्य भोजने काकशृगालखादितदोषः अङ्गारदोषश्च भवति । रसगृद्धो गच्छे रसाभावेन धृतिमलभमानो गच्छादपक्रामति । **मायावी** मण्डल्यां रसालमलभमानो भिक्षागत एव रसालं भुक्त्वा आगच्छति । उक्तं च— **'भद्दगं भद्दगं भुच्चा विवन्नं विरसमाहरे'** (दशवै० ५।२।३३ उत्तरार्धः) इत्यादि । रसभोजने च लुब्ध एषणामपि लुम्पति आर्यमङ्गुवत् । मङ्ग्वाचार्यो हि रसलाम्पट्यादवसन्नो जातो मृत्वा भवनपतिषूत्पन्नो जिह्वानिर्लालनेन साधूननुशशास । विपक्षे आर्यसमुद्रनिदर्शनम्—ते हि रसगृद्धिभीता एकतः सर्वं मिलित्वा भुञ्जते स्म । तथाच— **'अरसं विरसं वा वि'** (दशवै० ५।१।३८) **'सव्वं भुंजे न छड्डए'** (दशवै० ५।२।१ उत्तरार्धः) इति सूत्राभिहितं कृतं स्यात् । अमनोज्ञलाभेऽपि मनोज्ञभक्तादिनिमित्तं गोचरचर्या दीर्घा स्यात् । तथा च सूत्रार्थपरिमन्थो भवेत् । अमनोज्ञभक्तपरिष्ठापने च जन्तुविराधना स्यात् । यस्मादेते दोषाः ततो विधिना भोक्तव्यम् । स चाऽयम्—आचार्य—ग्लान—बाल—वृद्ध—प्राघुर्णकादीनां प्रायोग्यं पूर्वं दत्त्वा शेषं मनोज्ञममनोज्ञं च द्रव्याविरोधेन करम्बयित्वा मण्डलीरात्निको मण्डल्या सह भुङ्क्ते । एवं सर्वेषां समता स्यात् । पूर्वोक्तदोषाश्च परिहृता भवन्ति । एवममनोज्ञं कलुषं पानीयं परिष्ठाप्य मनोज्ञमच्छं पिबतो दोषा ज्ञेयाः । कलुषपानीयपरिष्ठापने च मक्षिका पिपीलिकादिबहुत्रसजन्तुघातो भवति । अत्रापीयं सामाचारी— कलुषमच्छं च जलं पृथक्कृत्वा प्रथमं कलुषं पिबन्ति पश्चादच्छम् । एवं गृद्धिदोषो न स्यात् । आचार्या— ऽभावितशैक्षग्लानादीनामच्छं दीयते । भाजनकल्पकरणबहिर्भूमिव्यापारणादावच्छं जलं गृह्यते । अन्यथा सागारिकः कलुषजलं दृष्ट्वा सर्वपाखण्डिष्वेते अधमतरा अशुचित्वादित्यपभ्राजनां लोके करोति, अनादरं वा तद्द्रव्यान्यद्रव्यव्यवच्छेदं वा । कारणैः पुनरमनोज्ञं परिष्ठाप्य मनोज्ञं गृह्णानोऽपि प्रायश्चित्तभाग् न स्यात् ।।१६९।। तथा अशनादिचतुर्विधाहारगतकियद्वस्तुविशेषग्रहणविषयं प्रायश्चित्तं क्रमेणोपदर्शयन्नाह—

**असणे अकारणं दुद्धदहिअभोगम्मि गुरुग लुद्धस्स ।**
**पाणम्मि गुरुग विअडे सचित्तजलि छलहु लहुमीसे ।।१७०।।**

व्याख्या—इहाशनाहारमध्ये साधूनां **दुग्धदध्यादिविकृतयः कारणं विना न कल्पन्ते ग्रहीतुम्** । अकारणग्रहणे चायं दोषः—

**'विगइं विगईभीओ विगइगयं जो उ भुंजए साहू । विगई विगइसहावा विगइं विगई बला नेई'** ।।
(पच्चक्खाणभाष्यम् ४०, पंचवस्तुकम् ३७०)

बीभत्सा विकृता वा गतिर्विगतिः नरकतिर्यक्कुमनुष्यत्वकुदेवत्वलक्षणा । अथवा विविधा गतिर्विगतिः संसारः । अथवा संयमो गतिः, असंयमो विगतिः तस्या भीतो विगतिभीतो यः साधुः **विकृतिं** क्षीरादिकां **विकृतिगतं** विकृतिप्रकारं विकृतिर्वा यस्मिन् द्रव्ये गता तत् विकृतिगतं क्षीरान्नादिकं भुङ्क्ते स दुर्गतिं यातीति वाक्यशेषः । यतो **विकृतिर्बलाज्जीवमनिच्छन्तमपि विगतिं** नरकादिकां **नयति** प्रापयति । एतदपि कुतः ?।

**विकृतिर्यतो विकृतिस्वभावा** विकारजननस्वभावा संयमयोगभ्रंशजननस्वभावेत्यर्थः । यत एवमतो विकृतयो न ग्राह्याः कारणमन्तरेण । सम्प्रति चेयं सामाचारी साधूनां—दुग्धदधिगुडरूपा एतास्तिस्रो विकृतयो विकृष्टतप—औषधादिकारणं विना न कल्पन्ते । घृततैलविकृती तु प्रत्यहं न कल्पेते, संयमयोगनिर्वाहार्थं पुनः कदाचित्कल्पेते । उद्‌गाहिमविकृतिरपि जिह्वालौल्येन न कल्पते । एवं पानखादिमस्वादिमाहारगतकियद्वस्तूनि न कल्पन्ते । तद्‌ग्रहणे च प्रायश्चित्तम् । तद्यथा **अशने** अशनाहारमध्ये **अकारणं** कारणं विना **दुग्धदधिभोगे** दुग्धदधिग्रहणे **लुब्धस्य** गृद्धस्य साधोर्**गुरुका मासाश्चत्वारः** स्युः । '**लुब्धस्येति**' वचनात् तक्राद्यभावे तद्‌ग्रहणेऽपि न दोषः । तथा **पाने** पानाहारमध्ये **विकटे** मद्ये गृहीते **गुरुकाश्चत्वारो** मासा भवन्ति । **सचित्तजले** गृहीते षड्लघु प्रायश्चित्तम् । **मिश्रे** सचित्ताऽचित्तरूपे **जले गृहीते लघुमासो** भवति । इह च साधूनां कल्पाध्ययनोक्तानि पानीयान्यमूनि—

**'उस्सेइम[१]संसेइम[२]चाउलओदगं[३] च तिल[४]तुस[५]जवाणं[६] । आयामं[७] सोवीरं[८] सुद्धवियडमिअ[९] जलं नवहा'** ।

(लघुप्रवचनसारोद्धार ९०)

**उत्स्वेदिमम्, संस्वेदिमम्, तन्दुलोदकम्, तिलोदकम्, तुषोदकम्, यवोदकम्, आयामम्, सौवीरम्, शुद्धविकटम्।** **तत्रोत्स्वेदिमं** पिष्टोत्स्वेदनार्थमुदकं पिष्टभृतहस्तादिक्षालनजलं वा, **संस्वेदिमं** येनारणिकादिपर्णाद्युत्काल्य शीतोदकेन सिच्यते । **चाउलोदकं** तन्दुलधावनोदकम्, **तिलोदकं** महाराष्ट्रादिषु निस्त्वगचित्ततिलधावनजलम् । **तुषोदकः** व्रीह्यादिधावनम्, **यवोदकं** यवधावनम्, **आयामम्** अवस्रावणम्, **सौवीरं** काञ्जिकम्, **शुद्धविकटम्** उष्णोदकम् उद्वृत्तत्रिदण्डमेव नापरं तस्य मिश्रत्वात् । एतेषां च पानीयानां मध्ये काञ्जिकमेव पूर्वं साधुभिर्ग्राह्यं तदभावे—ऽपरपानीयग्रहणानुज्ञाप्रतिपादनात् । तथा चोक्तं निशीथपीठे—

**'कांजिअआयामासइ संसट्ठुसुणोदगेसु वा असती । फासुअमुदगं तसजढं तस्सऽसति तसेहिं जं रहिअं'** ।।

(नि०भा० २००)

अस्याश्चूर्णिः—पू(पु?)व्वं ताव कंजिअं गिण्हति । कंजिअं देसीभासाए आरनालं भण्णति । आयामं अवसामणं। एतेसिं असतीए संसट्ठुसुणोदगं गिण्हति । गवगं[A]रसभायणनिक्केअणं जं तं संसट्ठुसुणोदगं भण्णति । अहवा कोसलविसयादिसु सल्लोअणो विणस्सणभया सीतोदगे छुब्भति । तम्मि अ ओअणे भुत्ते अंबीभूअं तं जइ अतसागं[B] ता घिप्पति । एवं वा संसट्ठुसुणोदगं । एतेसि असतीए जं वप्पादिसु फासुगमुदगं तं तसजढं घिप्पति । '**तस्सासति**' त्ति । फासुअ अतसागस्स असति फासुग सतसागं धम्मकरका[C]दिपरिपूअं घिप्पति । सव्वहा फासुगासति सचित्तं जं तसेहिं रहिअंति । अतः काञ्जिकजलाद्यलाभे उत्स्वेदिमादीनि पानकानि गृह्यन्ते ।।१७०।। तान्यपि कानिचिन्मिश्राणि भवन्ति तानि न कल्पन्त इति तद्विचारं दर्शयन्नाह—

---

**A.** गोरसः (दधिदुग्धादिः) **B.** त्रसजीवरहितम् **C.** वस्त्रादेः गालितं = 'गरणा विगेरेथी गाळेलुं' इति भाषायाम्

**पढमुस्सेइममुदयं न कप्पई कप्पई उ केसिंपि ।**
**तन्न जुज्जइ जम्हा मीसं उसिणंपि जा दंडो ।।१७१।।**

(नि०भा० ५९७१)

व्याख्या—यत्र शीतोदके उत्स्विन्नं क्षिप्यते तदुदकम् **उत्स्वेदिमम्** । यथा—मरहट्टदेशे दीवगा[A] उत्स्वेदिताः शीतोदके क्षिप्यन्ते तदुदकमुत्स्वेदिमम् । ते च दीवगादय उत्स्वेदिता एकस्मिन् द्वयोस्त्रिषु वा पानीयेषु क्षिप्यमाणा निर्वलन्ते । तत्र द्वितीयतृतीयपानीये सर्वेषामेवाचार्याणां मतेनाऽकल्प्ये एव । यत् प्रथममुत्स्वेदिममुदकं **तदपि न कल्पते** । **केषाञ्चित्** पुनराचार्याणां मतेन **तत्कल्पते** । **तन्न युज्यते**, कस्मात् ? **यस्मादुष्णमपि** उत्कालितमपि उदकं **यावद्दण्डो**ऽत्र जातावेकवचनं ततोऽयमर्थः । **यावत्** त्रयो **दण्डा** उत्काला न जायन्ते **तावन्मिश्रं** भवति । तथाहि—प्रथमे दण्डे जायमाने किञ्चित् परिणमति किञ्च(ञ्चि?)न्नेति मिश्रम्, द्वितीये प्रभूतं परिणमति स्तोकमवतिष्ठते, तृतीये तु सर्वमप्यचित्तं भवति । ततोऽनुद्वृत्तेषु त्रिषु दण्डेषु उष्णोदकं मिश्रमेव सम्भवति । यद्येवमुष्णोदकमपि मिश्रं भवति तर्हि कथं तेषु दीवगादिषु उत्स्वेदितेषु क्षिप्तेषु तत्प्रथमोदकमचित्तं भविष्यतीत्यर्थः । एवं संस्वेदिममपि किञ्चिन्मिश्रं भवति । यथा संस्विन्नारणिकादिपत्राणि शीतोदकेन सिच्यन्ते । तत्र प्रथमद्वितीयपानीये प्रासुके भवतः । तृतीयचतुर्थपानके तु मिश्रे स्याताम् । तथा तन्दुलोदकमपि मिश्रं भवति ।।१७१।। तदुपदर्शनपूर्वकं मिश्रग्रहणप्रायश्चित्तमाह—

**पढमबितिचाउलोदगि अहुणाधोअम्मि मीसगंति लहू ।**
**लहुगसचित्ते तुरिए तइएवि परे चिरकएवि ।।१७२।।**

व्याख्या—तन्दुलानां धावनोदकानि **प्रथमद्वितीयतृतीयानि** अचिरकालकृतानि नियमान्मिश्राणि भवन्ति, ततः परं चतुर्थादिधावनं सचित्तम् । एवं तिल—तुष—यवधावनोदकान्यपि अधुना कृतानि मिश्राण्यवगन्तव्यानि । ततः **प्रथमद्वितीयतृतीयतन्दुलोदकेऽधुना धौते गृहीते लघुमासः** प्रायश्चित्तं भवति, मिश्रकपरिणतमिदमिति हेतोः । अन्यस्मिन्नपि तिलधावनादिके उदकेऽधुना **धौते** मिश्रे गृहीते **लघुमासः** प्रायश्चित्तमवसेयम् । तन्दुलानां च **तुर्ये** चतुर्थे धावने **सचित्ते** गृहीते **चतुर्लघुकं** भवति । **परे** अन्ये आचार्याः **पुनस्तृतीयेऽपि** तन्दुलानां तृतीयधावनेऽपि न केवलं चतुर्थे, **चिरकृतेऽपि** न केवलमचिरकृते **चतुर्लघुप्रायश्चित्तमाहुः** । यतस्तत्रापि बहु अपरिणतं स्तोकं परिणतमिति । तन्दुलोदके च यान्याद्यानि—प्रथमद्वितीयतृतीयानि त्रीणि धावनानि मिश्राण्यभिहितानि तानि चिरमवतिष्ठमानान्यचित्तानि भवन्ति । चतुर्थादीनि तु धावनानि चिरमवतिष्ठमानान्यपि सचित्तानीति तेषामग्रहणमेव । मिश्राणां च तन्दुलोदकानां परिणामे इमे त्रयोऽनागमिका आदेशास्तद्यथा—

**भंडगपासगलग्गा उत्तेडा बुब्बुआ य न समंति । जा ताव मीसगं तंदुला य रज्झंति जावन्ने' ।।**

(पिं०नि० २६)

---

**A.** जे पाणीमां दहीं-वडा नाख्या होय ते गरम पाणी' इति भाषायाम् ।

व्याख्या—**तन्दुलोदके** तन्दुलप्रक्षालनभाण्डादन्यस्मिन् भाण्डे प्रक्षिप्यमाणे ये त्रुटित्वा **भाण्डकस्य पार्श्वेषु उत्तेडा** बिन्दवो लग्नास्ते यावन्न **शाम्यन्ति** विध्वंसमुपगच्छन्ति, **तावत्तं** तन्दुलोदकं **मिश्रं** ततः परम**चित्तमित्येके** । **अपरे पुनराहुः**—तन्दुलोदके तन्दुलप्रक्षालनभाण्डकादपरस्मिन् भाण्डके प्रक्षिप्यमाणे ये तन्दुलोदकस्योपरि समुद्भूता बुद्बुदास्ते यावदद्यापि **न शाम्यन्ति** न विनाश[A]मियूति तावत् तत् तन्दुलोदकं मिश्रं ततोऽचित्तमिति । **अन्ये पुनरेवमाहुः**—तन्दुलप्रक्षालनानन्तरं तन्दुला **राद्धुमारब्धाः** । ततस्ते यावन्न **राध्यन्ति** यावन्नाद्यापि सिद्ध्यन्ति तावत् तत् तन्दुलोदकं **मिश्रं ततो**ऽचित्तमिति । **एते त्रयोऽप्यादेशा अनादेशा एव** । कालनियमस्यासम्भवात् । न खलु **बिन्द्वपगमे** बुद्बुदापगमे तन्दुलपाकनिष्पत्तौ वा सर्वदा सर्वत्र प्रतिनियत एव कालः, येन प्रतिनियत—कालसम्भविनो मिश्रत्वादूर्ध्वमचित्तत्वस्याप्यभिधीयमानस्य न व्यभिचारसम्भवः । कालनियमासम्भवश्चारूक्षेतर—भाण्डपवनसम्भवाऽसम्भवचिरकालजलभिन्नत्वाऽभिन्नत्वादिभिः । इयमत्र भावना—स्नेहजलादिना यन्न भिन्नं भाण्डं तत् रूक्षमुच्यते । स्नेहादिना तु भिन्नं स्निग्धम् । तत्र रूक्षे भाण्डे तन्दुलोदके प्रक्षिप्यमाणे ये बिन्दवः पार्श्वेषु लग्नास्ते भाण्डस्य रूक्षतया झटित्येव शोषमुपयान्ति । स्निग्धे तु भाण्डे भाण्डस्य स्निग्धतया चिरकालम्। ततः प्रथमादेशवादिनां मते रूक्षे भाण्डे बिन्दूनामपगमे परमार्थतो मिश्रस्याप्यचित्तत्वसम्भावनया ग्रहण प्रसङ्गः । स्निग्धे तु भाण्डे परमार्थतोऽचित्तस्यापि बिन्दूनामनपगमे मिश्रत्वेन सम्भावनया न ग्रहणमिति । तथा बुद्बुदा अपि प्रचुरखरपवनसम्पर्कतो झटिति विनाशमुपगच्छन्ति । प्रचुरखरपवनसम्पर्काभावे तु चिरमप्यवतिष्ठन्ते । ततो द्वितीयादेशवादिनामपि मते यदा खरप्रचुरपवनसम्पर्कतो झटिति विनाश[B]मैयरुः बुद्बुदास्तदा परमार्थतो मिश्रस्यापि तन्दुलोदकस्याचित्तत्वेन सम्भावनया ग्रहणप्रसङ्गः । यदा तु खरप्रचुरपवनसम्पर्काभावे चिरकाल—मप्यवतिष्ठन्ते बुद्बुदास्तदा परमार्थतोऽचित्तीभूतस्यापि तन्दुलोदकस्य बुद्बुददर्शनतो मिश्रत्वशङ्कायां न ग्रहणमिति । येऽपि तृतीयादेशवादिनस्तेऽपि न परमार्थं पर्यालोचितवन्तः । तन्दुलानां चिरकालपानीय—भिन्नाभिन्नत्वेन पाकस्यानियतकालत्वात् । तथाहि—ये चिरकालसलिलभिन्नास्तन्दुला न च नवीना इन्धनादिसामग्री च परिपूर्णा ते सत्वरमेव निष्पद्यन्ते शेषास्तु मन्दम् । ततस्तेषामपि मतेन कदाचिन्मिश्रस्याप्यचित्तत्वसम्भावनया ग्रहणप्रसङ्गः । कदाचित् पुनरचित्तीभूतस्यापि मिश्रत्वशङ्कासम्भवादग्रहणमिति त्रयोऽप्यनादेशाः । अयं पुनरादेश आगमिकः—

**'जाव न बहुप्पसन्नं ता मीसं एस इत्थ आएसो । होइ पमाणमचित्तं बहुप्पसन्नं तु नायव्वं' ।।**

(पिं०नि० २८)

व्याख्या—**यावत् तन्दुलोदकं न बहुप्रसन्नं** नातिस्वच्छीभूतं तावन्मिश्रमवगन्तव्यम् । **एषोऽत्र** मिश्रविचारप्रक्रमे **भवत्यादेशः प्रमाणम्**, न शेषः । **यत्तु बहुप्रसन्न**मतिस्वच्छीभूतं **तदचित्तं ज्ञातव्यम्** । तथा चोक्तम्—

---

**A.** विनाशं गच्छन्ति । **B.** विनाशमगच्छन् ।

**जं जाणिज्ज चिराधोअं मइए दंसणेण वा । पडिपुच्छिऊण सुच्चा वा जं च निस्संकिअं भवे' ।।**
(दशवै० ५-१-७६)

ततोऽचित्तत्वेन तस्य ग्रहणे न कश्चिद्दोषः । एवमपरधावनेष्वपि प्रथमद्वितीयतृतीयधावनोदकानि मिश्राण्यवगन्तव्यानि, चतुर्थादीनि तु सचित्तानि । तान्यपि च मिश्रधावनोदकानि उत्स्वेदिमसंस्वेदिममिश्रोदकानि च यदा रसत आम्लरसानि, वर्णतो विवर्णानि, गन्धतोऽन्यगन्धानि, स्पर्शतश्चिप्फिलानि जायन्ते तदा परिणतानि ज्ञातव्यानि । तेषां ग्रहणे न दोषः ।।१७२।।

एवं पानाहारविषयं प्रायश्चित्तं प्रदर्श्य खादिमाहारविषयं तदाह—

**खाइमि भावे दव्वे अभिन्नभिन्ने पलंबि चउभंगो ।**
**पढमे कालतवगुरू लहुगा बीअम्मि तवगुरुगा ।।१७३।।**
**तइए कालगुरु लहू चरमे लहु दोहि लहु इअ परित्ते ।**
**ते गुरुगणंति साइमि लवंगपूआइए गुरुगा ।।१७४।।**

व्याख्या—**प्रलम्बते** नैरयिकादिकां गतिं प्रति लम्बते येन भुक्तेन जीवः तत् प्रलम्बम् । तच्च दशधा तद्यथा—

**भूले कंदे खंधे तया य साले पवालपत्ते अ । पुप्फे फले अ बीए पलंबसुत्तम्मि दसभेआ' ।।**
(बृ०क० ८५४)

**मूलम्**, **कन्दः**, **स्कन्धः**, **त्वक्** छल्ली, **शाला** शाखा, **प्रवालं** पल्लवः, **पत्रम्**, **पुष्पम्**, **फलम्**, **बीजम्** । एवं दशप्रकारं प्रलम्बं भवति । सर्वमप्येतत् **द्विधा भिन्नम् अभिन्नं** च । पुनः प्रत्येकं **द्विधा द्रव्यतो भावतश्च** । तत्र यद् विदारितं तत् **द्रव्यतो भिन्नम्**, जीवेन विप्रमुक्तं यत् तद् **भावतो भिन्नं** तद्विपरीतं **त्वभिन्नम्** । अत्र चत्वारो भङ्गा भवन्ति । तद्यथा—द्रव्यतो भावतश्चाऽभिन्नम्, द्रव्यतो भिन्नं भावतस्त्वभिन्नम्, भावतो भिन्नं द्रव्यतः पुनरभन्निम्, द्रव्यतो भावतश्च भिन्नम् । एतेषु चतुर्ष्वपि भङ्गेषु क्रमेण प्रायश्चित्तं प्रदर्श्यते । यथा—**खादिमे** खादिमाहारमध्ये **प्रथमे** प्रथमभङ्गप्रदर्शितप्रलम्बे द्रव्यतो भावतश्चाभिन्ने इत्यर्थः । गृहीते भिक्षोः**श्चत्वारो लघुका मासाः** । कथम्भूताः ? **कालतपोगुरवः** कालेन तपसा च गुरवो भवन्ति । **द्वितीये भङ्गे चत्वारो लघुकास्तपोगुरवः** तपसैवैकेन गुरवो न कालेनेत्यर्थः । एतयोर्द्वयोरपि भङ्गयोर्भावतोऽभिन्नतया प्रलम्बस्य सचेतनत्वात् । तृतीये भङ्गे लघुको मासः **कालगुरुः** कालेन गुरुर्न तु तपसा । **चरमे** चतुर्थे भङ्गे **लघुमासो द्वाभ्यां लघुः** । कालेन तपसा च लघुरित्यर्थः । **इति** उक्तप्रकारेण **परीत्ते** प्रत्येकवनस्पतिलक्षणे प्रलम्बे प्रायश्चित्तं भणितम् । **अनन्ते**ऽनन्तकाय प्रलम्बे पुनस्तानि प्रायश्चित्तानि गुरुकाणि ज्ञातव्यानि । प्रथमद्वितीययोर्भङ्गयो**श्चत्वारो गुरुकाः** । तृतीयचतुर्थयोस्तु **गुरुमासः** प्रायश्चित्तं तपःकालविशेषितं पूर्ववद्वक्तव्यमिति भावः । तथा प्रलम्बानि गृह्णता तीर्थकृतामाज्ञाभङ्गः कृतो भवति । अनवस्था मिथ्यात्वं विराधना च संयमात्मविषया कृता भवति । तथा प्रलम्बान्यनाचीर्णानि । तथा चोक्तम्—

**अविअ हु सव्व पलंबा जिणगणहरमाइएहिं नाइन्ना । लोउत्तरिआ धम्मा अणुगुरुणो तेण ते वज्जा' ।।**

(बृ०क० ९९५, नि०भा० ४८५५)

व्याख्या— **अपिचे' ति** दूषणाभ्युच्चये । पूर्वोक्ता दोषास्तावत् स्थिता एव दूषणान्तरमप्यस्तीति भावः । **हुः** निश्चितम् । **सर्वाणि** सचित्ताऽचित्तभेदभिन्नानि मूलकन्दादिभेदाद् दशविधानि वा **प्रलम्बानि जिनैस्तीर्थकरैर्गणधरैश्च** गौतमादिभिरादिग्रहणेन जम्बू—प्रभव—शय्यम्भवादिभिः स्थविरैरप्यनाचीर्णानि अनासेवितानि । **लोकोत्तरिकाश्च** ये केचन **धर्माः** समाचारास्ते सर्वेऽप्यनुगुरवो यद्यथा—पूर्वगुरुभिराचरितं तत्तथैव पाश्चात्यैरप्याचरणीयमिति गुरुपारम्पर्यव्यवस्थया व्यवहरणीया इति भावः । येनैवं **तेन तानि** प्रलम्बानि—**परिहर्त्तव्यानि** । अत्र परः प्राह—यदि यद्यत् प्राचीनगुरुभिराचीर्णं तत्तत् पाश्चात्यैरप्याचरितव्यं तर्हि तीर्थकरैः प्राकारत्रयछत्रत्रयप्रभृतिका प्राभृतिका तेषामेवार्थाय सुरैर्विरचिता यथा समुपजीविता, तथा वयमप्यस्मन्निमित्तकृतं किन्नोपजीवामः ? नैवम्, यतो यद्यप्यनुगुरवो धर्मास्तथापि न सर्वसाधर्म्यात् किन्तु देशसाधर्म्यादिव । तथाहि—तीर्थकरा यत् सुरेन्द्रादिकृतानतिशयानुपजीवन्ति स तीर्थकरजीतकल्प इति कृत्वा न तत्राऽनुधर्मता चिन्तनीया । यत्र पुनस्तीर्थकृतामितरेषां च साधूनां सामान्यधर्मत्वं तत्रैवानुधर्मता चिन्त्यते । सा चेयम्—अनाचीर्णेति दर्श्यते—

**'सगडद्दहसमभोमे अविअ विसेसेण विरहिअतरागं । तहवि खलु अणाइन्नं एसणुधम्मो पवयणस्स' ।।**

(बृ०क० ९९७, नि०भा० ४८५७)

यदा भगवान् श्रीमन्महावीरस्वामी राजगृहनगरादुदायननरेन्द्रप्रव्राजनार्थं सिन्धुसौवीरदेशावतंसं वीतभयं नगरं प्रस्थितः । तदा किलापान्तराले बहवः साधवः क्षुधार्त्ताः तृषार्दिताः सञ्ज्ञाबाधिताश्च बभूवुः । यत्र च भगवानाऽऽवासितः तत्र बहूनि तिलशकटान्यासन् । तेषु च तिला व्युत्क्रान्तयोनिका अशस्त्रोपहता अप्यायुःक्षयेणाचित्तीभूताः, स्थण्डिले च स्थितास्तदुद्भवाऽऽगन्तुकत्रसविरहिताश्च तिलशकटस्वामिभिश्च दत्ताः । तथा ह्रदः पानीयपूर्णो यथाऽऽयुष्कक्षयादचित्तीभूतोऽचित्तपृथिव्यां च स्थितस्त्रसविवर्जितश्च ह्रदस्वामिना च दत्तः । साधवश्च ते क्षुधापीडिताः तृषार्दिताश्चाऽऽयुषः स्थितिक्षयमकार्षुः । तथापि खलु भगवताऽनाचीर्णं—नानुज्ञातं ग्रहणम्, मा भूदशस्त्रोपहते ग्रहणप्रसङ्गः । तीर्थकरेणाऽपि गृहीतमिति मदीयमालम्बनं कृत्वा मत्सन्तानवर्त्तिनः शिष्या अशस्त्रोपहतं मा ग्राहिषुरिति भावः । तथा स्वामी तृतीयपौरुष्यां भुक्तमात्रैः साधुभिः सार्द्धमेकामटवीं प्रपन्नः । तत्र च समभोमं गर्त्तागोष्पदबिलादिवर्जितं यथास्थितिक्षयव्युत्क्रान्तयोनिकपृथिवीकं त्रसप्राणविरहितं स्थण्डिलं वर्त्तते, अपरं च शस्त्रोपहतं स्थण्डिलं नास्ति, साधवश्च ते सञ्ज्ञाबाधिताः स्थितिक्षयं कुर्वन्ति । तथापि भगवान्नानुज्ञां करोति । यथा— **अत्र व्युत्सृजत'** इति मा भूदशस्त्रोपहते प्रसङ्गः । युक्तियुक्तं चैतत् प्रमाणस्थपुरुषाणाम् । यत उक्तम्—

**प्रमाणानि प्रमाणस्थै रक्षणीयानि यत्नतः । विषीदन्ति प्रमाणानि प्रमाणस्थैर्विसंस्थुलैः' ।।**

(बृ०क० ९९८)

एषोऽनुधर्मः **प्रवचनस्य** तीर्थस्य सर्वैरपि प्रवचनमध्यमध्यासीनैरशस्त्रोपहतपरिहारलक्षण एष एव धर्मोऽनुगन्तव्य इति भावः । एवं प्रलम्बान्यपि तीर्थकरादिभिरनाचीर्णानि पाश्चात्यैरपि परिहर्त्तव्यानि । तथा अवमकाले असंस्तरणे प्रलम्बग्रहणे इयं यतना—

**बत्तीसाई जा इक्कघास खवणं व नवि अ से हाणी । आवस्सएसु अत्थओ जा छम्मासे न य पलंबे'** ।।
(बृ०क० १०७६, नि०भा० ४९३९)

ओदनस्य **द्वात्रिंशत् कवलाः** पुरुषस्य प्रमाणप्राप्त आहारः । यदि ते **एकेन कवलेन** न्यूनाः प्राप्यन्ते ततस्तैरेव तिष्ठतु । यदि **से** तस्य **साधोरावश्यकेषु** अवश्यकृत्ययोगेषु हानिर्नापि **नैव** भवति, न च प्रलम्बानि गृह्णातु । एवं द्वाभ्यां कवलाभ्यां न्यूनाः द्वात्रिंशत् कवला लभ्यन्ते तैस्तिष्ठतु यदि तस्यावश्यकयोगा न परिहीयन्ते । एवमेकैकं कवलं परिहापयता तावद्वक्तव्यं **यावद्यद्येको ग्रासः** कवलः प्राप्यते ततस्तेनैवास्ताम् । यदि तस्याऽऽवश्यकयोगा न परिहीयन्ते मा च प्रलम्बानि गृह्णातु । अथैकोऽपि कवलो न प्राप्यते तत एकं दिवसं क्षपणमुपवासं कृत्वा आस्तां द्वितीयदिवसे द्वात्रिंशत्कवलैः पारयतु । यदि तावन्तो न लभ्यन्ते, तत एकैककवल—परिहाण्या तावद्वक्तव्यं यावद्यद्येकोऽपि कवलो न लब्धः । ततः षष्ठं कृत्वा समाधिसौधमध्यास्ताम् । षष्ठस्य च पारणके प्रमाणप्राप्तमाहारमुपादत्ताम् । अथ न लभ्यते ततः पूर्वोक्तयुक्त्या यावदेकोऽपि कवलो न लभ्यते । ततोऽष्टमं कृत्वा तिष्ठतु । मा च प्रलम्बान्याददीत । एवमनयैव दिशा दशमादिकमुत्तरोत्तरक्षपणं वर्द्धयता तावन्नेतव्यं यावत् षण्मासक्षपणं करोतु **यद्यावश्यकयोगा न परिहीयन्ते मा च प्रलम्बानि गृह्णातु** । एवमादि प्रकारेण प्रलम्बविषया यतना प्रकल्पादौ[A] विस्तरेण प्रदर्शिता तत एवावसेया । एवं खादिमाहारविषयं प्रायश्चित्तं भणितम् । अथ स्वादिमाहारविषयं भण्यते । **'साइमि लवंगपूआइए गुरुग'** (मूलगाथा १७४) त्ति । **स्वादिमाहारमध्ये लवङ्गपूगादिके लवङ्गं** देवकुसुमम्, **पूगं** पूगीफलम्, **आदिशब्दात्** खदिरवटिकाजातीयफलादिग्रहः । तस्मिन् गृहीते **गुरुकाश्चत्वारो मासा** भवन्तीति चतुर्विधाहारविषयं प्रायश्चित्तमुक्तम् ।।१७४।।

अथात्र प्रतिपदमाज्ञाभङ्गादयो ये दोषाः प्रोच्यन्ते तद्विषयं प्रायश्चित्तमाह—

**आणाभंगे चउगुरु लहुगा मिच्छे तहाणवत्थाए ।**
**गुरुगा आयविराहणि संजमि वयकायनिप्फन्नं ।।१७५।।**

व्याख्या—इयं गाथा सामान्यविषयाऽपि प्रलम्बप्रक्रमात् प्रलम्बविषया प्रदर्श्यते । तद्यथा—भगवता प्रतिषिद्धं यत् प्रलम्बं न कल्पते, तद् ग्रहणं कुर्वता **भगवतामाज्ञाभङ्गः** कृतो भवति । तस्मिँश्चाऽऽ**ज्ञाभङ्गे चतुर्गुरुकाः** । अत्राह परः—

**अवराहे लहुगतरो आणाभंगम्मि गुरुतरो किह णु ? आणाइच्चिअ चरणं तब्भंगे जाण किं न भग्गं नु'** ।।
(बृ०क० ९२४, नि०भा० ४७८३)

---

A. निशीथादौ ।

**अपराधे** चारित्रातिचारे **लघुतरो** दण्डो भवद्भिः पूर्वं भणितः । तथाहि—अचित्ते प्रलम्बे **मासलघुः** सचित्ते **चतुर्लघु** । इह पुनराज्ञाभङ्गे चतुर्गुरुकमिति **गुरुतरो** दण्डः **कथं** कस्मात् ? **नुरिति** वितर्के । अपि च—अनपराधिजीवोपघातो दृश्यते तेन तत्र गुरुतरो दण्डो युक्तियुक्तः । आज्ञायां पुनर्नास्ति जीवोपघात इति लघुतर एवात्र भणितुमुचित इति । गुरुराह—**आज्ञायामेव** भागवत्यां **चरणं** चारित्रं व्यवस्थितम् । अतः **तद्भङ्गे** तस्या आज्ञाया भङ्गे **किं** तन्मूलोत्तरगुणादिकं वस्तु **न भग्नम्** ? । अपि तु सर्वमपि भग्नमत आज्ञायां गुरुतरो दण्ड उच्यते । अस्यैवार्थस्य प्रसाधनार्थमयं दृष्टान्तः—

**'सोऊण य घोसणयं अपरिहरंता विणासं जह पत्ता । एवं अपरिहरंता हिअसव्वस्सा उ संसारे'** ।।
(बृ०क० ९२५, नि०भा० ४७८४)

राज्ञा कारितां **घोषणां श्रुत्वा** घोषणया च निवारितमर्थ**मपरिहरन्तो यथा** द्रव्यापहारलक्षणं **विनाशं प्राप्ताः** । **एवं** तीर्थकरनिषिद्धं प्रलम्बग्रहण**मपरिहरन्तो हृतसर्वस्वा** अपहृतसंयमरूपसर्वसाराः **संसारे** दुःखमवाप्नुवन्ति । जहा कोइ नरवई सो छहिं पुरिसेहिं अन्नतरकज्जे तोसितो इमेणत्थेण घोषणं कारेइ । इमे छप्पुरिसा मज्झं पुरे अप्पणो इच्छाए विहरमाणा महाजणेणं अदिट्ठपुव्वा अणुवलद्धविभवनेवत्था अच्छंति । जो ते छिवइ वा पीडेइ वा मारेइ वा तस्स उग्गं दंडं करेमि । एवं घोषणयं सोऊण ते पउरा जणवया य दंडभीता ते पुरिसे पयत्तेण वण्णरूवाईहिं चिंधेहिं[A] आगमिऊणं पीडापरिहारकयबुद्धी तेसिं छण्हं पुरिसाणं पीडं परिहरंति ते निद्दोसा । जे पुण अणायारमंता न परिहरंति ते रन्ना सव्वस्सावहारदंडेणं दंडिआ । एस दिट्ठंतो । अयमत्थोवणओ—रायत्थाणीआ तित्थयरा । पुरत्थाणीओ लोगो । छप्पुरिसत्थाणीआ छक्काया । घोषणत्थाणीया छक्कायरक्खणपरूवणपरा छज्जीवणिआदओ आगमा । छिवणाइत्थाणीआ संघट्टणादी । पउरजणवयत्थाणीआ साहू । दंडत्थाणीओ संसारो । तत्थ जे य पयत्तेण छण्हं कायाणं सरूवं रक्खणोवायं च आगमेऊण जहुत्तविहीए पीडं परिहरंति ते कम्मबंधदंडेणं न दंडिज्जंति । इअरे पुण संसारे पुणो पुणो सारीरमाणसेहि दुक्खसयसहस्सेहिं दंडिज्जंति त्ति । **तथा मिथ्यात्वे चत्वारो लघुका भवन्ति** । शङ्कादयश्च दोषाः । यदुक्तम्—

**मिच्छत्ते संकाई जहेअ मोसं तहेव सेसंपि । मिच्छत्तथिरीकरणं अब्भुवगमवारणमसारं'** ।।
(बृ०क० ९२९, नि०भा० ४७८८)

**मिथ्यात्वे** विचार्यमाणे **शङ्कादयो दोषा** वक्तव्याः । **शङ्का** नाम किं मन्ये अमी यथावादिनस्तथाकारिणो न भवन्ति ? **येन प्रलम्बानि गृह्णन्ति** । आदिशब्दात् काङ्क्षादयो दोषाः । तथा **यथैतन्मृषा** तथैव शेषमन्यदप्येतेषां मिथ्यारूपमेवेति चित्तविप्लुतिः स्यात् , मिथ्यात्वाद्वा चलितभावस्य सम्यक्त्वाभिमुखस्य प्रलम्बग्रहणदर्शनात् पुनरपि **मिथ्यात्वे** स्थिरीकरणं भवति । **अभ्युपगमं** वा प्रव्रज्याया अनुव्रतानां वा सम्यग्दर्शनस्य वा कर्त्तुकामस्याऽपरः कश्चित् **वारणं** कुर्यात्—मा एतेषां समीपे प्रतिपद्यस्व । **असारं** निस्सारममीषां प्रवचनं मयेदं चेदं च दृष्टमिति । तथा **अनवस्थायां चत्वारो लघुका भवन्ति** । सा चेयम्—

---

**A.** चिह्नैः ।

**एगेण कयमकज्जं करेइ तप्पच्चया पुणो अन्नो । सायाबहुलपरंपरवुच्छेदो संजमतवाणं' ।।**

(बृ०क० ९२८, नि०भा० ४७८७, पंचव० ५९१)

एकेन केनचिदाचार्यादिना किमप्यकार्यं प्रमादस्थानं कृतं प्रतिसेवितं ततोऽन्योऽपि तत् प्रत्ययादेष आचार्यादिः श्रुतधरोऽप्येवं करोति, नूनं नास्त्यत्र दोष इति तदेवाकार्यं करोति । ततोऽपरोऽपि तथैव करोति तदन्योऽपि तथैवेत्येवं सातबहुलानां सातगौरवप्रतिबद्धानां प्राणिनां परम्परया प्रमादस्थानमासेवमानानां संयमतपसोर्व्यवच्छेदः प्राप्नोति । यद्धि संयमस्थानं तपःस्थानं वा पूर्वाऽऽचार्येण सातगौरवगृध्नुतया वर्जितं तत् पाश्चात्यैरदृष्टमिति कृत्वा व्यवच्छिन्नमेव । अथ विराधना, सा च द्विधा—आत्मविषया संयमविषया च । तत्राऽऽत्मविराधना जिह्वालोलुपतया बहुप्रलम्बभक्षणे विसूचिकादिभिः । तस्यां च गुरुकाश्चत्वारो भवन्ति । संयम पञ्चमहाव्रतषड्—विधजीवनिकायरक्षणात्मकः तस्मिन् या विराधना तस्यां व्रतकायनिष्पन्नं प्रायश्चित्तं भवति । अयमर्थः— यत् पूर्वं व्रतषट्कविराधनाविषयं षड्विधजीवनिकायविराधनाविषयं च प्रायश्चित्तं प्रतिपादितं तदत्र संयमविराधनायामव—गन्तव्यमिति । संयमविराधना चात्रेत्थं भवति । प्रलम्बानि गृह्णानो वनस्पतिकायान् न परित्यजति, तं चापरित्यजन् शेषानपि कायानसौ भावतः न परित्यजति, तदपरित्यागे च प्रथमव्रतपरित्यागः । प्रथमव्रतपरित्यागे च शेषव्रतपरित्यागोऽप्युपजायते । यद्वा—विरतिलक्षणं चारित्रं भणितं तच्च लक्षणं प्रलम्बानि गृह्णतो न स्यात् । लक्षणाभावे च चारित्रमपि न भवेत् । प्रलम्बग्रहणाच्च साधोर्जीविषु समता न विद्यते, समताया अभावाच्च सम्यक्त्वमपि नास्ति तस्यापि सामायिकभेदतया समतारूपत्वात् । तथा ज्ञानोपदेशे क्रियाद्वारेणावर्त्तमानोऽसौ ज्ञान्यपि अज्ञानी मन्तव्यः । एवमन्यत्राऽप्याज्ञाभङ्गादिष्विदं प्रायश्चित्तं ज्ञातव्यमिति पिण्डविषयं प्रायश्चित्तं प्रपञ्चितम् ।।१७५।। अथ वसतिमधिकृत्य प्रायश्चित्तमाचिख्यासुर्मूलोत्तरगुणदुष्टवसतिस्वरूपमाह—

**पिट्ठीवंसो दो धारणा य चत्तारि मूलवेलीओ ।**
**मूलगुणेहिं असुद्धा एसा आहागडा वसही ।।१७६।।**

(बृ०क० ५८२, नि०भा० २०४६)

व्याख्या—उपरितनस्तिर्यक्पाती पृष्ठिवंशः । द्वौ मूलधारणौ ययोरुपरि पृष्ठिवंशः तिर्यग्निपात्यते । चतस्रश्च मूलवेलय उभयोर्धारणयोरुभयतो द्विद्विवेलिसम्भवात् । एते वसतेः सप्त मूलभेदा एतैर्मूलगुणैः सप्तभिरशुद्धा या एषा वसतिः आधाकृता भवति साधूनाधाय सम्प्रधार्य कृता आधाकृता। पृषोदरादित्वादिष्टरूपनिष्पत्तेः ।।१७६।।

**वंसगकडणुक्कंबणछायणलेवणदुवारभूमी अ ।**
**सपरिकम्मा वसही एसा मूलुत्तरगुणेहिं ।।१७७।।**

(बृ०क० ५८३, नि०भा० २०४७)

व्याख्या—**वंशका** ये वेलीनामुपरि स्थाप्यन्ते पृष्ठवंशस्योपरि तिर्यक् । **कटनं** कटादिभिः समन्ततः पार्श्वाणामाच्छादनम् । **उत्कम्बनम्** उपरि कम्बिकानां बन्धनं **छादनं** दर्भादिभिराच्छादनम् । **लेपनं** कुड्यानां कर्दमेन गोमयेन च लेपप्रदानम् । **दुवार**' त्ति । संयतनिमित्तमन्यतो वसतेर्द्वारकरणम् । **भूमि**' त्ति ।। समभूमिकरणम् । एतत् सप्तविधमुत्तरकरणम् । एषा **सपरिकर्मा वसतिर्मूलगुणैरुत्तरगुणैश्च** । एषा नियमेनाविशोधिकोटिरन्येऽपि चोत्तरगुणा वसतेर्विद्यन्ते, तैः कृता विशोधिकोटिः ।।१७७।।

के तेऽन्ये उत्तरगुणाः ? इत्यत आह—

**दूमिअधूमिअ वासिअ उज्जोइअबलिकडा अवत्ता य ।**
**सित्ता संमट्ठावि अ विसोहिकोडीगया वसही ।।१७८।।**

(बृ०क० ५८४, नि०भा० २०४८)

व्याख्या—**दूमिता** नाम सुकुमारलेपेन सुकुमारीकृतकुड्या सेटिकया धवलीकृतकुड्या च । **धूपिता** अगुरुप्रभृतिभिः **वासिता** पटवासकुसुमादिभिः । **उद्योतिता** अन्धकारे अग्निकायेन कृतोद्योता । **बलिकृता** यत्र संयतनिमित्तं बलिविधानं कृतम् । **अवत्ता** नाम यत्र भूमिरुपलिप्ता । **सिक्ता** आवर्षणकरणतः । **सम्मृष्टा** सम्मार्जन्या, संयतनिमित्तमेवमुत्तरगुणैः कृता वसति**र्विशोधिकोटिगता** भवति ।।१७८।।

अथाविशोधिकोटि—विशोधिकोटिगतवसत्यवस्थानविषयं प्रायश्चित्तमाह—

**मूलुत्तरचउभंगो पढमे दोहिं गुरु गुरुग बिअतइए ।**
**तवगुरुकालगुरुकमा अत्तट्ठकडो चरिम सुद्धो ।।१७९।।**

(बृ०क० ५८७, नि०भा० २०५१)

व्याख्या—**मूलगुणाः** पृष्ठवंशादय **उत्तरगुणा** वंशकादयः । तेषु **मूलोत्तरगुणेषु चतुर्भङ्गी** । गाथायां पुंस्त्वं प्राकृतत्वात् । मूलगुणा अपि पृष्ठवंशादयः संयतनिमित्तमुत्तरगुणा अप्यविशोधिकोटिगता वंशकादयः संयतनिमित्तमिति **प्रथमो भङ्गः** । अत्र प्रायश्चित्तं **चत्वारो गुरुका द्वाभ्यां गुरवः** तपसा कालेन च । मूलगुणाः संयतार्थमुत्तरगुणा अविशोधिकोटिगताः स्वार्थमिति **द्वितीयः** । अत्र **चत्वारो गुरुकास्तपोगुरवः काललघवः** । मूलगुणाः स्वार्थमुत्तरगुणा अविशोधिकोटिगताः संयतार्थमिति **तृतीयो भङ्गः** । अत्र **चत्वारो गुरवः कालगुरवः तपोलघवः क्रमादवसेयाः** । आत्मार्थं मूलगुणा आत्मार्थमेव चोत्तरगुणा इत्येव**मात्मार्थकृतश्चरमभङ्गः शुद्धः** । चतुर्थभङ्गवर्त्तिवसतावस्थाने प्रायश्चित्तं न भवतीत्यर्थः ।।१७९।।

**अप्फासुएण देसे सव्वे वा दूमिआइ चउलहुआ ।**
**अप्फासु धूमजोई देसम्मिवि चउलहू हुंति ।।१८०।।**
**सेसेसु फासुएणं देसे लहु सव्वहिं भवे लहुगा ।**
**सुन्नवसहीइ गुरुगा बालाइवसहिपाले वि ।।१८१।।**

व्याख्या—यत्र देशतः **सर्वतो वा अप्रासुकेन** वस्तुना **दूमितादि** । आदिशब्दात् समस्तान्यपि पदानि गृहीतानि । तत्र तिष्ठतः प्रत्येकं प्रायश्चित्तं **चत्वारो लघुकाः** । यत्र पुनरगुरुप्रभृतिभि**र्धूपनम्** अन्धकारेऽग्निकायेन उद्द्योतनं तत्र नियमादप्रासुकः सचित्तोऽग्निकाय इति **देशेऽपि चत्वारो लघुका भवन्ति** किमुत सर्वतः ? **शेषेषु** धूपितमुद्द्योतितं च मुक्त्वाऽन्येषु दूमितवासितबलिकृतावत्तसिक्तसंसृष्टरूपेषु भेदेषु **प्रासुकेन देशतः** करणे **लघुमासः** । **सर्वतश्चत्वारो लघुका भवन्तीति** मूलोत्तरगुणाऽशुद्धवसत्यवस्थानविषयं प्रायश्चित्तमुक्तम् । तथा साधुभिर्वसतिः शून्या न कार्या, बालादिर्वसतिपालश्च न विधेयोऽनेकदोषसम्भवात् । ततः **शून्यवसतौ** कृतायां **गुरुकाश्चत्वारः** प्रायश्चित्तं **बालादौ**, आदिशब्दाद् ग्लाने अव्यक्ते वा **वसतिपालेऽपि कृते गुरुकाश्चत्वारो** भवन्ति । निशीथादौ तु शून्यवसतौ **चत्वारो लघुकाः** कालतपोगुरवः । बालादौ तु **मासलघु** ।।१८०-१८१।।

अथ संसक्तवसतिस्थितिविषयं प्रायश्चित्तमाह—

**संसत्ताए काएहिं सजिअमीसेहिं होइ सट्ठाणं ।**
**नरतिरिसंसत्ताए लहुगा गुरुगा नपुत्थीहिं ।।१८२।।**

(बृ०क० ५८९)

व्याख्या—**कायैः** पृथिव्यप्तेजोवनस्पतिकायैः **सजीवैः** सचित्तैः **मिश्रैश्च** सचित्ताचित्तरूपैः **संसक्तायां** संयुक्तायां वसतौ तिष्ठतः प्रायश्चित्तं **स्वस्थानं** स्वस्थाननिष्पन्नं भवति । तद्यथा—सचित्तैः पृथिवीकायादिभिः संसक्तायां वसतौ चतुर्लघु । हरितैरनन्तैश्चतुर्गुरु । प्रत्येकबीजै रात्रिंदिवपञ्चकं लघु । अनन्तबीजैर्गुरुकम् । मिश्रैः पृथिव्यादिभिर्मासलघु । हरितैरनन्तैर्मिश्रैर्मासगुरु । बीजैरनन्तैश्च मिश्रैः सचित्तैरिव त्रसकायैश्चत्वारो गुरुकाः । तथा **नरैः** पुरुषैः **तिर्यक्स्त्रीभिश्च संसक्तायां** वसतौ तिष्ठतां **निर्ग्रन्थानां चत्वारो लघुकाः** । **नपुंसकैर्मनुष्यस्त्रीभिश्च संसक्तायां** वसतौ **चत्वारो गुरुकाः** । निर्ग्रन्थीनां पुनस्त्रीभिः[A] संसक्तायां चतुर्लघु । पुरुषसंसक्तायां चतुर्गुरुः स्यादित्यनुक्तमप्यवगन्तव्यम् ।।१८२।।

अथ वसतिर्नवधा भवतीति दर्शयति—

**कालाइक्कंतउवट्ठाण अभिक्कंत अणभिक्कंता य ।**
**वज्जा य महावज्जा सावज्जमहऽप्पकिरिआ य ।।१८३।।**

(बृ०क० ५९३)

व्याख्या—शय्या नवप्रकारा भवति । तद्यथा—**कालातिक्रान्ता**[१], **उपस्थाना**[२], **अभिक्रान्ता**[३], **अनभिक्रान्ता**[४], **वर्ज्या**[५], **महावर्ज्या**[६], **सावद्या**[७], **महासावद्या**[८], **अल्पक्रिया**[९] च ।।१८३।।

साम्प्रतमेतासामेव कालातिक्रान्तादीनां व्याख्यानमभिधित्सुराह—

**उडुवासा समईआ कालाइक्कंत सा भवे सिज्जा ।**
**सा चेव उवट्ठाणा दुगुणादुगुणं अवज्जित्ता ।।१८४।।**

(बृ०क० ५९५)

---

**A. स्त्रीभिः – हलकी जातनी स्त्रीओवडे संसक्त अेवी वसतिमां ।**

व्याख्या—ऋतुबद्धकाले वर्षाकाले च यत्र स्थितास्तस्यामृतुबद्धे काले मासे पूर्णे, वर्षाकाले च चतुर्मासे पूर्णे यदि साधवस्तिष्ठन्ति तदा **सा वसतिः कालातिक्रान्ता** भवेत् १। यस्यां वसतौ ऋतुबद्धे मासम्, वर्षाकाले चतुर्मासं च स्थिता यदि तस्यामृतुबद्धवर्षाकालसम्बन्धिकालमर्यादां **द्विगुणां द्विगुणामवर्जयित्वा** भूयः समागत्य तिष्ठन्ति तदा **सैव** वसतिरु**पस्थाना** २। किमुक्तं भवति—ऋतुबद्धे काले द्वौ मासौ, वर्षासु अष्टमासानपरिहृत्य यदि पुनरागच्छन्ति यस्यां वसतौ ततः सा उपस्थाना भवति । अन्ये पुनरिदमाचक्षते—यस्यां वसतौ वर्षावासं स्थितास्तस्यां द्वौ वर्षारात्रावन्यत्र कृत्वा यदि समागच्छन्ति ततः सा उपस्थाना न भवति, अर्वाक् तिष्ठतां पुनरुपस्थाना ।।१८४।।

**जावंतिअ वसही तेहिं भुत्त अभिक्कंत इअरणभिक्कंता ।**
**वज्जा सगिहं दाउं सट्ठाए अन्नगिहकरणे ।।१८५।।**

(बृ०क० ५९६)

व्याख्या—या शय्या आचण्डालेभ्यो **यावन्तिकी सा** यदाऽन्यैश्चरकादिभिः पाखण्डस्थैर्गृहस्थैर्वा निषेविता पश्चात् संयतास्तिष्ठन्ति तदा **सा अभिक्रान्ता** ३। सा एव यावन्तिकी अन्यैः पाखण्डस्थैर्गृहस्थैर्वाऽपरिभुक्ता तस्यां यदि संयताः प्रविशन्ति ततः सा **अनभिक्रान्ता** ४। **स्वगृहं** यतिभ्यो **दत्त्वा स्वार्थमन्यगृहकरणे वर्ज्या** भवति । आत्मार्थे पूर्वकृतं गृहं साधुभ्यः प्रदत्तं ततः स्ववसनार्थमन्यन्नवीनं गृहं यदि गृहस्थः करोति, तदा यत् साधुप्रदत्तं गृहं सा वसतिः **वर्ज्या** प्रोच्यते इत्यर्थः ५।।१८५।।

**पासंडिअट्ठविहिआ महवज्जा समणअट्ठ सावज्जा ।**
**महसावज्ज जइट्ठा चरिमा अत्तट्ठकडसुद्धा ।।१८६।।**

व्याख्या—बहूनां श्रमणब्राह्मणप्रभृतीनां **पाखण्डिनामर्थाय** या **विहिता** वसतिः सा **महावर्ज्या** ६। **श्रमणार्थाय** पञ्चानां श्रमणानामर्थाय या कृता सा **सावद्या** ७। ते चामी— **निग्गंथसक्कतावसगेरुअ आजीवि पंच महासमणा'** निर्ग्रन्थाःसाधवः क्षपणका वा, शाक्या रक्तपटाः, तापसा वनवासिनः, गैरुकाः परिव्राजकाः, आजीवका गोसालकशैक्षाःपाण्डुरभिक्षवो वा । या पुनरमीषामेव यतीनामर्थाय कृता सा **महासावद्या** ८। या पुनरात्मार्थं **कृता शुद्धा** च कालातिक्रान्तादिदोषरहिता परिकर्मविप्रमुक्ता सर्वस्यापि परिकर्मणः स्वत एवाग्रे प्रवर्त्तितत्वात् सा वसतिश्च**रमा अल्पक्रिया** वेदितव्या ९।।१८६।।

अथैतासु वसतिषु तिष्ठतः प्रायश्चित्तमाह—

**कालाइआइ लहुगो उवठाणाईसु चउसु चउलहुगा ।**
**महावज्जाइसु गुरुगा अप्पकिरिआइ सुद्धो उ ।।१८७।।**

व्याख्या—**कालातिक्रान्तायां** वसतौ **तिष्ठतो** लघुको **मासो** भवति ऋतुबद्धे काले कालातिक्रान्तं तिष्ठतो **मासलघु** । वर्षाकाले **चत्वारो लघवो** भवन्तीत्यर्थः । **उपस्थानादिषु चतसृषु** उपस्थानायामभिक्रान्तायामनभि—क्रान्तायां वर्ज्यायां चेत्यर्थः, तिष्ठतः प्रत्येकं **चत्वारो लघुकाः** । तथा **महावर्ज्यादिषु तिसृषु** महावर्ज्यायां सावद्यायां महासावद्यायां चेत्यर्थः, प्रत्येकं **चत्वारो गुरवः** । परं तपःकालविशेषितास्तद्यथा—महावर्ज्यायां चत्वारो गुरुकास्तपोलघवः । सावद्यायां तपोगुरवः । महासावद्यायां तपसा कालेन च गुरवः । अल्पक्रियायां तु वसतौ तिष्ठन् **शुद्धः** । प्रायश्चित्तभाग् न भवतीत्यर्थः । आसां च नवानां शय्यानां मध्ये पूर्वस्याः पूर्वस्या अनुज्ञा वेदितव्या । किमुक्तं भवति—नवानां शय्यानां मध्ये या पूर्वाऽल्पक्रिया सा तावत् प्रथममनुज्ञाता, लेशतोऽपि सावद्याभावात् । तस्या अभावे शेषाणां मध्ये कालातिक्रान्ता या पूर्वा सा अनुज्ञाता । अल्पक्रियाया अलाभे सा आश्रयणीयेति भावः । तस्या अप्यलाभे शेषाणां पूर्वा उपस्थाना सा अनुज्ञाता । एवं या या पूर्वा सा सा अनुज्ञाता, तावद्वक्तव्या यावत् सावद्या महासावद्यायाः पूर्वा सा अनुज्ञाता । एवं पूर्वस्याः पूर्वस्या अलाभे उत्तरस्या उत्तरस्या अनुज्ञा वेदितव्या ।।१८७।। अथ विशेषतः सजलवसतिविषयं प्रायश्चित्तमाह—

**सिअउसिणोदगफासुअअफासु चउभंगि सदगसिज्जाए ।**
**ठंतस्स पढमतइए लहुगो लहुगा बिअचउत्थे ।।१८८।।**

व्याख्या—**शीतमुष्णं चोदकं प्रासुकमप्रासुकं** च । अत्र **चतुर्भङ्गी** भवति । तद्यथा—शीतोदकं प्रासुकम्, शीतोदकमप्रासुकम्, उष्णोदकं प्रासुकम्, उष्णोदकमप्रासुकम् । तत्र प्रथमभङ्गे उष्णोदकमेव शीतीभूतं तन्दुलधावनादिकं वा, द्वितीयभङ्गे शीतोदकमेव स्वभावस्थम्, तृतीयभङ्गे उष्णोदकमुद्वृत्तत्रिदण्डम्, चतुर्थभङ्गे तापोदकादिकं मन्तव्यम् । एवं **चतुर्विधोदकेन सहिता** या शय्या तस्यां **तिष्ठतः** साधोः **प्रथमे तृतीये** च **भङ्गे लघुको** मासो भवति । **द्वितीय—चतुर्थे** पुनर्लघुकाश्चत्वारो भवन्ति । एवं गुडमोदकशष्कुलिकाक्षीरदधिनवनीत—सर्पिस्तैललपनश्रीशिखरिणीप्रभृतिविविधाहारप्रतिबद्धवसतौ तिष्ठतश्चतुर्लघवो भवन्ति ।।१८८।।

अथापरवसत्यलाभे आधाकर्मिकस्त्रीसंसक्तवसत्योर्मध्ये कस्यां वस्तव्यमिति विचारं दर्शयति—

**एगा कम्मिअ वसही थीसंसत्ता इअरा दुसुवि गुरुगा ।**
**कारणि कम्मिअवसहीइ वसणमुचिअं न इअरीए ।।१८९।।**

व्याख्या—**एका वसतिः कार्मिकी** आधाकर्मदोषदुष्टा मूलगुणैरशुद्धेत्यर्थः । **इतरा** द्वितीया पुनर्मूलगुणैः शुद्धा परं **स्त्रीसंसक्ता** स्त्रीप्रतिबद्धा **द्वयोरपि** वसत्योः स्थितौ चत्वारो **गुरुगा** इति प्रायश्चित्तं समानमेव । तथापि तयोर्मध्ये **कार्मिकवसतौ कारणे** अपरनिर्दोषवसत्यलाभादिके पुष्टालम्बने **वसनमवस्थानमुचितम्**, न **पुनरितरस्याम्**, स्त्रीसंसक्तवसतौ ।।१८९।। कुतः ? इत्याहुः—

**जं एगकम्मदोसो कम्मिअवसहिवसणे गुरुस्सेव ।**
**इअरीए सव्वेसिं भुत्ताभुत्ताणं बहु दोसा ।।१९०।।**

व्याख्या—**यद्** यस्मात् कारणात् **कार्मिकवसतिवसने** आधाकर्मदोषदूषितायां वसतावस्थाने क्रियमाणे **गुरोरेवाचार्यस्यैव**, न शेषाणामेकः **कर्मदोष** आधाकर्मलक्षणो दोषो भवति। **इतरस्यां** स्त्रीसंसक्तवसतौ पुनः **सर्वेषां** साधूनां **भुक्तभोगानामभुक्तभोगानां** च **बहवो दोषाः** प्रादुष्यन्ति। तथाहि—भुक्तभोगानां स्मृतिकरणम् अभुक्तभोगानां कौतुकं भवति। तत उन्निष्क्रामणादयो दोषाः। गृहिणां च शङ्का जायते। एते अत्र स्थिता नूनं प्रतिसेवन्त इति लोके च परिवादो भवति— 'साधु[A] तपोवने वसती[B]'ति। अथवा यदि स्त्रीसंसक्ता वसतिः पुरुषाकीर्णा पुरुषाश्च सुशीलाः स्त्रियोऽपि शीलवत्यः भीतपरिषदश्च ते पुरुषाः। यद्वा—ताः स्त्रियो बाला अतीववृद्धा वा तरुण्यो वा तेषां साधूनां नालबद्धा अगम्याः तदा आधाकर्मिकवसतिः परित्यज्यते। यतः साधुभिः सर्वत्र यथा बहुतरगुणप्राप्तिः स्यात् तथा प्रवर्त्तितव्यम्। यदागमः—

**जम्हा सव्वाणुन्ना सव्वनिसेहो अ नत्थि समयंमि। आयं वयं तुलिज्जा लाहाकंखी व वाणिअओ'**॥

॥१९०॥ अथ वसतिप्रमार्जनविधिमाह—

**उडुवसहि दो पमज्जण तइअं वासासु अन्नहा लहुगो।**
**वसहि बहुसो पमज्जणि अइसंघट्टन्नहिं गच्छे॥१९१॥**

व्याख्या—यत्राऽपि वसतिस्त्रससंसक्ता न भवति। तत्रापि वसतेरष्टसु **ऋतुबद्धमासेषु द्वे प्रमार्जने कर्त्तव्ये।** तद्यथा—**पूर्वाह्णे अपराह्णे** च। **वर्षासु** पुनस्तृतीयं प्रमार्जनं मध्याह्ने विधेयम्। **अन्यथा** यथोक्तप्रमार्जनाकरणे **लघुको मासः** प्रायश्चित्तं भवति। अथ कुन्थुप्रभृतिभिस्त्रसप्राणैः संसक्ता वसतिस्तत ऋतुबद्धे वर्षामासे च यथोक्तप्रमाणादतिरिक्तमपि **बहुशः प्रमार्जनं** कुर्यात्। अथ वसतेर्बहुशः प्रमार्जने त्रसप्राणानामतीव **सङ्घट्टो** भवति अतिबहवो वा त्रसास्ततोऽन्यत्र उपाश्रये ग्रामे वा **गच्छेयुः**। अथ वसतेरेकदेशे पिपीलिकामत्कोटकादिनगरम् अन्यतरप्राणिसन्तानो वा भवति। तत्राऽयं विधिः—कुटकण्ठं तत्र स्थापयन्ति क्षारेण वोपलक्षितं कृत्वा परिहरन्ति। अनुपयुक्ततया गच्छन् साधून् शैक्षम् अयोगोलकल्पानपरान् वा नोदयन्ति। एवं वसतिविषयं प्रायश्चित्तं प्रदर्शितम्॥१९१॥

अथ वस्त्रमपि मूलोत्तरगुणदुष्टं न ग्राह्यं तद्ग्रहणे प्रायश्चित्तमभिधित्सुराह—

**तणवितणसंजयट्ठा मूलुत्तरपमज्जणाइ चउभंगे।**
**गुरुगा गुरुगा लहुगा विसेसिआ चरिमओ सुद्धो॥१९२॥**

व्याख्या—इह संयतार्थं वस्त्रनिष्पत्तिहेतोःयत् **तननं** तानपरिकर्म **वितननं** च वानपरिकर्म क्रियते। एतौ **मूलगुणौ।** यद् वस्त्रं निष्पन्नं सन्(त्?) खलिकां पाय्यते तत् पायनम्, तदादय **आदिशब्दाज्जलप्रक्षेपधावनधूपनादयो** गृह्यन्ते एते उत्तरगुणा वस्त्रस्य। अत्र **चतुर्भङ्गी** भवति। तननवितनने संयतार्थं पायनमपि संयतार्थम्, तननवितनने संयतार्थं पायनं स्वार्थम्, तननवितनने स्वार्थं पायनं संयतार्थम्, तननवितनने स्वार्थं पायनमपि स्वार्थम्। अत्राद्येषु

---

**A.** सुष्ठु। **B.** वासः।

त्रिषु भङ्गेषु गुरुका गुरुका लघुकाश्च तपःकालाभ्यां **विशेषिताः** प्रायश्चित्तम् । तद्यथा—प्रथमे भङ्गे चत्वारो गुरवः तपसा कालेन च गुरवः । द्वितीयेऽपि चतुर्गुरुकास्तपसा गुरवः कालेन लघवः । तृतीये चत्वारो लघुकाः कालेन गुरवस्तपसा लघवः । **चरमः** चतुर्थो भङ्गो द्वयोरपि मूलोत्तरगुणयोः स्वार्थत्वात् **शुद्धो** निर्दोषः ।।१९२।।

पुनर्वस्त्रविषयमेव प्रायश्चित्तमाह—

**लहुग समणट्ठधोए वत्थेणत्तट्ठिए अ पक्खित्ते ।**
**निक्खित्तु छिन्नकालं सुज्झइ अवहीसमत्तिदिणे ।।१९३।।**

व्याख्या—**श्रमणानां** संयतानाम**र्थाय** यद्वस्त्रं **धौतं** प्रक्षालितं तस्मिन् गृहीते **लघुकाश्च**त्वारा भवन्ति । **ऋणार्त्तस्य** यद्वस्त्रं स्थितं स्यात् तस्मिँश्च वस्त्रे गृहीते **चतुर्लघुकाः**, अथवा **अनात्मस्थिते** परगृहे स्थापिते एवं रूपे **प्रक्षिप्ते** प्रक्षेपकदोषदुष्टे वस्त्रे गृहीते **चतुर्लघुकाः** । **'णत्तट्ठिए'** इति पदस्यार्थोऽन्यथाप्यभ्यूह्यः । ननु प्रक्षेपकदोषः कथं स्यात् ? उच्यते—ये श्रमणश्रमणीजना लिङ्गमात्रधारिणस्ते उद्गमादिभिर्दोषैरशुद्धानि वस्त्राणि गृह्णन्ति स्वयमेव वा तन्तुवायैर्वाययन्ति, लिङ्गतः प्रवचनतोऽपि साधर्मिकाश्च ते इति तेषां वस्त्राण्यकल्पनीयानीति हेतोः साधवो न गृह्णन्ति । ततस्ते लिङ्गस्थाः संविग्नबहुमानिनः सन्तो वस्त्राण्यन्यत्र यथाभद्रककुलादौ प्रक्षिपेयुः । यदि साधवो वस्त्राणि गवेषयेयुस्तदा प्रदद्ध्वमितिकृत्वा । तथा श्रावकाः श्राविकाः साधुस्वजना वा 'अस्मद्गृहे उद्गमदोषाशङ्कया साधवो न गृह्णीयु'रित्यन्यत्र स्थापयेयुः । तथा ऋद्धिमतः श्रेष्ठिसार्थवाहादेर्गृहे यतस्ततः प्रवेशो न लभ्यते, तस्य च पत्नी श्राविका सा भक्तिवशादन्यत्र प्रक्षिपेद् वस्त्राणि । यद्वा—ऋद्धिमान् पाखण्डिनां श्रमणानां वा पुण्यार्थं वस्त्राणि दद्यात् । तत्र साधवो निमन्त्रिता अप्युद्गमाशङ्कातो न गृह्णन्ति, तेन सोऽपि दानश्रद्धालुस्तथैवान्यत्र प्रक्षिपेत् । एवं मामकस्यापि प्रान्तत्वेनेर्ष्यालुत्वेन वा कस्यापि स्वगृहे प्रवेशं न ददात्येवं लक्षणस्य भार्या श्राद्धिका भक्तिभरप्रेरिता सती तथैवाऽन्यस्मिन् गृहे स्थापयेत् । राजपिण्डविवर्जिनः साधवो राजसत्कवस्त्राणि नाददीरन्, ततो राजाऽपि दानश्रद्धालुतयाऽन्यत्र प्रक्षिपेत् । स्तेनस्यापि वस्त्रं साधवो न गृह्णन्ति, ततः सोऽपि संयतभद्रको मदीयं न स्वीकुर्वन्ति इत्यन्यत्र प्रक्षिपेत् । एवं साधूनामर्थाय यदन्यत्र वस्त्राणां प्रक्षेपणं स **प्रक्षेपकदोषः** । यत् पुनः प्रथमं स्वार्थं निक्षिप्य पश्चात् साधूनामनुज्ञायते स **निक्षेपकः** । स च कालेन **छिन्नो** वा स्यादछिन्नो वा । **छिन्नो** नाम निर्द्धारितः । यदि वयं देशान्तरगताः सन्तः एतावतः कालादर्वाक् न प्रत्यागच्छामस्ततो युष्माभिरमूनि वस्त्राणि श्रमणेभ्यः प्रदातव्यानीति । अच्छिन्नः पुनः प्रतिनियतकालविवक्षारहितः । तत्र **यन्निक्षिप्तं** निक्षेपके स्थापितं वस्त्रं **छिन्नकालं** प्रतिनियतकालावधिकं कृतं स्यात् **तदवधिसमाप्तिदिने** यस्मिन् दिनेऽवधिः पूर्णो भवति तस्मिन् दिने **शुद्ध्यति** कल्पते, न परतः स्थापनादोषसद्भावात् । अच्छिन्ने पुनर्यदा प्रयच्छन्ति तदा कल्पते ।।१९३।।

अथाअनादिदूषितमध्यमादिभागवस्त्रग्रहणविषयं प्रायश्चित्तं शेषदोषातिदेशं चाह—

**आसुररक्खसभागे गुरुगंजणमाइदूसिए वत्थे ।**
**पिंडम्मि व वत्थम्मि वि पच्छित्तं सेसदोसेसु ।।१९४।।**

व्याख्या—इह यद्वस्त्रं प्रथमं लभ्यमानं भवति, तस्य प्रथमतस्त्रयो भागाः कल्प्यन्ते । भूयोऽप्येकैको भागस्त्रिधा विभज्यते । एवं नवभागीकृते वस्त्रे ये चत्वारः कोणकास्ते देवसम्बन्धिनो भागाः । यौ द्वावञ्चलमध्यभागौ तौ मनुष्यसम्बन्धिनौ । यौ च द्वौ भागौ कर्णपट्टिकामध्यलक्षणौ तावसुरसम्बन्धिनौ । सर्वमध्यगतः पुनरेको भागो राक्षससत्कः । यदुक्तम्—

**चउरो अ दिव्विआ भागा दुवे भागा य माणुसा । आसुरा य दुवे भागा मज्झे वत्थस्स रक्खसो' ।।**
(नि०भा० ५०८८, बृ०क० २८३३)

एतेषु च नवसु भागेषु अञ्जनखञ्जनकर्दमैः खरण्टितेषु मूषककंसारिकादिभिर्भक्षितेषु अग्निना दग्धेषु तुन्नितेषु रजककुट्टनेन पतितछिद्रेषु जीर्णेषु कुत्सितवर्णान्तरसंयुक्तेषु फलमिदमवबोद्धव्यम् ।

**दिव्वेसु उत्तमो लाभो माणुसेसु अ मज्झिमो । आसुरेसु अ गेलन्नं मज्झे मरणमाइसे' ।।**
(नि०भा० ५०८९, बृ०क० २८३४)

ततो यौ द्वावासुरौ भागौ यश्चैको राक्षसो भागः, एतेषु त्रिषु भागेषु यद्वस्त्रमञ्जनादिभिरादिशब्दात् खञ्जनकर्दममूषकाग्न्यादिभिर्दूषितं भवति, तस्मिन् वस्त्रे गृह्यमाणे गुरुकाश्चत्वारो भवन्ति । आत्मविराधनासद्भावात् आज्ञा च भगवतां विराधिता भवति । अतो यद्वस्त्रं निर्दोषं लक्षणोपेतं च स्यात् तत्साधुभिः संयमनिर्वाहनिमित्तं ग्राह्यं न पुनः कृत्स्नं वस्त्रम् । तच्च चतुर्धा—द्रव्यकृत्स्नम्, क्षेत्रकृत्स्नम्, कालकृत्स्नम्, भावकृत्स्नं च । तत्र यत्सदशं प्रमाणातिरिक्तं वा वस्त्रं तद्द्रव्यकृत्स्नम् । यद्वस्त्रं यत्र क्षेत्रे दुर्लभं बहुमूल्यं वा तत्तत्र क्षेत्रकृत्स्नम् । यद्वस्त्रं यस्मिन् काले अर्थितं (**अर्घितं - बहुमूल्यं**) दुर्लभं वा तत्तस्मिन् काले कालकृत्स्नम्, यथा ग्रीष्मे काषायवस्त्रं शिशिरे प्रावारादि वर्षासु कुङ्कुमादिखचितम् । भावकृत्स्नं द्विधा—वर्णतो मूल्यतश्च । वर्णतः पञ्चविधं वर्णाढ्यं यथा—कृष्णं मयूरग्रीवासन्निभम्, नीलं शुकपिच्छसन्निभम्, रक्तम् इन्द्रगोपकसन्निभम्, पीतं सुवर्णच्छवि, शुक्लं शङ्खेन्दुसन्निभं तदेवंविधं वर्णकृत्स्नम् । द्रव्यादिकृत्स्ने वर्णकृत्स्ने चोत्कृष्टे चतुर्लघु, मध्यमे मासलघु, जघन्ये पञ्चकम् । मूल्यकृत्स्नं पुनस्त्रिविधं—जघन्यं मध्यमं उत्कृष्टं च । तत्र यस्याष्टादश रूपका मूल्यं तज्जघन्यम्, लक्षरूपकमूल्यमुत्कृष्टम्, शेषं मध्यमम् । रूपकप्रमाणं चेदं— द्वीपसत्करूपकद्विके—नोत्तरापथरूपक एकः स्यात् तद्द्वयेन चैकः पाटलिपुत्रीयो रूपकः । अथवा दक्षिणापथरूपकद्वयेन काञ्चिपुरीयरूपकः एकः स्यात् तद्द्वयेन च पाटलिपुत्रीय एकः एवंविधो रूपकोऽत्रावगन्तव्यः । १८ रूपके मूल्ये वस्त्रे **लघुमासः**, २० रूपके **चतुर्लघु**, १०० रूपके **चतुर्गुरु**, २५० रूपके **षड्लघु**, ५०० रूपके **षड्गुरु**, सहस्ररूपके **छेदः**, दशसहस्ररूपके **मूलम्**, पञ्चाशत्सहस्ररूपकमूल्ये **अनवस्थाप्यम्**, लक्षरूपकमूल्ये **पाराञ्चितम्** । पात्रे

पुनरेकादित्रिपर्यन्तकार्षापणमूल्ये **लघुमासः**, चतुराद्यष्टादशपर्यन्तकार्षापणमूल्ये **गुरुमासः** । अग्रतो मूल्यवृद्धौ प्रायश्चित्तवृद्धिर्वस्त्रवत् पात्रेऽप्यवसेया । कृत्स्नवस्त्रबहुमूल्यपात्रग्रहणे च **चौराद्यनर्थः** । इत्थ दिट्ठंतो—एगो राया आयरिआण उवसमइ (एगेण आयरियेणं धम्मकहालद्धिसंपन्नेणं राया उवसामिओ) सो सव्वं गच्छं कंबलरयणेहिं पडिलाभिउं उवट्ठिओ । आयरिएहि निसिद्धो—न वट्टइत्ति । अतिनिबंधा एगं गहिअं । भणाति—पाउएणं हट्टमग्गेणं गच्छह तहा कयं । तेणगेण दिट्ठा । रातिं आगंतुं तेणगेणं भणिअं—जइ न देह वत्थं रायदिण्णं तो भे सिरच्छेअं करेमि । आयरिएहिं भणिअं—खंडिअं दंसेह, दंसिअं । रुट्ठो भणेति—सिव्विउं देह अन्नहा भे मारेमि । तं च सिव्विउं दिण्णं । एवमनेकदोषाः स्वयं ज्ञेयाः । तथा वस्त्रं साधुभिः साधूचितव्यापारविधिना व्यापार्यं न तु शीर्षावरणाद्यविधिना । यदुक्तम्—

**भिक्खविआरविहारे दुइज्जंतो व गाममणुगामं । सीसदुवारं भिक्खू जो कुज्जा आणमाइणि'** ।।

(नि०भा० १५२४)

शीर्षावरणे चोपकरणभोगविपर्यासः, विपर्यासभोगे चेमे प्रकाराः प्रायश्चित्तं च ।

**खंधे दुवारसंजइगरुलद्धंसो अ पट्टलिंगदुगे । लहुगो लहुगो लहुगा तिसु चउगुरु दोसमूलं तु'** ।।

(नि०भा० १५२५)

चतुष्फलं मुत्कलं वा वस्त्रं **स्कन्धे** करोति । **दुवार'** इति **सीसदुवारिआ** शीर्षावरणं करोति द्वे अपि बाहे छादयन् **संयतीप्रावरणेन** प्रावृणोति । एकत उभयतो वा स्कन्धारोपितकल्पाञ्चलकरणेन **गरुडपक्षं** प्रावृणोति । **अर्द्धांस** उत्तरासङ्गः, **पट्ट'** इति चोलपट्टं बध्नाति । **लिङ्गद्विकं** गृहलिङ्गमन्यतीर्थिकलिङ्गं वा करोति । एतेष्वष्टसु विपर्यासोपकरणभोगप्रकारेषु यथासङ्ख्यं पश्चार्द्धोक्तं प्रायश्चित्तमवसेयम् । शीर्षावरणे च त्रिधा छत्रकं भवति । उक्तं च—

**घउफलपुत्ती सीसे बहुपावरणाउ बिइअगं छत्तं । हत्थुक्खित्तं वत्थं तइअं छत्तं च पिच्छाइ'** ।।

(नि०भा० १५२७)

**चतुष्फलं** कल्पं **शिरसि** करोति, **वधूप्रावरणं** नाम अङ्गुष्टिं करोति । एतद्द्वितीयं **छत्रकम्** । **हस्तोत्क्षिप्तं** दण्डके वा कृत्वा धरति इदं तृतीयं छत्रकम् । अथवा द्वे पूर्वोक्ते, तृतीयं **पिच्छादि छत्रकं** धरति । कारणे पुनः शीर्षावरणं कुर्यात् । उक्तं च—

**बिइअपदं गेलन्ने असहू सागारसेहमाईसु अद्धाणतेणएसु अ संजयपंतेसु जयणाए'** ।।

(नि०भा० १५२८)

**ग्लान** उष्णं न सहते कर्णा वा तस्य वातेन भ्रियन्ते । राजादिर्दीक्षितो वा **असहो** धारयति । **शैक्षस्य वा सागारिकमिति** कृत्वा अङ्गुष्टिं करोति । आदिशब्दादशैक्षोऽपि प्रत्यनीकादन्यस्माद्वा शङ्कमानो जात्यादिजुङ्गितो वा करोति । **अध्वनि** वा उष्णं न सहते, तृषितो वा **संयतप्रान्तेषु** वा स्तेनेष्वङ्गुष्टिं करोति । **जयणाए'** त्ति ।

यदि स्वलिङ्गोपधिना शीर्षावरणे कृते ज्ञायते तदा गृहिकाषायादिवस्त्रं गृहीत्वा करोति । एवं यथा न ज्ञायते तथा तथा करोति । एषा यतना । तथा **पिण्डवत् वस्त्रेऽपि शेषदोषेषु प्रायश्चित्तं प्रतिपत्तव्यम्** । अयमर्थः—यथा पिण्डविषयेषु उद्गमोत्पादनैषणासंयोजनालक्षणेषु दोषेषु पूर्वं प्रायश्चित्तं प्रदर्शितं तथा वस्त्रविषयेष्वपि शेषेषु—उक्तेभ्योऽवशिष्टेषु उद्गमोत्पादनैषणासंयोजनारूपेषु दोषेषु प्रायश्चित्तमवगन्तव्यम् ।।१९४।।

अथ वस्त्राऽप्रतिलेखनाविषयं प्रायश्चित्तमाह—

**लहुगा गुरुगो लहुगो उक्कोसादुवहि अपडिलेहाए ।**
**दोसेहि उपेहंते कमेण लहुभिन्नपणगाइं ।।१९५।।**

व्याख्या—**उत्कृष्टाद्युपधीनामप्रतिलेखनायां क्रमेण लघुका गुरुको लघुकश्च** प्रायश्चित्तं भवति । उत्कृष्टमुपधिं न प्रत्युपेक्षते चत्वारो लघुकाः, मध्यमं न प्रत्युपेक्षते गुरुमासः, जघन्यं न प्रत्युपेक्षते लघुमास इत्यर्थः । कल्पव्यवहारयोस्तु मध्यमे लघुमासः । जघन्ये पञ्चकम् । अथारभटासम्मर्दामोसलीप्रभृतिभि**र्दोषैर्दुष्टं प्रत्युपेक्षते** ततः **क्रमेणोत्कृष्टे लघुमासः, मध्यमे भिन्नमासः, जघन्ये रात्रिंदिवपञ्चकम्** । उपधेरप्रतिलेखने चाऽऽज्ञाभङ्गादयो दोषाः । इमे च संयमदोषाः—अप्रतिलेखिते लूतापूटकं सम्बध्यते । पनको भवति । गृहकोकिला प्रसूते । हृतं नष्टं वाऽस्मारितं भवति । ग्रीष्मे वृश्चिकसर्पादयः प्रविशन्त्यप्रतिलेखिते तैरात्मविराधना भवति । भ्रमरी वा गृहं कुर्यात् । यस्मादेते दोषाः तस्मात् सर्वोपधिर्द्विसन्ध्यं प्रतिलेखनीयः । कारणेषु पुनरप्रतिलेखनेऽपि न दोषः । तानि चेमानि—

**असिवे ओमोदरिए गेलन्नद्धाण संभमभए वा । तेणपउरसागारे संजमहेउं च बिइअपयं'** ।।

**अशिवगृहीतो न** शक्नोति प्रतिलेखनां कर्त्तुं तत्प्रतिचारका वा व्याकुलत्वात् । **अवमे** प्रगे एवारब्धा हिण्डितुं प्रतिलेखनाया नास्ति कालः, **ग्लानो न** शक्नोति, एकाकी **अध्वनि** सार्थवशो न प्रत्युपेक्षते, अग्न्यादि**सम्भ्रमे** वा बोधिकादि**भये** वा स्तेने वा **प्रचुरे** सारोपधिं मा पश्यत्विति न प्रत्युपेक्षते । सागारिके वा कृत्स्नोपधिं न प्रत्युपेक्षते । **संयमहेतोर्वा** महिकाभिन्नवर्षसचित्तरजस्सु द्वितीयपदेनाऽप्रतिलेखयन्नपि शुद्धः । प्रत्युपेक्षणा चाऽन्यूनाधिका क्रमेण कर्त्तव्या । तत्र षट् पुरिमा नव खोटका नव प्रमार्जनाश्च भवन्ति । ततो यदि न्यूना अधिका वा क्रियन्ते ततोऽशुद्धा । वेलायां च न्यूनायामधिकायां वा क्रियते ततोऽप्यशुद्धा । अतो वेलायामेव विधेया प्रत्युपेक्षणा । वेला च प्रातस्तदा स्याद् यदा आवश्यकानन्तरं मुखवस्त्रिका—रजोहरण—निषद्याद्वय—चोलपट्ट—कल्पत्रय— संस्तारको— त्तरपट्ट—दण्डकेषु एतेष्वेकादशसूपकरणेषु प्रतिलेखितेषु सूर्य उदेति । क्रमश्चायम्—प्रातः प्रतिलेखनायां पूर्वं मुखवस्त्रिका ततो रजोहरणं ततोऽन्तर्निषद्या ततो बाह्यनिषद्या, चोलपट्टः, कल्पत्रयम्, उत्तरपट्टः, संस्तारकपट्टः, दण्डकश्च । एष क्रमोऽन्यथा उत्क्रमः । पुरुषेषु पुनरयं क्रमः—पूर्वमाचार्यस्य पश्चात् परिज्ञावतस्ततो ग्लानशैक्षादीनाम् । अन्यथा उत्क्रमः । उत्क्रमे च उत्कृष्टमध्यमजघन्योपधिषु क्रमेण चतुर्लघु— लघुमास—पञ्चकानि प्रायश्चित्तम् । प्रतिलेखनां च कुर्वता **आरभटादयः षड् दोषास्त्याज्याः** ।

तत्र यद्विपरीतं करणं त्वरितमन्यान्यवस्त्रग्रहणं वा सा **आरभटा** १, वस्त्रस्य मध्यप्रदेशे कोणाः संवलिता यत्र भवन्ति सा सम्मर्दा तत्रैवोपधावुपवेश्य यत् प्रत्युपेक्षणां करोति सा वा **सम्मर्दा** २, यत्र प्रत्युपेक्षणे वस्त्रमूर्द्ध्वं पीठिषु तिर्यक् कुड्ये अधश्च भूमौ लगति सा **मोसली** ३, यथा गृहस्थो रेणुगुण्डितं वस्त्रं प्रस्फोटयति एवं यद्वस्त्रस्य प्रस्फोटनं सा **प्रस्फोटना** ४, वस्त्रं प्रतिलेख्य यदन्यत्र क्षिपति वस्त्राञ्चलानां वा यदूर्ध्वं क्षेपणं सा **विक्षिप्ता** ५। वेदिका पञ्च प्रकारा । तद्यथा—ऊर्ध्ववेदिका, अधोवेदिका, तिर्यग्वेदिका, उभयतो वेदिका, एकतो वेदिका च । तत्रोर्ध्ववेदिका यदि जानुनोरुपरि हस्तौ च कृत्वा प्रतिलेखयति । अधोवेदिका जानुनोरधो हस्तौ कृत्वा प्रत्युपेक्षते । तिर्यग्वेदिका सन्दशकमध्येन हस्तौ नीत्वा प्रतिलेखयति । उभयतो वेदिका हस्तयोरन्तरे जानुद्वयं कृत्वा प्रतिलेखयति । एकतो वेदिका हस्तयोरन्तरे एकं जानु कृत्वा प्रतिलेखयति (इति पंचप्रकारा वेदिका) ६। एते षड्दोषाः । प्रतिलेखनाविधिस्तु सम्पूर्ण ओघनिर्युक्तितोऽवसेयः (ओ०नि० २६६) तथा प्रत्युपेक्षमाणः षट्सु कायेषु आत्मना प्रतिष्ठितः उपधिर्वा तेषु प्रतिष्ठित इत्यत्र चतुर्भङ्गी । तद्यथा—स्वयं कायेषु प्रतिष्ठितो नोपधिः, उपधिः प्रतिष्ठितो न स्वयम्, स्वयमपि प्रतिष्ठित उपधिरपि प्रतिष्ठितः, स्वयमप्यप्रतिष्ठितः उपधिरप्यप्रतिष्ठितः । ते च षट्काया मिश्रा वा सचित्ता वा भवेयुस्तेषु च साधुरुपधिर्वा अनन्तरं परम्परं वा प्रतिष्ठितो भवेत् । अत्राऽऽद्यभङ्गत्रये स्वस्थानप्रायश्चित्तं प्रागुक्तं षट्कायविराधनाविषयं प्रायश्चित्तमिति भावः । चतुर्थो भङ्गो विशुद्धः । अथ द्वीन्द्रियादित्रसानां शाल्यादिबीजानामस्थिरसंहननिनां रक्षार्थं कायेष्वपि पृथिव्यादिषु दृढसंहननिषु कारणतः प्रत्युपेक्षणा भवति न च प्रायश्चित्तम् । आह—तेषु प्रतिष्ठितः प्रत्युपेक्षणं कुर्वन् सङ्घट्टनादिबाधाविधानात् कथं न दोषभाग् भवतीति ? उच्यते—नदीहरणोपलक्षितं पुत्रज्ञातमत्र—यथा कश्चित् पुरुषः तस्य द्वौ पुत्रौ । तयोरेकः कृशो द्वितीयः स्थूलः । स चान्यदा ताभ्यां सहितः कश्चिद् ग्रामं गच्छन् अपान्तराले एकामपारगभीरां[A] नदीमवतीर्णवान्। स च नदीष्णतया[B] सुखेनैव स्वयं तां तरीतुं शक्तः पुत्रौ तु न तरणकलाकुशलौ । ततः स यदि समर्थः तदा द्वावपि पुत्रावुत्तारयेत् । अथाऽसमर्थस्तर्हि यः कृशस्तं तारयति, लघुशरीरतया तस्य सुखेनैव तारणीयत्वात् । यस्तु स्थूलस्तमुपेक्षते, निजशरीरबहुभारेणात्मानं तं च नद्यां बोलयतीतिकृत्वा । एष दृष्टान्तः । अयमर्थोपनयः— पितृस्थानीयः साधुः । पुत्रद्वयस्थानीयः स्थिराऽ— स्थिरसंहनिनः पृथिवीकायादयः । ततः साधुना प्रथमतो निर्विशेषं षडपि कायाः स्थिरसंहननिनोऽस्थिरसंहननिनोश्च रक्षणीयाः । अथाऽन्यतरेषां विराधनामन्तरेणाध्वगमनादिषु प्रत्युपेक्षणादि न स्यात् ततः स्थिरसंहननिनां पृथिव्यादीनां विराधनामभ्युपेत्याप्यस्थिरसंहननिनस्त्रसादयो रक्षणीया इति । पुनरुपधिविषयमेव प्रायश्चित्तमाह—

**तिविहोवहिणो विच्चुअ विस्सारिअ—पेहिआ—निवेइअए ।**
**तह पाडिअलद्धे वि हु भिन्नं लहु गुरु लहुग सव्वे ।।१९६।।**

---

**A.** भोटी अने ऊंडी' इति भाषायाम् । **B.** भदीनी ऊंडाई – प्रवाह विगेरेने जाणनारो (नदीनो अनुभवी)' इति भाषायाम् ।

व्याख्या—द्विविधाः साधवो—जिनकल्पिकाः स्थविरकल्पिकाश्च । उपधिरपि द्विविध औघिक औपग्रहिकश्च । इहायं प्रागुक्तोऽप्यनुस्मरणार्थमत्रापि लिख्यते—

**ओहेण जस्स गहणं भोगो पुण कारणे स ओहोही । जस्स य दुगंपि नियमा कारणओ सो उवग्गहिओ' ।।**

जिनकल्पिकसाधूनां चोपधिरष्टधा । तद्यथा—द्विविधः, त्रिविधः, चतुर्विधः, पञ्चविधः, नवविधः, दशविधः, एकादशविधः, द्वादशविधश्चेत्यष्टौ भेदाः । एषां च मध्ये कोऽपि केषाञ्चिज्जिनकल्पिकानां भवति । उक्तं च—

**बिअ—तिअ—चउक्क—पणगं—नव—दस—इक्कारसेव बारसगं । एए अट्ठ विगप्पा उवहिम्मि उ हुंति जिणकप्पे ।।**
**रयहरणं मुहपत्ती दुविहो कप्पिक्कजुत्ततिविहो उ । रयहरणं मुहपुत्ती दुकप्प एसो चउद्धा उ ।।**
**तिन्नेव य पच्छागा रयहरणं चेव मुहपुत्ती । पाणिपडिग्गहिआणं एसो उवही उ पंचविहो ।।**
**पत्तगधारीणं पुण नवाइभेआ हवंति नायव्वा । पुव्वुत्तोवहिजोगा जिणाण जा बारसुक्कोसा' ।।**

सप्तप्रकारपात्रोपधिधारिणां पूर्वोक्तद्वित्रिचतुष्पञ्चप्रकारोपधियोगान् नवदशैकादशद्वादशाख्या भेदाः क्रमेण ज्ञेयाः ।

**[१] पत्तं [२] पत्ताबंधो [३] पायठवणं च [४] पायकेसरिआ । [५] पडलाइं [६] रयत्ताणं च [७] गुच्छओ पायनिज्जोगो ।।**
**[८-९-१०] तिन्नेव य पच्छागा [११] रयहरणं चेव होइ [१२] मुहपुत्ती । एसो दुवालसविहो ओही जिणकप्पिआणं तु ।।**
**एए चेव दुवालस [१३] मत्तग[१४]मइरेगचोलपट्टो अ । एसो चउद्दसविहो ओही पुण थेरकप्पंमि' ।।**

(नि०भा० १३९३, १३९४, १३९५, ओ०नि० ६६९, ६७०, ६७१)

एष त्रिविधो **जघन्य—मध्यमो—त्कृष्टभेदात्** । तत्र मुखवस्त्रिका पात्रकेसरिका गुच्छकः पात्रस्थापनं चेतिचतुर्विधो **जघन्यः**, पटलानि रजस्त्राणं पात्रकबन्धश्चोलपट्टको मात्रकं रजोहरणं चेति **षड्विधो मध्यमः**, पतद्ग्रहः कल्पत्रयं चेति **चतुर्विध उत्कृष्टः** । जिनकल्पिकानां तूपधेर्जघन्यमध्यमोत्कृष्टता यथासम्भवं स्थाप्या । आर्यिकाणां पुनरेवम्—

**उक्कोसो अट्ठविहो मज्झिमओ होइ तेरसविहो उ । तह चउव्विहो जहन्नो अज्जाणं पन्नवीसेवं' ।।**

(नि०भा० १४१२, बृ०क० ४०९५, ओ०नि० ६७९)

**कप्पतिअ पडिग्गहगो अब्भिंतरबाहिरा निअंसणिआ संघाडिखंधकरणी उक्कोसो एस अट्ठविहो ।।**
**पत्ताबंधो पडला रयहरणं मत्तकमढरयताणं । उग्गहपट्टो अद्धोरुचलणिकंचुअओ कच्छिवेकच्छी ।।**
**इअ एस तेरसविहो मज्झिमओ तयणु चउविहु जहन्नो । गुच्छगपत्तठवणं मुहणंतयपायकेसरिआ' ।।**

'**कमढ**' त्ति, साध्वीनामेकस्मिन् भाजने भोजनं न भवति किन्तु प्रत्येकं सर्वासां निजोदरमानं **कमढकं** भवति । अन्यथैकभाजनभोजने एकया गुरुकवलयोत्पाटनेऽन्यस्या अप्रीतिसम्भवः स्यादिति । इदानीमौपग्रहिकोपधिस्त्रिधा—

**पीठ निसिज्जा दंडगपमज्जणं घट्टडगलपिप्पलगा । सूई नहहरणी दंतकन्नसोहणदुग जहन्नो' ।।**
(नि०भा० १४१३, बृ०क० ४०९६)

**पीठं** काष्ठमयासनम्, निषीदन्त्वस्यामिति **निषद्या** पादप्रोञ्छनम् । **दण्डकप्रमार्जनं** येन वसतिः प्रमार्ज्यते । **घट्टका** लिप्तपात्रघर्षणोपलाः । **डगल'** त्ति, लेष्टवो यैरपानं निर्लेप्यते । **पिप्पलकः** क्षुरप्रः, **सूची** यया सीव्यते, **नखहरणी**, दन्तशोधनं सिक्थाऽपनयनसिलाका **कर्णशोधनं** चेति जघन्यः ।

**वासत्ताणाईओ मज्झिमगो वासत्ता(ता?)ण पंच इमे । वाले सुत्ते सूई कुडसीसगच्छत्तए चेव' ।।**
**तहिअं दुन्नि अ ओहोवहिंमि वाले अ सुत्तिए चेव । सेस तिअ वासताणा पणगं तह चिलमिणीण इमं' ।।**
**वालमई सुत्तमई वागमई तहय दंडकडगमई । संथारगदुगमझुसिरझुसिरंपि य दंडपणगं च ।।**
**दंडविदंडगलट्ठीविलट्ठि(ट्ठी?) तह नालिया य पंचमिआ । अवलेहणि मत्ततिगं पासवणुच्चारखेले अ' ।।**
**चिंचिणि अत्थुर पाउर तलिग अहवावि चम्मतिविहमिमं । केत्तीतलिगवब्भा पट्टगदुगं चेव होइ मिमं' ।।**
**संथारुत्तरपट्टो अहवा सन्नाहपट्ट पल्हत्थी । मज्झो अज्जाणं पुण अइरित्तो वारगो होइ' ।।**

आसां व्याख्यालेशः— **वाल'** त्ति, **वाला** ऊर्णरूपास्तन्मयं कम्बलकमित्यर्थः । **सुत्त'** त्ति सूत्रमयम् । सूई तालपत्रसूच्यादि खुम्पकः । **कुडसीसगं** पलाशपत्रमयं खुम्पकम् । **छत्रकं** वंशमयम् । **सेस तिअ वासताणा'** और्णिकसौत्रिकादन्यद्वर्षास्पर्शनरक्षकं त्रयमौपग्रहिकम् । **अझुसिरझुसिरं'** अशुषिरः संस्तारको बहुकाष्ठफलकमयः उत्तरत्रैकाङ्गिकभणनात् । **शुषिरः** तृणादिमयः । **दंडे**त्यादि ।

**लट्ठी आयपमाणा विलट्ठि(ट्ठी?) चउरंगुलेण परिहीणा । दंडो बाहुपमाणो विदंडओ कक्खमित्तो उ' ।।**
(ओ.नि. ७३१)

सिरसो उवरिं चउरंगुलदीहा **नालिआ** होइ । **अवलेहिणी** वटोदुंबरप्लक्षाम्लिकाकाष्ठमयी यया पादयोः कर्दमोऽपनीयते । भणिअं च— **वडउंबरे पिलक्खू तस्स अलाभम्मि चिंचिणिआ'** । **अत्थुर'** त्ति, दावाग्न्यादिभये भूमावास्तीर्यति प्रलम्बादिविकरणाय च । **पाउर'** त्ति, षट्पदिकाभये यत् प्राव्रियते । **तलिका** उपानहः । **सन्नाहपट्टो** विहारे उपधेः शरीरेण सह बन्धनार्थः । **पल्हत्थी** योगपट्टः । **वारओ'** त्ति, ससागारिके साध्वीनां प्रस्रवणानन्तरमुदकस्पर्शनार्थं। नित्यं जनमध्य एव तासामुपाश्रयस्यानुज्ञातत्वात् । एष **मध्यमौपग्रहिकः** ।

**अक्खा संथारो वा दुविहो एगंगिओ तदिअरो वा । बिइअपय पुत्थपणगं फलगं तह होइ उक्कोसो' ।।**
(नि०भा० १४१६, बृ०क० ४०९९, व्य०सू० १२९ टीका)

**अक्खा** अक्षा आचार्योपकरणम् । **संस्तारको** द्विविधः **एकाङ्गिकः** तिनिसकाष्ठरूपः, **तदितरो** दवरकावबद्ध—कम्बिकामयः । **प्रथमपदमुत्सर्गः** तदपेक्षया **द्वितीयपदमपवादः** । तत्र **पुस्तकपञ्चकम्** अग्रे वक्ष्यमाणस्वरूपम् । **फलकं** पट्टिका यस्यां लिखित्वा पठ्यते । **एष उत्कृष्टौपग्रहिकः** ।

अयं साधूनां साध्वीनां च त्रिविधोऽप्यौपग्रहिकः । एतस्य चौघिकौपग्रहिकोपधेस्त्रिविधस्यापि मध्यात् **विच्चुअ'** त्ति पदं सूत्रकारेणैव **तह पाडिअलद्धे विहु'** इत्यनेन पदेन व्याख्यातम् । ततो **विच्युतं** नामाऽनाभोगेन पातितं ततः

पुनर्लब्धं ततश्च **जघन्ये** उपधौ **पातितलब्धे भिन्नमासः । मध्यमे** पातितलब्धे **लघुमासः । उत्कृष्टे** पातितलब्धे **गुरुमासः** । तथा **विस्मारितप्रेक्षितानिवेदने । प्रेक्षितं** प्रतिलेखना । अयं भावः—प्रतिलेखनाया विस्मारणे विस्मार्यां प्रतिलेखनां गुरूणामनिवेदने च **जघन्यस्य भिन्नमासः । मध्यमस्य लघुमासः । उत्कृष्टस्य गुरुमासः । सर्वस्मिँश्चोपधौ पातितलब्धे विस्मारितप्रतिलेखने** 'न प्रतिलिखित' इति **गुरूणामनिवेदिते** च **चतुर्लघु** । इदं च मुखवस्त्रिकारजोहरणव्यतिरिक्तस्योपधेः प्रायश्चित्तं ज्ञेयम् । तयोः **मुहणंतय**'त्ति (मूलगाथा १९८) गाथायां प्रायश्चित्तस्य वक्ष्यमाणत्वात् ।।१९६।।

**हारिअधोउग्गमिआनिवेअणादिन्नभोगदाणेसु ।**
**तिविहोवहिम्मि गुरु लहुग गुरुग सव्वम्मि छल्लहुगा ।।१९७।।**

व्याख्या—**हारितधौतोद्गमितानिवेदनादत्तभोगदानेषु गुरुचतुर्लघुचतुर्गुरूणि भवन्ति** । अयं भावः—**हारिते** नाशिते, **धौते** क्षालिते, **उद्गमितानिवेदने** उद्गम्योत्पाद्योपधिं गुरोरनिवेदिते, **अदत्तभोगे** गुर्वदत्तेऽपि परिभुक्ते, **अदत्तदाने** गुर्वननुज्ञयाऽप्यन्यस्य दत्ते, **त्रिविधोपधौ** जघन्यमध्यमोत्कृष्टभेदे **यथाक्रमं प्रायश्चित्तमिदं**—यथा—जघन्ये उपधौ गुरुमासः । मध्यमे चतुर्लघु । उत्कृष्टे चतुर्गुरु । **सर्वस्मिँस्तूपधौ** हारिते, वर्षारम्भकालेऽपि धौते, उत्पाद्य गुरोरनिवेदिते, गुर्वदत्तेऽपि परिभुक्ते, गुर्वननुज्ञयाऽप्यन्यस्य दत्ते **षड्लघुकाः** प्रायश्चित्तम् ।।१९७ तथा—

**मुहणंतयरयहरणे फिडिअम्मि कमेण भिन्नचउगुरुगा ।**
**नासिअ हारविए वा जीएणं गुरुग छल्लहुगा ।।१९८।।**

व्याख्या— **फिडिय' त्ति** । **स्फिटण्** पदभ्रंशे विकल्पे' **भन्ताश्चुरादय'** इतीन्प्रत्ययाभावे कर्त्तरि निष्ठाप्रत्यये च **स्फिटित** इति रूपम् । अथ गाथार्थः—चतुर्दिशमात्मप्रमाणं क्षेत्रमवग्रहः, तस्मादवग्रहात् **स्फिटिते** बहिर्भूते **मुखानन्तके क्रमेण भिन्नमासः रजोहरणे चतुर्गुरुका** इति जीतकल्पचूर्णौ । निशीथभाष्ये तु साधोः सकाशात् हस्तमात्रातिक्रमेऽपि रजोहरणस्योत्सङ्घट्टनोक्ता । परचक्रादिसम्पाते चकितत्वेन च **नाशिते** पातिते निजप्रमादेन वा **हारिते मुखानन्तके जीतव्यवहारेण चतुर्गुरु** । **रजोहरणे षड्लघु** ।।१९८।।

अथ सामान्येनाऽप्रत्युपेक्षणाऽप्रमार्जनाविषयप्रायश्चित्तमाह—

**अप्पेहऽपमज्जणि चउभंगे तुरिए दुपेहदुपमज्जे ।**
**चउभंगी इअ सत्तसु तिसु लहु तिसु पण चरिम सुद्धो ।।१९९।**

व्याख्या—**अप्रेक्षणं** चक्षुषा, **अप्रमार्जनं** रजोहरणेन । तत्र **चत्वारो भङ्गा** भवन्ति । तद्यथा—**दण्डकग्रहणे** न प्रत्युपेक्षते न प्रमार्जयतीत्येको **भङ्गः** । न प्रत्युपेक्षते, प्रमार्जयतीति **द्वितीयः** । प्रत्युपेक्षते, न प्रमार्जयतीति **तृतीयः** । प्रत्युपेक्षते प्रमार्जयतीति **चतुर्थः** । तत्र **तुर्ये** चतुर्थे **भङ्गे दुष्प्रेक्षणे दुष्प्रमार्जने चतुर्भङ्गी** भवति । तथाहि—दुष्प्रत्युपेक्षते दुष्प्रमार्जयति, दुष्प्रत्युपेक्षते सुप्रमार्जयति, सुप्रत्युपेक्षते दुष्प्रमार्जयति, सुप्रत्युपेक्षते

सुप्रमार्जयति । इत्येवं सप्त भङ्गा भवन्ति । एतेषु च सप्तभङ्गेषु मध्ये त्रिषु आद्येषु भङ्गेषु लघुमासः, शेषेषु त्रिषु रात्रिंदिवपञ्चकं प्रायश्चित्तं भवति । चरमे सप्तमे भङ्गे शुद्धो विधिना प्रवृत्तेः । यथा दण्डकग्रहणे सप्त भङ्गा दर्शिताः । तथा दण्डकनिक्षेपेऽधस्तात् भूमेरुपरि च दण्डशिरः—सम्पर्कविषयभित्तिप्रदेशे अप्रेक्षणाऽप्रमार्जना—विषयाः सप्त भङ्गा वाच्याः । षट्सु प्रायश्चित्तं पूर्ववत् । सप्तमस्तु शुद्धः । एवं परेषामप्युपकरणानां ग्रहणे निक्षेपणे च सप्त भङ्गाः प्रायश्चित्तं च तथैव । तथा—अविधिना खेलमल्लके निष्ठीवने दण्डक इव सप्त भङ्गा दण्डक इवैव चाद्येषु त्रिषु प्रत्येकं लघुमासः । उत्तरेषु त्रिषु प्रत्येकं रात्रिंदिवपञ्चकम्, सप्तमभङ्गवर्त्तिनस्त्वनिष्ठीवका एव विधिना निष्ठीवनात् । उपरितनेष्वपि च त्रिषु भङ्गेषु यदि भूमौ निष्ठीव्यति तदा मासलघु । यच्च निष्ठीवने प्राणिनां परितापनाद्युपजायते तन्निष्पन्नं च तस्य प्रायश्चित्तम् । एवमविधिना कण्डूयनेऽपि दण्डक इव सप्त भङ्गास्तथैव च प्रायश्चित्तविधिः । तथा वस्त्रादिकमातपात् छायायाम्, छायाया वा आतपे सङ्क्रामयन् न प्रत्युपेक्षते न प्रमार्जयतीत्यादयः पूर्ववत् सप्त भङ्गाः, पूर्ववदेव चाद्येषु षट्सु भङ्गेषु प्रायश्चित्तविधिः । सप्तमे तु भङ्गे शुद्धः । एवं मार्गे व्रजन् अस्थण्डिलात् स्थण्डिले स्थण्डिलाद्वा अस्थण्डिले । तथा—कृष्णभूमात्प्रदेशान्नीलभूमौ नीलभूमेर्वा कृष्णभूमिप्रदेशे । एवं शेषवर्णेष्वपि प्रत्येकं योजनीयम् । तथा—अध्वनो ग्रामप्रवेशे ग्रामाद्वा अध्वनि सङ्क्रामन् पादौ न प्रत्युपेक्षते न प्रमार्जयतीत्यादयो दण्डक इव प्रत्येकं सप्त भङ्गा दण्डक इवैव च षट्सु भङ्गेषु प्रायश्चित्तम्, सप्तमे तु शुद्धः । एवमन्यत्राप्यप्रतिलेखनाऽप्रमार्जनाविषयं प्रायश्चित्तमवगन्तव्यम् ।।१९९।।

एवं वस्त्रविषयं प्रायश्चित्तमभिधाय पात्रविषयं प्रायश्चित्तमभिधातुकामस्त्रिविधपात्रोत्क्रमग्रहणप्रायश्चित्तमाह—

**तुंबयदारुअमट्टिअपायं उक्कोस मज्झिम जहन्नं ।**
**उप्परिवाडीगहणे चाउम्मासा भवे लहुगा ।।२००।।**

व्याख्या—पात्रं त्रिविधं—तुम्बकमयं दारुमयं मृत्तिकामयम् । एकैकं त्रिविधम्—उत्कृष्टं मध्यमं जघन्यम् । उत्कृष्टं पतद्ग्रहो, मध्यमं मात्रकम्, जघन्यं टोप्परिकादि । एकैकं पुनस्त्रिधा—यथाकृतम् अल्पपरिकर्म बहुपरिकर्म च । तत्र यथाकृतं यत् पूर्वमेव कृतमुखं कृतलेपं तादृशं कुत्रिकापणे लभ्यते, निह्नवो वा प्रतिमाप्रतिनिवृत्तः श्रमणोपासको वा तादृशं ददाति । अर्द्धाङ्गुलं यावद्यच्छेद्यं स्यात्तदल्पपरिकर्म । यदर्द्धाङ्गुलात् परतश्छेद्यं भवति तत् बहुपरिकर्म । एतेषां पात्राणामुत्परिपाट्या विपर्यासेन ग्रहणे चत्वारो मासा लघुका भवन्ति । उपलक्षणत्वाल्लघुमास—रात्रिंदिवपञ्चके अपि । इदमुक्तं भवति—उत्कृष्टस्य यथाकृतस्य पात्रस्योत्पादनाय निर्गतस्तस्य योगं त्रिःपर्यटनरूपमकृत्वाऽल्पपरिकर्मोत्कृष्टमेव गृह्णाति चतुर्लघु । सपरि[A]कर्म वा प्रथमत एव गृह्णाति चतुर्लघु । यदा यथाकृतम्, योगे कृतेऽपि न लभ्यते तदा अल्पपरिकर्म गवेषणीयम् । तस्योत्पादनाय निर्गतः प्रथमत एव सपरि[A]कर्म गृह्णाति चतुर्लघु । इति त्रीणि चतुर्लघुकानि । एवं मध्यमस्यापि त्रिषु स्थानेषु त्रीणि मासिकानि, जघन्यस्य स्थानकत्रयेऽपि त्रीणि रात्रिंदिवपञ्चकानि । यथा यथाकृतादिविपर्यस्तग्रहणे प्रायश्चित्तं

**A.** बहुपरिकर्म ।

तथोत्कृष्टादीनामपि परस्परं विपर्यस्तग्रहणे प्रायश्चित्तम् । तद्यथा—उत्कृष्टस्य प्रतिग्रहस्यार्थाय निर्गतो मध्यमं मात्रकं गृह्णाति मासिकम् । जघन्यं टोप्परिकादि गृह्णाति पञ्चकम् । मध्यमस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु । जघन्यं गृह्णाति पञ्चकम् । जघन्यस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु । मध्यमं गृह्णाति मासिकम् ।।२००।। अथ मूलोत्तरगुणदुष्टपात्रग्रहणप्रायश्चित्तमाह—

**मुहकरणं मूलगुणा निक्कोरणमुत्तरे गुरुग मूले ।**
**उत्तरगुणि लहुग अकोरिए अ झुसिरत्तिऽबीए वि ।।२०१।।**

व्याख्या—पात्रस्य **यन्मुखकरणं तन्मूलगुणाः** । यत् पुनर्मुखकरणानन्तरं तदभ्यन्तरवर्तिनो गिरस्योत्कीरणं **तन्निक्कोरणमित्यभिधीयते तदुत्तरगुणाः** । तत्र **मूले** मूलगुणदुष्टे पात्रे गृहीते **गुरुकाश्चत्वारो** भवन्ति । **उत्तरगुणे** उत्तरगुणदुष्टे **पुनर्लघुकाश्चत्वारो** भवन्ति । इदमुक्तं भवति—अत्र चतुर्भङ्गी—संयतार्थं कृतमुखं संयतार्थमेवोत्कीर्णमिति प्रथमो भङ्गः । संयतार्थं कृतमुखं स्वार्थमुत्कीर्णमिति द्वितीयः । स्वार्थं कृतमुखं संयतार्थमुत्कीर्णमिति तृतीयः । स्वार्थं कृतमुखं स्वार्थमेवोत्कीर्णमिति चतुर्थः । अत्र त्रिषु भङ्गेषु प्रायश्चित्तम् । तद्यथा—प्रथमे भङ्गे चत्वारो गुरुकाः तपसा कालेन च गुरवः । द्वितीयेऽपि चतुर्गुरुकाः तपसा गुरवः कालेन लघवः । तृतीये चतुर्लघुकाः कालेन गुरवस्तपसा लघवः । चतुर्थे भङ्गे शुद्धः । उभयस्यापि स्वार्थत्वात् । तथा **अकोरितेऽ**नुत्कीर्णे भाजने **अबीजेऽपि** बीजविरहितेऽपि गृहीते **चतुर्लघुका** भवन्ति । **शुषिरमिति**कृत्वा, शुषिरं हि दुर्निरीक्षत्वेन दुष्प्रतिलेख्यं भवति ।।२०१।।

अथ दग्धत्वादिदोषदूषितपात्रकग्रहणप्रायश्चित्तमाह—

**अंतो बहिं च दड्ढे पुप्फगभिन्ने अ चउगुरू हूंति ।**
**अन्नह भिन्ने लहुगा हुंडाइसु सत्तसु वि लहुगो ।।२०२।।**

व्याख्या—इह साधुना एवंविधलक्षणयुक्तं पात्रकं धारणीयं न तु निर्लक्षणम् । यदुक्तम्—

**वट्टं समचउरंसं होइ थिरं थावरं च वन्नड्ढं । हुंडं वायाइद्धं भिन्नं च अधारणिज्जाइं'** ।।
(बृ०क० ४०२२,नि०भा० ५८४६, ओ०नि० ६८७)

**वृत्तं** वर्तुलं तदपि **समचतुरस्रम्** उच्छ्रयेण पृथुत्वेन च तुल्यम्, **स्थिरं** सुप्रतिष्ठानं दृढं वा, **स्थावरम**प्रातिहारिकम्, **वर्णाढ्यं** स्निग्धवर्णोपेतम् । एवंविधं लक्षणयुक्तं पात्रं धार्यम् । तथा **हुण्डं** विषमसंस्थितं यत् समचतुरस्रं न भवति । **वाताविद्धं** यन्निष्पत्तिकालमन्तरेणाऽर्वागपि शुष्कम् । आतपसङ्कुचितं वलिभूतं च सञ्जातम् । **भिन्नं** नाम सछिद्रं राजियुक्तं च । एवं शबलं विचित्रवर्णम् । दुष्पुतं पुष्पकमूलेन प्रतिष्ठितं यत् स्थाप्यमानमूर्ध्वं तिष्ठति, वालितं पुनः प्रलुठति । कीलकसंस्थानं कूर्पराकारं कीलकवद्दीर्घम् । पद्मोत्पलम् अधः पद्मोत्पलाकार—पुष्पकयुक्तम् । सव्रणं क्षतसहितं दग्धम् अग्निना ध्यामितम् । एतान्युपलक्षणतया **अधारणीयानि**। यतः सलक्षणनिर्लक्षणपात्रकयोरिमे गुणदोषाः ।

**संठिअम्मि भवे लाभो पइट्ठा सुपइट्ठिए । निव्वणे कित्तिमारुग्गं वन्नड्ढे नाणसंपया ।।**
**हुंडे चरित्तभेओ सबलम्मि अ चित्तविब्भमं जाण । दुप्पुए खीलसंठाणे नत्थि ठाणं ति निद्दिसे' ।।**
(बृ०क० ४०२३-४०२४,नि०भा० ५८४७-५८४८, ओ०नि० ६८८-६८९)

गणे चरणे च स्थानं नास्ति ।

**पउमुप्पले अ कुसलं सव्वणे वणमाइसे । अंतो बहिं च दड्ढे मरणं तत्थ निद्दिसे' ।।**
(बृ०क० ४०२५,नि०भा० ५८४९, ओ०नि० ६९०)

अतो दग्धत्वादिदूषिते पात्रके धार्यमाणे प्रायश्चित्तम्, तद्यथा— **अन्तर्मध्ये बहिश्चोपरिष्टात्** दग्धे पात्रे **पुष्पकभिन्ने च पुष्पकं** पात्रकस्य नाभिस्तत्र यद्भिन्नं तस्मिन् पात्रके धार्यमाणे **चत्वारो गुरुका भवन्ति** । **अन्यत्र** पुष्पकाद्व्यतिरिक्तेषु कुक्ष्यादिस्थानेषु **भिन्ने** पुनः पात्रके **चतुर्लघुकाः** । **हुण्डादिषु सप्तस्वपि**—हुण्डे, वाताविद्धे, दुष्पुते, कीलकसंस्थाने, शबले, सव्रणे, अवर्णाढ्ये चेत्यर्थः । पात्रकेषु धार्यमाणेषु **लघुको मासो** भवति। तथा पात्रं प्रमाणोपेतं धार्यं हीनाधिकप्रमाणे पात्रे चतुर्लघुका भवन्ति । पात्रकप्रमाणं चेदम्—

**तिन्नि विहत्थि चउरंगुलं च भायणस्स मज्झिमपमाणं । इत्तो हीण जहन्नं अतिरेययरं तु उक्कोसं' ।।**
(बृ०क० ४०१३, नि०भा० ५८३७, ओ०नि० ६८१)

इदं पात्रकपरिधिप्रमाणम् । अथवा—

**उक्कोस तिसामासे[A] दुगाउअद्धाणमागओ साहू । चउरंगुलवज्जं भत्तपाणपज्जत्तयं हिट्ठा' ।।**
(बृ०क० ४०१४, नि०भा० ५८३८, ओ०नि० ६८३)

मात्रकप्रमाणं पुनरिदं—

**सुक्कोदणस्स भरिअं दुगाउ अद्धाणमागओ साहू । भुंजइ एगट्ठाणे एअं खलु मत्तगपमाणं ।।**
(पंचव० ८१९, बृ०क० ४०६८)

**भत्तस्स व पाणस्स व एगतरागस्स जो भवे भरिओ । पज्जत्तो साहुस्स उ बिइअं पि अ मत्तगपमाणं'।।**
(ओ०नि० ७१५, बृ०क० ४०६९)

।।२०२।। अथ पात्रकपरिकर्मणप्रायश्चित्तमाह—

**कारणविहिपरिकम्मे चउभंगो पढम सुद्ध तिसु लहुगो ।**
**तवकालेहिं विसिट्ठो तवकालगुरु चरिमभंगो ।।२०३।।**

व्याख्या—पात्रकस्य **कारणे** सति **विधिना** सूत्रोक्तेन **परिकर्मणं** बन्धनलेपनादिकं विधेयम् । अत्र **चतुर्भङ्गी** । कारणे विधिना परिकर्मणमित्येको **भङ्गः** । कारणे अविधिनेति **द्वितीयः** । निष्कारणे विधिना **तृतीयः** । निष्कारणे अविधिनेति **चतुर्थः** । अत्र **प्रथमो भङ्गो विशुद्धो**ऽनुज्ञातत्वात् । **शेषेषु त्रिषु** भङ्गेषु **लघुको मासः तपःकालाभ्यां विशिष्टो** भवति । तत्र **द्वितीयभङ्गे कालगुरुः**, **तृतीये तपोगुरुः** । **चरमः** चतुर्थो भङ्गस्तपः**कालगुरुः**। तपःकालाभ्यां गुरुर्लघुमासश्चतुर्थे भवतीत्यर्थः ।।२०३।।

---

**A.** उत्कृष्टस्तृड्मासः स उच्यते यस्मिन् अतीवप्रबला पिपासा समुल्लसति स च ज्येष्ठः अषाढो वा ।

अथ शोभादिनिमित्तपात्रकलेपदानप्रायश्चित्तमाह—

**संजमहेउं लेवो न विभूसा गारवेण वा देओ ।**
**चउगुरुग विभूसाए लिंपंते गारवेणं वा ।।२०४।।**

(बृ०क०५२७)

व्याख्या—लेपः पात्रस्य दातव्यः **संयमहेतोर्न विभूषया न वा गारवेण** । **संयमहेतोः** पुनर्दीयमाने लेपे यदि विभूषा भवति तथापि संयमहेतोरेव । अत्र सत्या असत्या च दृष्टान्तः । तथाहि—सत्यपि आत्मानं विभूषयति असत्यपि, केवलं सती कुलाचारनिमित्तमात्मानं विभूषयतीति तुल्यमपि तद्विभूषणमदुष्टम् इतरा जारतोषणनिमित्तमिति दोषवत् । एवं यथा सत्यसत्यौ तथा साधू । यथा विभूषणं तथा लेपः । यथा कुलाचारः तथा संयमः । यथा जारतोषणं तथा असंयमः । **विभूषया गारवेण** वा **लिम्पतो** लेपं ददतः प्रायश्चित्तं **चतुर्गुरुकाः** । तथा रात्रौ लेपं गृहीत्वा रात्रावेव च भाजने ददाति । अत्र प्रायश्चित्तं चतुर्लघुकास्तपःकालगुरुकाः, रात्रौ लेपं गृहीत्वा दिवा ददाति चतुर्लघुकास्तपोगुरवः, दिवा लेपं गृहीत्वा रात्रौ ददाति चतुर्लघुकाः कालगुरवः, दिवा गृहीत्वा दिवैव ददाति तदा शुद्धः । इति पात्रविषयं प्रायश्चित्तमभिहितम् ।।२०४।।

एवमुत्तरगुणप्रायश्चित्ताधिकारे पिण्डशय्यावस्त्रपात्रविषयप्रायश्चित्तप्रतिपादनेनाऽकल्पविषयप्रायश्चित्तमुक्त्वा गृहिमात्रादिविषयं प्रायश्चित्तमभिधित्सुराह—

**गिहिमत्ते पलिअंके लहुगा पडिहारिवत्थमाइगहे ।**
**चउगुरुग रायपिंडे तहित्थिकहगिहनिसिज्जासु ।।२०५।।**

व्याख्या—**गृहिणां** गृहस्थानां **मात्रं** भाजनं मणिसुवर्णरजतताम्रकांस्यलोहदारुमृदादिमयम्, तस्मिन् योऽशनादि भुङ्क्ते तस्य **चतुर्लघुकाः** । आज्ञाभङ्गादयश्च दोषाः । तथा गृहिभाजनभोजने पुरःकर्मपश्चात्कर्मादिभिः षट्कायविराधना । तथा **पर्यङ्के** पल्यङ्के, उपलक्षणत्वात् आसन्दीमञ्चकाशालकेषु शयनासने कुर्वतः **चतुर्लघु** आज्ञादयश्च दोषाः । तथा **प्रातिहारिकवस्त्रादिग्रहे** प्रातिहारिकं गृहस्थसत्तास्थमेव कियत्कालव्यापारणाय गृहीतं वस्त्रादि, **आदिशब्दात्** कम्बलादि तस्य व्यापारणे **चतुर्लघुकाः** । आज्ञादयश्च दोषाः । साधुव्यापारेण मलिने च धावनादयो दोषाः । तथा **राजपिण्डे** यो मूर्द्धाभिषिक्तः सेनापत्यमात्यपुरोहितश्रेष्ठिसार्थवाहसहितो राज्यं भुङ्क्ते स राजा तस्य पिण्डोऽशनादिरष्टविधः । यदुक्तम्—

**असणाइआ चउरो वत्थे पाए अ कंबले चेव । पाउंछणए अ तहा अट्ठविहो रायपिंडो अ' ।।**

(बृ०क० ६३८४, नि०भा० २५००)

तस्मिन् **राजपिण्डे** गृह्यमाणे **गुरुकाश्चत्वारः** । तथा **स्त्रीणां** पुरतस्त्रीणि चत्वारि पञ्च वा व्याकरणानि कारणेऽनुज्ञातानि, ततः परं तु षष्ठादिव्याकरणरूपामपरिमितां **कथां** कथयतश्चतुर्गुरुकाः । आज्ञादयश्च दोषाः

शङ्कादिदोषाश्च । द्वितीयपदेन तथाविधकारणे स्त्रीणामग्रेऽपि धर्मकथां कथयेत् । तत्र तासु दृष्टिमबध्नन् वृद्धासु वा दृष्टिं बध्नन् वैराग्यकथां कथयतीति विधिः । तथा **गृहनिषद्यायां चतुर्गुरुकाः** । गोचरचर्यादिगतो गृहिणां गृहे निषदनं कुर्वतश्चतुर्गुरुका भवन्तीत्यर्थः । आज्ञाभङ्गादयश्च दोषाः। जराभिभूतादेस्तु गृहे निषीदतो न दोषः ।।२०५।। तथा साधूनां स्नानं न कल्पते । तत् करणे प्रायश्चित्तं प्रतिपिपादयिषुराह—

**आइन्न जयण कारण देसे ण्हाणंमि भंग सोलसगं ।**
**जत्थाऽऽइन्नं सव्वे कारणि नाइन्न ते सुन्ना ।।२०६।।**

व्याख्या—इह **स्नानं द्विधा—देशस्नानं सर्वस्नानं** च । तत्र मुखनयनचलनदन्तकक्षाबाहुप्रभृतिशरीरावयवधावनं **देशस्नानं**, सर्वाङ्गप्रक्षालनं **सर्वस्नानम्** । तत्र देशस्नानं द्विधा—**आचीर्णम् अनाचीर्णं** च । **आचीर्णं** यत् साधुभिराचर्यति। **अनाचीर्णं** तद्विपरीतम् । **आचीर्णमपि** द्विविधं—**कारणे निष्कारणे** च । यत्कारणे तदपि द्विधा—**भक्तामर्षे लेपे** च । तत्र **भक्तामर्षे**ऽशनादिना लेपकृता द्रव्येण हस्तौ लिप्तौ ततस्तौ मणिबन्धं यावद् धाव्येते यत् । **लेपे** पुनरिदम्—अस्वाध्यायिकमूत्रपुरीषादिना यावन्मात्रः शरीरावयवश्चलनादिः खरण्टितस्तावन्मात्रः स धाव्यते यत् । एतत्**कारणतः** । निष्कारणे पुनस्तद्विपरीतम् । भक्तामर्षे लेपे च यत् स्नानं तद**ाचीर्णम्**, शेषं देशस्नानं सर्वस्नानं वा **सर्वमनाचीर्णम्** । एतत्सर्वमपि स्नानं यतनयाऽयतनया वा स्यात् । तत्र त्रिप्रसृतिप्रमाणप्रासुकपानीयेन यत्स्नानं क्रियते तत् यतनया, तदधिकेन पुनरयतनया । ततः स्नाने आचीर्ण—यतना—कारण—देशानामेतेषां चतुर्णां पदानां सप्रतिपक्षाणां षोडश भङ्गा भवन्ति । ते च प्रस्तारतो यथा—एतेषु च

| | | | |
|---|---|---|---|
| ।।।। | ।ऽ।। | ऽ।।। | ऽऽ।। |
| ।।।ऽ | ।ऽ।ऽ | ऽ।।ऽ | ऽऽ।ऽ |
| ।।ऽ। | ।ऽऽ। | ऽ।ऽ। | ऽऽऽ। |
| ।।ऽऽ | ।ऽऽऽ | ऽ।ऽऽ | ऽऽऽऽ |

षोडशभङ्गेषु ये भङ्गा अत्र न घटन्ते तानुत्तरार्द्धेनोपदर्शयति । यथा यत्र भङ्गे **आचीर्णग्रहणं** दृश्यते तत्रैव यदि **सर्वग्रहणं** दृश्यते ततः पूर्वापरविरोधान्न **घटते**ऽसौ भङ्गः । यत्र च **कारणग्रहणमनाचीर्णग्रहणं** च दृश्यतेऽसावपि न **घटते**, ततस्ते भङ्गाः सर्वेऽपि शून्या ज्ञातव्याः। शेषभङ्गा अत्र ग्राह्यास्तेषु प्रथमे भङ्गे शुद्धः । शेषेषु प्रायश्चित्तम् ।।२०६।। एतदेवाह—

**सेसे पढम ति इगदस बारस पण सत्त पनरस सोलसमे ।**
**सुद्धो लहु३ लहु११ लहुगा१२ तिसु५।७।१५ लहुगो चउलहु१६ कमेण ।।२०७।।**

व्याख्या—ये भङ्गाः शून्यास्तान् वर्जयित्वा ये **शेषा** भङ्गा भवन्ति । तेषु यः **प्रथमो** भङ्ग आचीर्णो यतनया कारणे देशस्नानमित्येवंरूपस्तस्मिन् भङ्गे **शुद्धः** । ततस्तृतीयादिषु भङ्गेषु लघुकादि प्रायश्चित्तं **क्रमेण** ज्ञातव्यम्,

तद्यथा—**तृतीये लघुकः । एकादशे लघुकः । द्वादशे चतुर्लघुकाः । पञ्चमे सप्तमे पञ्चदशे** च भङ्गे **लघुको मासः । षोडशे** भङ्गे पुनश्चतु**र्लघुकाः** । आज्ञाऽनवस्थामिथ्यात्वविराधनाश्च भवन्ति । इमे च दोषाः स्नाने षड्जीवनिकायविराधना । स्नानप्रतिबन्धः । अस्नानसाधुशरीरेभ्यो निर्मलशरीरोऽहमिति गारव विभूषा । अस्नानपरीषहाऽजयः। लोकस्याविश्रम्भः । उक्तं च—

**छक्कायाण विराहण तप्पडिबंधो अ गारव विभूषा । परिसहभीरुत्तंपि अ अविसासो चेव ण्हाणंमि'** ।। द्वितीयपदे ग्लानस्याध्वश्रान्तस्य वा देशस्नानं सर्वस्नानं वा न दुष्टम् । वादिनो वादपर्षदं गच्छतः पादादि—देशस्नानं सर्वस्नानं वा आचार्यस्याऽतिशय इति कृत्वा देशस्नानं सर्वस्नानं वाऽनुज्ञातम् ।।२०७।।

अथ कालातीतादिभक्तादिप्रायश्चित्तमाह—

**भिन्नं कालद्धाणाइत्थिअकरणंमि गुरुग परिभोगे ।**
**अविहिविगिंचिणिआए भत्ताईणं तु लहुमासो ।।२०८।।**

व्याख्या—विकथादिप्रमादेन विस्मृत्या भक्तादेः **कालाध्वातिक्रान्तकरणे** कालातीते अध्वातीते वा भक्ते पाने वा **कृते भिन्नमासः** । कालाध्वातीतस्य भक्तादेः **परिभोगे चतुर्गुरुकाः** । कालाध्वातीतानामशुद्धगृहीतानामधिकीभूतानां वा **भक्तादीनामन्येषां** वा परिष्ठापनीयानां प्रस्रवणादी**नामविधिविवेचनायाम**शुद्धस्थण्डिलादौ परित्यागे पुन**र्लघुमासः** ।।२०८।। अथवा—

**संसट्ठासंसट्ठे निद्धे चउगुरुग लुक्खसंसट्ठे ।**
**गुरुगो इअरे लहुगो भत्ते संपइ अविहिचाए ।।२०९।।**

व्याख्या—**संसृष्टे असंसृष्टे** वा **स्निग्धे** भक्ते अविधिना परिष्ठापिते **चतुर्गुरुकाः** । **रूक्षसंसृष्टे गुरुको मासः** । **इतरस्मिन्** रूक्षासंसृष्टे **भक्ते अविधिना त्यक्ते लघुको** मासः । सम्प्रति इदानीं सामाचार्यागतमिदं प्रायश्चित्तमविधिपरिष्ठापनेऽवगन्तव्यम् । आगमे च परिष्ठापनेऽयं विधिः—मूलगुणाशुद्धे भक्ते परिष्ठाप्यमाने एकः पुञ्जः, उत्तरगुणाशुद्धे लोभातिरेकगृहीते च द्वौ पुञ्जौ । आचार्यग्लानप्राघुर्णकदुर्लभत्वसहसाला—भहेतुकगृहीतेऽधिकीभूते शुद्धे भक्ते त्रयः पुञ्जा वीथ्यादिनिर्गतानां साधूनां शुद्धाशुद्धपरिज्ञानार्थं क्रियन्ते । दुष्टविद्यामन्त्रचूर्णविषकृतं तु भक्तं भस्माक्रान्तं कृत्वा परिष्ठाप्यते । साम्प्रतं तु सर्वं परिष्ठाप्यं प्रायो भस्माक्रान्तं कृत्वा परिष्ठाप्यते ।।२०९।। तथा—

**चउलहु भागे पाए चउगुरु किमिपाय संखडे वमणे ।**
**लहुगो इरिओवओगाकरणे सज्झाय गुरुगो अ ।।२१०।।**

व्याख्या—प्रमादादिना हस्तपातनादितः **पात्रे भग्ने चतुर्लघु** । **कृमिपातः**, **कृमयो** व्रणापानकुक्षिसमुद्भवा जन्तवस्तेषां **पातः** पातनं निष्कासनं स चतुर्धा—निष्कारणे अविधिना, निष्कारणे विधिना, कारणे अविधिना, कारणे विधिना।

काष्ठादिभिरविधिः । अङ्गुल्यादिभिस्तु विधिः । अत्र चतुर्थे भङ्गे शुद्धो विधिना प्रवृत्तत्वात् । शेषेषु त्रिषु प्रायश्चित्तं **चतुर्गुरु** । निशीथे तु आद्यभङ्गद्वये चतुर्लघु । तृतीये लघुमासः । उत्सर्गेण विधिना अविधिना वा न ते निष्कास्या यतस्तेषु विराध्यमानेषु संयमविराधना, क्षते त्वात्मविराधना ततोऽधिसोढव्यम् । यदुक्तं **निशीथचूर्णौ— सीस आह—वेअणट्टेण किं कायव्वं ?' आयरिअ आह—**

**भच्चुप्पइअं दुक्खं अभिभूओ वेअणाए तिव्वाए । अद्दीणो अव्वहिओ दुक्खं अहिआसए सम्मं'** ।।
(नि०भा० १५०३)

**नच्चत्ति** ज्ञात्वा, किं ज्ञात्वा ? दुः**क्खमुत्पन्नम्**, वेद्यते इति **वेदना तिव्वाए वेअणाए सव्वं सरीरं व्याप्त'** मित्यर्थः । न दीणो **अदीणो** पसण्णमणो स्वभावस्थ इत्यर्थः । न वा **ओहयमणसंकप्पे** । अथवा हा माते ! हा पिते ! एवमादि न भासए जो सो अदीणो, न वेअणट्टो अप्पणो सिरोरुकुट्टणादि करेति । अथवा न वेअणट्टो चिंतेइ अप्पाणं मारेमित्ति । तं **दुक्खमुप्पन्नं सम्मं अहिआसेअव्वं** इत्यर्थः । कारणे पुण नीहरणं करिज्ज ।

**अव्वुच्छित्तिनिमित्तं जीविअट्टी समाहिहेउं वा । गंडादीसुं किमिए जयणाए नीहरे भिक्खू'** ।
(नि०भा० १५१३)

**'सुत्तत्थाणं अव्वुच्छित्तिं करिस्सामि'** त्ति । **जीवितट्टी** वा जीवंतो संजमं करिस्सामि, चउत्थाइणा वा तवेणं अप्पाणं भाविस्सामि, **नाण—दंसण—चरित्तसमाहिसाहणट्ठा** वा अथवा **समाहिमरणेण** वा मरिस्सामि त्ति । **किमिए जयणाए नीहरिज्ज** । जयणा जहा जीवोवघाओ न भवतीत्यर्थः । तथा **संखडे** सङ्खड्यां **चतुर्गुरु** । इदमुक्तं भवति—सङ्खडी द्विविधा—आचीर्णा अनाचीर्णा च । साधूनां कल्पनीया आचीर्णा, इतरा अनाचीर्णा। तत्रैता अनाचीर्णाः—

**जावंतिआ पगणिआ सखित्त अखित्त बाहिराइण्णा । अविसुद्धा पंथ गमणा सपच्चवाया सभेआ य'** ।।
(नि०भा० १७७२, बृ०क० ३१८४)

तटिककार्प्पटिकादीनां सर्वेषां यस्यां दीयते सा **यावन्तिका** । यस्यां पुनः पाखण्डिनामेव दश सरजस्कानां दश शाक्यानां दश परिव्राजकानां दश श्वेतपटानामेवं गणितानां दीयते सा **प्रगणिता** । **स्वक्षेत्रे या** सक्रोशयोजनाभ्यन्तरे, **अक्षेत्रे या** सचित्तपृथिव्यां सचित्तवनस्पतिकायादिषु या स्थिता । **बाह्या या** सक्रोशयोजनप्रमाणक्षेत्रावग्रहाद् बहिः । **आकीर्णा** चरकपरिव्राजकसरजस्कादिभिस्तटिककार्प्पटिकादिभिश्च या आकुला । यस्या मार्गः पृथिव्यब्वनस्पतित्रसैः संसक्तो भवति सा**ऽविशुद्धपथा** । सिंहादिश्वापदस्तेनादिप्रत्यपायसहिता **सप्रत्यपाया** । यस्यां विषकुटिलप्रयोगेण जीवितचरित्रभेदो भवति सा **सभेदा** । एताः सर्वा अपि सङ्खड्यो**ऽनाचीर्णाः** । यावन्तिकादिदोषविप्रमुक्ता **आचीर्णाः** । अनाचीर्णासु च नवसु सङ्खडीषु गच्छतः प्रायश्चित्तम्, तद्यथा— **यावन्तिकायां चतुर्लघु । प्रगणितायां चतुर्गुरु । स्वक्षेत्रसङ्खड्यां चतुर्लघु । अक्षेत्रसङ्खड्यां कायप्रायश्चित्तम् । बाह्यायामर्द्धयोजनार्द्धयोजनवृद्धौ चतुर्लघु—चतुर्गुरुप्रभृति । आकीर्णायां चतुर्गुरु । अविशुद्धपथायां कायप्रायश्चित्तमेव।**

सप्रत्यपायायां दर्शनापाये चतुर्लघु । ब्रह्माद्यपाये चतुर्गुरु । सभेदायां चतुर्गुरु । तथा वमने सञ्जाते च चतुर्गुरु । तथा हस्तशताद् बहिर्गमनागमनादौ ईर्याया ईर्यापथिक्या अप्रतिक्रमणे उपयोगाकरणे च लघुमासः । तथा पौरुषीचतुष्टये स्वाध्यायाकरणे गुरुको मासः । साधुना हि सततं विशुद्धस्वाध्यायध्यानबद्धादरेण भाव्यम् । यदुक्तं **श्रीमहानिशीथे—**

गोयमा ! णं पव्वज्जा—दिवस—प्पभिईए जहुत्त—विहिणोवहाणेणं जे केई साहू वा साहुणी वा अपुव्व—नाण—गहणं न कुज्जा तस्सासइं विराहियं सुत्तत्थोभयं सरमाणे एगग्ग—चित्ते पढम—चरम—पोरिसीसु दिया राओ य णाणुगुणेज्जा से णं गोयमा ! णाणकुसीले णेए ।

से भयवं ! जस्स अइगुरुय—नाणावरणोदएणं अहंनिसं पहोसेमाणस्स[A] संवच्छरेणावि सिलोगऽद्धमवि णो थिरपरिचियं भवेज्जा से किं कुज्जा ? गोयमा ! तेणावि जावज्जीवाभिग्गहेणं सज्झायसीलाणं वेयावच्चं तहा अणुदिणं अड्ढाइज्जे सहस्से (२५००) पंचमंगलाणं सुत्थत्थोभए सरमाणे गग्गमाणसे पहोसिज्जा ।

से भयवं ! केणं अट्ठेणं ? गोयमा ! जे भिक्खू जावज्जीवाभिग्गहेणं चाउक्कालियं वायणाइ जहासत्तीए सज्झायं न करेज्जा से णं णाणकुसीले णेए ।

अन्नं च—जे केई जावज्जीवाभिग्गहेण अपुव्वं नाणाहिगमं करेज्जा, तस्सासत्तीए पुव्वाहियं गुणेज्जा, तस्सावियासत्तीए पंचमंगलाणं अड्ढाइज्जे सहस्से परावत्ते सेवि आराहगे तं च नाणावरणं खवित्ताणं तित्थयरे इ वा गणहरे इ वा भवित्ता णं सिज्झिज्जा ।

**से भयवं ! । केण अट्ठेणं एवं वुच्चइ जहा णं चाउक्कालियं सज्झायं कायव्वं ? गोयमा ।**

**मण—वयण—कायगुत्तो नाणावरणं खवेइ अणुसमयं । सज्झाए वट्टंतो खणे खणे जाइ वेरग्गं ।।१०८।।**

**उड्ढमहे—तिरियंमि य जोइस—वेमाणिया य सिद्धी य । सव्वो लागालोगो सज्झाय—विउस्स पच्चक्खो ।।१०९।।**

**दुवालस—विहंमिवि तवे साब्भिंतरबाहिरे कुसल—दिट्ठे । णवि अत्थि न वि य होही सज्झायसमं तवोकम्मं ।।११०।।**

**एग—दुति—मासक्खमणं संवच्छरमवि य अणसिओ होज्जा । सज्झायझाणरहिओ एगोवासफलं पि ण लभेज्जा ।।१११।।**

**उग्गम—उपायण—एसणाहिं सुद्धं तु निच्च भुंजंतो । जइ तिविहेणाउत्तो अणुसमय भवेज्ज सज्झाए ।।११२।।**

**ता तं गोयम ! एगग्गमाणसत्तं ण उवमिउं सक्का । संवच्छरखवणेणवि जेण तहिं णिज्जराऽणंता ।।११३।। (युग्मम्)**

**पंचसमिओ तिगुत्तो खंतो दंतो य निज्जरापेही । एगग्गमाणसो जो करेज्जा सज्झायं सो मुणी मन्ने ।।११४।।**

**जो वागरे पसत्थं सुयनाणं जो सुणेइ सुद्धभावो । ठइयासव—दारत्तं तक्कालं गोयमा ? दोण्हं ।।११५।।**

**एगंपि जो दुहत्तं[B] सत्तं पडिबोहिउं ठवइ मग्गे । ससुरा—ऽसुरंमि वि जगे तेणेह घोसिओ अमाघाओ[C] ।।११६।।**

**धाउ—पहाणो कंचणभावं न य गच्छई किया—हीणो । एवं भव्वोवि जिणोवएस—हीणो न बुज्झेज्जा ।।११७।।**

---

**A.** प्रघोषयतः । **B.** दुःखार्तं । **C.** अभयघोषणा ।

गय–राग–दोस–मोहा धम्मकहं जे करेंति समयन्नू । अणुदियहमवीसंता सव्वप्पावाण मुच्चंति ।।११८।।
निसुणंति अ भयणिज्जं, एगंतं निज्जरं कहंताणं । जइ अन्नहा ण सुत्तं अत्थं वा किंचि वाएज्जा ।।११९।।
एएणं अट्ठेणं गोयमा ! एवं वुच्चइ जहा णं जावज्जीवं अभिग्गहेणं चाउक्कालियं सज्झायं कायव्वंति, तहा अ गोयमा ! जे भिक्खू विहीए सुपसत्थनाणमहिज्जेऊण नाणमयं करेज्जा से वि नाणकुसीले, एवमाइनाणकुसीले अणेगहा पन्नविज्जंति । (महानिशीथसूत्रम् अध्ययन – ३ सूत्र ३६-३७-३८) ।।२१०।।

अथावश्यकाविधिकारणप्रायश्चित्तमाह—

**फिडिए सयमुस्सारिअ भग्गे वेगाइवंदणुस्सग्गे ।**
**कमसो भिन्नं लहुगुरु मासो सव्वंमि चउलहुगा ।।२११।।**

व्याख्या—स्फिटिते स्वयमुत्सारिते भग्ने वा एकादिवन्दनोत्सर्गे । क्रमशो भिन्नलघुगुरुमासाः । सर्वेषु चतुर्लघुकाः । अयं भावार्थः—निद्रादिप्रमादवशतो गुरुभिः सह प्रतिक्रमणे स्फिटितो न मिलितः । एकस्मिन् कायोत्सर्गे भिन्नमासः । द्वयोर्लघुमासः । त्रिषु गुरुमासः । तथा गुरुभिरपारितेऽपि कायोत्सर्गे स्वयमात्मना प्रथममेव पारिते, भग्ने वा कायोत्सर्गे अचिन्तयित्वापि सर्वं चिन्तनीयमन्तराल एव पारिते । एकद्वित्रिसङ्ख्ये कायोत्सर्गे यथासङ्ख्यं भिन्नलघुगुरुमासाः । सर्वेष्वपि च कायोत्सर्गेषु स्फिटितत्वे भग्नत्वे च चतुर्लघु । एवं वन्दनकेऽपि स्फिटितत्वे पश्चात्पतितत्वे गुरोर्वन्दनकं ददानस्य स्वयमग्रतः प्रदत्ते कृताकृतत्वे भग्ने वा यथासङ्ख्यमेकस्मिन् भिन्नमासः । द्वयोर्लघुमासः । त्रिषु गुरुमासः । सर्वेषु चतुर्लघु ।।२११।।

यस्तु कायोत्सर्गादीनि न करोत्येव तस्य किमित्याह—

**अकएसु अ तेसु पुणो लहुगुरुचउलहुग चउगुरु सव्वे ।**
**पुव्वमपिहि अथंडिल निसि वोसिरणे दिवा सुअणे ।।२१२।।**

व्याख्या—अकृतेषु पुनस्तेषु कायोत्सर्गेषु वन्दनकेषु च एकादिषु एकद्वित्रिषु लघुगुरुचतुर्लघुकाः क्रमेण भवन्ति । सर्वस्मिंस्तु प्रतिक्रमणे अकृते चतुर्गुरु । तथा पूर्वं सन्ध्यायामप्रेक्षितस्थण्डिले निशि सञ्ज्ञोत्सर्गे कृते, दिवा स्वापे च कृते चतुर्गुरु ।।२१२।। तथा—

**कोहे बहुदेवसिए आसवकक्कोलमाइएसुं वा ।**
**लसुणाइसु लहुमासो तन्नाईबंधमुअणे अ ।।२१३।।**

व्याख्या—अत्र वाशब्दोऽनुक्तसमुच्चये । तेन पूर्वोक्तं चतुर्गुरु प्रायश्चित्तमाकृष्यते । ततश्च क्रोधे बहुदेवसिके चिरकालीने पक्षाच्चातुर्मासकाच्चोपर्यपि रहिते चतुर्गुरु । तथा 'आसवकक्कोलमाइएसु' । आसवो धातक्यादिभावित— इक्षुरसस्तस्मिन् कथञ्चित्पीत इति शेषः । कक्कोलादिषु कक्कोललवङ्गपूगफलजातिफलताम्बुलादिषु च भक्षितेषु चतुर्गुरु प्रायश्चित्तम् । लशुनादिषु अचित्ते लशुने, आदिशब्दात् पलण्डौ च भक्षिते । तथा 'तन्नाइ' त्ति । तर्णो वत्स आदिशब्दात् मयूरतित्तिरादयः तेषां बन्धोन्मोचने लघुमासः ।।२१३।।

---

**A.** श्रमरहिताः । **B.** 'डुंगळी' इति भाषायाम् ।

**भूतिगअपेह अज्झुसिरतण भिन्नं सेसपंचगेसु लहू ।**
**चउलहु पुत्थयपणए अपेहि पणगे गुरुगं च तसे ।।२१४।।**

व्याख्या—इह साधुभिः चतुर्भागावशेषायां चरमपौरुष्यां प्रस्रवणोच्चारकालभूमयः प्रतिलेख्याः ताः सप्तविंशतिर्भवन्ति । तद्यथा—उपाश्रयस्य मध्ये कायिकाभूमयस्तिस्रोऽनधिसहनीया आसन्ने मध्ये दूरे चाधिसहनीया अपि तिस्रः । एवमेताः षट् कायिकाभूमयो वसतिमध्ये । बहिरप्येवमेव षट् कायिकाभूमयः । एवं प्रस्रवणे द्वादश । एवं सञ्ज्ञाभूमयोपि द्वादश । तिस्रः कालमण्डलभूमयः । एवमेताः सर्वाः सप्तविंशतिः । ततो **भुवां** प्रस्रवणोच्चारकालभूमीनां **त्रिकं भूत्रिकं** तस्याऽप्रत्युपेक्षणे **भिन्नमासः** । निशीथे तु लघुमासः आज्ञादयश्च दोषाः । अप्रतिलेखिते च स्थण्डिले यदि व्युत्सृजति ततः षट्कायविराधना । बिलादिसम्भवे अप्रतिलेखिते अहिवृश्चिकादिभिरात्मविराधना । स्थण्डिलं न प्रतिलेखितमिति न व्युत्सृजति यदि ततो मूत्रनिरोधे चक्षुर्विनाशः । वर्चोनिरोधे जीवितनाशः । ग्लानकार्यव्याकुलत्वाग्निसम्भ्रमग्रामविकालप्राप्त्यादिकारणैः पुनरप्रतिलेखयन्नपि शुद्धः । तथा **अशुषिरतृणेषु** दर्भादिषु निष्कारणं परिभुक्तेषु **भिन्नमासः** । **शेषपञ्चकेषु लघुमासः** । तानि च पञ्चकानि—तृणपञ्चकं १ अप्रतिलेख्यदूष्यपञ्चकं २ दुष्प्रतिलेख्यदूष्यपञ्चकं ३ पुस्तकपञ्चकं ४ चर्मपञ्चकं चेति ५ । तत्र शालिव्रीहिकोद्रवरालकारण्यकतृणरूपं तृणपञ्चकम् । तूली संस्कृतरु(रू[B]?)तादिभृता अर्कतूलादिभृता वा प्रतीता १ आलिङ्गनिका[A] पुरुषप्रमाणा या राजेति बुद्ध्या समालिङ्ग्य राजान्तःपुर्यः शेरते २ मस्तकोपधानं हंसरोमादिपूर्णमुच्छीर्षकं ३ गल्लमसूरिका ४ पञ्चमो मसूरकश्चर्मकृतो वस्त्रकृतो वा बूयादिपूर्ण आसनक्रियायोग्यश्च क्वलकगष्टिकारूपः ५ । एतदप्रतिलेख्यदूष्यपञ्चकं सर्वथापि प्रत्युपेक्षितुमशक्यम् अन्तश्चक्षुरविषयत्वात् । कोयवि—प्रावारक—पूरिका—दाढिकालि—विरालिकाख्यं दुष्प्रतिलेख्यदूष्यपञ्चकं चक्षुषा सम्यगनिरीक्ष्यम् । तत्र कोयविर्नाम रूतपूरितपट्टरूपा या लोके माणिकीत्युच्यते १ । प्रावारो बृहत्कम्बलो नेपालादिः प्रतिशीरा वा २ । पूर्यते स्तोकैरपि तन्तुभिः पूर्णा भवतीति पूरिका स्थूलशणगुणमयपट्टात्मिका यया धान्यगोणिकाः क्रियन्ते हस्त्याद्यास्तरणानि च ३ । दाढिकालिर्यमलिततन्तुद्वयव्यूता पटी । अयमन्वयः । मुखमध्ये हि यमलितोभयदन्त—पङ्क्तिरूपा दाढिकालि—दंष्ट्रिकावलिर्निरीक्ष्यते । एवं द्विसूत्रपट्यपि । और्णिकी सौत्रिकी वा दाढिकालिसदृशीव दृश्यमाना प्रतिभातीति दाढिकालिरित्युच्यते ४ । विरालिका नाम द्विसरसूत्रपटी ५ । तथा गण्डीपुस्तकः १ कच्छपिपुस्तकः २ मुष्टिपुस्तकः ३ छेदपाटीपुस्तकः ४ सम्पुटफलकपुस्तकः ५ चेति पुस्तकपञ्चकम् । एतत्स्वरूपं चेदं—

**'बाहल्लपुहत्तेहिं गंडीपुत्थो अ तुल्लगो दीहो । कच्छवि अंते तणुओ मज्झे पिहुलो मुणेयव्वो ।।**
**चउरंगुलदीहो वा वट्टागिइमुट्ठीपुत्थगो अहवा । चउरंगुलदीहु च्चिय चउरंसो होइ विन्नेओ ।।**
**दीहो वा हस्सो वा जो पिहुलो होइ अप्पबाहल्लो । तं मुणिअसमयसारा छिवाडिपुत्थं भणंतीह' ।।**

(द०वै०नि०गा० ४६)

---

**A.** मोटो तकीयो' इति भाषायाम् । **B.** रू' इति भाषायाम् ।

**संपुडगो दुगमाइ–फलगा** । गोमहिषाऽजैडकमृगाणां चर्माणि चर्मपञ्चकम् । द्वितीयमपि चर्मपञ्चकं भवति। यथा–तलिगाखल्लगवद्धे कोसगकत्ती अ बीअं तु । कोशकाद्याधारं चर्म । कृत्तिः प्रलम्बविकर्तनाय । अत्र च तृणपञ्चके दुष्प्रतिलेख्यदूष्यपञ्चके चर्मपञ्चके च निष्कारणपरिभुक्ते **लघुमासः** । **अप्रतिलेख्य दूष्यपञ्चके गुरुमासः** । **पुस्तकपञ्चके** च गृहीते **चतुर्लघुकाः** । यच्च त्रसानां द्वीन्द्रियादीनाम् पुस्तकान्तर्गतानां वा वधे आपद्यते तदपि च प्रायश्चित्तं भवतीत्यर्थः । त्रसविराधना च पुस्तकेष्वित्थमुक्ता ।

**जइ तेसिं जीवाणं तत्थ गयाणं तु लोहिअं हुज्जा । पीलिज्जंते धणिअं गलिज्ज तं अक्खरे फुसिउं ।।**

(नि०भा० ४००७, बृ०क० ३८३०)

**यदि तेषां तत्र गतानां** पुस्तकपत्रान्तरस्थितानां **जीवानां** कुन्थुप्रभृतीनां **लोहितं भवेत्** । ततः पुस्तकबन्धनादिकाले तेषां **धणियं** गाढतरं **पीड्यमानानां** तत् **रुधिरमक्षराणि स्पृष्ट्वा** बहिः **परिगलेत्** । अत एव—

**जत्तिअमित्ता वाराउ मुंचई बंधई व जइ वारा । जइ अक्खराणि लिहइ तइ लहुगा जं च आवज्जे ।।**

(नि०भा० ४००८, बृ०क० ३८३१)

**यावन् मात्रान् वारान्** पुस्तकं **मुञ्चति** छोटयति । **यति वारांश्च बध्नाति** । **यति** वा यावन्ति **अक्षराणि लिखति** । **तति** तावन्ति **चतुर्लघूनि** । **यच्च** कुन्थुपनकादीनां सङ्घट्टनं परितापनमपद्रवणं वा **आपद्यते** तन्निष्पन्नं च प्रायश्चित्तं भवति । द्वितीयपदेन तु मेधाधारणादिपरिहाणिं विज्ञाय कालिकोत्कालिकश्रुतस्य दानग्रहणादौ भाण्डागारमेवेदं भविष्यतीत्येवमर्थं पुस्तकपञ्चकमपि गृह्यते । उक्तं च–घिप्पइ पुत्थगपणगं कालिअनिज्जुत्ति–कोसट्ठा ।।२१४।। तथा—

**छल्लहु अकालधुअणे फुल्लिअ–धुवणंडुवद्दवे छगुरू ।**
**मत्तविणु बहिनिरोहे लहुगा लोहे गुरुग नट्ठे ।।२१५।।**

व्याख्या—वर्षारम्भकालं विना यदुपधिप्रक्षालनं **तदकालधावनं** तच्च साधूनां न कल्पते । अनेकदोषसम्भवात् । उक्तं च—

**'उउबद्धधुवण बाओस बंभविणासो अट्ठाणठवणं च । संपाइमवाउवहो पावणभूओवघाओ अ' ।।**

(पिं०नि० ३१)

**ऋतुबद्धे** काले **चीवरधावने** चरणं **बकुशं** भवति **उपकरणबकुशत्वात्** । तथा **ब्रह्मविनाशो** मैथुनप्रत्याख्यानभङ्गः । प्रक्षालितवासःपरिधानभूषितशरीरो हि विरूपोऽपि रमणीयत्वेन प्रतिभासमानो रमणीनां रमणयोग्योऽयमिति प्रार्थनीयो भवति, किं पुनः शरीरावयवरामणीयकोपशोभितः । ततः कामिनीकटाक्षविक्षेपादिक्षोभितोऽवश्यं ब्रह्मचर्यादपभ्रश्यति । तथा **अस्थानस्थापनम्** । इयमत्र भावना—यदि कथञ्चित्तत्त्ववेदितया संयमविषयनिष्प्रकम्प–धृत्यवष्टम्भतो न ब्रह्मचर्यादपभ्रश्यति तथापि लोकेनासौऽस्थाने स्थाप्यते । यथा—नूनमयं कामी कथमन्य–

थात्मानमित्थं भूषयति । न खल्वकामी मण्डनप्रियो भवतीति । तथा **सम्पातिमानां** मक्षिकादीनां प्रक्षालनजलादिषु निपततां **वायोश्च वधो** भवति । तथा **प्लावनेन** प्रक्षालनजलपरिष्ठापने पृथिव्यां रेल्लणेन **भूतोपघातः** पृथिव्याश्रितकीटिकादिसत्त्वोपमर्द्दो भवति । तस्मान्न ऋतुबद्धकाले वस्त्रं क्षालनीयम् । नन्वेते दोषा वर्षाकालादर्वागपि धावने सम्भवन्ति । ततस्तदानीमपि न चीवराणि प्रक्षालनीयानि । तन्न, तदानीं चीवराऽप्रक्षालने अनेकदोष—सम्भवात् । उक्तं च—

**अइभार चुडण पणए सीअलपाउरणजीरगेलन्ने । ओहावण कायवहो वासासु अधोवणे दोसा ।।**
(पिं०नि० ३२)

वर्षाकालादर्वागपि यदि वासांसि न प्रक्षालयन्ते तदा**नीमतिभारः** सर्वतः सलिलमयीसु वर्षासु क्लिन्नमलसम्पर्कतो वासांसि गुरुतरभाराणि भवन्ति । तथा **'चुडणं' ति** । वाससामधावने वर्षासु जीर्णताभवनेन शाटो भवति । न च वर्षासु अभिनववस्त्रग्रहणं न चाधिकः परिग्रहस्ततो वस्त्राभावे ये दोषाः समये प्रसिद्धास्ते सर्वेऽपि यथायोगमुपढौकन्ते । तथा मलक्लिन्नेषु वस्त्रेषु **पनकः** सञ्जायते । तथा वर्षासु **शीतलीभूतवाससां प्रावरणे** भुक्ताहारस्या**जीर्णतायां ग्लानत्वमु**पजायते । तथा च सति प्रवचनस्यापभ्राजना । यथा अहो ! बटरशिरोमणयो[A]ऽमी तपस्विनो ये नाम वर्षासु अप्रक्षालितानां वाससां परिभोगे मान्द्यमुपजायते इत्येतदपि नावबुध्यन्ते—ते पृथग्जनापरिच्छेद्यं[B] स्वर्गापवर्गमार्गमवगच्छन्तीति दुःश्रद्धेयम् । तथा भिक्षाद्यर्थं विनिर्गतस्य साधोर्मेघवृष्टौ मलिनवस्त्रकम्बलसम्पर्क—तो**ऽप्कायविराधना** । एते **वर्षासु** वर्षाप्रत्यासन्नकाले वस्त्रादीना**मप्रक्षालने दोषा**स्तस्मादवश्यं वर्षाकालादर्वाग् वासांसि प्रक्षालनीयानि । ये च सम्पातिमसत्त्वोपघातादयो दोषाश्चीवरप्रक्षालने प्रोक्तास्तेऽपि सूत्रोक्तनीत्या यतनया प्रवर्तमानस्य न सम्भवन्ति । यो हि सूत्राज्ञामनुसृत्य यतनया सम्यग् प्रवर्त्तते स यद्यपि कथञ्चित् प्राण्युपमर्द्दकारी तथापि नासौ पापभाग् भवति । नापि तीव्रप्रायश्चित्तभागी । सूत्रे बहुमानतो यतनया प्रवर्त्तमानत्वात् । सूत्रं चेदम्—

**अप्पत्ति च्चिअ वासे सव्वं उवहिं धुवंति जयणाए । असइए उदगस्स य जहन्नओ पायनिज्जोगो ।।**

आचार्यादीनां पुनरकालेपि वस्त्रधावने न दोषः । यदुक्तम्—

**आयरिअ—गिलाणाण य मइला मइला पुणोवि धोवंति । मा हु गुरूण अवण्णो लोअंमि अजीरणं इअरे ।।**
(पिं०नि० ३४)

ततश्च **शेषसाधोरकाले** ऋतुबद्धकाले कल्प—चोलपट्टादेः कियन्मात्रस्योपधेः प्रक्षालने **षड्लघु प्रायश्चित्तम्**, सर्वस्य तूपधेरकालधावने प्रायश्चित्तमग्रे भणिष्यते । तथा **पुष्पितस्य** पनकजीवाश्रितस्योपधेः **प्रक्षालने अण्डस्य** चटकादिसत्त्व**स्योपद्रवे** प्रमादादिना विनाशे च **षड्गुरु** । तथा **मात्रकं विना बहिः** केवलभूमावेव **निरोधे कृते[C] चतुर्लघुकाः** । **लोहे** सूचीनखहरणिकादिके **नष्टे चतुर्गुरुकाः** ।।२१५।। तथा—

---

**A.** मूर्खः । **B.** प्राकृत (= सामान्य) जनागम्यम् । **C.** (तुला) नि०भा० १८५७ णिरोहं करोति वोसिरति ।

**लहु कायऽभंग कवाडपिल्लणे लहुग कालऽपडिकमणे ।**
**मंडलिअपडिक्कमणे समं कुसीलेहिं पडिक्कमणे ।।२१६।।**

व्याख्या—**कायस्य** शरीरस्याभ्यङ्गस्तैलादिना मर्दनम् । अस्थिमांसरोमत्वक्सुखप्रदा सम्बाधनेत्यर्थः । तस्मिन् कायाभ्यङ्गे निष्कारणे कृते कारिते च **लघुमासः** । एवं कायस्य कल्कादिना उद्वर्त्तने मलप्रस्वेदस्फेटने नखसंस्करणे दीर्घरोमकर्त्तने काष्ठादिना दन्तधावने अलक्तकादिरङ्गेन नखादिरञ्जने च **लघुमासः** । आज्ञाभङ्गादयश्च दोषाः । इमे चापरे दोषाः । गाढसम्बाधनायां चर्मापनीयते, अस्थिभङ्गो वा भवेत्, अभ्यङ्गे च मक्षिकादि—सम्पातिमजीववधः । मलस्फेटननखसमारणादौ आत्मपरमोहोदीरणं बाकुश्यदोषः । सूत्रार्थपरिमन्थः। साधुक्रियाविपर्ययः श्रावकमिथ्यादृष्टिलोके वा परिवादः । अभ्यङ्गादिकरणेन परिज्ञायते न साधुरिति । वातादिरोगमार्गश्रमादिना कारणेन पुनरभ्यङ्गं उद्वर्त्तनं वा कारयन्नपि शुद्धः । एवमनाभोगादिना मलाद्यपनयन्नपि शुद्धः । तथा पादनखा दीर्घाश्चङ्क्रमणे उपलादिषु आस्फिटन्ति, भज्यन्ते वा हस्तनखा, भाजनलेपं विनाशयन्ति, देहे वा क्षतं कुर्वन्ति । तथा च लोको भणेदेष कामी कामिनीकृतक्षतत्वादिति । लोकश्च भणति दीर्घ—नखान्तरे सज्ज्ञा तिष्ठत्यतोऽशुचय एते । पादनखेषु च दीर्घेष्वन्तरे रेणुस्तिष्ठति तया च चक्षुरुपहन्यते । एतद्दोषपरिहरणार्थं नखकर्त्तनं कुर्वन्नपि शुद्धः । तथा व्रणगण्डभगन्दरादिषु रोमाण्युपघातं कुर्वन्तीतिरोमच्छेदने शिरोरोगिणो वा केशकर्त्तने न दोषः । दन्तरोगे काष्ठादिना दन्तघर्षणे न दोषः । तथा आदर्शस्फटिकादिमणि—जलतैलघृतादिभाजनादिषु स्वं मुखं रूपं वा विलोकमानस्य चतुर्लघु प्रायश्चित्तम् । आज्ञाभङ्गादयो दोषाः । इमे चान्ये—आदर्शादिषु आत्मानं रूपवन्तं दृष्ट्वा विषयान् भुनज्मीति प्रतिगमनं कुर्यात् ; अन्यतीर्थिकेषु वा प्रविशति; सिद्धपुत्रो वा भवति; सिद्धपुत्रीं वा सेवते; स्वलिङ्गेन वा संयतीं प्रतिसेवते; विरूपं वात्मानं दृष्ट्वा निदानं कुर्यात् ; देवताराधनवशीकरणयोगादि वा शरीरबाकुश्यं वा कुर्यात् ; आदर्शे वाऽऽत्मनो रूपं दृष्ट्वा शोभेऽहमिति गौरवं कुर्यात् ; रूपेण हृष्टो विरूपो वा विषादेन क्षिप्तादिचित्तो भवेत् ; सागारिकैर्वा दृष्टे उड्डाह—एष न तपस्वी कामी एषोऽजितेन्द्रिय इति । रोगादिकारणे पुनरादर्शादिष्वात्मरूपविलोकनेऽपि न दोषः । तथा **कपाटस्य प्रेरणे** अयतनयाऽग्रतः पश्चाच्च क्षेपणे **लघुमासः** । तथा **काले** आवश्यकवेलायाम**प्रतिक्रमणे** आवश्यकाकरणे **लघुकाश्चत्वारो** भवन्ति । तथा **मण्डल्यां** यथाज्येष्ठानुक्रमव्यवस्थितसाधुश्रेणिरूपायाम**प्रतिक्रमणे** च कृते प्रतिक्रमणाऽकरणे । कुत्सितं शीलमाचारो येषां ते **कुशीलाः** पार्श्वस्थावसन्नादयस्तैः सार्द्धं **प्रतिक्रमणे** च कृते **चतुर्लघुका** भवन्ति ।।२१६।।

**गुरु उवहिअपडिलेहे छप्पइअ असोहि कमतदग्गहणे ।**
**लहुगा गुरुगज्जाणं सयमेव य वत्थपायगहे ।।२१७।।**

व्याख्या—**गुरूणामाचार्याणां** परिभोग्य**स्योपधेरप्रतिलेखने षट्पदिकानामशोधने क्रमेण** परिपाट्या विभज्य **तासामग्रहणे** च **चत्वारो लघुका** भवन्ति । उपलक्षणत्वात् प्रपन्नानशनग्लानतपस्विस्थविरप्राघूर्णकशैक्षाणामुपधेरप्रत्युपेक्षणे चतुर्लघुकाः । तथा **आर्याणां** संयतीनां गृहस्थसकाशात् **स्वयमेव वस्त्रपात्रग्रहणे चतुर्गुरुकाः** । यतः संयतीनां गृहस्थेभ्यः स्वयमेव वस्त्रादिग्रहणे अनेकदोषाः सम्भवन्ति । तथाहि—संयतीं गृहस्थाद्वस्त्राणि गृह्णन्तीं दृष्ट्वा कोऽप्यभिनवश्राद्धो मिथ्यात्वं गच्छेत् । निर्ग्रन्थ्योऽपि भाटिं गृह्णन्तीति शङ्कते वा । गृहस्थो वा वस्त्राणि दत्त्वा मैथुनमवभाषेत प्रतिषिद्धे चैषामेव वस्त्राणि गृहित्वा उक्तं न करोतीत्युड्डाहं कुर्यात् । स्त्री च स्वभावेनाल्पसत्त्वा ततो येन तेन वा वस्त्रादिनाऽल्पेनापि लोभ्यते, लोभिता चाऽकार्यमपि करोति । बहुमोहा च स्त्री, ततः पुरुषैः सह संलापं कुर्वत्या वस्त्राणि गृह्णन्त्याश्च तस्याः पुरुषसम्पर्कतो मोहो दीप्यते । उदाररूपां वा संयतीं दृष्ट्वा कार्मणादिना कश्चिद्वशीकुर्यात् । वशीकृता च चारित्रविराधनां करोति । तस्माद् निर्ग्रन्थीभिः गृहस्थेभ्यः स्वयं वस्त्राणि न ग्राह्याणि किन्तु तासां तानि गणधरेण दातव्यानि । तत्रायं विधिः—संयतीप्रायोग्यमुपधिमुत्पाद्य सप्त दिनानि स्थापयति । ततः कल्पं कृत्वा स्थविरं स्थविरां वा परिधापयति । यदि नास्ति विकारस्ततः सुन्दरम् । एवं परीक्षामकृत्वा यदि ददाति तदा चतुर्गुरुकम् । तं च परीक्षितमुपधिमाचार्यो गणिन्याः प्रयच्छति । गणिनी च संयतीनां विधिना ददाति । अथाचार्यः स्वयं तासां ददाति तदा चतुर्गुरुकम् । यतः काचिन्मन्दधर्मा भणेदस्याश्चोक्षतरं दत्तम् । एषाऽस्येष्टा यौवनस्था च । एवमस्थाने स्थापयति । तस्मादाचार्येण प्रवर्त्तिन्या एव प्रदातव्यम् । आचार्यश्च संयतीवर्त्तापकः प्रथमभङ्गवर्त्ती अनुज्ञातो न शेषभङ्गत्रयवर्त्ती । ते चामी भङ्गाः—सहिष्णुरपि भीतपरिषदपि १ सहिष्णुर्न भीतपरिषत् २ असहिष्णुः परं भीतपरिषत् ३ असहिष्णुरभीतपरिषच्च ४। तत्रेन्द्रियनिग्रहसमर्थः संयतीप्रायोग्यक्षेत्रवस्त्रपात्रादीनामुत्पादनायां प्रभविष्णुः सहिष्णुरुच्यते । यस्य तु सर्वोऽपि साधुसाध्वीवर्गो भयान्न कामप्यक्रियां करोति स भीतपरिषत् । तत्र प्रथमभङ्गे वर्त्तमानः संयतीपरिवर्त्तने समुचितः, शेषेषु त्रिषु भङ्गेषु वर्त्तमानो नानुज्ञातः । यदि परिवर्त्तयति तदा चतुर्गुरुकाः । यतो द्वितीयभङ्गे आत्मना सहिष्णुः परमभीतपरिषत्तया स्वच्छन्दप्रचाराः सत्यो यत् किमपि ताः करिष्यन्ति तत् सर्वमयमेव प्राप्नोति । तृतीयभङ्गे तु स्वयमसहिष्णुतया तासामङ्गप्रत्यङ्गादीनि दृष्ट्वा यदाचरति तन्निष्पन्नम् । चतुर्थभङ्गे द्वितीयतृतीयभङ्गदोषांश्चाप्नोति। प्रथमभङ्गवर्त्तिनश्चाचार्यस्य यथावत् संयतीपरिवर्त्तने अतिमहती कर्मनिर्जरा यदुक्तम्—

**'जइ पुण पव्वावेई जावज्जीवाए ताउ पालेई । अन्नासति कप्पे वि हु गुरुगा जं निज्जरा विउला'** ।।

(बृ०क० १०६३, नि०भा० ४९२६)

**यदीत्यभ्युपगमे** । ततश्चायमर्थः—ताः प्रथमतोऽपि यतस्ततः प्रव्राजयितुं न कल्पन्ते । **यदि पुनः प्रव्राजयति** ततो यथोक्तविधिना **यावज्जीवं ताः पालयति** योगक्षेमविधानेन सम्यग् निर्वाहयतीत्यर्थः । स प्रथमभङ्गवर्त्ती यदि जिनकल्पं प्रतिपित्सुरपरं चार्यिकाः परिवर्त्तयितव्याः । ततः किं करोत्विति चिन्तायां यद्यस्ति तदीये गच्छे

कोऽप्यार्यिकाणां विधिना वर्त्तापकः ततः तस्य समर्प्य जिनकल्पं प्रतिपद्यते । अथ नास्त्यन्यो वर्त्तापकः तर्हि मा जिनकल्पप्रतिपत्तिं करोतु किन्तु आर्यिका एव परिवर्त्तयतु । कुतः ? इत्याह **अन्यस्य वर्त्तापकस्यासति** अभावे **जिनकल्पेऽपि** प्रतिपद्यमाने हुर्निश्चये, **चत्वारो गुरुकाः** । आह—सकलकर्मक्षयाक्षूण्णकारणे जिनकल्पेऽपि प्रतिपद्यमाने किमेवं प्रायश्चित्तम् ? आह—यद्यस्मात्कारणात् जिनकल्पं प्रतिपन्नस्य या निर्जरा तस्याः सकाशात् **विपुला निर्जरा** यथावत् संयतीः परिपालयतो भविष्यतीति युक्तियुक्तमेव प्रायश्चित्तम् ।।२१७।। तथा—

**भिन्नमपेहे वसहीसयणासणदंडथंडिलकडीणं ।**
**सज्झायकालगोअरचरिआई अपडिकमणे अ ।।२१८।।**

व्याख्या—**वसतिः** उपाश्रयः **शयनं** शय्या **आसनं** पीठकादि **दण्डो** बाहुप्रमाणा यष्टिः **स्थण्डिलं** प्रस्रवणोच्चारादिव्युत्सर्जनभूमिः **कटी** वंशखण्डादिमयीद्वारपिधानम् । एतेषामप्रत्युपेक्षणे प्रत्युपेक्षणां प्रमार्जनां च विनापि व्यापारणे प्रत्येकं **भिन्नमासः** । तथा **स्वाध्यायकालगोचरचर्याणामप्रतिक्रमणे** स्वाध्यायकालगोचरचर्याप्रतिक्रमणविस्मारणे प्रत्येकं **भिन्नमासः** । अत्र च निशीथादिभाष्यगतानां श्रीजिनभद्रगणिक्षमाश्रमणप्रणीतजीतसूत्रगतानां सुविहितजनाचीर्णजीतसमाचारीगतानां च गाथानां तद्रूपाणामेव प्रायः सङ्गृहीतत्वात् क्वचित् किञ्चित् पदं पुनरुक्तमप्यदुष्टम् ।।२१८।। तथा—

**वरिसंताणि अभोगे लहुगा गुरुगा अकालसन्नाए ।**
**दगमट्टिजलुगमुअणे दगपिअणे लहुग सन्नाए ।।२१९।।**

व्याख्या—**वर्षात्राण्याः** कम्बल्या वर्षादौ जलादिविराधनायां सत्याम**भोगे** विनाशभयादिना अव्यापारणे **चतुर्लघुकाः** । अथवा **वर्षति** वृष्टिं कुर्वति वारिदे यदानीतं भक्तादि तस्य **भोगे** व्यापारणे **चतुर्लघुकाः** । अस्य पदस्यार्थोऽन्यथापि चिन्त्यः । **अकालसञ्ज्ञायाम्** अकाले रजन्यां सञ्ज्ञाया व्युत्सर्जने **चतुर्गुरुकाः** । तथा निष्कारणे मात्रके सञ्ज्ञां व्युत्सृज्य यः परिष्ठापयति तस्य **मासलघु** । मात्रके सञ्ज्ञाव्युत्सर्जने चेमे दोषाः । शैक्षा गन्धेन दर्शनेन वा विपरिणामं व्रजेयुः जुगुप्सां वा कुर्युः । सागारिको वा दृष्ट्वा उड्डाहं कुर्यात् । अहो ! इमे अशुचयः सर्वलोकं विटालयन्तीति । भाजनभेदं वा विदध्यात् । ग्लानः पुनः सञ्ज्ञाभूमिगमनाऽसमर्थः बाढमाबाधितो वा सञ्ज्ञाभूम्यऽभावे वा पृथिव्यादिविराधनादिकारणे वा मात्रके सञ्ज्ञां व्युत्सृज्य परिष्ठापयन्नपि शुद्धः । विरुद्धस्थाने च सञ्ज्ञाव्युत्सर्जने प्रायश्चित्तं तच्च विरुद्धस्थानं त्रिधा—आत्मसंयमप्रवचनोपघातकारिभेदात् । तत्रात्मोपघातकारि गृहादि तच्च परिगृहीतमपरिगृहीतं वा भवति । अपरिगृहीते मासलघु । परिगृहीते चतुर्लघु । ग्रहणाकर्षणादयश्च दोषाः । श्मशानादि प्रवचनोपघातकारि । तत्र चतुर्लघु । अशुचिस्थानसेविन एते कापालिका इवेति प्रवचनोपघातः । अङ्गारादिदाहस्थानादीनि संयमोपघातीनि । तत्र कायविराधनानिष्पन्नं प्रायश्चित्तम् । गृहादि विरुद्धस्थानेषु सञ्ज्ञाव्युत्सर्जने चैते दोषाः—दृष्टे छर्द्दाप्यते प्रान्ताप्यते वाऽमत्रं[A] वा पात्यते । अदृष्टे पुनरङ्गारादिदाहस्थानमन्यत्

**A.** भाजनं = 'पात्रुं' इति भाषायाम् ।

कुर्वन्ति तत्र च कायविराधनातीव तां वा सञ्ज्ञां कायानामुपरि क्षिपन्ति । तथा असंसक्तग्रहणीकः साधुरुष्णे सञ्ज्ञां विसृजति । संसक्तग्रहणीः पुनः छायायाम् अथोष्णे व्युत्सृजति ततः चतुर्लघु । तथा **दकेन** जलेन सहिता **मृत्तिका दकमृत्तिका** तस्यां गमने, रक्तादिविकारे **जलौकोमोचने** सन्ध्यायामुत्सूरे सामाचार्यन्तरे पुनः कालवेलायां पानीयपाने **चतुर्लघुकाः** ।।२१९।। तथा—

**गुरुगो दगुल्लवत्थाइघट्टणे फुसिअमत्तगाइ लहू ।**
**सुत्थे वसओ वासुवरिं गुरुग मासोवरिं लहुगा ।।२२०।।**

व्याख्या—**दकेन** जलेनार्द्रं भिन्नं यद्वस्त्रादि, आदिशब्दात् कम्बलादिपरिग्रहः तस्य **घट्टने** स्पर्शने **गुरुको मासः** । **स्पृष्टमात्रकादौ** । **स्पृष्टे** जलेन भिन्नमात्रकदण्डकाद्युपकरणे **लघुमासः** । **स्पृष्टमात्रकादिघट्टने** वा । तथा **सौस्थ्ये** अशिवाद्यभावे **वर्षाकाले वर्षाकालस्य** चतुर्मासकरूपस्योपरि एकत्र स्थाने **वसतः** तिष्ठतः साधोश्चत्वारो **गुरुकाः** । ऋतुबद्धकाले तु **मासस्योपरि** वसतो **लघुकाश्चत्वारो भवन्ति** । यतः—ऋतुबद्धवर्षा—स्वतिरिक्तं वसतो नियतवासो भवति । स च चतुर्द्धा—द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र द्रव्यक्षेत्राभ्यां नियतवासे चतुर्भङ्गी । तद्यथा—द्रव्यतः क्षेत्रतश्च नियतः १ द्रव्यतो नियतः क्षेत्रतस्त्वनियतः २ द्रव्यतोऽनियतः क्षेत्रतस्तु नियतः ३ द्रव्यतः क्षेत्रतश्चानियतः । तत्र संस्तारकद्विविधोपधिप्रस्रवणसञ्ज्ञाखेलमात्रकादीनि तान्येव द्रव्याणि कालद्वयातिक्रमे तस्मिन्नेव क्षेत्रे परिभुञ्जानस्य तेष्वेव च कुलेष्वाहारं गृह्णानस्य प्रथमो भङ्गः । तान्येव संस्तारकादीनि द्रव्याणि अन्यत्र क्षेत्रे नीत्वा परिभुञ्जानस्य द्वितीयो भङ्गः । तस्मिन्नेव क्षेत्रे वसतिस्वाध्यायभूमिसञ्ज्ञाभूमिकुलग्रामादिरूपे अन्यानि संस्तारकादीनि द्रव्याणि परिभुञ्जानस्य तृतीयो भङ्गः । चतुर्थस्तु शून्यो नियतवासमाश्रित्य । एवं कालभावाभ्यामपि चतुर्भङ्गी । कालतो भावतश्च नियतः १ कालतो नियतो भावतस्त्वनियतः २ कालतोऽनियतो भावतस्तु नियतः ३ कालतो भावतश्चानियतः ४। तत्र ऋतुबद्धवर्षासु मासचतुर्मासातीतं वसतः श्राद्धशय्याभक्तपानादिषु च प्रतिबद्धस्य प्रथमः । कालद्विकातीतं वसतः श्राद्धादिषु अप्रतिबद्धस्य च द्वितीयः । कालद्वयनिर्गतस्यापि श्राद्धादिषु रागप्रतिबद्धस्य तृतीयः । चतुर्थः शून्यः । वृद्धनिमित्तं च वसन् बहुकालेनापि नियतवासी न भवति । वृद्धकार्यपरिसमाप्तौ तु उपरिष्टाद्वसन् नियतवासी भवति । तत्र द्रव्यं प्रतीत्य नियतवासे उत्कृष्टोपधौ फलके च चतुर्लघु । क्षेत्रं प्रतीत्य देशे राज्ये च चतुर्लघु । कालं प्रतीत्य वर्षातीते वृद्धवासातीते च चतुर्लघु । रागेण भावनियतवासे सर्वत्र चतुर्गुरु । शेषेषु द्रव्यादिषु प्रायो मासलघु । डगलकक्षारमल्लकेषु पञ्चकमिति निशीथे । बहिरऽशिवाऽवमबोधिकादिगाढ—भयमासकल्पप्रायोग्यक्षेत्राभावादिकारणैः पुनर्द्रव्यादिचतुर्विधमपि नियतं वसेन्न दोषः । तथा ज्ञानादिगुणपरिवृद्धि—निमित्तं नियतवासोऽपि न दुष्टः । यदुक्तम्—

**गुणपरिवड्ढिनिमित्तं कालातीते ण होइ दोसो उ । जत्थ उ बहिआ हाणी हविज्ज तहिअं ण विहरिज्जा ।।**
(नि०भा० १०२४) ।।२२०।।

**धावणडेवणसंहरिसगमणकिड्डाकुहावणाईसु ।**
**उकिट्ठिगीअछेलिअ–जीवरुआईसु चउगुरुगा ।।२२१।।**

व्याख्या—**धावनम**तिवेगेन गमनम् । **डेपनं** वरण्डाद्युल्लङ्घनम् । **सङ्घर्षणगमनम्** आवयोः कः शीघ्रगतिरिति स्पर्द्धया गमनं समश्रेणिस्थितस्य वा यानं **क्रीडा** सारिचतुरङ्गद्यूताद्या । **'कुहावण'**त्ति । **कुहना** विस्मयकारिणी दम्भक्रिया इन्द्रजालकगोलकखेलनाद्या, आदिशब्दात् **समस्याप्रहेलिकादयो** गृह्यन्ते । **उत्कृष्टिः** बूत्कारपूर्वकः कलकलः । **गीतं** प्रतीतं **छेलितं** सेण्टितं[A] तस्करसञ्ज्ञा । **जीवरुतं** मयूरमार्जारशुकसारसादिला(ल?)पितम् । आदिशब्दादजीवरुतं अरघट्टशकटपादुकादिशब्दरूपम् । एतेषु सर्वेषु शुद्धि**कृच्चतुर्गुरुकम्** ।।२२१।। तथा—

**अहछंद अभुट्टंजलिकरणे चउगुरुगलहुग पासत्थे ।**
**थीमेहुण संकाए चउगुरु निस्संकिए मूलं ।।२२२।।**

व्याख्या—इह छन्दोऽभिप्रायः, ततो **यथा**ऽस्याभिप्रेतं स्यात्तथा प्रज्ञापयन् **यथाछन्दो** भवति । तस्य चेदं स्वरूपम्—

**'उस्सुत्तमणुवदिट्ठं सच्छंदविगप्पिअं अणणुवाई । परतत्तिपवत्तो तिंतिणे अ इणमो अहाछंदो' ।।**

(नि०भा० ३४९२, व्य०सू० ८५२, गु०वि० ३/१००)

**उस्सुत्तं** णाम सुत्तादवेअं । **अणुवदिट्ठं** नाम जं नो आयरिअपरंपरागयं मुक्तव्याकरणवत्[B] । सीसो पुच्छइ—किमण्णं सो परूवेति ? आचार्य आह—**सच्छंदविगप्पिअं** स्वेन छन्देन विकल्पितं स्वच्छन्दविकल्पितं । तं च **अणणुपाती** न क्वचित् सूत्रे अर्थे उभये वा अनुपाती भवति ईदृशं प्ररूपयति । किञ्च—**परो** गृहस्थः तस्य कृताकृतव्यापारवाहकः परापवादभाषी वा स्त्रीकथादिप्रवृत्तो वा **परतप्तिप्रवृत्तः** । **तिंतिणो** दव्वे भावे अ । दव्वे तुंबुरुगादिकट्ठं[C] अगणिपक्खित्तं तिणितिणेति । भावे तिंतिणो आहारोवहिसिज्जाओ इट्ठाओ अलभमाणे सोअति जूरति तप्पति । एवं दिवसंपि तिडितिडिंतो अच्छति । **इमा अहाछन्दे** प्रतिपत्तयः । सो अ अहाछंदो **तिहा उस्सुत्तं** दंसेति । परूवण—चरण—गईसुं । तत्थ परूवणे इमम्—

**'पडिलेहणमुहपत्ती रयहरणनिसिज्ज पायमत्तए पट्टे । पडलाइं चोल उण्णा दसिआ पडिलेहणा पोत्तं' ।।**

(नि०भा० ३४९३, व्य०सू० ८५५, गु०वि० ३/१०४)

**पायपडिलेहणि–मुहपोत्तिआणं** एगतरं भवतु । जती सकायपमज्जणा भायणपमज्जणा य एआए चेव कज्जति न विरोहो । अप्पोवगरणया य भवति । तम्हा सच्चेव पडिलेहणिआ सच्चेव मुहपोत्तिआ कज्जतु । **रयहरणपट्टगो** चेव बाहिर**निसज्ज**कज्जं करोति किं निसज्जागहणं कज्जति ? एक्कं चेव **पायं** पडिग्गहं भवतु किं **मत्तय**गहणं कज्जति ? पडिग्गहेणं चिअ मत्तयकज्जं कज्जति । भणिअं च तरुणो एगं पायं गिण्हिज्जा । **पट्टे**त्ति । उत्तरपट्टो सो राओ अत्थुरणं कज्जति, भिक्खग्गहणकाले तं चेव **पडलं** कज्जति । अहवा रातो उत्तरपट्टो दिवा चेव

**A.** अव्यक्तध्वनिविशेषः (तस्करसञ्ज्ञा) भाषायां 'सीसोटी' ति । **B.** व्याकरणनियमरहितभाषणवद् । 
**C.** भाषायां 'टिंबरु वृक्ष' इति ।

चोलपट्टो कज्जति । किं कक्खडफासाहि **उण्णदसिआहि** खोमिआ चेव मिउफासा भवन्तु । जइ जीवदयत्थं **पडिलेहणा** कज्जति तो एगवत्थस्स उवरिं सव्वपडिलेहणा कज्जतु । तं वत्थं बाहिं सीतले पदेसे पडिलेहेज्जउ । एवं जीवदया भवति ।

**दंतच्छिन्नमलित्तं हरिअठिअ पमज्जणा य णिंतस्स । अणुवाइ अणणुवाई परूवणाचरणगइसुं तु'** ।।

(नि०भा०३४९४, व्य०सू० ८५७, गु०वि० ३/१०५)

**दंतेहिं** नहा छित्तव्वा नहहरणं न घित्तव्वम्, अधिकरणसम्भवात् । पायमलित्तं धरेअव्वं लेवग्गहणे बहु आयसंजमविराहणा भवति । **हरितोवरिट्ठिअं** डगलादि घित्तव्वम्, ते जीवा भाराक्रान्ता आसासिआ भवंति, अण्णहा अदयालुत्तं भवति । जहा निंतो जीवदयत्थं पमज्जइ जावच्छन्नं, तहा परतोवि पमज्जउ जीवदयत्थमेव न दोसो । इत्थ किंचि **अणुवादि** जहा पडिलेहणि मुहपत्ती । अहवा पडिलेहणा पुत्ते । किंचि **अणणुवादी** जहा पट्टे अ पडलाइं चोलेति, छप्पदिअंडओदरसम्भवात् । अहवा सव्वे पदा अगीतस्स अणुवादी अ प्रतिभान्ति । गीतार्थस्य अननुपाति अनभिहितत्वात् सदोषत्वाच्च । एसा परूवणा भणिआ । इआणिं चरणगतीसु भन्नति । तत्थ **चरणे**—

**सागारिआदि पलिअंक निसिज्जा सेवणा य गिहिमत्ते । निग्गंथिचिट्ठणादी पडिसेहो मासकप्पस्स'** ।।

(नि०भा० ३४९५, व्य०सू० ८५८, गु०वि० ३/१०७)

**सिज्जातरपिंडो** उग्गमादिसुद्धो भुत्तव्वो, आदिग्गहणातो रायपिण्डोवि न दोषः । नवे **पलिअंके** मंकुणादिजीवविरहिते सोअव्वं न दोसो । **गिहिनिसिज्जाए** को दोसो ? अवि अ साहू तत्थ निसण्णो धम्मं कहिज्जा । ते अ दुविहं धम्मं पडिवज्जिज्जा । गिहिधम्मं साहुधम्मं च । एवं बहुतमो गुणो गिहिनिसिज्जाए । **गिहिमत्तसेवणे** को दोसो ? अवि अ उड्डाहपच्छादणं कयं भवति । **निग्गंथीणं** उवस्सए दोसविमुक्को कुसलचित्तो **चिट्ठणादिपदे** किं न करेति ? अह तत्थ ठिअस्स अकुसलचित्तसंभवो भवे अन्नत्थवि अकुसलचित्तस्स दोसो भवत्येव । जत्थ न दोसो तत्थ मासाहिअंपि वसतु, जत्थ दोसो तत्थ ऊणेवि मासे गच्छउ । एवं **मासकप्पेण न किंचि पओअणं** । एवं चरणे परूवणं करेति । किञ्चान्यत्—

**धारे वेरज्जे वा पढमसमोसरणि तह य नियते उ । सुण्णे अकप्पिते वा अन्नाउंछे अ संभोगे'** ।।

(गु०वि० ३/१०८, नि०भा० ३४९८, व्य०सू० ८५९)

चरणं चारः । विगतरायं **वेरज्जं** जं भणिअं—णो कप्पति निग्गंथाणं वेरज्जविरुद्धरज्जंसि सज्जं गमणं सज्जं आगमणं । तदयुक्तम्, कम्हा ? जम्हा परिसहोवसग्गा सोढव्वा । अवि अ पव्वयंतेण चेव अप्पा परिचत्तो । **पढमसमोसरणंसि** उग्गमादिसुद्धं वत्थपत्तं किं न घिप्पति ? को दोसो ? निम्ममस्स **नियतावासे** को दोसो ? अवि अ विहरंताणं सीउण्हपरिसहाइया य दोसा । निप्पच्चवाए **सुन्ना** वसही किं न कज्जइ ? को दोसो ?

पिंडवत्थादि **अकप्पिएण**[A] उग्गमादिसुद्धं आणिअं किं न भुंजइ ? **अन्नाउंछं** अडंतस्स पिवासखुहपरिस्समा बहुतरा दोसा, तम्हा सड्ढादिसु कुलेसु चेव उग्गमादिसुद्धं घित्तव्वं । **अन्नसंभोइओ** पंचमहव्वय अट्ठारससीलंग—सहस्सधारी तिगुत्तो पंचसमितो अ तेण सद्धिं किं न भुंजइ ? न य अन्नकिरिआ अन्नस्स संकमति । एवं चरणे उस्सुत्तं परूवेति करेति अ । इआणिं **गतिदिट्ठंतमाह—**

**खित्तं गओ अ अडविं एगो संचिक्खई तहिं चेव । तित्थगरोवि अ पिअरो खित्तं तू भावतो सिद्धी' ।।**
(नि०भा० ३४९९, व्य०सू० ८६२, गु०वि० ३/१११)

इमं अहाछंदो दिट्ठंतं परिकप्पेइ । तंजहा—एगो कुडुंबी । तस्स चउरो पुत्ता । तेण सव्वे संदेट्ठा—गच्छह **खित्ते** । किसिवावारं करेह । तत्थेगो जहुत्तं खित्ते कम्मं करेति । बीओ निग्गंतुं **अडवीए** उज्जाणादिसु सीअलच्छायठितो अच्छइ । तइओ गिहा निग्गंतु **गामे चेव** देवकुलादिसु जूआदिपमत्तो चिट्ठति । चउत्थो **गिहे चेव** किंचि वायारं करिंतो चिट्ठति । अन्नया तेसिं पिता मतो । ताण जं पितिसंतिअं किंचि दव्वं खित्ते वा उप्पन्नं तं सव्वं समभागेण भवति । इआणिं दिट्ठंतोवसंहारो । पच्छद्धं । **कुडुंबीसमा तित्थगरा । भावतो खित्तं सिद्धी ।** पढमपुत्तसमा मासकप्पविहारी उज्जमंता । बितिअपुत्तसमा नियतवासी । तइअपुत्तसमा पासत्था । चउत्थपुत्तसमा सावगधम्मट्ठिता गिहिणो । पितिसंतिअं दव्वं नाणदंसणचरित्ता । जं च तुब्भे खित्तं पडुच्च दुक्करं किरिअकलावं करेह । तं सव्वं अम्ह निअतादिभावट्ठिआणं सुहेण चेव सामण्णं । एसो अहाच्छंदो । अह **पासत्थो—**

**दुविहो खलु पासत्थो देसे सव्वे अ होइ नायव्वो । सव्वे तिन्नि विगप्पा देसे सिज्जायरकुलादी' ।।**
(नि०भा० ४३४०, व्य०सू० ८४३)

**दुविहो पासत्थो देसे सव्वे अ । सव्वहा** जो पासत्थो सो **तिविहो । देसेण** जो पासत्थो सो सिज्जायरपिंडभोइमादी **अणेगविहो** । पासत्थनिरुत्तं इमं सव्वदेसभेएणं भन्नति ।

**दंसणनाणचरित्ते तवे अ अत्ताहितो पवयणे अ । तेसिं पासविहारी पासत्थं तं विआणाहि' ।।**
(नि०भा० ४३४१, व्य०सू० ८४४, गु०वि० ३/६७)

**दंसणादिआ** पसिद्धा । **पवयणं** चाउवन्नो समणसंघो । **अत्ता** आत्मा संधिपयोगेण आभियोगेण **आहितो** आरोपितः स्थापितः जेहिं साहूहिं उज्जुत्तविहारिण इत्यर्थः । तेसिं साधूणं पासविहारी जो सो एवंविधो पासत्थो पवयणं पडुच्च, जम्हा साहुसाहुणी—सावगसाविगासु एगपक्खेवि न निवडइ तम्हा **पवयणं** पइ **तेसिं पासविहारी** । अहवा दंसणादिसु अत्ता अहिओ जस्स सो अत्ताहितो दर्शनादीनां विराधक इत्यर्थः । जम्हा सो विराधको तम्हा तेसिं दंसणादीणं पासविहारी पासत्थो । तिविधभेदो भण्णति ।

**दंसणनाणचरित्ते सत्थो अच्छइ तहिं न उज्जमति । एएण उ पासत्थो एसो अन्नोवि पज्जाओ' ।।**
(नि०भा० ४३४२, व्य०सू० ८४५, गु०वि० ३/६८)

**सत्थो**[B] **अच्छइ** त्ति । सुत्तपोरिसिं वा अत्थपोरिसिं वा न करेइ **नोद्यमते** । दंसणाइआरेसु वट्टइ । चारित्ते न

---

**A.** अगीतार्थेन ।  **B.** स्वस्थः' अलसस्तिष्ठति । (गु०वि० ३/६८)

वट्टति । अइआरे वा न वज्जेइ । एवं सत्थो अच्छइ । तेन पासत्थो अन्यः पर्यायः । अन्यो व्याख्याप्रकारः । अहवा—

**पासोत्ति बंधणंति अ एगट्ठं बंधहेतवो पासो । पासट्ठिअ पासत्थो एसो अन्नोवि पज्जाओ' ।।**

(नि०भा० ४३४३, व्य०सू० ८४६, गु०वि० ३/६९)

**पासो** वा **बंधणो** त्ति वा **एगट्ठं** । एए पया दोवि एगट्ठा । **बंधस्स हेऊ** अविरतिमादी ते **पासा** भण्णंति । तेसु **पासेसु ठिओ पासत्थो** । सव्वपासत्थो गतो । इमो देसपासत्थो—

**सिज्जातर कुलनिस्सिअ ठवणाकुल पलोअणा अभिहडे अ । पुव्विपच्छासंथुअ निअअग्गपिंडभोती अ पासत्थो[A]' ।।**

(नि०भा० ४३४४, व्य०सू० ८४७, गु०वि० ३/७२)

**सिज्जातरपिंडं** भुंजति । सड्ढाइ**कुलनिस्साए** विहरति । **ठवणकुलाणि** वा निक्कारणे पविसति । संखडिं **पलोएति** देहं वा **पलोएइ** आदंसादिसु वा । **अभिहडं** गिण्हइ भुंजति अ । सयणं पडुच्च मातापितादिअं **पुव्वं** संथवं करेति । **पच्छा संथवं** वा सासुससुरादिअं । दाणं वा पडुच्च अदिण्णे पुव्वसंथवो दिण्णे पच्छासंथवो, **निअयं** **निच्चं** निमंतणे निकाएति[B] । जइ दिणे दिणे दाहिसि **अग्गकूरो** तं गिण्हइ भुंजइ अ । एवमादिएसु अववादपदेसु वट्टंतो देसपासत्थो भवति । अथ **कुत्सितशीलः** कुत्सितेषु शीलं करोतीति **कुशीलः** । तस्य चेदं स्वरूपम्—

**कोउअ भूतिकम्मं पसिणापसिणं निमित्तमाजीवी । कक्ककुरुसुमिणलक्खणमूलमंतविज्जोवजीवी कुसीलो उ' ।।**

(नि०भा० ४३४५, व्य०सू० ८७०, गु०वि० ३/८८)

निंदुमादिआणं तिगचच्चरादिसु ण्हवणं करेति त्ति **कोतुअं** । रक्खनिमित्तं अभिमंतिअं **भूतिं** देति । अंगुट्ठबाहुपसिणादि करेति । सुविणगे विज्जाए अक्खिअं अक्खमाणस्स **पसिणापसिणं** । तीतपडुप्पण्णमणागय**निमित्तोवजीवी** । अहवा—आजीवी जातिकुलगणकम्मसिप्पे पंचविहे करेति । लोद्रादिकेन **कल्केन** जंघादि घसति । सरीरे सुस्सूसाकरणं **कुरुकुआ**[C] बकुसभावं करेति त्ति वुत्तं भवति । सुभासुभ**सुमिण**फलं अक्खति । इत्थिपुरिसाण मसतिलगादि**लक्खणे** सुभासुभे कहेति । विविधरोगपसमणे कंदमूले कहिंति । अहवा—गब्भादाणपरिसाडणे **मूलकम्मं मंतविज्जाहिं** वा जीवणं करेंतो **कुसीलो** भवति ।

**अथावसन्नो** बहुतरगुणापराधी । स च द्विधा—देशतः सर्वतश्च । तत्र देशतोऽयम्—

**आवासग सज्झाए पडिलेहा झाण भिक्खभत्तट्ठे । काउस्सग्ग पडिक्कमणे कितिकम्मं चेव पडिलेहा' ।।**

(नि०भा० ४३४६)

आवासग त्ति । अस्य व्याख्या—

**आवासगं अनिअयं करेति हीणातिरित्तविवरीतं । गुरुवयणनियोगवलायमाणो इणमो उ ओसण्णो' ।।**

(नि०भा० ४३४७, व्य०सू० ८७५)

---

**A.** अस्या गाथाया विवरणाय गु.वि. ३/७३ तः ३/८१ गाथा द्रष्टव्याः । **B.** यत्तु दायकात् निमन्त्रणापुरस्सरं प्रतिदिवसं निकाचित्तं निबद्धीकृतं पिण्डं गृह्यते तन्नित्यपिण्डमिति , दीयते तन्निमन्त्रितम् । **C.** पादप्रक्षालनम् ।

**अणिअयं** कदाइ करेति कयाइ न करेति । **हीणं** वा करेइ **अधिकं** वा करेइ, **दोसेहिं वा** सह करेति । चक्कवालसामायारीए सीअमाणो आवस्सगे आलोअणवेलाए **नियोग**' त्ति चोइतो सम्मं अपडिवज्जंतो तहा वा अकरिंतो **वलायमाणो**[A] **गुरुवयणो** भवति । अन्नत्थ वा चोइओ गुरुवयणाओ वलायति । '**सज्झाय**' त्ति । सज्झायं हीणं करेति अतिरिक्तं वा करेति अहवा न करेति, विवरीअं वा कालिअं उक्काले करेति, उक्कालिअं वा कालवेलाए करेति, असज्झाइए वा करेति । **पडिलेहणाए** वि एवं चेव दट्ठव्वं । पुव्वावररत्तकाले झाणं नो झायति । आलसिओ भिक्खं न हिंडइ, अणुवउत्तो वा भिक्खाविसोहिं न करेति, असुद्धं वा गिण्हति । **भत्तट्ठ**' त्ति । मंडलीए कयाइ भुंजति कयाइ न भुंजति, मंडलिसामायारिं वा न करेति, दोसेहिं वा भुंजति । पविसंतो निसीहिअं न करेति । निंतो आवस्सिअं न करेति । णिंताणिंतो न पमज्जति वा । नदीसंतरणादिसु अन्नत्थ वा गमणागमणे **काउस्सग्गं** न करेति, दोसेहिं वा करेति । '**पडिक्कमणं**' ति । मिच्छादुक्कडं, तं पमायखलियादिसु न करेति । संवरणादिसु कितिकम्मट्ठाणेसु **कितिकम्मं** वंदणं न करेति । गुरुमाईण वा विस्सामणादि कितिकम्मं न करेति । निसीअणतुअट्टणादिट्ठाणं न पडिलेहेइ । संडासयं वा निसीअंतो आदाणनिक्खेवणेसु वा **न पडिलेहेइ न पमज्जति** । एस देसोसन्नो गतो । इमो सव्वोसण्णो—

'**उउबद्धपीढफलगो ओसन्नं संजयं विआणाहि । ठविअगरईअगभोई एमेआ पडिवत्तीओ**' ।।

(नि०भा०४३४८, व्य०सू० ८७७)

जो अ पक्खस्स पीढफलगादिआण बंधे मुत्तुं पडिलेहणं न करेति सो संजओ **उउबद्धपीढफलगो** । अहवा निच्चुत्थरिअसंथारगो **उउबद्धपीठफलगो** भण्णति । ठविअपाहुडिअं भुंजति निक्खित्तभोई वा **ठविअभोई**[B] । घंटिकरगपटलगादिसु जो अवट्ठिअं आणेउं भुंजति सो **रइअभोई**[C] । अहवा इमो संखेवओ **ओसण्णो** भण्णति—

'**सामायारिं वितहं ओसण्णो जं च पावई जत्थ । संसत्तो व अलंदो नडरूवी एलओ चेव**' ।।

(नि०भा०४३४९, व्य०सू० ८७८)

सव्वं **सामायारिं वितहं** करिंतो **ओसन्नो**, जं वा मूलुत्तरगुणातिआरं **जत्थ** किरिआविसेसे पयट्टो **पावइ** तं अनिंदंतो अणालोअंतो पच्छित्तं अकरिंतो ओसण्णो भवति । अह दोसेहिं जुत्तो संसत्तो आकिण्णदोसो वा संसत्तो । पच्छद्धं । संसत्तो कहं ? **अलंदमिव**[D] जहा गोभत्तकलंदयं अणेगदव्वनिअरं किमिमादीहिं वा संसत्तं तहा सोवि । अहवा—संसत्तो अणेगरूवी **नटवत् एडकवत्** । जहा नडो नडवसा अणेगाणि रूवाणि करेति । ऊरणगो वा हलिद्दरागेण रत्तो धोविउं पुणो गुलिगगेरुगादिरागेण रज्जते । एवं पुणो पुणोवि धोविउं अण्णाण्णेण रज्जति । एवं **एलगादिबहुरूवी**, एवं संसत्तोवि इमेण विहिणा बहुरूवी ।

'**पासत्थ अहाछंदे कुसील ओसन्नमेव संसत्ते । पिअधम्मो पिअधम्मे चेव इणमो उ संसत्तो**' ।।

(नि०भा०४३५०, व्य०सू० ८८०)

---

**A.** गुरुवचनमकुर्वन् पुनर्गुरुं प्रति वालयत इति। **B.** स्थापनादोषदुष्टप्राभृतिकाभोजी । **C.** रचितकं नाम कांस्यपात्रादिषु पटादिषु वा यदशनादि देयबुद्ध्या वैविक्त्येन स्थापितं तद् भुङ्क्ते इत्येवंशीलो रचितकभोजी । **D.** कैलन्दः पात्रविशेषः कुण्डु' इति भाषायाम्।

पासत्थाणं मज्झे ठितो **पासत्थो** । अहच्छंदेसु **अहाछंदो** । कुसीलेसु **कुसीलो** । ओसन्नेसु **ओसण्णाणुवत्तिओ** ओसण्णो । संसत्ताण मज्झे **संसत्ताणुचरितो** । **पिअधम्मेसु** मिलितो अप्पाणं **पिअधम्मं** दंसेइ । निद्धंमेसु **निद्धम्मो** भवति । **इणमोत्ति** वक्खमाणस्वरूपं **संसत्तो**—

**पंचासवप्पवत्तो जो खलु तिहि गारवेहि पडिबद्धो । इत्थिगिहिसंकिलिट्ठो संसत्तो सो उ नायव्वो'** ।।

(नि०भा०४३५१, व्य०सू० ८८१, गु०वि० ३/९८)

**पंच** आसवदारा पाणवह—मुसावाय—अदत्त—मेहुण—परिग्गहा एतेसु **प्रवृत्तः** । **खलुः** अवधारणार्थः । **तिण्णि गारवा** इड्डिरससाया एएसु भावतो **पडिबद्धो** । **इत्थीसु** मोहमोहितो **संकिलिट्ठो** तप्पडिसेवी । **गिहीसु** वि समक्खपरोक्खेसु सुत्थदुत्थेसु दुपदचउपदेसु वा वावारवहणपडिबद्धो **संकिलिट्ठो** । संखेवो इमो—जो जारिसेसु चेव मिलति सो तारिसो चेव भवति । एरिसो **संसत्तो नायव्वो** । अह निच्चमवत्थाणाओ नियतो—

**जं पुव्वं निअयं खलु चउव्विहं वण्णिअं तु बितिअंमि । तं आलंबणरहिओ सेवंतो होइ निअओ अ'** ।।

(नि०भा० ४३५२)

दव्वखित्तकालभावा एअं **चउव्विहं** इहेव[A] अज्झयणे **बिइउद्देसे वण्णिअं**, **तं निक्कारणे सेवंतो निअतो** भवति । सज्झायादिकरणिज्जे जोगे मोत्तुं जो देसकहादिकहाओ कहेति सो **काहिओ** ।

**आहारादीणट्ठा जसहेउं अहव पूअणनिमित्तं । तक्कम्मो जो धम्मं कहेइ सो काहिओ होइ'** ।।

(नि०भा०४३५३, गु०वि० ३/५४ टीका)

धम्मकहं पि जो करेति **आहारादिनिमित्तं** वत्थपायादिनिमित्तं **जसत्थी वा** वंदणादिपूआनिमित्तं वा, सुत्तत्थ—पोरिसिमुक्कवावारो अहो अ राओ अ धम्मकहादिपढणकहणवंझो तदेवास्य केवलं **कर्म तत्कर्मा** एवंविधो **काहिओ** भवति । चोअग आह—नणु सज्झाओ पंचविहो वायणादिगो तस्स पंचमो भेदो धम्मकहा तेण भव्वसत्ता पडिबुज्झंति तित्थे अ अव्वुच्छित्ती पभावणा य भवइ, अतो ताओ निर्जरा चेव भवति कहं काहिअत्तं पडिसिज्झइ ? आचार्य आह—

**कामं खलु धम्मकहा सज्झायस्सेव पंचमं अंगं । अव्वुच्छित्ती अ ततो तित्थस्स पभावणा चेव'** ।।

(नि०भा०४३५४, गु०वि० ३/५४ टीका)

पूर्वाभिहितनोदकानुमते कामं शब्दः । **खलुशब्दोऽवधारणार्थे** । किमवधारयति ? इमं सज्झायस्स **पंचमं चेवंगं धम्मकहा** । जइ अ एवं—

**तहविह न सव्वकालं धम्मकहा जीइ सव्वपरिहाणी । नाउं व खित्तकालं पुरिसं च पवेदए धम्मं'** ।।

(नि०भा० ४३५५, गु०वि० ३/५४ टीका)

---

A. निशीथाध्ययने ।

**सव्वकालं धम्मो न कहेअव्वो** । जहा पडिलेहणाइसंजमजोगाणं सुत्तत्थपोरिसीण य आयरिअगिलाणमादिकिच्चाण य **परिहाणी** भवइ । अतो न काहिअत्तं कायव्वं । जया पुण धम्मं कहेइ तया नाउं साधुसाधुणीण य बहु गच्छुवग्गहं । **खित्तं'** ति । **ओमकाले** बहूणं साहुसाहुणीणं उवग्गहकरा इमे दाणसड्ढादि भविस्संति(त्ति?) धम्मं कहेइ, रायादिपुरिसं वा नाउं **कहिज्जा** । महाकुले वा इमेण इक्केण उवसंतेणं पुरिसेणं बहू उवसमंतीति कहिज्जा ।। जणवयववहारेसु नडनड्डादिसु वा जो पेक्खणं करेइ सो **पासणिओ** ।

**'लोइअववहारेसु लोए सत्थादिएसु कज्जेसु । पासणिअत्तं कुणई पासणिओ सो उ नायव्वो' ।।**

(नि०भा० ४३५६, गु०वि० ३/५४ टीका)

**लोइअववहारेसु** त्ति । अस्य व्याख्या—

**'साधारणे विरेगं साहइ पुत्त पडए अ आहरणं । दुण्ह य इक्को पुत्तो दुण्णि अ महिला उ एगस्स' ।।**

(नि०भा० ४३५७, गु०वि० ३/५४ टीका)

दुण्हं सामन्नं **साधारणं** तस्स **विरेगो** विभयणं । तत्थन्ने पासणिआ छेत्तुमसमत्था सो भावत्थं नाउं छिंदति । कहं ? इत्थ उदाहरणं भण्णति—एगस्स वणिअस्स दो महिलाओ तत्थेगीए पुत्तो । एअं उदाहरणं जहा नमुक्कारनिज्जुत्तीए । पडगआहरणंपि जहा तत्थेव । एवं अन्नेसु वि बहुसु लोगववहारेसु पासणिअत्तं करेति छिंदति वा । **'लोए सत्थादिएसु'** त्ति । अस्य व्याख्या—

**'छंदं निरुत्तं सद्दं अत्थं वा लोइआण सत्थाणं । भावत्थं च पसाहइ छलिआई उत्तरे सउणे' ।।**

(नि०भा० ४३५८, गु०वि० ३/५४ टीका)

**छंदादिआणं** लोगसत्थाणं सुत्तं कहेइ अत्थं वा । अहवा— **अत्थं व'** त्ति । अत्थसत्थं सेतुमादिआण वा बहूणं कज्जाणं कोडिल्लयाण य वेसिअमादिआण य **भावत्थं पसाहइ** । **छलिअ** सिंगारकहा त्थीवण्णगादी । **'उत्तरे'** त्ति । ववहारे उत्तरं सिक्खवेइ । अहवा—**उत्तरेत्ति** । लोउत्तरे वि सउणरुआदीणि कहयति । ममीकारं करिंतो मामाओ—

**'आहार उवहि देहे विआर विहार वसहि कुलग्गामे । पडिसेहं च ममत्तं जो कुणई मामओ सो उ' ।।**

(नि०भा० ४३५९, गु०वि० ३/५४ टीका)

**उवगरणादिसु** जहासंभवं **पडिसेहं करेति** मा मम उवगरणं कोइ गिण्हउ । एवं अन्नेसु वि **विहारभूमिमादिएसु** पडिसेहं सगच्छपरगच्छयाणं वा करेति । आहारादिएसु चेव सव्वेसु ममत्तं करेति । भावपडिबंधं एवं करिंतो **मामाओ** भवति । विविधदेसगुणेहिं पडिबद्धो **मामाओ** इमो—

**'अह जारिसओ देसो जे अ गुणा इत्थ सस्सगोणादी । सुंदर अभिजाय जणा मामाति निक्कारणा वदति' ।।**

(नि०भा० ४३६०, गु०वि० ३/५४ टीका)

**अह'** त्ति । अयं **जारिसो देसो** रुक्खवाविसरतडागोवसोभितो एरिसो अन्नो नत्थि । सुहविहारो सुलभवसहि भत्तोवकरणादिआ य बहू **गुणा** । सालिकुल्मासादिआ य बहू **सस्सा** निप्फज्जंति अ । **गोमहिसिपउरत्तणतो** अ पउरगोरसं । सरीरेण वत्थादिएहिं **सुंदरो जणो** । **अभिजायत्तणतो** अ कुलीणो न साहुमुवद्दवकारी । एमादिएहिं गुणेहिं भावपडिबद्धो **निक्कारणतो** वा **वयति** प्रशंसतीत्यर्थः । गिहीण कज्जाणं गुरुलाघवेणं संपसारिंतो **संपसारओ** ।

**असंजयाण भिक्खू कज्जेसु असंजमप्पवत्तेसु । जो देइ सामत्थं संपसारो उ नायव्वो'।।**

(नि०भा० ४३६१, गु०वि० ३/५४ टीका)

जे भिक्खू **असंजयाणं असंजमकज्जपवत्ताणं** पुच्छंताणं अपुच्छताणं वा **सामत्थं** देइ—मा एवं इमं वा करेहि । इत्थ बहुदोसा जहाहं भणामि तहा करेहि त्ति । एवं करिंतो **संपसारओ** भवति । ते अ इमे असंजमकज्जा—

**गिहिनिक्खमणपवेसे आवाहविवाहविक्कयकए वा । गुरुलाघवं कहंते गिहिणो खलु संपसारीओ' ।।**

(नि०भा० ४३६२, गु०वि० ३/५४ टीका)

**गिहीणं** असंजयाणं गिहाओ दिसि जत्ताए वा **निग्गमयं** देइ । जत्ताओ वा आगयस्स **पवेसं** देइ । **आवाहो**[A] बिट्टिआलंभणयं सुहं दिवसं कहेइ मा वा एअस्स देहि इमस्स वा देहि । **विवाह**पडलमादिएहिं जोइसगंथेहिं विवाहवेलं देइ । अग्घकंडमादिएहिं[B] गंथेहि इमं दव्वं **विक्किणाहि** इमं वा **किणाहि** । एवमादिएसु कज्जेसु **गिहीणं गुरुलाघवं कहिंतो संपसारत्तणं** पावइ । एवं प्रकल्पाध्ययनाभिहित स्वरूपा यथाछन्द—पार्श्वस्थ—कुशीला—ऽवसन्न—संसक्त—नियत—काथिक—दार्शनिक— मामाक—सम्प्रसारका एते दश न वन्दनीया न प्रशंसनीयाश्च । यदुक्तम्—

**एएसामण्णतरं जे भिक्खु पसंसए अहव वंदे । सो आणा अणवत्थं मिच्छत्तविराहणं पावे' ।।**

(नि०भा० ४३६३, गु०वि० ३/५४ टीका)

**पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होइ । कायकिलेसो एमेव कुणइ तह कम्मबंधं च' ।।**

अतो यथाछन्दादीनां वन्दने प्रायश्चित्तं तच्च प्रस्तुतगाथया (मूलगाथा २२२) प्रतिपाद्यते—**यथाछन्दस्य अभ्युत्थाने अञ्जलिकरणे च प्रत्येकं चतुर्गुरुकाः** । **अभ्युत्थानं** च षोढा अभिमुखोत्थानम् , आसनोपढौकनम् , किंकरोमीति भणनम्, धर्मच्युतस्य पुनर्धर्मे स्थापनरूपमभ्यासकरणम्, अभेदरूपा अविभक्तिः एतत्पञ्चपदरूपः संयोगश्च। उक्तं च—

**अब्भुट्ठाणे[१] आसण[२] किंकर[३] अब्भासकरण[४] अविभत्ती[५] । संजोगविहिविभत्ता[६] अब्भुट्ठाणे वि छट्ठाणा' ।।**

(नि०भा० २१११)

---

**A.** अभिनवपरिणीताया वध्वा वरगृहे आनयनम् । **B.** ग्रन्थविशेषः ।

ततोऽभिमुखोत्थानादिपञ्चके कृते अभ्यासकरणे पुनः सामर्थ्ये सत्यकृते **प्रायश्चित्तम्** । अञ्जलिकरणमपि षोढा पञ्चविंशत्यावश्यकयुक्तं वन्दनं १ शिरसा प्रणामकरणम् २ एकस्य द्वयोर्वा हस्तयोर्ललाटे योजनम् ३ बहुमानरसभरेण सरभसं नमो खमासमणाणमितिभणनम् ४ निषद्याकरणम् ५ एतेषां योगश्च ६ । उक्तं च—

**'वंदिअ पणमिअ अंजलि गुरु आलावे अ अभिग्गहनिसज्जा । संजोगविहिविभत्ता अंजलिपग्गहेवि छट्टाणा'** ।।

(नि०भा० २१०३)

पार्श्वस्थस्य पुनरभ्युत्थाने अञ्जलिकरणे च चतुर्लघुकाः । उपलक्षणत्वात् कुशीला—ऽवसन्न—संसक्त—नियत—काथिक—दार्शनिक—मामाक—सम्प्रसारकाणां गृहस्थानां वाऽभ्युत्थाने अञ्जलिकरणे च चतुर्लघुकाः । संयतीनां च वन्दने चतुर्गुरु । किं मैथुनार्थी कुपितां वा प्रसादयतीति शङ्का च भवतीति । तत्र च प्रायश्चित्तं यथा—स्त्रीमैथुनशङ्कायां चतुर्गुरु, निःशङ्किते च मैथुने मूलम् । तथा पार्श्वस्था—ऽवसन्न—कुशील—संसक्तादीनामन्यतीर्थिकानां गृहस्थानां वा वाचनादाने तेभ्यो वा वाचनाग्रहणे चतुर्लघु । अथवा—अर्थे च चतुर्गुरु । यथाछन्दानां सूत्रे चतुर्गुरु । यथाछन्दानाम् अर्थे षड्लघु । तथा पुरुषाणां स्त्रीवाचनायां चतुर्गुरु, स्त्रीणां च पुरुषवाचनायां चतुर्गुरु । पार्श्वस्थादीनामनेकदिनवाचनासु पुनः प्रायश्चित्तमिदम्—

**'सत्तरत्तं तवो होइ ततो छेओ पहावई । छेएण छिन्नपरिआए तओ मूलं तओ दुगं'** ।।

(नि०भा० २७४८, बृ०क० ५४८६)

सप्त दिनानि **चतुर्लघुतपः**, ततः एकं दिनं **चतुर्लघुच्छेदः**, ततः एकैकदिनं **मूलाऽनवस्थाप्यपाराञ्चिकानि** । अथवा—तपस्तथैव चतुर्लघुच्छेदः । सप्त दिनानि शेषाण्येकैकदिनं तथैव । अथवा तपस्तथैव षड्गुरुच्छेदः सप्त दिनानि शेषाणि तथैव । अथवा—चतुर्लघुतपः सप्त दिनानि ततश्चतुर्गुरुतपः सप्त दिनानि । ततः षड्गुरु सप्त दिनानि, तत एते एव च्छेदाः सप्त सप्त दिनानि । ततो मूलानवस्थाप्यपाराञ्चिकान्येकैकदिनम् । अथवा—चतुर्लघ्वादीनि तपांसि तान्येव सप्त सप्त दिनानि । ततो लघुपञ्चकादिकाः षड्गुरुपर्यन्ता—श्छेदाः प्रत्येकं सप्त सप्त दिनानि ज्ञातव्याः । ततो मूलानवस्थाप्यपाराञ्चिकान्येकैकदिनम् । पार्श्वस्थादिषु च वाचनादानादानयोर्वन्दन—दुष्टसंसर्गादयोऽनेकदोषाः । अन्यतीर्थिकगृहिभ्यो ग्रहणे मिथ्यात्वस्थिरीकरणं यथा ते तेषां समीपे गच्छन्तं दृष्ट्वा मिथ्यादृष्टयश्चिन्तयन्ति—इमे एव प्रधानतरा यत एतेप्येतेषां समीपे शिक्षन्ते । लोको दृष्ट्वा भणति—एतेषामात्मन आगमो नास्ति, परसत्कानि शिक्षन्ते, निस्सारं प्रवचनमित्यपभ्राजना । एवमादयो दोषाः । तेषां च दानेऽधिकरणादयो दोषाः । यः पुनर्गृही अन्यतीर्थिको वा ज्ञानदर्शनचारित्राणि प्ररूपयति जिनवचनं च रोचते यस्य, स्वपाषण्ड्येव स वाच्यते । तथा गृही परपाषण्डी वा प्रव्रज्याऽभिमुखो वाच्यते । श्रावको वा सूत्रतः षड्जीवनिकां यावदर्थस्तु पिण्डैषणाध्ययनं यावत् । पार्श्वस्थादिर्वा संविग्नविहारमभ्युपगतोऽभ्युगन्तुकामो वा वाच्यते । तथाऽन्यत्रालाभे सिद्धान्ताव्युच्छित्त्यर्थं

पार्श्वस्थादिभ्योऽपि गृह्यते संयतीनां च यद्याचार्यं विना प्रवर्त्तिन्यादिर्वाचयित्री नास्ति तदाऽऽचार्यो वाचनां ददाति न दोषः । तथा गृहिणामन्यतीर्थिकानां वा अशनाद्याहारदाने चतुर्लघु, आज्ञाभङ्गादयश्च दोषाः । यदुक्तम्—

**जे भिक्खू असणादी दिज्जा गिहि अहव अन्नतित्थीणं । सो आणा अणवत्थं मिच्छत्त विराहणं पावे' ।।**

(नि०भा० ४९५९)

**सव्वे वि खलु गिहत्था परप्पवादी य देसविरया य । पडिसिद्धदाणकरणे समणे परलोगकंखिम्मि' ।।**

(नि०भा० ४९६०, ४९८२)

एतेषु दानं शरीरशुश्रूषाकरणं वा, अथवा दानस्यैव करणं यः परलोककाङ्क्षी श्रमणः तस्यैतत् प्रतिषिद्धम् । अत्र नोदकः प्राह—

**जुत्तमदाणमसीले कडसामइओ उ होइ समण इव । तस्समजुत्तमदाणं आचार्य आह—चोअग ! सुण कारणं तत्थ ।।**

**रंधणकिसिवाणिज्जं पव्वत्तइ तस्स पुव्वविणिउत्तं । सामाइअकडजोगिस्सुवस्सए अच्छमाणस्स ।।**

**सामाइअ पारेऊण निग्गओ जाव साहुवसहीओ । तं करणं साइज्जइ उदाहु तं वोसिरइ सव्वं ।।**

**दुविह तिविहेण रुंभइ अणुमण्णा तेण सा न पडिसिद्धा । तेण उ न सव्वविरओ कडसामइओवि सो किं च ।।**

**कामी सघरंगणओ थूलपइण्णा सि(से?) होइ दट्ठव्वा । छेअणभेअणकरणे उद्दिट्ठकडं च सो भुंजे' ।।**

(नि०भा० ४९६१ तः ४९६५, ४९८३ तः ४९८७)

अस्याः चूर्णिः— **पंचविसया कामेति' त्ति कामी** । सह गृहेन **सगृहः** । **अङ्गना** स्त्री सह अङ्गनया **साङ्गनः** । **थूलपइण्णा देसविरति'** त्ति वुत्तं भवति । साधूणं सव्वविरई, **वृक्षादिच्छेदने** पृथिव्यादिभेदने च प्रवृत्तः सामायिकभावादन्यत्र, जं च **उद्दिट्ठकडं** तं कडसामइओ वि भुंजइ । एवं सो **सव्वविरओ न भवति** । एएणं कारणेणं तस्स न कप्पइ दाउं । इमो अववाओ—गिही अन्नतित्थी वा णिबंधेणं मग्गिज्ज तदा से दिज्जति । सेहो वा गिहिवेसट्ठिओ भावतो पव्वइओ तस्स दिज्जा । विज्जस्स वा गिलाणट्ठा आणिअस्स दिज्जति । एवमादि एवं पार्श्वस्थावसन्नकुशीलसंसक्तनित्यवासिनामशनादिदाने तेभ्यो वा अशनादिग्रहणे **चतुर्लघु** आज्ञादयश्च दोषाः। उक्तं च—

**पासत्थासन्नाणं कुसील—संसत्त—निअयवासीणं । जे भिक्खू असणाई दिज्ज पडिच्छिज्ज वाणाई' ।।**

पार्श्वस्थादयश्चोद्गमादिदोषेषु नित्यं वर्त्तन्ते । अतस्तेषां दाने ते अनुमोदिताः, तेषां च हस्ताद् ग्रहणे उद्गमादिदोषाः प्रतिसेविता भवन्ति । तथा चोक्तम्—

**उग्गमदोसादीया पासत्थाई जओ न वज्जंति । तम्हा उ तव्विसुद्धिं इच्छंतो ते विवज्जिज्जा' ।।**

(नि०भा० ४९७४)

**सूइज्जइ अणुरागो दाणेणं पीइतो अगहणं तु । संसग्गया य दोसा गुणा य इअ ते परिहरिज्जा' ।।**

दुष्टसंसर्गतो बहुदोषाः, अदुष्टसंसर्गतश्च गुणा भवन्ति । अत्र च वनशुकोदाहरणं यथा—

**मातप्येका पिताप्येको मम तस्य च पक्षिणः । अहं मुनिभिरानीतः स च नीतो गवाशनैः[A]' ।।**
**'गवाशनानां स गिरः शृणोति अहं तु राजन् ! मुनिपुङ्गवानाम् । प्रत्यक्षमेतद्भवतापि दृष्टं संसर्गजा दोषगुणा भवन्ति' ।।**

(नि०भा० ४९७६)

अत्राऽयमपवादः—

**असिवे ओमोदरिए रायदुट्ठे भये व गेलन्ने । अद्धाणरोहए[B] वा दिज्जा अहवा पडिच्छिज्जा' ।।**

(नि०भा० ४९७८)

तथा योऽन्यतीर्थिकानां गृहस्थानां वा वस्त्रादि ददाति गृह्णाति वा, प्रातिहारिकं वा तेषां ददाति, तेषां समीपाद्वा प्रातिहारिकं गृह्णाति तस्य चतुर्लघु आज्ञादयश्च दोषाः । तथा चोक्तम्—

**जे भिक्खू वत्थादी दिज्जा गिहि अहव अन्नतित्थीणं । पडिहारिगं व तेसिं पडिच्छए आणमाईणि' ।।**

(नि०भा० ४९८०)

दाने ग्रहणे च बहवो दोषाः प्रतीता एव । **'जुत्तमदाणमसीले'** इत्यादिचालना तत् प्रत्यवस्थानं चाहारवद् वस्त्रेऽपि ज्ञातव्यम् । एवं पार्श्वस्थादीनामपि यो वस्त्रं ददाति तेषां हस्ताद्वा प्रातिहारिकं गृह्णाति तस्य चतुर्लघु । उक्तं च—

**जे भिक्खू वत्थाई पासत्थोसन्ननियवासीणं । दिज्जा अह पडिच्छे सो पावइ आणमादीणि' ।।**

(नि०भा० ४९९०)

इमो **अववाओ—गिही** अन्नतित्थिओ वा **सेहो पव्वईउकामो** तस्स दिज्जइ । जत्थ सुलभं वत्थं तंमि विसए अंतरे वा असिवादि हुज्जा । एवमादिकारणेहिं तं विसयमगच्छंतो इह अलभंतो पासत्थादिवत्थं गिण्हिज्जा, दिज्जा वा तेसिं, अद्धाणे वा वच्चंता मुसिआ अन्नतो अलभंता पासत्थादिवत्थं गिण्हिज्जा । हिमदेसे वा सीताभिभूआ पाडिहारिअं गिण्हिज्जा, गिलाणस्स वा अत्थुरणादि[C] गिण्हिज्जा एवमादि । तथा—

**ठिअकप्पंमि दसविहे ठवणाकप्पे अ दुविहमण्णतरे । उत्तरगुणकप्पंमि अ जो सरिकप्पो ससरिसो उ' ।।**

(नि०भा० ५९३२, बृ०क० ६४४१)

**स्थितकल्पादिभिर्यस्तुल्यः** स साधुः सदृशः । अथवा—संविग्नः सर्वोऽपि सदृशः साम्भोगिको वा सदृशः । अथवा कारणे पार्श्वस्था असाम्भोगिका अपि सदृशास्तेषां वसतिमध्ये विद्यमानं स्थानं यो न ददाति तस्य चतुर्लघु । अग्न्यादिना वसत्युपद्रवात् श्वापदादिभयाद्वा शैक्षग्लानाद्यर्थं वा अध्वप्रपन्ना वा । एवमादिभिः कारणैर्ये आगतास्तेषां विद्यमानस्थानादाने चतुर्गुरु । सम्भोगव्युच्छित्तिः साधर्मिकवात्सल्यव्युच्छित्तिः प्रवचनव्युच्छित्तिर्वा भवति । तस्मात् साधुना साधुषु दृढसौहृदेन भाव्यम् । आपत्सु चात्मवदन्योऽपि रक्षणीयः । उक्तं च—

**A.** म्लेच्छैः । **B.** रोधकः= परचक्रेण नगरादिवेष्टनम् । **C.** आस्तरणम् ='बिछानुं' इति भाषायाम् ।

जइ[A] एगभाणजिमिआ गिहिणो वि हु दीहसोहिआ हुंति । जिणवयणबाहिरा वि अ धम्मं पुण्णं अयाणंता ।।
किं पुण जगजीवसुहावहेण संभुंजिऊण समणेणं । सक्का हु इक्कमिक्के रक्खिउ जह अप्पणो देहो' ।।

(नि०भा० ५९४१ – ५९४२)

अशिवादिकारणैः पुनः स्थानाऽदानेऽपि न दोषः ।।२२२।। तथा—

**पुरिमचरिमासु पत्तादपेहि सज्झायअकरणे लहुगा ।**
**नियमे चेइअवंदणि संघस्स अखामणे गुरुगा ।।२२३।।**

व्याख्या—**प्रथमचरमपौरुष्योः** पात्राद्यप्रत्युपेक्षणे पात्रकस्य, आदिशब्दात् मात्रकादेरप्रतिलेखने **स्वाध्यायाकरणे** च **चतुर्लघुकाः** । **नियमे** सति **चैत्याऽवन्दने सङ्घस्य** चतुर्विधस्याप्यक्षामणे च **चतुर्गुरुकाः** ।।२२३।। तथा—

**बिट्ठपडिकमणि लहुगा गुरुगा निक्कारणोवविट्ठस्स ।**
**पडिकमणाकरणे थुक्कमाइपयघट्टणे गुरुगा ।।२२४।।**

व्याख्या—**उपविष्टः सुप्तो** वा यदि **प्रतिक्रमणं** करोति तदा **चतुर्लघुकाः** । **निष्कारणोपविष्टस्य चतुर्गुरुकाः** । **तथा** सर्वस्यापि **प्रतिक्रमणस्याकरणे चतुर्गुरुकाः** । तथा गुरोः आचार्यादिः **थुक्कादिलगने** थुक्कश्लेष्मादिलगने पदेन घट्टने चतुर्गुरुकाः ।।२२४।।

**लहु अप्पे वि हु तलि अंधकारगमि जीणमाइपरिभोगे ।**
**तुंबाइबीअवणयणि पडिक्कमणे चिइअवंदणए ।।२२५।।**

व्याख्या—**अल्पेऽपि तलिकापरिभोगेन** गमने, **अल्पेऽप्यन्धकारगमने**, **जीणं** जयनं तच्च प्रतीतमेव, **आदिशब्दादन्यदपि** तथाविधं दुष्प्रतिलेख्यं गृह्यते, तस्य **परिभोगे**, **तुम्बादीनामलाबूदङ्कादीनां** बीजापनयने, भाजनार्थं जिघृक्षया गृहस्थादिभिर्बीजनिष्कासने, **प्रतिक्रमणे** प्राभातिकप्रादोषिकप्रतिक्रमणमध्ये **चैत्याऽवन्दने** च । एतेषु **सर्वेष्वपि प्रत्येकं लघुमासः** ।।२२५।। तथा—

**दिवसनिसि पढमचरिमे चउनिद्दासेवणे लहू मासा ।**
**आणऽणवत्थुड्डाहो विराहणा निद्दवुड्ढी अ ।।२२६।।**

(नि०भा० १३४)

व्याख्या—**दिवसस्य** चतुर्ष्वपि यामेषु, **निशायाः** पुनः **प्रथमे चरमे** वा यामे **चतस्रो निद्राः** निद्रा—निद्रानिद्रा—प्रचला—प्रचलाप्रचलालक्षणाः **तासामासेवने प्रत्येकं लघुमासः** । निद्रायां द्वाभ्यां लघुः । अतिनिद्रायां कालगुरुः । प्रचलायां तपोगुरुः । अतिप्रचलायां द्वाभ्यामपि गुरुः । निद्रां कुर्वतां चेमे दोषाः—भगवता प्रतिषिद्धे काले स्वपता आज्ञाभङ्गः कृतो भवति । आज्ञाभङ्गे च चरणभङ्गो, यतो भणितम्— **आणाइ च्चिअ चरणं तब्भंगे जाण किं न भग्गं तु ?'** एकः प्रतिषिद्धकाले स्वपिति, अन्योऽपि तं दृष्ट्वा स्वपितीत्येवमनवस्था

**A.** दीर्घमैत्रीमन्तः ।

भवति । दिवा शयानोऽसंयतैर्दृष्टस्ततस्ते चिन्तयन्ति—यथा एष निक्षिप्तस्वाध्यायध्यानयोगः स्वपिति तथा एष लक्ष्यते रात्रौ रतिक्लान्तः, एवमुड्डाहो भवति । विराधना सुप्तस्याग्निप्रदीपने दाहेन, निद्रावृद्धिश्च भवति । यत उक्तम्—

**'वर्द्धन्ते पञ्च कौन्तेय ! सेव्यमानानि नित्यशः । आलस्यं मैथुनं निद्रा क्षुधा क्रोधश्च पञ्चमः'** ।।

स्त्यानर्द्धिनिद्राप्रायश्चित्तं त्वग्रे पाराञ्चिकप्रायश्चित्ताधिकारे भणिष्यते । एवमत्र **'वयछक्ककायछक्क'** मित्यादि—गाथासङ्गृहीतमूलोत्तरगुणविषयं प्रायश्चित्तं पूर्वं प्रतिपादितम्, तदनु एकोनविंशतिगाथाभिः सामान्यत उत्तरगुणविषयविश[A]कलितातिचारप्रायश्चित्तमभिहितम् । तदेवं मूलोत्तरगुणविषयातिचारप्रायश्चित्तप्रतिपादनेन समर्थितं चारित्राचारातिचारप्रायश्चित्तम् ।।२२६।।

अथ तपआचारातिचारप्रायश्चित्तं प्रतिपिपादयिषुराह—

**दुविहतवपरूवणया सट्ठाणारोवणा तमकरंते ।**
**सव्वत्थ होइ लहुओ लीणविणयझाय मुत्तूणं ।।२२७।।**

(नि०भा० ४१)

व्याख्या—**तपो द्विधा—बाह्यमभ्यन्तरं** च । तत्र बाह्यमनशनादि । यदुक्तम्—

**'अणसणमूणोअरिआ वित्तीसंखेवणं रसच्चाओ । कायकिलेसो संलीणता य बज्झो तवो होइ'** ।।

(नवतत्वप्रकरणम् ३४)

अभ्यन्तरं तु प्रायश्चित्तादि । उक्तं च—

**'पायच्छित्तं विणयो वेआवच्चं तहेव सज्झाओ । झाणं उस्सग्गोवि अ अब्भिंतरओ तवो होइ'** ।।

(नवतत्वप्रकरणम् ३५)

तयोः **प्ररूपणा** नाम प्रज्ञापना, यथा द्रुमपुष्पिकाध्ययने । द्विविधमपि तत्तपोऽकुर्वतः **स्वस्थानारोपणा** स्वस्थानप्रायश्चित्तं भवति । तच्चेदं **'सव्वत्थ होइ लहुओ'** त्ति । **सर्वेष्वनशनादितपोभेदेषु संलीनताविनयस्वाध्यायवर्जेषु शक्तौ सत्यामकृतेषु लघुमासो** भवति ।।२२७।।

अथाऽवतिष्ठमानसंलीनतादितपोभेदत्रयप्रायश्चित्तं क्रमेणाह—

**दव्वंमि असंलीणे थीनपुसंसत्तवसहीए गुरुगा ।**
**पुरिसतिरिएहि लहुगा भावे घाणिंदिए रागे ।।२२८।।**
**गुरुगो लहुगो दोसे गुरुगा सेसेसु रागि लोभे अ ।**
**दोसे स कोहमाणे लहुगा गुरुगो अ मायाए ।।२२९।।**

व्याख्या—**संलीनता द्विधा—द्रव्यसंलीनता भावसंलीनता** च । तत्र **द्रव्यसंलीनता** स्त्रीपशुपण्डकसंसक्तवसतिविवर्जनम्।

---

**A.** विभागतः ।

**भावसंलीनता** पुनर्द्विधा—इन्द्रियप्रतिसंलीनता नोइन्द्रियप्रतिसंलीनता च । इन्द्रियप्रतिसंलीनता पञ्चविधा श्रोत्रेन्द्रियादिकेन्द्रियपञ्चकभेदात् । नोइन्द्रियप्रतिसंलीनता च चतुर्विधा क्रोधादिकषायचतुष्कभेदात् । साधुना च द्रव्यतो भावतश्च प्रतिसंलीनेन भाव्यम्, यः पुनः प्रतिसंलीनो न भवति तस्येदं प्रायश्चित्तम्, तद्यथा—**द्रव्ये** द्रव्यविषये **असंलीनस्य स्त्रीनपुंसकसंसक्तवसतौ** वसतः **चतुर्गुरुका** भवन्ति । **पुरुषतिर्यग्भिः** संसक्तायां पुनर्वसतौ **चतुर्लघुकाः** । **भावे** भावविषये घ्राणेन्द्रिये घ्राणेन्द्रियविषये **रागतोऽसंलीनस्य गुरुमासः** । **द्वेषतोऽसंलीनस्य लघुमासः** । शेषेषु श्रोत्रेन्द्रियादिषु **चतुर्षु** विषये रागतोऽसंलीनस्य **चतुर्गुरुकाः** । एतेष्वेव च **द्वेषतोऽसंलीनस्य चतुर्लघुकाः** । **क्रोधे मानेऽसंलीनस्य चतुर्लघुकाः** । **मायायां गुरुमासः** । **लोभे च चतुर्गुरुकाः** । गाथायां तु व्यस्तोपन्यासो लाघवार्थः ।।२२८-२२९।।

एवं संलीनताप्रायश्चित्तमुक्तम् । अथ विनय—स्वाध्याय—प्रायश्चित्तमाह—

**गुरुवसभभिक्खुखुड्डे अविणय गुरुगाइ जाव लहुमासो ।**
**सत्तीइ सुत्तपोरिसि अकरणि लहुगो गुरु अत्थे ।।२३०।।**

व्याख्या—**गुरुवृषभभिक्षुक्षुल्लानामविनये चतुर्गुरुकादिलघुमासान्तं** प्रायश्चित्तम् । आचार्यस्याविनये **चतुर्गुरु** । उपाध्यायस्याविनये चतुर्लघुः । भिक्षोर्गुरुमासः । क्षुल्लस्य च **लघुमासो** भवतीत्यर्थः । **शक्तौ** सत्यां **सूत्रपौरुष्या अकरणे लघुमासः** । **अर्थपौरुष्या अकरणे गुरुमासः** । व्यवहारे त्वित्थम्—

**'सुत्तत्थपोरिसीणं अकरणि मासो उ होइ गुरुलहुगो । चाउक्कालं पोरिसिओवायणंतस्स चउलहुगा'** ।।

(व्य०सू० १३०)

**सूत्रार्थपौरुष्योः** सूत्रपौरुष्या अर्थपौरुष्या इत्यर्थः । **अकरणे** यथाक्रमं **गुरुमासो लघुमासः** । अर्थपौरुषी हि प्रज्ञादिविशिष्टसामग्र्यपेक्षा सूत्रायत्ता च । सूत्रपौरुषी त्वभिनवदीक्षितेनापि जडमतिनापि च यथाशक्ति अवश्यं कर्तव्या । सूत्राभावे सर्वस्याप्यभावाद्, अतः सूत्रपौरुष्या अकरणे **मासगुरु** । अर्थपौरुष्या अकरणे मासलघु । द्वयोःसूत्रपौरुष्योरकरणे **द्वौ लघुमासौ** । तिसृणां पौरुषीणामकरणे **त्रयो लघुमासा** इति सामर्थ्यात् प्रतिपत्तव्यम् । **'चाउक्काल'** मित्यादि । **चतुष्कालं** दिवारात्रिगतप्रथमचरमप्रहररूपेषु चतुर्षु कालेषु **सूत्रार्थपौरुषीरवपातयतो** भ्रंशयतोऽकुर्वत इत्यर्थः । **चतुर्लघुकाश्चत्वारो** लघुमासाः ।।२३०।।

**अणसणमाई नवविहसेसतवोऽकरणि लहुग सत्तीए ।**
**वयभंगे लहु सहसप्पमायओ गुरुग दप्पेणं ।।२३१।।**

व्याख्या—**अनशनादेर्नवविधस्य शेषतपसः शक्तौ** सत्याम**करणे चतुर्लघुका** जीतेनेति सम्भाव्यते । तथा **सहसा प्रमादेन** वा **व्रतभङ्गे लघुमासः** । **दर्पेण** अकुशलपरिणामेन **व्रतभङ्गे चतुर्गुरुकाः** । व्रतभङ्गे चातिक्रमव्यतिक्रमाती—चारानाचाररूपाः चत्वारो भेदा भवन्ति । एतेषां चाधाकर्म प्रतीत्येदं व्याख्यानम्—

**'आहाकम्मामंतण पडिसुणमाणे अतिक्कमो होइ । पयभेआइ वइक्कम गहिए तइएयरो गिलिए'** ।।

(व्य०सू० ३३, पिं०नि० १८२)

कोऽपि श्राद्धो नालप्रतिबद्धो ज्ञातिप्रतिबद्धो गुणानुरक्तो वा **आधाकर्म** निष्पाद्य **निमन्त्रयति** । यथा भगवन् ! युष्मन्निमित्तमस्मद्गृहे सिद्धमन्नमास्ते इति समागत्य प्रतिगृह्यतामित्यादि, **तत्प्रतिशृण्वति** अभ्युपगच्छति **अतिक्रमो** नाम दोषो भवति । स च तावत् यावदुपयोगपरिसमाप्तिः । किमुक्तं भवति यत्प्रतिशृणोति, प्रतिश्रवणानन्तरं चोत्तिष्ठति, पात्राण्युद्गृह्णाति, उद्गृह्य च गुरोः समीपमागत्योपयोगं करोति । एष समस्तोऽपि व्यापारोऽतिक्रमः । उपयोगपरिसमाप्त्यनन्तरं च यदाधाकर्मग्रहणाय **पदभेदं** करोति, आदिशब्दात् मार्गे गच्छति, गृहं प्रविशति, आधाकर्मग्रहणाय पात्रं प्रसारयति, न चाद्यापि प्रतिगृह्णाति । एष सर्वोऽपि व्यापारो **व्यतिक्रमः** । '**गहिए तइए**' त्ति । आधाकर्मणि **गृहीते**, उपलक्षणमेतत् यावद्वसतौ समानीते गुरुसमक्षमालोचित्ते, भोजनार्थमुपस्थापिते, मुखे प्रक्षिप्यमाणेऽपि च यावन्नाद्यापि गिलति ताव**त्तृतीयोऽतीचारलक्षणो** दोषः । **गिलिते** त्वाधाकर्म**ण्यनाचारः** । एवमन्यत्राप्यतिक्रमादिस्वरूपमवगन्तव्यम् । एतेषु चेदं प्रायश्चित्तम्, तद्यथा—अतिक्रमे व्यतिक्रमे अतीचारे च मासगुरुः यथोत्तरं तपःकालविशेषितः । अनाचारे चतुर्गुरु । एते च मासगुर्वादयः प्रायश्चित्तभेदा अतिक्रमादिष्वविशोधिकोट्यां द्रष्टव्याः । विशोधिकोट्यां त्वेत एव मासादयो लघुकाः ।।२३१।।

अथाष्टम्यादिपर्वदिनेषु यथोक्ततपोऽकरणे प्रायश्चित्तमाह—

**चउछट्ठट्ठमऽकरणे अट्ठमिपक्खचउमासवरिसेसु ।**
**लहु गुरु लहुगा गुरुगा अवंदणे चेइसाधूणं ।।२३२।।**

(व्य०सू० १३३)

व्याख्या—अत्र यथासङ्ख्येन पदयोजना । सा चैवम्—**अष्टम्यां चतुर्थस्याकरणे मासलघु** । **पाक्षिके चतुर्दश्यां चतुर्थस्याकरणे मासगुरु** । **चतुर्मासके षष्ठस्याकरणे चत्वारो लघुमासाः** । **सांवत्सरिके अष्टमस्याकरणे चत्वारो गुरुमासाः** । तथा एतेषु चाष्टम्यादिषु दिवसेषु **चैत्यानां** जिनबिम्बानामन्यवसतिगत**सुसाधूनां चावन्दने प्रत्येकं मासलघु** ।।२३२।। अथ प्रत्याख्यानाऽकरण—भङ्गप्रायश्चित्तमाह—

**पाणासंवरि भिन्नं नवकाराईण अगहणे भंगे ।**
**लहु तदहिअ तंमत्तं अभिक्खभंगे दसहिं सपयं ।।२३३।।**

व्याख्या—**पानस्याऽसंवरणे** विकालवेलायां पानकाहारस्याऽप्रत्याख्याने **भिन्नमासः** । साधुभिः किल भुक्तानन्तरं सर्वाहारसंवरणं कार्यम् । अत एव साधवस्तृतीयपौरुष्यां स्वाध्यायकरणकाले त्रिविधाहारं प्रत्याख्यान्ति, विकाले च पानकाहारमपि । यस्तु विकालेऽपि सर्वसंवरणं न करोति तस्य सर्वाहारासंवरणे **लघुमासो** भवतीत्युपलक्षणत्वादवसेयम् । तथा **नमस्कारसहितपौरुष्यादिप्रत्याख्यानानामग्रहणे** गृहीतानां वा **भङ्गे लघुमासः** । **केचित्** पुनर्नमस्कारसहितपौरुषीसार्द्धपौरुषीपुरिमार्द्धापार्द्धद्व्यासनैकासननिर्विकृतिकाचाम्लक्षपणानां **भङ्गे तदधिकप्रत्याख्यानदानमाहुः** । **इतरे** तु यदेवैकासनादि **भज्यते तदेवैकासनादि** दीयते इति भणन्ति । तथा

**अभीक्ष्णं** पुनः पुनः प्रत्याख्यानभङ्गे **दशभिर्वाराभिः स्वपदं** पाराञ्चिकं भवति । तथाहि—सकृत्प्रत्याख्यानभङ्गे मासलघु । द्वितीयवारभङ्गे मासगुरु । तृतीयवारे चतुर्लघु । चतुर्थवारे चतुर्गुरु । पञ्चमवारे षड्लघु । षष्ठवारे षड्गुरु । सप्तमवारे छेदः । अष्टमवारे मूलम् । नवमवारे अनवस्थाप्यम् । दशमवारे पाराञ्चिकम् । प्रत्याख्यानभङ्गे चाज्ञातिक्रमादयो दोषाः । इमे चापरे—

**अपच्चयो अवन्नो पसंगदोसो अ अदढया धम्मे । माया य मुसावाओ होइ पइन्नाइलोवो अ' ।।**

(नि०भा० ३९८८)

यथा एष नमस्कारसहितादिप्रत्याख्यानं भनक्ति तथा मूलगुणप्रत्याख्यानमपि भनक्ति । एवमगीतार्थगृहस्थानाम**प्रत्ययं** जनयति । आत्मनः साधूनां **चावर्णवादं** जनयति । प्रत्याख्यानभङ्ग**प्रसङ्गेन** मूलगुणानपि भनक्ति । प्रत्याख्यानधर्मे श्रमण**धर्मे** वा **अदृढत्वं** कृतं भवति । अन्यां प्रतिज्ञां प्रतिपद्यते अन्यच्च करोतीति **माया** । अन्यद्भाषते अन्यत्करोतीति **मृषावादः** । पौरुष्यादि**प्रतिज्ञापदलोपः** कृतो भवति । प्रत्याख्यानं भनक्तीति प्रद्विष्टा देवता छलनादि कुर्यात् । **कारणैः** पुनः प्रत्याख्यानभङ्गेऽपि न दोषः ।।२३३।।

एवं तपआचारातिचारप्रायश्चित्तं प्ररूपितम् । अथ वीर्याचाराऽतिचारप्रायश्चित्तमभिधित्सुराह—

**नाणे दंसणचरणे तवे अ छत्तीसएसु भेएसु ।**
**विरिअं न हावइज्जा सट्ठाणारुवण हावंते ।।२३४।।**

व्याख्या—**ज्ञानाचारो**ऽष्टविधः । **दर्शनाचारो**ऽष्टविधः । **चारित्राचारो**ऽष्टविधः । **तपआचारो** द्वादशविधः । एवमेतेषु **षट्त्रिंशत्सु भेदेषु** आचारविशेषेसु **वीर्यं** शक्तिं न **हापयेत्** न गोपयेत् । वीर्यं **हापयतश्च स्वस्थानारोपणा** स्वस्थानप्रायश्चित्तं भवति । ज्ञानाचारं हापयतस्तदेव प्रायश्चित्तं यत् ज्ञानाचारेऽभिहितम् । एवं शेषेष्वपि स्वस्थानप्रायश्चित्तमवगन्तव्यम्। **एषा स्वस्थानारोपणा** ।।२३४।।

अथ वीर्याचारादिविषयं जीत—व्यवहारगतं प्रायश्चित्तमुपदर्शयति—

**ठवणमणापुच्छाए निव्विसणे विरिअगूहणाए अ ।**
**जीएणं गुरुमासो सेसगमायासु चउगुरुगा ।।२३५।।**

व्याख्या—**स्थापनमिति** । **स्थापनाकुलानि** दानश्राद्धयथाभद्रकश्राद्धादीनां गृहाणि, एतेषु ह्येकेनैवाचार्यादिप्रायोग्यग्राहिणा सङ्घाटकेन प्रवेष्टव्यं नान्यैरित्यवगणय्य लुब्धत्वाद् गुरो**रनापृच्छया** तेभ्यः प्रायोग्यभक्ताद्यादाय **निविशतः** परिभुञानस्य **वीर्यगूहनायां** च **वीर्यं** तपोऽनुष्ठानादिपराक्रमस्तस्य **गूहनायां** सतोऽपि मायया गोपनायां **जीतेन** जीतव्यवहारेण **गुरुमासः** । श्रुतव्यवहारेण पुनरेको जीतोक्तो द्वितीयो मायानिष्पन्नः, ततो गुरुमासद्वयं दीयत इति भावः । **शेषकमाया** पूर्वोक्तमायातोऽन्या यथा—

**सिआ एगयओ लद्धुं विविहं पाणभोअणं । भद्दगं भद्दगं भुच्चा विवन्नं विरसमाहरे' ।।**

**जाणंतु ता इमे समणा आयअट्ठी (मोक्षार्थी) अयं मुणी । संतुट्ठो सेवए पंतं लूहवित्ती सुतोसओ' ।।**
(दशवै० सूत्रम् ५/२/३३-३४)

इत्यादिकासु यशोऽर्थं कृतासु मायासु पुनश्चतुर्गुरुकाः ।।२३५।। तथा—

**विज्जाइसुविणलक्खणकोउअभूईनिमित्तपसिणेसु ।**
**गिहिणा उवहिवहावणि वमणविरेआइसु अ लहुगा ।।२३६।।**

व्याख्या—**विद्या** स्त्र्यभिधाना सोपचारसाधना वा, आदिशब्दान्मन्त्र—योगा गृह्यन्ते । तत्र मन्त्रः पुरुषाभिधानः पठितसिद्धो वा, वशीकरणविद्वेषणोच्चाटनपादलेपान्तर्द्धानादिका योगा अनेकविधास्ते पुनः सर्वेऽपि सविद्या अविद्या वा भवन्ति । **स्वप्नं** सुप्तजागरावस्थायां प्रायो यद् दृश्यते तच्च शुभाशुभमागामिसुखदुःखनिमित्तं भवति । **लक्षणं** द्विधा बाह्यमभ्यन्तरं च । तत्र **बाह्यं** स्वरवर्णादि । **अभ्यन्तरं** स्वभावसत्त्वादि । तत्र प्राकृतमनुष्याणां बाह्यानि द्वात्रिंशल्लक्षणानि भवन्ति । बलदेववासुदेवानामष्टोत्तरं शतम् । चक्रवर्त्तितीर्थकराणामष्टोत्तरं सहस्रम् । यानि हस्तपादादिषु स्फुटानि लक्ष्यन्ते तेषामिदं प्रमाणम्, यानि पुनरन्तःस्वभावसत्त्वादीनि तैः सह बहुतराणि भवन्ति । उपलक्षणाद्व्यञ्जनमपि ज्ञेयम् । लक्षणव्यञ्जनयोरयं विशेषः— मानोन्मानादिकं लक्षणम्, मषतिलकादिकं व्यञ्जनम् । अथवा शरीरेण सहोत्पन्नं लक्षणं पश्चात्समुत्पन्नं व्यञ्जनम् । मानोन्मानप्रमाणानां चेदं व्याख्यानम्—

**जलदोणमद्धभारं समुहाइं समुस्सिओ व जो नव उ । माणुम्माणपमाणं तिविहं खलु लक्खणं एअं' ।।**
(नि०भा० ४२९५ तः ४३०४)

**कौतुकं** निन्दुप्रभृतीनां श्मशानचत्वरादिषु स्नानविधापनम् । **भूतिकर्म** रक्षानिमित्तं विद्याभिमन्त्रितरक्षाप्रदानम् । **निमित्तमतीतादिकालत्रयगतलाभालाभसुखदुःखादिकथनम्** । **प्रश्नो** नानाविधा लोकपृच्छा लग्नबलादिना तस्य कथनम् । **प्रश्नात्प्रश्नो वा** । स चायं स्वप्नमध्ये विद्या किञ्चित्कथयति । अथवा विद्याभिमन्त्रिता घण्टिका कर्णमूले चाल्यते तत्र देवता कथयति तस्य परेषां कथनम्, ततो विद्यामन्त्रसविद्यायोगप्रयोगे स्वप्नलक्षणव्यञ्जन—निमित्तप्रश्नकथने कौतुकभूतिकर्मकरणे, उपलक्षणत्वान्निधानधातुवादकथने शिल्पद्वासप्ततिकलाशिक्षणे मार्गं पृच्छतां मार्गकथने च **चतुर्लघुकाः** प्रायश्चित्तं भवति । **अविद्यायोगप्रयोगे तु मासलघु । मिश्रे** पुनः **संयोगप्रायश्चित्तम्** । तथा **गृहिणा** गृहस्थेनाऽन्यतीर्थिकेन वा **उपधेः** स्वोपकरणस्य **वाहने चतुर्लघुकाः** । आज्ञादयश्च दोषाः । इमे चापरे—स गृहस्थोऽन्यतीर्थिको वा उपकरणं पातयेत् भाजनं वा भिन्द्यात् मलिने दुर्गन्धे चोपकरणे जुगुप्सां कुर्यात् षट्पदिका वा पातयेत् मारयेद्वा । अयोगोलकल्पो वाऽसौऽस्थण्डिले पृथिव्यादौ स्थापयेत् तद्द्वारेण वा तस्यात्मविराधना भवेत् तत्र परितापनादि, यच्च पश्चादौषधभेषजानि कुर्वन् विराधयति तन्निष्पन्नं च तस्य प्रायश्चित्तं स्यात् । स वा तदुपकरणं हरेत् तस्यानुपयुक्तस्याऽन्यो हरेत्, ग्लानत्वादिकारणैः पुनरुपकरणवाहनेपि

न दोषः । तथा वमनमूर्ध्वं विरेचः । विरेचोऽधःश्रावणम्, आदिपदात्तैलादिना गात्राभ्यङ्गः वर्णबलादिनिमित्तं घृतादिस्नेहपानं रूपमेधास्वरमाधुर्यादिनिमित्तं रसायनसेवनं, वलिपलितनाशनार्थमौषधकरणं नासाऽर्शःप्रभृतिरोग—नाशनार्थं तस्य करणं बस्तिकर्म च । एतेषु वमनविरेचादिषु निष्कारणं कृतेषु चतुर्लघुकाः प्रायश्चित्तम् । इमे च दोषाः । अतीव वमने मरणम्, वमननिरोधे कुष्ठम्, वर्चोनिरोधे मरणम्, अतिवेगेनास्थण्डिले छर्द्दनं तत्र षट्कायविराधना । यच्चात्मानमग्लानं ग्लानं करोति तन्निष्पन्नं च प्रायश्चित्तम् ।।२३६।। तथा—

**सुइमाई इक्किक्का गुरुण सेसाण वंससिंगसुई ।**
**गिहिमाइणा तदुत्तरकरणे गुरुगो तहाणाई ।।२३७।।**

व्याख्या—सूची लोहमयी वस्त्रादिसीवनोपकरणम्, आदिशब्दान्नखहरणी—कर्णशोधनादिकमौपग्रहिकोपकरणम्। एतान्येकैकान्येव गुरूणां भवन्ति । शेषा अपि तैरेव कार्यं कुर्वन्ति । अथवा महान्तं गच्छमाश्रित्य शेषसाधूनामेकैका वंशमयी शृङ्गमयी वा सूची भवति । गृहिणा गृहस्थेनादिशब्दादन्यतीर्थिकिन तस्य सूच्यादेरुत्तरकरणे समारचनरूपे कारिते सति गुरुमासः तथा आज्ञादयो दोषाः ।।२३७।।

अथ पञ्चकल्यप्रायश्चित्तशोध्यमपराधजातं पादोनगाथाद्वयेनाह—

**साहूहिं लेहसालं चिगिच्छचप्पुडिअरक्खडिअखडिअं ।**
**सिसुकीलनघरकम्मं कयविक्कयमेसिमेहिं वा ।।२३८।।**
**कंकणिअकंडगाई गणत्तिआहारपोअणाई तहा ।**
**कारिंते पणकल्लं लहू तदब्भंग पयधुवणे ।।२३९।।**

व्याख्या—इदं गाथाद्वयं श्राद्धजीतकल्पसम्बद्धं तेन तत्प्राधान्येन प्रायश्चित्तमत्र निबद्धं प्रस्तुतेप्युपयोगीत्यत्रापि लिखितमतोऽत्र साधुप्राधान्येन प्रदर्श्यते, यथा—यदि साधुभिः श्राद्धो लेखशालां शिशु पाठनरूपां कारयति । चिकित्सां रोगप्रतीकारं । चपुटिकां रक्षाटिकां खटिकां शिशुक्रीडनं गृहकर्म वा धवलनचित्रकरणादि कारयति, तदा साधोरेतानि कुर्वाणस्य प्रत्येकं पञ्चकल्यं भवति । तथा एतेषां गृहस्थानां सम्बन्धिवस्तुनः क्रयविक्रययोः करणे, एतैर्वा गृहस्थैः स्वसम्बन्धिवस्तुक्रयविक्रयविधापने पञ्चकल्यम् । तथा कङ्कणिका कराभरणं कण्डकं वलयम्, आदिशब्दात् आभरणसमारचनादि । तथा गणेत्रिकाहारप्रोतनादि । आदिशब्दादन्यदप्येवंविधं साधुजनानुचितगृहकर्म गृहस्थो यत्र कारयति तत्र साधोः प्रत्येकं पञ्चकल्यं प्रायश्चित्तं भवति । तथा तेन गृहस्थेन गात्राभ्यङ्गविधापने पादधावने च लघुमासः ।।२३८-२३९।।

अथ कल्यशोध्यमपराधमाह—

**संसट्ठदाणगहणे कल्लं निज्जूहणा अणुवसंते ।**
**पडिलेहणकालंमि वि फिडिए कल्लं पमत्तस्स ।।२४०।।**

व्याख्या—**संसृष्टमुच्छिष्टं** भक्तादि तस्य **दाने ग्रहणे च** साधोर्घट्टयित्वा—त्वयैवं पुनर्न कार्यमित्युक्त्वा **कल्यं** प्रायश्चित्तं गुरुर्दत्ते । तथा **अनुपशान्तस्य** तस्माद्दोषादनिवृत्तस्य दायकस्य ग्राहकस्य च **निर्यूहणा** गणान् निष्कासनं भवति । तथा **प्रतिलेखनाकालेऽपि स्फिटिते** प्रमादपरवशतया अतिक्रान्ते **प्रमत्तस्य** साधोः **कल्यं** भवति ।।२४०।। पुनः (पञ्च)कल्याणकप्रायश्चित्तशोध्यातिचारस्थानानि गाथायुगलेनाह—

> **दप्पेणं पंचिंदियवोरमणे संकिलिट्ठकम्मे अ ।**
> **दीहद्धाणासेविसु गिलाणकप्पावसाणे अ ।।२४१।।**
> **सव्वोवहिकप्पंमि अ पुरि मत्तापेहणे अ चरिमाए ।**
> **चउमासवरिससव्वुवहिधुवणअंते अ पणकल्लं ।।२४२।।**

व्याख्या—**दर्पो** धावनवल्गनडेपनादिः प्राग्व्याख्यातः । तं कुर्वता **पञ्चेन्द्रियव्यपरोपणं** विघातनं कृतं स्यात् तस्मिन् दर्पेण **पञ्चेन्द्रियव्यपरोपणे । संक्लिष्टं कर्म** यदङ्गादानस्य—लिङ्गस्य करपरिमर्द्दनेन शुक्रपुद्गलनिष्कासनं करकर्मेति यदुच्यते, चकाराल्लिङ्गस्य स्नेहादिना म्रक्षणादिकं च तस्मिन् **सङ्क्लिष्टकर्मणि । 'दीहद्धाणासेविसु'** त्ति । षष्ठीसप्तम्योरर्थं प्रत्यभेदः, ततो दीर्घाध्वनि यदाधाकर्म अध्वकल्पादिकं च शुष्ककदलीफलादिधरणात्मकं तदाऽऽ**सेविनां ग्लानकल्पावसाने** च । **ग्लानकल्पो** ग्लानाचारः आधाकर्मिक्वाथपथ्याद्युपजीवनं सन्निधीभूतचूर्णाद्या—सेवनं वा तस्य ग्लानकल्प**स्यावसाने** नीरोगित्वे जाते सतीत्यर्थः । **चः** समुच्चये । **सर्वोपधिकल्पे च** वर्षारम्भं विनापि सर्वोपधेः **कल्पे** क्षालने कृते सति **'पुरि मत्तापेहणे अ चरिमाए'** सूचकत्वात् सूत्रस्य' **'पुरि'** त्ति पौरुष्यां **'चरिमाए'** त्ति । चरमभागोनायां प्रथमपादोनप्रहरे सतीत्यर्थः । **मात्राप्रेक्षणे मात्रकस्य** भिक्षापात्रकस्य प्रमादेना**प्रतिलेखने, चातुर्मासिके वार्षिके** पर्युषणाख्ये पर्वणि शुद्धौ प्रक्रान्तायां **वर्षारम्भकालेऽपि सर्वोपधिधावनिकाप्रान्ते** च **पञ्चकल्यं** सर्वेष्वप्येतेषु पदेषु शोधकं पञ्चकल्याणकं प्रायश्चित्तं भवतीत्यर्थः । अत्राह—दर्पतः पञ्चेन्द्रियवधादौ दीयतां नाम प्रायश्चित्तम्, चातुर्मासिकवार्षिकेषु चातिचाराभावे कथं प्रायश्चित्तम् ? इति । अत्रोच्यते—प्रादोषिका—र्द्धरात्रिक—वैरात्रिक—प्राभातिकाख्यकालानां कदाचिदग्रहणम्, सूत्रार्थपौरुष्योर्जात्वऽकरणम् अप्रतिलेखितादि चेत्यादीन् सूक्ष्मातिचारान् कृतानपि यतो न जानाति न वा स्मरति । ततश्चातुर्मासिकवार्षिकेषु निरतिचारस्यापि प्रायश्चित्तं भवति । ननु वर्षारम्भकाले सर्वोपधिधावनं सिद्धान्तोक्तमेव । ततः कथं तदा सर्वोपधिधावने प्रायश्चित्तम् ? उच्यते—तदापि सिद्धान्तोक्तविधिना यतनापुरस्सरमपि धाव्यमानेषु वस्त्रेषु कथञ्चिद्वायुविराधनारूपः षट्पदिकोपमर्द्दादिरूपो वाऽसंयमोऽपि सम्भाव्यते, ततः तच्छुद्ध्यर्थं तत्र प्रायश्चित्तम् । ओघनिर्युक्तौ तु तत्रैककल्यमेवोक्तमस्ति । चकारद्वयं चात्र गाथायां समुच्चयार्थं **'पुरि मत्तापेहणे अ चरिमाए'** इत्यत्र तु यश्चकारः सोऽनुक्तसमुच्चयार्थः । तेन यद्युपोषितः कश्चिच्चरमायां पौरुष्यामपि पात्रकानि न प्रतिलेखयति, आस्तां प्रथमायां तदा तस्यैककल्याणकं दीयत इति समुच्चीयते ।।२४१-२४२।।

अथ कर्मवशावधावित—प्रत्यावृत्तसाधुविषयप्रायश्चित्ताभिधित्सया गाथायुगलमाह—

**संविग्गो साविक्खो कम्मवसोहाविओ निरईआरो ।**
**तद्दिणनिअत्तसुद्धो न तस्स उवही वि उवहम्मे ।।२४३।।**
**संविग्गे अमणुन्ने एवं वसि आगए नवरि लहुगो ।**
**पासत्थाइसु लहुगा सच्छंदि गुरुगा उवहिघाओ ।।२४४।।**

(व्य०सू० ३६३५ तः ३६५१)

व्याख्या—कश्चित्साधुः **कर्मवशात्** चारित्रमोहनीयकर्मोदयवशादव**धावितो** दुस्सहपरीषहपराजिततया गणादपगत—स्ततः केनाप्यनुशिष्टः स्वयं वा प्रत्यावृत्तपरिणामः पुनः **संविग्नः** सञ्जातसंवेगः समुत्पन्नज्ञानदर्शन—चारित्रसमाराधनोद्यम इत्यर्थः । ततः **सापेक्षः** संयमसापेक्षचित्तो **निरतीचारः** सर्वातीचारविवर्जितो यदि तस्मिन्नेव दिने **निवृत्तः** पुनः स्वगणमध्ये समायातः, तदा **शुद्धः** प्रायश्चित्तभाग् न भवति **उपधिरपि तस्य नोपहन्यते** साधुनामकल्प्यो न स्यात् । अथवा **संविग्नेषु** संयमोद्यतेषु साधुषु **अन्यसाम्भोगिकेषु** मध्येऽ**सावुषित्वा आगत**स्तदाप्येवम् अमुना प्रकारेण तस्योपधिर्नोपहन्यते, **परं** तस्य **लघुमासः** प्रायश्चित्तं भवति अथ **पार्श्वस्थादिषू**षित्वा समागतस्तदा तस्य **चतुर्लघुकाः** । अथ **स्वच्छन्देषु** यथाछन्देषु उषित्वा यद्यागतस्तदा तस्य **चतुर्गुरुकाः** **पार्श्वस्थादिकेषु** च वसतः **साधोरुपधिघातोऽपि** भवति । अथ संविग्नादिभिरनुशिष्टः साधुर्निवृत्तः परं तद्दिने एव गच्छे न मिलितो न च **व्रजिका** सङ्खडिकादिषु प्रतिबद्धः, ततः चिरेणापि मिलितस्य **तस्योपधिर्नोपहन्यते** । अथ पार्श्वस्थादीन् परिहरन्नेकाकी रात्रौ यदि सुप्तः तदा तस्य **मासलघु प्रायश्चित्तम् उपधिश्चोपहन्यते** । ततः परं द्वितीयतृतीयादिदिनेष्वेकाकिनो वसतश्चतुर्लघु । यच्च सूत्रार्थपौरुष्यकरणे सूत्रार्थनाशे दर्शनचरणविराधने च प्रायश्चित्तं तत् सर्वमापद्यते । यश्चावधावनानुप्रेक्षी आकारेङ्गितादिभिरवगम्यते, तस्य रतिवाक्यचूलाभणितान्यऽष्टादशस्थानानि हयरश्मिगजाङ्कुशपोतपताकाभूतानि यदि पुराप्यवगतानि तदा स्मारयन्ति वृषभसाधवः । अथ न तान्यवगतानि तस्य तदा सूत्रार्थतः कथयन्ति ।।२४३-२४४।।

अथ छेदादिशोध्यमतीचारं कृतवतामपि केषाञ्चित्तप एव इति तान् ज्ञापयितुमाह—

**छेआइमसद्दहओ मिउणो परिआयगव्विअस्स वि अ ।**
**छेआईए वि तवो जीएण गणाहिवइणो अ ।।२४५।।**

व्याख्या—यः छेदं न श्रद्दधाति भणति च व्रतपर्याये दिनपञ्चकादौ छिन्ने किं मदीयं छिन्नं ? सम्पूर्णकरचरण—कर्णनासिकाद्यवयव एव तावदहमस्मि'; तस्य **छेदाद्यश्रद्धानपरस्य** । **मिउणो'** त्ति । यः छिद्यमानो व्रतपर्यायेन सन्तप्यते । यथा 'कष्टं मम पर्यायः छिन्न' इति । यद्वा 'अन्येषां लघूनामप्यहमतिलघीयान् जात' इति तस्य **मृदोः** । यश्च **पर्यायगर्वितो** दीर्घपर्यायत्वात् छिन्नेऽपि पर्यायेऽन्येभ्योऽभ्यधिक पर्याय एव नाऽवमपर्यायः,

न वा पर्यायच्छेदाद् बिभेति तस्य **पर्यायगर्वितस्य** । **अपिचेति** समुच्चये । एतेषामुद्दिष्टानां **छेदमापन्नानामपि**, आदिशब्दान्मूलानवस्थाप्यपाराञ्चिकानप्यापन्नानाम् । तथा **गणाधिपतेः** आचार्यस्य, **च**शब्दात् **कुलगणसङ्घाधिपानां** च **जीतेन** जीतव्यवहारमतेन **तप एव दीयते** । अत्राह—दीयतां नाम छेदाद्यश्रद्धालुप्रभृतीनां छेदापत्तावपि तपः, आचार्यादीनां तु कथम् ? इति । अत्रोच्यते—अनेकविधाः शिष्याः परिणामकाः अपरिणामकाः अतिपरिणामकाः शैक्षाः उच्छृङ्खलाश्चेति । तत्रोत्सर्गे उत्सर्गमपवादे चापवादं यथा भणितं ये श्रद्दधत्याचरन्ति च ते परिणामकाः । ये पुनरुत्सर्गमेव श्रद्दधत्याचरन्ति च, अपवादं तु न श्रद्दधति नाचरन्ति वा ते अपरिणामकाः । ये चापवादमेवाचरन्ति नोत्सर्गं ते अतिपरिणामकाः । शैक्षा नवदीक्षिताः । उच्छृङ्खला उल्लुण्ठाः । एषामपरिणामकादीनामिमे मा निन्दनीया लाघवभाजो भूवन्नित्याचार्यादीनामपि तप एव दीयते न छेदादय इति ।।२४५।।

उक्तं वीर्याचारातिचारप्रायश्चित्तं तदुक्तौ च समर्थितं पञ्चविधाचारातिचारप्रायश्चित्तम् । अथ विशेषाभिधानाय प्रस्तावनामाह—

**एअं पुण सव्वं चिअ पायं सामन्नओ विणिद्दिट्ठं ।**
**दाणं विभागओ पुण दव्वाइविसेसिअं नेअं ।।२४६।।**

व्याख्या— **एतत्** पुनरालोचनार्हादि प्रायश्चित्तदानं **सर्वमेव प्रायो** बाहुल्येन **सामान्यतो** द्रव्याद्यविभागतो **विनिर्दिष्टम्** । **विभागतः** पुनर्द्रव्यादीनि द्रव्य—क्षेत्र—काल—भाव—पुरुष—प्रतिसेवनाद्यपेक्षाविशेषितं हीनमधिकं वा यथोक्तमेव वा जीतदानं दातव्यमिति **ज्ञेयम्** । उक्तं च—

**'दव्वं खित्तं कालं भावं पुरिसपडिसेवणाओ अ । नाउ मिअं चिय दिज्जा तंमत्तं हीणमहिअं वा' ।। मिअं चिय' त्ति** । **मितमेव** द्रव्यक्षेत्रादिप्रमाणेनैव । कोऽर्थः ? द्रव्यादिषु हीनेषु हीनम्, अधिकेष्वधिकम्, अहीनोत्कृष्टेषु तन्मात्रं जीतोक्तसममेव दद्यात् ।।२४६।। तत्र द्रव्याभिधित्सयाह—

**आहाराई दव्वं बलिअं सुलहं च नाउ अहिअंपि ।**
**दिज्जाहि दुब्बलं दुल्लहं च नाऊण हीणंपि ।।२४७।।**

(गु०वि० २/२७७)

व्याख्या—**आहारादिकं द्रव्यं यत्र देशे बलिकं सुलभं च** । यथा अनूपदेशे शालिकूरो बलिकः स्वभावेनैव सुलभश्च **तज्ज्ञात्वाऽधिकमपि** जीतोक्ताद् बहुतरमपि **दद्यात्** । यत्र पुनर्वल्लचणककञ्जिकादिको रूक्षाहारो **दुर्बलो दुर्लभश्च** तं **ज्ञात्वा हीनमपि** जीतोक्तादल्पमपि **दद्यादित्यर्थः** ।।२४७।।

अथ क्षेत्रकालाभिधानार्थमाह—

**लुक्खं सीअल साहारणं च खित्तमहिअंपि सीअंमि ।**
**लुक्खंमि अ हीणतरं एवं काले वि तिविहंमि ।।२४८।।**

(गु०वि० २/२७८)

व्याख्या—**रूक्षं** क्षेत्रं स्नेहरहितं वातिलं वा। **शीतलं** पुनः स्निग्धमनूपं च । **साधारणं** मध्यस्थम् अस्निग्धरूक्षम्। इह **शीते** स्निग्धक्षेत्रे जीतोक्तादधि**कमपि** दद्यात्। **रूक्षे च हीनतरं** जीतोक्तादल्पतरम्। अत्र **चकारो**ऽनुक्त—समुच्चये । तेन साधारणे क्षेत्रे साधारणं जीतोक्तमात्रमेवाहीनाधिकं दद्यादिति ज्ञेयम्। **कालेऽपि त्रिविधे** वर्षाशिशिरग्रीष्मरूपे । **एवम्** अमुनैवोक्तप्रकारेण जीतोक्ताधिकसमहीनानि तपांसि यथासङ्ख्यं दद्यादिति सामान्यातिदेशः ।।२४८।। विशेषतः कालं प्रपञ्चयन्नाह—

**गिम्हसिसिरवासासुं दिज्जट्ठमदसमबारसंताइं ।**
**नाउं विहिणा नवविहसुअववहारोवएसेणं ।।२४९।।**

(गु०वि० २/२७९)

व्याख्या—अत्र कालस्त्रिविधो **ग्रीष्मशिशिरवर्षालक्षणः** । स सामान्यतो द्विधा—स्निग्धो रूक्षश्च । स च द्विरूपोप्युत्कृष्टमध्यमजघन्यभेदात् त्रिधा । तत्रोत्कृष्टस्निग्धो अतिशीतः । मध्यमस्निग्धो नातिशीतः । जघन्यस्निग्धः स्तोकशीतः । उत्कृष्टरूक्षो अत्युष्णः । मध्यमरूक्षो नात्युष्णः । जघन्यरूक्षो कवोष्णः । एवंरूपे ग्रीष्मशिशिरवर्षाख्ये कालत्रये **नवविधश्रुतव्यवहारोपदेशेन** । **नवविधो** नवविधतपोदानलक्षणश्चासौ **श्रुतव्यवहारोपदेशश्च** तेन नवविधश्रुतव्यवहारोपदेशेन **विधिना** वैपरीत्याभावेन **ज्ञात्वा अष्टमदशमद्वादशान्तानि** तपांसि **दद्यात्**। अयं भावार्थः—ग्रीष्मशिशिरवर्षासु यथाक्रमं चतुर्थषष्ठाष्टमानि जघन्यानि । षष्ठाष्टमदशमानि मध्यमानि । अष्टमदशमद्वादशान्युत्कृष्टानि । उक्तं च—

**गिम्हासु चउत्थं दिज्जा छट्ठगं च हिमागमे । वासासु अट्ठमं दिज्जा तवो एस जहन्नगो ।।**
**गिम्हासु छट्ठगं दिज्जा अट्ठमं च हिमागमे । वासासु दसमं दिज्जा एस मज्झिमगो तवो ।।**
**गिम्हासु अट्ठमं दिज्जा दसमं च हिमागमे । वासासु दुवालसमं एस उक्कोसओ तवो' ।।**

एष नवविधतपोदानलक्षणः **श्रुतव्यवहारोपदेशः** । एष च नवविधश्रुतव्यवहारोपदेशो द्विधा—ओघतो विभागतश्च । तद्विचारश्च बहुविस्तर इति कृत्वाऽग्रे दर्शयिष्यते ग्रन्थकृता स्वयमेव ।।२४९।।

उक्तं कालविषयं प्रायश्चित्तम्, साम्प्रतं भावविषयमाह—

**हट्ठगिलाणा भावंमि दिज्ज हट्ठस्स न उ गिलाणस्स ।**
**जावइअं वा विसहइ तं दिज्ज सहिज्ज वा कालं ।।२५०।।**

व्याख्या—**भावे** भावतः कश्चिदालोचनाग्राही **हृष्टो** नीरोगः समर्थः, कश्चिद् **ग्लानो** रोगी शक्तिविकल इत्येतद्विचार्य **दिज्ज हट्ठस्स न उ गिलाणस्स'** तुशब्दस्य विशेषणार्थत्वात्। हृष्टस्य जीतोक्तादधिकमपि दद्यात्, ग्लानस्य तु न दद्यात् जीतोक्तादूनं वा दद्यात्। **यावन्मात्रं वा विषहते** कर्त्तुं शक्नोति **तत्** प्रायश्चित्तं तावन्मात्रं **दद्यात्**। **कालं वा सहेत** यावता प्रगुणो भवति तावत्प्रतीक्षेत, रोगनिवृत्तौ समर्थस्य दद्यादित्यर्थः । उक्तो भावविषयो दानविधिः ।

अथ अत्र सूत्रेऽनुक्तमपि पूर्वजीतकल्पगतं पुरुषद्वारं सप्रपञ्चमत्रापि लिख्यते—

**'पुरिसा गीआगीआ सहासहा तह सढासढा केई। परिणामापरिणामा–अइपरिणामाइ वत्थूणं'** ।।

(गु०वि० २/३२८)

इह आलोचनाग्राहिणः **पुरुषाः** किं स्वरूपाः ? इति प्रथममेवाचार्यैर्विचार्यास्तदपेक्षया प्रायश्चित्तं दातव्यम्। ते च बहुप्रकाराः। तद्यथा—**गीतार्था** अधिगताचारप्रकल्पादिनिशीथान्तश्रुताः। तदितरे **त्वगीता** अगीतार्थाः। **सहाः** सर्वप्रकारैः समर्थाः। **असहाः** त्वसमर्थाः। तथा केचित् **शठा** मायाविनः। **अशठाः** सरलात्मानः। **परिणामकादयस्त्रयोऽपि** पूर्वमदूरे **'छेआइमसद्दहओ'** इति (अस्य ग्रन्थस्य २४५) गाथाया विवरणे व्याख्यातास्ततो नात्र पुनः प्रतन्यन्त इति ।।

**'तह धिइसंघयणोभयसंपन्ना तदुभएण हीणा य। आयपरोभयनोभयतरगा तह अन्नतरगा य'** ।।

(गु०वि० २/३२९)

तथा **धृतिसंहननोभयसम्पन्नास्तदुभयेन हीनाश्च**। इह भङ्गचतुष्टयं सम्भवति। तत्र धृत्या सम्पन्ना इत्येकः। संहननेन सम्पन्ना इति द्वितीयः। उभयेन धृतिसंहननाख्येन सम्पन्ना इति तृतीयः। तदुभयेन हीनाश्चेति चतुर्थः। तथा **'आत्मपरोभयानुभयतरका'** इति। अत्रापि चतुर्भङ्गी। आत्मानुग्राहकं तपः, परोपष्टम्भकारकं वैयावृत्त्यं तयोर्द्वयोरपि समर्थाः परं ये तप एव कुर्वन्ति, न वैयावृत्त्यं ते आत्मतरकाः, स्वार्थेऽत्र कः, न परतरका इति प्रथमः। ये तु वैयावृत्त्यमेव कुर्वन्ति न तपस्ते परतरका इति द्वितीयः। ये तूभयमपि कुर्वन्ति ते उभयतरका इति तृतीयः। ये पुनरुभयमपि न कुर्वन्ति ते नोभयतरका इति चतुर्थः। तथा **'अन्नतरगा'** त्ति। अन्यतरकाः ये तपोवैयावृत्त्ययोरन्यतरदेकमेव कर्त्तुं शक्नुवन्ति नोभयकरणक्षमा इत्यर्थः ।।

**'कप्पठिआदओ वि अ चउरो जे सेअरा समक्खाया। साविक्खेअरभेआदओ अ जे ताण पुरिसाण'** ।।

(गु०वि० २/३३०)

**कल्पः** सततासेवनीयः समाचारः। स चायम्—

**'आचेलुक्कुद्देसिअ सिज्जायररायपिंड किइकम्मे। वयजिट्ठ पडिक्कमणे मासं पज्जोसवणकप्पे'** ।।

(बृ०क० ६३६४, नि०भा० ५९३३)

न विद्यते चेलं वस्त्रं यस्यासावचेलकस्तस्य भाव **आचेलक्यम्**। सचेलत्वे चायमचेलकत्वव्यपदेशः। तथा चान्यत्रापि दृश्यते—

**'जह जलमवगाहिंतो बहुचेलो वि सिरवेढिअकडिल्लो। भन्नइ नरो अचेलो तह मुणओ संतचेला वि ।।**

**तह थोव–जुण्ण–कुच्छिअचेलेहिं वि भन्नए अचेलुत्ति। जह तूर सालिअ ! लहुं दे पुत्तिं नग्गिआ मु त्ति'** ।।

(वि०आ०भा० २६००-२६०१)

**उद्देशेन** साधुसङ्कल्पेन निर्वृत्तमौद्देशिकम् आधाकर्म। **शय्यया** वसत्या तरति भवाम्भोधिमिति **शय्यातरः**,

राजा नृपस्तयोः पिण्डो भक्तादिरूपः शय्यातरपिण्डो राजपिण्डश्च । इहौद्देशिकादीनां त्रयाणामपि परिहारोऽवसेयः । **कृतिकर्म** ज्येष्ठानुक्रमेण वन्दनदानम् । **व्रतानि** पञ्च महाव्रतानि । **ज्येष्ठो** वर्षशतदीक्षिताया अपि साध्व्या अद्यतनदीक्षितोऽपि साधुर्गरियान् । **प्रतिक्रमणं** प्रतीतम् । **मासो** मासकल्पः । **परिः** सर्वथा **वसनमे**कत्र निवासो निरुक्तिवशात् **पर्युषणा** । इत्येतस्मिन् **दशविधे** कल्पे स्थिताः प्रथमचरमजिनसाधवस्ते **आदयो** अवयवभूता येषां ते **कल्पस्थितादयः** कल्पस्थितपरिणतकृतयोगितरमाणाख्याः । तत्र **कल्पस्थिताः** कथिता एव । **परिणताः** परिणतिपरिपाकमापन्नं जीवेन सह प्राप्तैकीभावं चारित्रं येषां ते । **कृतयोगिनः** चतुर्थषष्ठाष्टमादितपोभिः परिकर्मितशरीराः । '**तरमाण**' त्ति । '**शकेश्चयतरतीरपारा**' इत्यनेन प्राकृतलक्षणसूत्रेण '**शक्लृ**' धातोस्तरादेशे कृते **शक्नुवानाः** शक्तितुलनां कुर्वाणा इत्यर्थः । ये एते चत्वारः **सेतराः** सप्रतिपक्षाः **समाख्याताः** कथिताः । कल्पस्थितादिभ्य इतरे अकल्पस्थिताऽपरिणताऽकृतयोगाऽतरमाणाख्याः । तत्र **अकल्पस्थिता** मध्यमद्वाविंशतिजिनसाधवो महाविदेहजाश्च । एते हि दशविधस्थितिकल्पमध्यात् शय्यातर–पिण्डाऽनादानचतुर्यामपुरुषज्येष्ठत्वकृतिकर्मकरणाख्येषु चतुर्षु स्थिताः शेषेषु षट्सु पुनरस्थिताः । ते ह्येतानि षट् स्थानानि गुणानुलोम्यमालोच्य कदाचित् कानिचित् कुर्वन्ति वा न वेति । **अपरिणतादयस्तु** परिणतादिविपरीताः । '**साविक्खेअरभेआदओ अ जे**' (उपरितना गु.वि. २/३३०) इति । **जे** इति पादपूरणे । कल्पस्थिताकल्पस्थितादयोऽष्टावपि द्विविधाः । **सापेक्षा** गच्छवासिनो **निरपेक्षा** जिनकल्पिकादयः । '**ताण पुरिसाण**' (उपरितना गु.वि. २/३३०) इत्यग्रेतनगाथायां सम्बध्यते । सा चेयम्—

'**जो जहसत्तो बहुतरगुणो व तस्साहिअंपि दिज्जाहि । हीणस्स हीणतरगं झोसिज्ज व सव्वहीणस्स**' ।।
(गु०वि० २/३३१)

तेषां पुरुषाणां कल्पस्थितादीनां सापेक्षनिरपेक्षभेदानां प्राग्गाथाद्वयोक्तगीतार्थादीनां च मध्यात् **यो यथाशक्तः** तपः कर्तुं क्षमः । **बहुतरगुणो वा** धृतिसंहननसम्पन्नः परिणतः कृतयोगी आत्मपरतरो वा भवेत् **तस्याधिकमपि** जीतोक्तादतिरिक्तमपि दद्यात् । **हीनस्य** धृतिसंहननादिरहितस्य **हीनतरं** जीतोक्तादल्पतरं दद्यात् । **सर्वहीनस्य** सामास्त्येनाक्षमस्य सर्वमपि तपः **क्षपयेत्** ह्रासयेत् न किमपि तस्य दद्यात् मिथ्यादुष्कृतेनैव तस्य शुद्धिरादेश्येत्यर्थः । पुनः पुरुषविशेषानेवाह—

'**इत्थं पुण बहुतरगा भिक्खुण ठिय अकयकरणाणभिगया य । जं तेण जीअमट्ठमभत्तंतं निव्विगाईअं**' ।।

**अत्र पुनर्बहुतरा** बहुभेदा आचार्योपाध्यायकृतकरणगीतार्थस्थिराद्या **भिक्षवः** साधवः इति । **स्थिरा** नाम ये चरकादिभिर्दर्शनतः परीषहोपसर्गैश्चरणतोऽतिकर्कशप्रायश्चित्तदानतः स्वभावतो वा न च्याव्यन्ते । **अकृतकरणाः** तपोभिरपरिकर्मितशरीराः । **अनभिगताश्चागीतार्थाः** **चशब्दादस्थिराः** । एतेषां च सर्वेषां यथार्हम्, तेन सूक्ष्मबादरातिचारादिना **यज्जीतं** जीतदानं **तन्निर्विकृत्याद्यष्टमभक्तान्तं** ज्ञेयमिति शेषः । यद्वा यन्त्रेणैतद्

ज्ञेयमित्यर्थः । इदमत्र गाथान्ते यन्त्रकस्य पञ्चम्या दीर्घपङ्क्तेः पश्चिमानुपूर्व्या तपो गृहीतम् । एतदीयश्च तपोविशेषः सर्वोऽपि यन्त्रकेण स्पष्टीभवति । ततस्तस्यायं लिखनविधिः कथ्यते इह दैर्घ्येण पङ्क्तिरचनायां त्रयोदश गृहाणि स्थाप्यन्ते, पृथुत्वेन चाद्यपङ्क्तौ पञ्चदश गृहाणि । द्वितीयतृतीयपङ्क्त्योश्चतुर्दश । चतुर्थपञ्चमपङ्क्त्योस्त्रयोदश । षष्ठसप्तमपङ्क्त्योर्द्वादश । अष्टमनवमपङ्क्त्योरेकादश । दशमैकादश—पङ्क्त्योर्दश । द्वादशत्रयोदशपङ्क्त्योर्नवगृहाणीति । अत्र चाद्यायाः पृथुपङ्क्तेरुपरि निरपेक्षः स्थाप्यते । द्वितीयाया उपर्याचार्यः कृतकरणः । तृतीयाया आचार्योऽकृतकरणः । चतुर्थ्या उपाध्यायः कृतकरणः । पञ्चम्या उपाध्यायोऽकृतकरणः । षष्ठ्या गीतार्थः स्थिरः कृतकरणभिक्षुः । सप्तम्या गीतार्थः स्थिरोऽकृत—करणभिक्षुः । अष्टम्या गीतार्थोऽस्थिरः कृतकरणभिक्षुः । नवम्या गीतार्थाऽस्थिरोऽकृतकरणभिक्षुः । दशम्या अगीतार्थः स्थिरः कृतकरणः । एकादश्या अगीतार्थः स्थिरोऽकृतकरणः । द्वादश्या अगीतार्थोऽस्थिरः कृतकरणः । त्रयोदश्या उपरि अगीतार्थोऽस्थिरोऽकृतकरणभिक्षुरिति स्थापयित्वा पृथुत्वेन प्रथमायां पङ्क्तौ निरपेक्षस्याधो गृहद्वये शून्यं स्थाप्यं, यतस्तयोः पाराञ्चिकानवस्थाप्ये भवतः, ते च जिनकल्पिकस्य न सम्भवतः। तस्य हि स्वभावेनैव निरपेक्षत्वात् । अथ तयोः शून्ययोरधस्त्रयोदशसु गृहेषु मूल—छेद—षड्गुरु—षड्लघु चतुर्गुरु—चतुर्लघु—मासगुरु—मासलघु—भिन्नमास—विंशतिक—पञ्चदशक—दशक—पञ्चकानि स्थाप्यन्ते । द्वितीयायां पङ्क्तौ पाराञ्चिकादीनि दशकान्तानि । तृतीयायामनवस्थाप्यादीनि पञ्चकान्तानि । चतुर्थ्यामन—वस्थाप्यादीनि दशकान्तानि । पञ्चम्यां मूलादीनि पञ्चकान्तानि । षष्ठ्यां मूलादीनि दशकान्तानि । सप्तम्यां छेदादीनि पञ्चकान्तानि । अष्टम्यां छेदादीनि दशकान्तानि । नवम्यां षड्गुर्वादीनि पञ्चकान्तानि । दशम्यां षड्गुर्वादीनि दशकान्तानि । एकादश्यां षड्लघ्वादीनि पञ्चकान्तानि । द्वादश्यां षड्लघ्वादीनि दशकान्तानि । त्रयोदश्यां चतुर्गुर्वादीनि पञ्चकान्तानि स्थाप्यन्ते । अत्र चैवं भावना—यत्रापराधे कृतकरणाचार्यस्य पाराञ्चिकं तत्रैवापराधे अकृतकरणाचार्यादीनां दीर्घपङ्क्तिक्रमेणानवस्थाप्यादीनि प्रायश्चित्तानि भवन्ति । तथा यत्राऽपराधे कृतकरणाचार्यस्यानवस्थाप्यं तत्रैवापराशेषाणां तथैव क्रमेण प्रायश्चित्तानीत्येवं सर्वदीर्घपङ्क्तिषु भावना करणीया। स्थापना चैवमत्रावसेया। एतत्पुरुषविभागेन श्रुतव्यवहारतो जीतकल्पयन्त्रम् ।।२५०।।

सम्प्रति **प्रतिसेवनामाह—**

**आउट्टिआइ दप्पप्पमायकप्पेहिं वा निसेविज्जा ।**
**दव्वं खित्तं कालं भावं वा सेवओ पुरिसो ।।२५१।।**

व्याख्या—**आकुट्टिकया** उपेत्य सावद्यकरणोत्साहात्मिकया, **दर्पप्रमादकल्पैर्वा, दर्पो** धावनडेपनवल्गनादिकः हास्यजनकवचनादिकं दर्परूपो वा, **प्रमादो** दिवा रात्रौ वा प्रतिलेखनाप्रमार्जनाद्यनुपयुक्तता । **कल्पः** कारणे दर्शनादिचतुर्विंशतिरूपे सति गीतार्थस्य कृतयोगिन उपयुक्तस्य यतनया आधाकर्माद्यादानरूपः । **तैरेतैश्चतुर्भिः** प्रतिसेवनारूपैरासेवकः पुरुषो **निषेवेत** प्रतिसेवेत । **द्रव्यम्** आहारादिकं किञ्चिदशुद्धमप्याददीत । **क्षेत्रं**

| निरपेक्षः | आचार्यः कृत-करणः | आचार्यः अकृत-करणः | उपाध्यायः कृत-करणः | उपाध्यायः अकृत-करणः | गीतार्थः स्थिरः कृत-करणः भिक्षुः | गीतार्थः स्थिरः अकृत-करणः भिक्षुः | गीतार्थः अस्थिरः कृत-करणः भिक्षुः | गीतार्थः अस्थिरः अकृत-करणः भिक्षुः | अगीतार्थः स्थिरः कृत-करणः भिक्षुः | अगीतार्थः स्थिरः अकृत-करणः भिक्षुः | अगीतार्थः अस्थिरः कृत-करणः भिक्षुः | अगीतार्थः अस्थिरः - अकृतकरणः भिक्षुः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ० | पाराञ्चितम् | अनवस्थाप्यं | अनवस्थाप्यं | मूलम् | मूलम् | छेदः | छेदः | ६ी | ६ी | ६ | ६ | ४ी |
| ० | अनवस्थाप्यं | मूलम् | मूलम् | छेदः | छेदः | ६ी | ६ी | ६ | ६ | ४ी | ४ी | ४ |
| मूलम् | मूलम् | छेदः | छेदः | ६ी | ६ी | ६ | ६ | ४ी | ४ी | ४ | ४ | ● |
| छेदः | छेदः | ६ी | ६ी | ६ | ६ | ४ी | ४ी | ४ | ४ | ● | ● | ० |
| ६ी | ६ी | ६ | ६ | ४ी | ४ी | ४ | ४ | ● | ● | ० | ० | २५ |
| ६ | ६ | ४ी | ४ी | ४ | ४ | ● | ● | ० | ० | २५ | २५ | २० |
| ४ी | ४ी | ४ | ४ | ● | ● | ० | ० | २५ | २५ | २० | २० | १५ |
| ४ | ४ | ● | ● | ० | ० | २५ | २५ | २० | २० | १५ | १५ | १० |
| ● | ● | ० | ० | २५ | २५ | २० | २० | १५ | १५ | १० | १० | ५ |
| ० | ० | २५ | २५ | २० | २० | १५ | १५ | १० | १० | ५ | | |
| २५ | २५ | २० | २० | १५ | १५ | १० | १० | ५ | | | | |
| २० | २० | १५ | १५ | १० | १० | ५ | | | | | | |
| १५ | १५ | १० | १० | ५ | | | | | | | | |
| १० | १० | ५ | | | | | | | | | | |
| ५ | | | | | | | | | | | | |

छिन्नमडम्बादिकं स्तोकलोकाश्रयं सार्द्धयोजनं यावदविद्यमानवसत्प्रदेशं यत्र सम्पूर्णा भिक्षा न लभ्यते । **कालो** दुर्भिक्षादिर्यत्र सर्वथाऽन्नादिर्न प्राप्यते । तं प्रतिसेवेत । अयमाशयः—साधुना महति क्षेत्रे काले च गत्वा स्थेयम्। आकुट्टिकादिभिर्हि छिन्नमडम्बादिकं क्षेत्रं दुष्कालं च प्रतिसेवमानः संयमात्मविराधने प्राप्नुवन् (? प्राप्नोति) । **भावं च** हृष्टग्लानत्वादिकं प्रतिसेवते । आकुट्टिकादिभिरहिताऽन्नौषधादिकं[A] भुक्त्वा ग्लानत्वादिकं भावमुत्पादयेदित्यर्थः ।।२५१।। उक्ताः स्वरूपतः प्रतिसेवनाः । तासां प्रायश्चित्तमाह—

**जं जीअदाणमुत्तं एअं पायं पमायसहिअस्स ।**
**इत्तो च्चिअ ठाणंतरमेगं वड्ढिज्ज दप्पवओ ।।२५२।।**

व्याख्या—**यज्जीतदानं** जीतव्यवहारे तपोदान**मुक्तम्** । एतत्सर्वं **प्रायः प्रमादसहितस्य** प्रमादप्रतिसेवनाप्राग्गाथाविवरण—व्याख्यातद्रव्यादिसेविनो भणिताः । **इत एव** प्रमादप्रतिसेवकप्रायश्चित्तादे**कं स्थानान्तरं वर्द्धयेत् दर्पवतः** । अयमर्थः— प्रमादप्रतिसेवनया भिन्नमास—लघुमास—गुरुमास—चतुर्लघु—चतुर्गुरु—षड्लघु—षड्गुरूणामापत्तौ निर्विकृतिकपुरिमार्द्धैकासनाचामाम्लचतुर्थषष्ठाष्टमाख्यं तपो दीयते । दर्पप्रतिसेवनाकारिणस्तु भिन्नमासादीनामा—पत्तौ सत्यां स्थानान्तरवृद्धिः कार्या । निर्विकृतिकं मुक्त्वा पुरिमार्द्धादीनि दशमान्तानि देयानीति ।।२५२।।

**आउट्टिआइ ठाणंतरं व सठाणमेव वा दिज्जा ।**
**कप्पेण पडिक्कमणं तदुभयमहवा विणिद्दिट्ठं ।।२५३।।**

व्याख्या—**आकुट्टिकाप्रतिसेवायां** साधोः **स्थानान्तरं** वा दद्यात् । दर्पप्रतिसेवाकारिणः सकाशात् स्थानवृद्ध्याधिकं तपःस्थानं वितरेत् । दर्पप्रतिसेविनो हि भिन्नमासाद्यापत्तौ पुरिमार्द्धादीनि दशमान्तानि दीयन्ते । अस्य त्वेकासनादीनि द्वादशान्तानि देयानि । **'स्वस्थानमेव'** वा दद्यात् । इहापत्तिरूपं प्रायश्चित्तं स्वस्थानमुच्यते । यथाऽऽकुट्टिकया पञ्चेन्द्रियवधे मूलम् । अन्यत्रापि चाकुट्टिकया यत्रापराधे यद् भिन्नमासादिकमुक्तं तत्तत्र स्वस्थानं तदेवाकुट्टिकाप्रतिसेविनो दद्यादित्यर्थः । **कल्पेन** कल्पप्रतिसेवनया **प्रतिक्रमणं** मिथ्यादुष्कृतं प्रायश्चित्तम् । **अथवा तदुभयम्** आलोचनामिथ्यादुष्कृतोभयरूपं प्रायश्चित्तं **विनिर्दिष्टम्** ।।२५३।।

इदं चोक्तस्वरूपं प्रायश्चित्तं परिणामानुरूपेणैव दद्यादित्याह—

**आलोअणकालंमि वि संकेस—विसोहिभावओ नाउं ।**
**हीणं वा अहिअं वा तम्मत्तं वा वि दिज्जाहि ।।२५४।।**

(गु०वि० २/३३४)

व्याख्या—**आलोचनाकालेऽपि** कमप्यपराधविशेषं यः सर्वथा न प्रकाशयति कथयन्नप्यर्द्धकथितं वा करोति स **सङ्क्लिष्टपरिणाम** इति ज्ञात्वा **तस्याधिकमपि दद्यात्** । यः पुनः संवेगमुपगतो निन्दागर्हादिभि**र्विशुद्धपरिणामः** तस्य **हीनमपि** दद्यात् । यः पुनर्मध्यस्थपरिणामः तस्य **तन्मात्रमेव** दद्यात् ।।२५४।।

---

**A.** आकुट्टिकादिभिः अहितकारि

उक्तमेवार्थं दृढयन्नाह—

**इअ दव्वाइ बहुगुणे गुरुसेवाए अ बहुतरं दिज्जा ।**
**हीणयरे हीणयरं हीणयरे जाव झोसु त्ति ।।२५५।।**

व्याख्या—**इति** अमुना प्रकारेण **द्रव्यादौ** द्रव्यक्षेत्रकालभावाख्ये प्रतिसेव्ये **बहुगुणे** बहुगुणिते प्रचुरदोषत्वेन समर्थे वा, विपरीतलक्षणया वा बहुदोषे **गुरुसेवायां** गुरुतरायां प्रतिसेवायां कृतायां **बहुतरं** प्रायश्चित्तं **दद्यात्** । **हीनतरे** ऽल्पदोषे द्रव्यादिके प्रतिसेविते **हीनतरमल्पतरं** प्रायश्चित्तं दद्यात् । ततोऽपि **हीनतरे यावत्सर्वहीने**ऽत्यल्पदोषे द्रव्यादौ अत्यल्पीयस्यां सेवायां **झोसु**' त्ति । **क्षपणा** ह्रासः कार्यः । सर्वस्तोकं तपो देयमित्यर्थः ।२५५।।

कुत्रापि च सर्वथापि ह्रासः क्रियत इति प्रतिपादयन्नाह—

**झोसिज्जइ सुबहुं पि हु जीएणन्नं तवारिहं वहओ ।**
**वेआवच्चगरस्स उ दिज्जइ साणुग्गहतरं वा ।।२५६।।**

व्याख्या—इह **जीतेन** यद्येकगुरुभिर्वितीर्णं षाण्मासिकादितपो **वहतः** पञ्च—षट्स्वपि दिवसेषु गतेष्वन्यच्चातुर्मासिकं षाण्मासिकं वा **तपोर्हं** समापन्नं ततः **तत्क्षिप्यते सुबहुकमपि** ह्रास्यते, सर्वथापि तस्य न दीयत इत्यर्थः । **वैयावृत्त्यकरस्य च सानुग्रहतरं वा दीयते** । कोऽर्थः ? यावन्मात्रं तपस्तप्यमानः स वैयावृत्त्यं कर्तुं शक्नोति तस्य तावन्मात्रमेव तपो दीयते नाधिकम् ।।२५६।।

अथ पूर्वोपन्यस्तनवविधश्रुतव्यवहारं विभागतो दिदर्शयिषुर्द्वारभूतां गाथामाह—

**ति नव सगवीस इगसी पक्खे आवत्तिदाण कालतिगे ।**
**नवतवसुअववहारो जंते दसरेहि तिरिउड्ढं ।।२५७।।**

व्याख्या—अत्रैष नवविधतपोदानलक्षणश्रुतव्यवहारस्त्रिभिर्नवभिः **सप्तविंशतिभिरेकाशीतिभिश्च भेदैर्भवति** । तत्र संक्षेपतः तावदयं **त्रिभेदः पक्षत्रयभेदात्** । **आपत्तिभेदतः** पुनर्नवभेदः । **दानतपोभेदतस्तु सप्तविंशतिभेदः** । **कालत्रिकविशेषेण पुनरेकाशीतिभेदश्च** भवति । एतेषां च सर्वेषामपि भेदानां स्वरूपं ग्रन्थकारः स्वयमेव पुरस्ताद् व्यक्तीकरिष्यति । एवंविधभेदभिन्नश्च **नवविधतपोदानलक्षणश्रुतव्यवहारः तिर्यगूर्ध्वं च दशरेखे यन्त्रे** स्थापितः सुखावसेयो भवतीति सकलभेदप्रतिपादनानन्तरं तत्स्थापनापि दर्शयिष्यते ।।२५७।।

तत्र पूर्वं नवविधतपोदानश्रुतव्यवहारमेव दर्शयन्नाह—

**उववासछट्ठअट्ठम जहन्न छट्ठट्ठमादसम मज्झा ।**
**अट्ठमदसमदुवालस जिट्ठ तिकाले तवो नवहा ।।२५८।।**

(सड्ढजीयकप्पो १२६)

व्याख्या—**उपवासषष्ठाष्टमानि जघन्यानि** । **षष्ठाष्टमदशमानि मध्यमानि** । **अष्टमदशमद्वादशानि उत्कृष्टानि** । **कालत्रये** ग्रीष्मशिशिरवर्षालक्षणे क्रमेण **तपांसि नवधा** देयतया अवगन्तव्यानि । एष **नवविधत**पोदानश्रुतव्यवहारः प्रोच्यते ।।२५८।। अथवा एष नवविधतपोदानश्रुतव्यवहारः—

**निविअपुरिमासणंबिल इगबितिचउपंचखमण नवह तवो ।**
**सुअववहारुवएसा ओहेण विभागजो चेव ।।२५९।।**

(सड्ढजीयकप्पो १२७)

व्याख्या—निर्विकृतिकं १ पुरिमार्द्धम् २ एकासनं ३ आचामाम्लम् ४ एकक्षपणं चतुर्थं ५ द्वे क्षपणे षष्ठं ६ त्रीणि क्षपणानि अष्टमं ७ चतुःक्षपणानि दशमं ८ पञ्च क्षपणानि द्वादशं ९ श्रुतव्यवहारोपदेशादेवं तपो नवधा ओघतो विभागतश्च ग्रीष्मशिशिरवर्षासु दीयत इति नवधा तपोदानश्रुतव्यवहारः ।।२५९।।

अथ 'यथोद्देशं निर्देश' इति न्यायात् पूर्वं पक्षत्रयं स्पष्टयन्नाह—

**गुरु लहु लहुस ति पक्खा पिहो तिहाऽतिगुरु गुरुतरो गुरुओ ।**
**लहुतमलहुतरलहुओ लहुसतमो लहुसतर लहुसो ।।२६०।।**

(गु०वि० २/२८२, सड्ढजीयकप्पो १२८)

व्याख्या—एष नवविधतपोव्यवहारः संक्षेपतस्त्रिधा—उत्कृष्टो मध्यमो जघन्यश्च । तत्र गुरुतम गुरुतर—गुरुरूपभेदत्रयात्मको गुरुपक्ष उत्कृष्टः । लघुतम—लघुतर—लघुरूपभेदत्रयात्मको लघुपक्षो मध्यमः । लघुस्वतम—लघुस्वतर—लघुस्वाख्यत्रिभेदो लघुस्वपक्षो जघन्य इति । यदाह—

'नवविहववहारे सो संखेवेणं तिहा मुणेअव्वो । उक्कोसो मज्झिमगो जहन्नगो चेव तिविहो सो ।। उक्कोसो गुरुपक्खो लहुपक्खो मज्झिमो मुणेअव्वो । लहुसपक्खो जहन्नो तिविगप्पो एस नायव्वो' ।।

इदानीं प्रकृतगाथाक्षरार्थः—गुरु १ लघु २ लघुस्वः ३ लघुस्वशब्दश्च लघुकार्थः । स्वशब्दास्याल्पार्थकप्रत्य—यार्थत्वादित्येते त्रयः पक्षाः पृथक् प्रत्येकं त्रिधा भवन्ति । त्रैविध्यं च दर्शितमेव ।।२६०।।

अथ नवविधापत्तितपोव्यवहारं दर्शयति—

**गुरुलहुअ छपणमासा चउतिगमासा दुमासगुरुमासो ।**
**लहुमासभिन्नवीसं पनरसदसपण तिपक्खकमा ।।२६१।।**

(गु०वि० २/२८३, सड्ढजीयकप्पो १२९)

**उक्कोसमज्झहीणा आवत्ती नवति दाण कालतिगे ।**
**उक्कोसुक्कोसुक्कोसमज्झ उक्कोसग जहन्ना ।।२६२।।**
**मज्झुक्कोसा मज्झिमगमज्झिमा तहय मज्झिमजहन्ना ।**
**जहन्नुक्कोस जहन्नगमज्झा य जहन्नगजहन्ना ।।२६३।।**

(सड्ढजीयकप्पो १३०-१३१)

व्याख्या—तेषु त्रिषु पक्षेषु गुरुलघुलघुकलक्षणेषु । एता आपत्तय उत्कृष्टमध्यमजघन्यरूपाः क्रमादवगन्तव्याः। तथाहि—गुरुपक्षे गुरुलघु षाण्मासिकपञ्चमासिकरूपा उत्कृष्टापत्तिः । चातुर्मासिकत्रिमासिकरूपा मध्यमा।

द्विमासिकगुरुमासरूपा **जघन्या** । **लघुपक्षे लघुमास उत्कृष्टः** । **भिन्नमासो मध्यमः** । **विंशतिकं जघन्यम्** । लघुकपक्षे **पञ्चदशकमुत्कृष्टम्** । दशकं **मध्यमम्** । पञ्चकं **जघन्यमित्येवं** नवविधापत्तितपोरूपः श्रुतव्यवहारो दर्शितः । भणितं च—

**गुरुपक्खो उक्कोसो मज्झ जहन्नो अ एव लहुए वि । एमेव य लहुसे वी इअ एसो नवविहो होइ ।। गुरुपक्खे छम्मासो पणमासो चेव होइ उक्कोसो । मज्झो चउतिमासो दुमासगुरुमासग जहन्नो ।। लहु–भिन्नमास–वीसा लहुपक्खुक्कोस मज्झिम जहन्ना । पनरस दसगं पणगं लहुसुक्कोसाइ तिविहेसो ।। आवत्तितवो एसो नवभेओ वण्णिओ समासेण । अहुणा उ सत्तवीसो दाणतवो तस्सिमो होइ' ।।**

तस्यापत्तितपसो नवविधस्य दानतपस्त्रिविधमुत्कृष्टमध्यमजघन्यलक्षणं सप्तविंशतिभेदं भवति । तच्च **कालत्रिकेण** वर्षाशिशिरग्रीष्मलक्षणेन विचार्यमाणमेकाशीतिभेदं भवति । तत्र गुरुपक्ष एकोऽपि नवधा । तद्यथा—**उत्कृष्टोत्कृष्टः** १ । **उत्कृष्टमध्यमः** २ । **उत्कृष्टजघन्यः** ३ । **मध्यमोत्कृष्टः** ४ । **मध्यममध्यमः** ५ । **मध्यमजघन्यः** ६ । **जघन्योत्कृष्टः** ७ । **जघन्यमध्यमः** ८ । **जघन्यजघन्यश्चेति** ९ एवं लघुपक्षोऽपि नवधा ।९। लघुकपक्षोऽपि चैवमेव नवधा ९। सर्वमीलने सप्तविंशतिभेदा भवन्ति । भणितं च—

**गुरुलहुलहुसगपक्खे इक्किक्को नवविहो मुणेअव्वो । उक्कोसुक्कोसो वा उक्कोसो मज्झिमजहन्नो ।। मज्झुक्कोसो मज्झिममज्झो तह होइ मज्झिमजहन्नो । इअ नेउ जहन्नो वि अ उक्कोसो मज्झिम जहन्नो ।। गुरुपक्खे नव एए नव चेव य हुंति लहुअपक्खे वि । नव चेव लहुसपक्खे सत्तावीसं भवंतेए' ।।**

।।२६३।। अथैतेषु गुरुलघुलघुकलक्षणेषु त्रिषु पक्षेषु सप्तविंशतिविधं दानतपो व्यक्तीकरोति—

**तहिं बारसदसममट्ठम जिट्ठे मज्झि दसमट्ठमा छट्ठं ।**
**अट्ठमछट्ठचउत्थं जहन्न तिगि दाण गुरुपक्खे ।।२६४।।**

(गु०वि० २/२८५, सड्ढजीयकप्पो १३२)

व्याख्या—**तत्र** पक्षत्रये क्रमेण दानतपः प्रतिपाद्यते, यथा—इह **गुरुपक्षे** षाण्मासिकपञ्चमासिकाख्योत्कृष्टापत्तौ सत्यामुत्कृष्टोत्कृष्टं **द्वादशं** तपः, उत्कृष्टमध्यमं **दशमम्**, उत्कृष्टजघन्य**मष्टमम्** । चातुर्मासिकत्रिमासिकाख्य—**मध्यमापत्तौ** मध्यमोत्कृष्टं **दशमम्**, मध्यममध्यम**मष्टमम्**, मध्यमजघन्यं **षष्ठम्** । द्विमासिकगुरुमासाख्य**जघन्या–पत्तौ** जघन्योत्कृष्ट**मष्टमम्**, जघन्यमध्यमं **षष्ठम्**, जघन्यजघन्यं **चतुर्थम्** । एवं **गुरुपक्षे** नवधा दानतपः प्रोक्तम् ।।२६४।। अथ लघुपक्षे दर्शयति—

**इअ दसमट्ठमछट्ठा अट्ठमछट्ठाचउत्थया कमसो ।**
**छट्ठचउत्थायामा लहुपक्खे दाण वासासु ।।२६५।।**

(सड्ढजीयकप्पो १३३)

व्याख्या—**लघुपक्षे** लघुमासाख्योत्**कृष्टापत्तौ** उत्कृष्टोत्कृष्टं **दशमम्**, उत्कृष्टमध्य**ममष्टमम्**, उत्कृष्टजघन्यं **षष्ठम्**। भिन्नमासाख्यमध्यमापत्तौ मध्यमोत्कृष्ट**मष्टमम्**, मध्यममध्यमं **षष्ठम्**, मध्यमजघन्यं **चतुर्थम्** । विंशत्याख्य—**जघन्यापत्तौ** जघन्योत्कृष्टं **षष्ठम्**, जघन्यमध्यमं **चतुर्थम्**, जघन्यजघन्य**माचामाम्लम्** । इत्यमुनाप्रकारेण **लघुपक्षे** क्रमेण **दानतपो** नवविधमुक्तम् । एतच्च दानतपो **वर्षास्ववगन्तव्यम्** । पूर्वगाथोक्तमपि अग्रेतनगाथोक्तमपि च ।।२६५।। अथ लघुकपक्षे दानतपो दर्शयति —

**अट्ठमछट्ठचउत्थं छट्ठचउत्थंबिलं लहुसपक्खे ।**
**तह खवणंबिलआसण इअ अट्ठक्कंति सगवीसा ।।२६६।।**

(गु०वि० २/२८७, सड्ढजीयकप्पो १३४)

व्याख्या—**लघुस्वपक्षे** पञ्चदशाख्योत्कृष्टापत्तौ उत्कृष्टोत्कृष्ट**मष्टमम्**, उत्कृष्टमध्यमं **षष्ठम्**, उत्कृष्टजघन्यं **चतुर्थम्** । दशकाख्यमध्यमापत्तौ मध्यमोत्कृष्टं **षष्ठम्**, मध्यममध्यमं **चतुर्थम्** , मध्यमजघन्यमाचामाम्लम् । पञ्चकाख्यजघन्यापत्तौ जघन्योत्कृष्टं **चतुर्थम्**, जघन्यमध्य**ममाचामाम्लम्** , जघन्यजघन्य**मेकाशनकमित्येव—मर्द्धापक्रान्त्या सप्तविंशतिविधं** दानतपो वर्षाविषयं प्रदर्शितम् ।।२६६।।

अथ शिशिरग्रीष्मविषयं दानतपोऽतिदेशेनाह—

**दसमाई पुरिमंता सिसिरे (२७) गिम्हट्ठमाइ निविअंता (२७) ।**
**असहे इक्किक्क हासो जा पंतिसु अंति इक्किक्कं ।।२६७।।**

(सड्ढजीयकप्पो १३५)

व्याख्या—एवं यथा वर्षासु उत्कृष्टाद्यापत्तिनवके सति दानतपसो द्वादशमादौ कृत्वा एकासनान्ताः सप्तविंशति—र्भेदाश्चारणिकया कृताः, तथा शिशिरेऽपि, केवलं दशममादौ कृत्वा पुरिमार्द्धान्ताः । ग्रीष्मे पुनरष्टममादौ कृत्वा निर्विकृत्यन्ताः सप्तविंशतिर्भेदाः कार्याः यन्त्रकस्थापनातश्च ज्ञेयाः । वर्षाशिशिरग्रीष्माणां सप्तविंशतित्रय—मिलने चैकाशीतिर्दानतपसो भेदा भवन्ति । अर्द्धापक्रान्तिश्चेयं—अर्द्धस्य असमप्रविभागरूपस्य **एकदेशस्य** एकादिपदात्मकस्याप**क्रमणं** निवर्त्तनं शेषस्य तु द्व्यादिपदसंघातात्मकस्यैकदेशस्यानुवर्त्तनं यस्यां रचनायां सा समयपरिभाषया अर्द्धापक्रान्तिरुच्यते । यथा वर्षासु गुरुतमे उत्कृष्टतो द्वादशमम्, मध्यमतो दशमम्, जघन्यतोऽष्टमम्, एषां मध्यादेकदेशो द्वादशलक्षणोऽपक्रामति, दशमाष्टमे गुरुतरं गच्छतः अग्रेतनं च षष्ठं मील्यते । ततश्च गुरुतरे उत्कृष्टतो दशमम्, मध्यमतोऽष्टमम्, जघन्यतः षष्ठम् । एषां मध्यादेकदेशो दशमलक्षणो निवर्त्तते अष्टमषष्ठे गुरुकं गच्छतः अग्रेतनं चतुर्थं मील्यते । ततश्च गुरुके उत्कृष्टतोऽष्टमं मध्यमतः षष्ठं जघन्यतश्चतुर्थमिति । यथा चेयमेकाशीतिके दानतपोयन्त्रके वर्षाद्ये नवकेऽर्द्धापक्रान्तिर्दर्शिता, तथैव सर्वेष्वपि नवकेषु विलोकनीया । एतैर्दानैरापत्तयः स्वकाः स्वका नियमात् सर्वा बोद्धव्याः । एवंविधापत्तिषु च द्वादशाद्यं तपः कर्तुमसहिष्णोरेकैकह्रासः तावत् कार्यो यावन्नवस्वपि पङ्क्तिषु पर्यन्तकोष्टकगतमेकैकं चतुर्थादि निर्विकृति**कान्तं** तपः स्थितम् । ततः तत्तस्य दीयते ।।२६७।।

तत्करणेऽप्यशक्तस्य पुनस्तथैव ह्रासो भवतीति दर्शयति—

**असहस्स तंपि हसई तो सट्ठाणाउ दिज्ज परट्ठाणे ।**
**इअ हिट्ठमुहे हासे निव्विअं ठाइ सुद्धो वा ।।२६८।।**

(सड्ढजीयकप्पो १३६)

व्याख्या—**असहस्य** तत्करणासमर्थस्य **तदपि** पङ्क्तिपर्यन्तकोष्टकगतमपि तपो **ह्रास्यते** । ततः— पूर्वस्थानतपो दीयते । **वर्षासु** वर्षाकालोक्तम्, शिशिरे शिशिरोक्तम्, ग्रीष्मे ग्रीष्मोक्तम् । तदपि कर्तुमक्षमस्य ततः **स्वस्थानात्परस्थानं** परस्थानतपः वर्षास्वपि शिशिरोक्तम् , शिशिरेऽपि च ग्रीष्मोक्तं तपो दीयते । **इत्येवमधोमुखे ह्रासे** स्थाने स्थाने वर्षाशिशिरग्रीष्मरूपे ह्रासयद्भिः तावन्नेयं यावन्निर्**विकृतिक**मात्रमेव देयतया **स्थितम्** । **शुद्धो वा** यः पुनर्निर्विकृतिकमात्रमपि तपःकर्त्तुमशक्तः स मिथ्यादुष्कृतेनैव शुद्ध्यतीत्यर्थः । कैश्चित्त्वेवं व्याख्यातम्—आधाकर्मिकाद्युत्पत्तौ या षड्जीवनिकायविराधना तज्जनितं प्रायश्चित्तं स्वस्थानम् । आधाकर्माद्यासेवाभणितं च चतुर्थादिकं परस्थानं तद्दानेऽप्ययमेव ह्रासविधिर्ज्ञेय इति । उक्तं च—

**एएहिं दाणेहिं आवत्तिओ सया सया नियमा । बोधव्वा सव्वाओ असहस्सिक्किक्कहासणया ।। जावट्ठिय इक्किक्कं तं पि हासिज्ज असहुणो ताव । दाउं सठाणतवं परठाणं दिज्ज एमेव' ।।** एवं ठाणे ठाणे हिट्ठाहुत्तं कमेण हासित्ता । नेअव्वं जाव तिअं नियमा निव्वीअयं इक्कं । एष नवविधो व्यवहारः ।। एकाशीतिकस्य नवविधव्यवहारयन्त्रस्य स्थापना चेयं । (**स्थापनायन्त्राय द्रष्टव्यं – सड्ढजीयकप्पो** पृ.क्र. १००-१०१) ।।२६८।। एवं कालविषयो नवविधदानतपोव्यवहारः पुनरपि प्रकारान्तरेण दानविधिमेवाह—

**एगाइ जा छमासं आवन्नाणं जहागयं दिज्जा ।**
**तवकाल गुरुअ लहुअं सझोसमिअरं व जहपत्तं ।।२६९।।**

व्याख्या—**एकादि यावत् षण्मासमापन्नानाम्** एकमासिकं द्विमासिकं त्रिमासिकं चातुर्मासिकं पाञ्चमासिकं षाण्मासिकं च आपन्नानां साधूनां **यथागतं तपःकालाभ्यां गुरुकं लघुकं** वा यथाप्राप्तं स्यात् । तथा **सझोषमितरद्वा** अझोषम्, **यथापात्रं** सहासहादिपुरुषविशेषरूपं पात्रमपेक्ष्य प्रायश्चित्तं दीयते ।।२६९।।

अथ तपःकालाभ्यां लघुगुरु प्रायश्चित्तं यदुच्यते तत्स्वरूपं प्ररूपयति—

**छट्ठंतं तव लहुमट्ठमाइ तव गुरु जमुज्झई गिम्हे ।**
**तं लहुमवि कालगुरु गुरु वि लहुअं सिसिरवासे ।।२७०।।**

(सड्ढजीयकप्पो १२४)

व्याख्या—**निर्विकृत्यादिना षष्ठान्तेन** तपसा यन्मासगुर्वादिकमप्युह्यते **तत्तपो लघुकम्** । **अष्टमादिना** तूह्यमानं मासलघ्वादिकमपि **तपो गुरुकम्** । **ग्रीष्मे** यदुह्यते **तल्लघुकमपि** मासलघ्वादिकमपि **कालगुरुकम्** । **शिशिरवर्षासु** तु यन्मासगुर्वादिकमप्युह्यते तत्काललघुकम् । यदाह—

**'तवकाले आसज्जउ गुरू वि होइ उ लहू लहू गुरुओ । कालो गिम्हो उ गुरू अ ठाइ तवो लहू सेसो'** ।। ।।२७०।। गुरुलघुप्रायश्चित्तं पुनः प्रकारान्तरेण दर्शयति—

**दाणे निरंतरे वा लहुअं पि गुरू गुरुं पि लहु इहरा ।**
**सुत्तविहिणाऽविलंबं जं वुज्झइ तं तु हाडहडं ।।२७१।।**

(गु०वि० २/२९३)

व्याख्या—**वाशब्दः** प्रकारान्तरोपन्यासे । **दाने निरन्तरे सति लघुकमपि गुरुकम्,** विचाले पारणकाऽदानेन दीयमानं लघुकमपि तपो गुरुकं भवतीति भावः । **इतरथा** सान्तरं दीयमानं **गुरुकमपि** तपो **लघुकं** भवति । उक्तं च—

**'जं तु निरंतरदाणं जस्स व तस्स व तवस्स तं गुरुअं । जं पुण संतरदाणं गुरुअं पि हु तं लहुं होइ'** ।।

तथा **सूत्रविधिना** सूत्रोक्तप्रकारेण **यत्प्रायश्चित्तमविलम्बं** कालक्षेपं वि**नैवोह्यते तत्प्रायश्चित्तं हाडहडमित्युच्यते** । आरोपणा हि पञ्चविधा । यदुक्तम्—

**'पट्ठविइआ य ठविआ कसिणाऽकसिणा तहेव हाडहडा । आरोवण पंचविहा पायच्छित्तं पुरिसजाए'** ।।

(नि०भा० ६६४३)

आरोपणा **पञ्चप्रकारा** । तद्यथा—**प्रस्थापितिका स्थापिता कृत्स्ना अकृत्स्ना हाडहडा** च । एषा पञ्चप्रकाराप्यारोपणा प्रायश्चित्तस्य । तच्च **प्रायश्चित्तं पुरुषजाते** कृतकरणादौ यथायोग्यमवसेयम् । एतासां चेदं व्याख्यानम्—

**'पट्ठविइआ वहंते वेआवच्च ठिआ ठविइआउ । कसिणा झोसविरहिआ जहिं झोसो सा अकसिणाओ'** ।।

(नि०भा० ६६४४)

यदारोपितं प्रायश्चित्तं वहति एषा **प्रस्थापितिका,** वैयावृत्त्यकरणलब्धिसम्पन्न आचार्यप्रभृतीनां वैयावृत्त्यं कुर्वन् यत्प्रायश्चित्तमापन्नः तस्यारोपितमपि **स्थापितं** क्रियते यावद्वैयावृत्त्यपरिसमाप्तिर्भवति । द्वौ योगावेककालं कर्तुमसमर्थ इति कृत्वा सा आरोपणा **स्थापितिका** । **कृत्स्ना** नाम यत्र **झोषो न क्रियते, अकृत्स्ना** यत्र किञ्चित् **झोष्यते** । हाडहडा त्रिविधा—सद्योरूपा स्थापिता प्रस्थापिता च । तत्र लघुगुरुमासिकादि यत्तप आपन्नः तद्यदि सद्यस्तत्कालं दीयते न कालक्षेपेण तदा सा हाडहडा आरोपणा सद्योरूपा । यदि पुनर्यन्मासिकादिकमापन्नः तद्वैयावृत्त्यमाचार्यादीनां करोतीति स्थापितं क्रियते । तस्मिंश्च स्थापिते यदन्यदुद्घातमनुद्घातं वा आपद्यते तत्सर्वमपि प्रमादनिवारणार्थमनुद्घातं दीयते सा हाडहडा स्थापिता । षाण्मासिकपाञ्चमासिकादितपो वहन् अन्तरा यदन्यदापद्यते उद्घातमनुद्घातं वा तत्तस्यापि प्रमादनिवारणार्थमनुद्घातं यदारोप्यते एषा हाडहडा आरोपणा प्रस्थापिता ।।२७१।।

कस्मिन्नपराधे पुनरेवं क्रमेण तपःप्रभृति प्रायश्चित्तमापद्यत इति दर्शयति—

**सत्तरत्तं तवो होइ तओ छेओ पहावई ।**
**छेएणाछिन्नपरिआए तओ मूलं तओ दुगं ।।२७२।।**

(नि०भा० ५५८६, बृ०क० ५४८६, व्य०सू० १४०२, गु०वि० २/६९)

व्याख्या—**सप्तरात्र**मिति जातावेकवचनम्, ततोऽयमर्थः—त्रीणि सप्तरात्राणि यावच्चतुर्गुर्वादिकं **तपो** भवति । **ततः** सप्तरात्रत्रयानन्तरं **छेदः** तस्यापराधपदासेविनोऽभिमुखं प्रकर्षेण धावति **प्रधावति** । छेदेनापि यस्य प्रभूतत्वात् पर्यायो न छिद्यते तस्मिन्नपराधकारिणि **छेदेनाछिन्नपर्याये** एकेनैव दिवसेन **मूलम्** । **ततो द्विक**मनवस्थाप्यपाराञ्चिकलक्षणम् । इयमत्र भावना—यदा कश्चिदाचार्योऽगीतार्थस्याऽबहुश्रुतस्य वा गणं ददाति, स च तदनुज्ञातो गणं धारयति, तदा द्वयोरप्यनेन क्रमेण प्रायश्चित्तमापद्यते । तथाहि—तयोराचार्ययोः प्रथमतः सप्तरात्रं यावत् दिवसे दिवसे चतुर्गुरुकम् । यद्येतावति गते केनाप्यपरेण गीतार्थेन आर्या ! न कल्पते अबहुश्रुतस्यागीतार्थस्य वा गणं दातुं धारयितुं वा, ततः प्रतिपद्यध्वं सम्प्रत्यपि प्रायश्चित्तमिति प्रज्ञापितौ स्वयं वा यद्युपरतौ ततः प्रायश्चित्तमप्युपरतम् । अथ नोपरमेते ततो द्वितीयं सप्तरात्रं दिने दिने षड्लघवः । तृतीयं सप्तरात्रं प्रत्यहं षड्गुरवः । यद्येतावता स्थितौ ततः सुन्दरमेव, नो चेत्ततश्छेदः प्रधावति । तत्रैके आचार्याः पञ्चरात्रिंदिवादारभ्य छेदं प्रस्थापयन्ति । अपरे पुनश्चतुर्गुरुकादिति । पञ्चरात्रिंदिवप्रस्थापनायां भूयोऽप्याऽऽदेशयुगं तद्यथा—केचिदाचार्या लघुभ्यः केचित्तु गुरुभ्यः पञ्चरात्रिंदिवेभ्यश्छेदं प्रारभन्ते । तत्र लघुकं पञ्चरात्रिंदिवप्रस्थापना प्रथमतो भाव्यते—सप्तरात्रत्रयानन्तरं तुरीयं सप्तरात्रं लघुपञ्चकच्छेदः । पञ्चमं गुरुपञ्चकः । षष्ठं लघुदशरात्रिंदिवः । सप्तमं गुरुदशरात्रिंदिवः । अष्टमं लघुपञ्चदशकः । नवमं गुरुपञ्चदशकः । दशमं लघुविंशतिरात्रिंदिवः । एकादशं गुरुविंशतिरात्रिंदिवः । द्वादशं लघुपञ्चविंशतिरात्रिंदिवः । त्रयोदशं गुरुपञ्चविंशतिकः । चतुर्दशं लघुमासिकः । पञ्चदशं गुरुमासिकः । षोडशं चतुर्लघुमासिकः । सप्तदशं चतुर्गुरुमासिकः । अष्टादशं लघुषाण्मासिकः । एकोनविंशं सप्तरात्रं गुरुषाण्मासिकच्छेद इति सर्वसङ्ख्यया त्रयस्त्रिंशं शतमहोरात्राणां भवति । गुरुपञ्चकप्रस्थापनायां तु सप्तरात्रत्रयानन्तरं सप्ताहोरात्राणि प्रथमत एव गुरुपञ्चकछेदः । ततः सप्ताहं लघुदशकः । एवं पूर्वोक्तविधिना गुरुदशकादयोऽपि षड्गुरुकान्ताश्छेदाः । सप्ताहं सप्ताहं प्रत्येकं द्रष्टव्या इति । अत्र चाष्टादशभिः सप्तरात्रैः षड्विंशं शतं रात्रिंदिवानां भवति । यदा तु यतः प्रभृति तपः प्रायश्चित्तमुपक्रान्तं तत आरभ्य छेदविवक्षा क्रियते तदा चतुर्थे सप्तरात्रे प्रथमत एव चतुर्गुरुकः छेदः । पञ्चमे षड्लघुकः । षष्ठेषड्गुरुकः एवं षड्भिः सप्तरात्रैर्द्विचत्वारिंशद्दिनानि भवन्ति । इत्थं त्रयाणामादेशानामन्यतमेनादेशेन छिद्यमानोऽपि भूयस्त्वात् यदा पर्यायो न छिद्यते । ततो यद्यपि देशोनपूर्वकोटिप्रमाणः पर्यायोऽवशिष्यते तथापि सर्वोपि युगपदेकदिनेनैव छिद्यते इति सर्वछेदलक्षणं ततो मूलम् । ततो द्वितीयदिवसेऽनवस्थाप्यम् । तृतीये पाराञ्चिकम् ।

एषा गाथाऽनियतविषयाऽप्येवं प्रतिनियतविषयत्वेन भाविता निशीथादौ तथादर्शितत्वात् ।।२७२।।

अथ श्रीवीरतीर्थे उत्कृष्टा तपोभूमिः षाण्मासिकं तपो भवतिः । ततःपरमपि कश्चित् तत्प्रायश्चित्तमापन्नः स्यात्तस्य कथं प्रायश्चित्तं प्रदीयत ? इत्याह—

**जइ छम्मास परेण वि आवन्नो जाव मास असिइसयं ।**
**ठवणरुवणाइ ते वि हु काउ दिणे दिज्ज छम्मासं ।।२७३।।**

व्याख्या—**यदि** कश्चित् साधुः **षण्मासेभ्यः** **परतो**ऽपि सप्तमासादीनि प्रायश्चित्तानि **यावदशीतिशतमासरूप**मुत्कृष्टं तपोर्हप्रायश्चित्त**मापन्नः** तदा **तान्** सर्वानपि मासान् **स्थापनारोपणाप्रकारेण** **दिवसान्** **कृत्वा** **षाण्मासिकमेवोत्कृष्टं** तपस्तस्य **दद्या**न्नाधिकम् । इयमत्र भावना—मासादारभ्य यावत् षण्मासास्तावत् स्थापनारोपणाव्यतिरेकेणापि सूत्रेणैव प्रायश्चित्तं दीयते । ततः पराणि तु यानि सप्तमासादीनि प्रायश्चित्तानि यावदशीतिशतमासरूपमुत्कृष्टं प्रायश्चित्तं तानि अपरिणामकस्याऽतिपरिणामकस्य वाऽगीतार्थस्य स्थापनारोपणाप्रकारेणैव दीयन्ते । तयोः प्रत्ययहेतुत्वात्तत्प्रकारस्याऽन्यथादोषसम्भवाच्च । गीतार्थस्य अगीतार्थस्य वा परिणामकस्य पुनर्न स्थापनारोपणाप्रकारेण तानि दीयन्ते, तयोरन्यथा दानेऽपि प्रत्ययसम्भवात् दोषाभावाच्च। स्थापनारोपणाप्रकारश्चायम्—यावन्तो मासा दिवसा प्रतिसेविताः तावन्तः सर्वेऽप्येकत्र स्थाप्यन्ते, स्थापयित्वा च यत् सङ्क्षेपार्हं विंशिकादिकं प्रतिसेवितं तत् स्थाप्यते एषा स्थापना । तदनन्तरं येऽन्ये मासाः प्रतिसेवितास्ते सफलीकर्तव्या इत्येकैकस्मान्मासात् प्रतिसेवनापरिणामानुरूपं स्तोकान् स्तोकतरान् समान् विषमान् वा दिवसान् गृहीत्वैकत्र रोपयति । एषा आरोपणा । एषा चोत्कर्षतः तावत्कर्तव्या यावत् स्थापनया सह संकलय्यमानाः षण्मासाः पूर्यन्ते, नाधिकाः । अनेन हि प्रकारेण प्रायश्चित्तदानेऽतिपरिणामकोऽपरिणामको वा चिन्तयति—सर्वे मासाः सफलीकृता इति शुद्धोऽहमिति । तत्र स्थापनाया आरोपणायाश्च चत्वारि स्थानानि भवन्ति । तद्यथा—प्रथमं स्थानं त्रिंशत्स्थानात्मकम् । द्वितीयं त्रयस्त्रिंशत्स्थानात्मकम् । तृतीयं पञ्चत्रिंशत्स्थानात्मकम्। चतुर्थमेकोनाशीत्यधिकस्थानकशतप्रमाणम् । एतेषु च चतुर्ष्वपि स्थानकेष्विमा जघन्या स्थापनारोपणा ।।

**ठवणा वीसिअ पक्खिअ पंचिअ एगाहिआ उ बोधव्वा । आरोवणा वि पक्खिअ पंचिअ तह पंचएगाही'** ।।

(व्य०सू० ३५६, नि०भा० ६४३२)

स्थापनायाः प्रथमे स्थाने जघन्या स्थापना **विंशिका** विंशतिरात्रिंदिवप्रमाणा । द्वितीये **पाक्षिकी** । तृतीये **पञ्चदिवसात्मिका** । चतुर्थे **एकाहिका** । **आरोपणापि** प्रथमे स्थाने जघन्या **पाक्षिकी** । द्वितीये **पञ्चिका** पञ्चदिनप्रमाणा । तृतीयेऽपि **पञ्चिका** । चतुर्थे एकाहिका । आद्येषु च त्रिषु स्थापनारोपणास्थानेषु पञ्चोत्तरा वृद्धिः । चतुर्थे **त्वेकोत्तरा वृद्धिः** । तथाहि—प्रथमस्थापनास्थानके विंशतिदिनस्थापना १ पञ्चविंशतिदिना २ त्रिंशद्दिना ३ एवं पञ्चकवृद्ध्या तावन्नेयं यावत्पञ्चषष्ट्यधिकशतदिनप्रमाणा त्रिंशत्तमा स्थापना । द्वितीये

स्थापनास्थाने पञ्चदशदिना प्रथमा, द्वितीया विंशतिदिना, तृतीया पञ्चविंशतिदिना, एवं पञ्चकवृद्ध्या तावन्नेतव्यं यावत् पञ्चसप्तत्यधिकशतदिनप्रमाणा त्रयस्त्रिंशत्तमा स्थापना । तृतीये स्थाने प्रथमा पञ्चदिना, द्वितीया दशदिना, पञ्चदशदिना तृतीया, एवं पञ्चोत्तरवृद्ध्या तावन्नेतव्यं यावत् पञ्चसप्तत्यधिकशतदिनप्रमाणा पञ्चत्रिंशत्तमा स्थापना । चतुर्थे स्थाने प्रथमा एकदिना, द्वितीया द्विदिना, तृतीया त्रिदिना, चतुर्थी चतुर्दिना, एवमेकोत्तरवृद्ध्या तावन्नेतव्यं यावदेकोनाशीत्यधिकशतदिनप्रमाणा एकोनाशीतिशततमा स्थापना । एवमारोपणाया अपि प्रथमे स्थाने पञ्चदशदिना विंशतिदिना, पञ्चविंशतिदिना, एवं पञ्चकवृद्ध्या तावज्ज्ञातव्यं यावत् षष्ट्यधिकशतदिनप्रमाणा त्रिंशत्तमा आरोपणा । द्वितीयस्थाने पञ्चदिना प्रथमा । दशदिना द्वितीया । पञ्चदशदिना तृतीया । एवं पञ्चकवृद्ध्या तावत् ज्ञेयं यावत् पञ्चषष्ट्यधिकशतदिनप्रमाणा त्रयस्त्रिंशत्तमाऽऽरोपणा। तृतीयेऽपि स्थाने पञ्चदिना प्रथमा । दशदिना द्वितीया । पञ्चदशदिना तृतीया, एवं पञ्चकवृद्ध्या तावद् गन्तव्यं यावत् पञ्चसप्तत्यधिकशतदिनप्रमाणा पञ्चत्रिंशत्तमाऽऽरोपणा । चतुर्थे पुनरारोपणास्थाने स्थापना चतुर्थस्थानवदेकोनाशीतिशतप्रमाणान्यारोपणास्थानान्यवगन्तव्यानि । विंशतिदिनादिकासु च स्थापनासु पाक्षिक्यादिका आरोपणाः प्रत्येकं योज्याः । एवं पाक्षिक्यादिकासु स्थापनासु पञ्चाहिकादिका आरोपणाः प्रत्येकं योज्याः । पञ्चाहिकादिस्थापनासु पञ्चाहिकाद्या आरोपणा, एकाहिकादिस्थापनासु पुनरेकाहिकाद्या आरोपणा योजनीयाः । एवं स्थापनारोपणानां परस्परं संवेधतोऽनेके भङ्गा भवन्ति । ते च स्वयं निशीथव्यवहारतो ज्ञेयाः । स्थापनारोपणयोश्च सर्वत्र वृद्धिः तावती कार्या यावत्या उभयमीलने षण्मासाः पूर्णा भवन्ति नाधिकम् ।।

अथ का स्थापना आरोपणा च कतिषु मासेषु प्रतिसेवितेषु द्रष्टव्या ? इत्येतत्परिज्ञानार्थमाह—

**ठवणारोवणदिवसे माणाउ विसोहइत्तु तु जं सेसं । इच्छिअरूवणाए भए असुज्झमाणे खिवइ झोसं'।।**

(व्य०सू० ३६९)

**मानात्** षण्णां मासानां दिवसपरिमाणात् अशीत्यधिकशतरूपात् विवक्षितायाः **स्थापनाया** विवक्षितायाश्च**आरोपणाया** ये **दिवसाः** तान् **विशोधयेत्** । **विशोध्य** च **यच्छेषमु**पलभ्यते तत् **ईप्सितया** अधिकृतया **आरोपणया भजेत्** भागं ह्रियात् । भागे च हृते यदि राशिर्निर्लेपः शुध्यति । ततो न किमपि प्रक्षिप्यते, केवलं सारोपणा कृत्स्नेति व्यपदिश्यते । यदि पुनर्निर्लेपो **न शुद्ध्यति** ततः **क्षिपति झोषम्** । यस्मिन् प्रक्षिप्ते समो भागहारो भवति सा चारोपणा अकृत्स्नभागहरणादकृत्स्नेति व्यवहर्तव्या । यथा केनापि पृष्टम्—विंशिका स्थापना पाक्षिकी चारोपणा कतिभिर्मासैः प्रतिसेवितैर्निष्पन्ना ? उच्यते—त्रयोदशभिर्मासैः । तथाहि—षण्णां मासानां मानमशीतं दिवस—शतमित्यशीतं शतं ध्रियते १८० । ततो विंशतिकायाः स्थापनाया विंशतिदिनानि पाक्षिक्याश्चारोपणायाः पञ्चदश दिनानि शोध्यन्ते । शोधिते च शेषं जातं पञ्चचत्वारिंशं शतम् । ततोऽधिकृतया पञ्चदशदिनया आरोपणया

भागो ह्रियते, तत्र चोपरितनो राशिः शुद्धं भागं न प्रयच्छति, पञ्चसु च प्रक्षिप्तेषु प्रयच्छतीति पञ्चपरिमाणोऽत्र झोषः प्रक्षिप्यते । ततो भागे हृते लब्धा दश मासाः । वक्ष्यमाणकरणतो द्वौ स्थापनाया मासौ एकश्चारोपणाया मास इत्यागतास्त्रयोदश मासाः प्रतिसेविताः । एवं विंशिका स्थापना पञ्चविंशतिदिना चारोपणा कतिभिर्मासैः प्रतिसेवितैर्निष्पन्ना ? उच्यते—त्रयोविंशतिमासैः । तथाहि—स्थापनादिवसा विंशतिरारोपणादिवसाः पञ्चविंशतिरेते मिलिताः पञ्चचत्वारिंशत् । ते षण्मासदिवसेभ्योऽशीतिशतसङ्ख्येभ्यः शोध्यन्ते । जातं शेषं पञ्चत्रिंश—शतम्। ततोऽधिकृतपञ्चविंशतिदिनया आरोपणया तस्य भागो ह्रियते । तत्र चोपरितनो राशिः शुद्धं भागं न प्रयच्छति, पञ्चदशसु च प्रक्षिप्तेषु प्रयच्छतीति पञ्चदशपरिमाणोऽत्र झोषः प्रक्षिप्यते लब्धाः षण्मासाः । तथा वक्ष्यमाणकरणतोऽधिकृतारोपणया पञ्चभिर्भागो ह्रियते लब्धाः पञ्च ते द्विरूपहीनाः क्रियन्ते, जातास्त्रय एतावन्त आरोपणाया मासा यदि वेयं तृतीयारोपणेति ते षण्मासास्त्रिभिर्गुण्यन्ते जाता अष्टादश, द्वौ स्थापनामासौ त्रयश्चारोपणामासा इत्यागताः सर्वसङ्ख्यया त्रयोविंशतिमासाः ।।

अथवाऽन्यथा झोषपरिमाणं कथयति—

**ठवणादिवसे माणा विसोहइत्ताण भयह रुवणाए । जो छेयं सविसेसो अकसिणरुवणाइ सो झोसो'।।**

(व्य०सू० ३७१)

**मानात्** षण्मासदिवसपरिमाणात् अशीतिशतात् **स्थापनादिवसान्** अधिकृतस्थापनावासरान् **विशोध्य** यच्छेषमवतिष्ठते तत् **आरोपणया** अधिकृतारोपणादिवसैर्**भज** भागहारं कुरु । भागे च हृते यच्छेदांशानां विश्लेषः । इह विश्लेषे कृते सति यदवतिष्ठते, तदपि विश्लेषतो जातत्वात् विश्लेषः । स तावत्प्रमाणो—**ऽकृत्स्नारोपणायां झोषः** । यथा षण्मासदिवसपरिमाणादशीतिशतात् विंशतिकायाः स्थापनाया दिवसा विंशतिरिति शोध्यते । जातं षष्ट्यधिकं शतं १६० । ततः पाक्षिक्यामारोपणायां सञ्चयमासा ज्ञातुमिष्टा इति पञ्चदशभिर्भागो ह्रियते, स्थिताः शेषा दश अधस्ताच्छेदः पञ्चदश । तेभ्यो दश विश्लिष्यन्ते स्थिताः पञ्च, आगतं पञ्चदशिक्यामकृत्स्नारोपणायां पञ्चको झोषः । तथा अशीतिशतात् स्थापनादिवसा विंशतिः शोध्यन्ते, जातं षष्टं शतं १६० । ततः पञ्चविंशतिदिनाया आरोपणायाः सञ्चयमासा ज्ञातुमिष्टा इति पञ्चविंशत्या भागो ह्रियते, शेषा दशच्छेदोऽधस्तात् पञ्चविंशतिः तस्य दशविश्लिष्यन्ते स्थिताः पञ्चदश । आगतं पञ्चविंशतिदिनायामारोपणायां पक्षो झोषः । एवं सर्वत्र भावनीयम् ।।

**जत्थ पुण देइ सुद्धं भागं आरोवणाओ सा कसिणा । दुण्हं पि गुणसु लद्धं इच्छिअरुवणाइ जइ मासा' ।।**

(व्य०सू० ३७२)

**यस्यां** पुनरारोपणायामुपरितनो राशिः **शुद्धभागं** प्रयच्छति, न किञ्चित् पञ्चाद्यस्यावतिष्ठते इति भावः । **सा आरोपणा कृत्स्ना** ज्ञातव्या । यथा विंशतिदिना । तथाहि—केनाऽपि पृष्टं विंशतिकास्थापना विंशिका चारोपणा

कतिभिर्मासैः प्रतिसेवितैर्निष्पन्ना ? उच्यते—अष्टादशभिर्मासैः । तद्यथा—षण्णां मासानामशीतिशतं दिवसाः, तेभ्यो विंशतिर्दिना स्थापनाया विंशतिर्दिनान्यारोपणायाः शोध्यन्ते । जातं शेषं चत्वारिंशं शतं । ततोऽधिकृतया विंशिकया आरोपणया भागे हृते उपरितनो राशिर्निर्लेपः शुद्धः । एषा कृत्स्नारोपणा लब्धाः सप्त मासाः । इयमारोपणा द्वाभ्यां मासाभ्यां निष्पन्नेति सप्त मासा द्वाभ्यां गुण्यन्ते । जाताश्चतुर्दश मासाः । ततो द्वौ स्थापनामासौ द्वौ चारोपणामासौ चतुर्दशसु प्रक्षिप्यन्ते, आगतं विंशिका स्थापना विंशिका चारोपणा अष्टादशमासैर्निष्पन्नेति । **दुण्हंपि**' इत्यादि । द्वयोरपि आरोपणयोः कृत्स्नाकृत्स्नयोर्लब्धमीप्सिताया आरोपणाया **यति मासा** यतिभिर्मासैरी-प्सितारोपणा निष्पन्नेति यावत् ततिभि**र्गुणय** । यद्येकेन मासेन निष्पन्ना तत एकेन गुणय । अथ द्वाभ्यां मासाभ्यां निष्पन्ना तर्हि द्विकेन । अथ त्रिभिः ततस्त्रिभिरित्यादि । अथवा द्वयोरप्यारोपणयोः कृत्स्नाकृत्स्नयोर्लब्धं **यति मासास्तत ईप्सितया आरोपणया गुणय** । यदि प्रथमा तत एकेन गुण्यते । अथ द्वितीया ततो द्वाभ्यामथ तृतीया ततस्त्रिभिरित्यादि एवं सर्वत्र भावनीयम् ।।

अथ स्थापनारोपणादिवसेभ्यो यथा मासा आगच्छन्ति मासेभ्यो वा दिवसास्तथा प्रतिपादयति—

**दिवसा पंचहिं भइआ दुरूवहीणाउ ते भवे मासा । मासा दुरूवसहिआ पंचगुणा ते भवे दिवसा**'।।

(व्य०सू० ३७३)

स्थापनाया आरोपणाया वा **दिवसाः पञ्चभिर्भज्यन्ते**, ततो भागे हृते ये लब्धास्ते **द्विरूपहीनाः** क्रियन्ते, ततो यदवशिष्यते **ते भवेयुर्मासाः** । यथा विंशिकायाः स्थापनाया दिवसा विंशतिः, तेषां पञ्चभिर्भागे हृते लब्धाश्चत्वारस्ते द्विरूपहीना कृताः स्थितौ द्वौ । आगतं विंशिकास्थापना द्वाभ्यां मासाभ्यां निष्पन्ना । तथा पाक्षिक्या आरोपणाया दिनानि पञ्चदश, तेषां पञ्चभिभगि हृते लब्धाः त्रयस्ते द्विरूपहीनाः कृताः स्थित एक आगतं पाक्षिकी आरोपणा एकेन मासेन निष्पन्ना विंशिकारोपणा विंशिकास्थापना च द्विमासनिष्पन्ना । एवं सर्वत्र भावनीयं । **मासा दुरूवसहिआ**' इत्यादि । यति मासाः स्थापनायामारोपणायां वा अधिकृतकरणवशात् लब्धास्ते दिवसानयनाय **द्विरूपसहिताः** क्रियन्ते । ततः **पञ्चगुणास्ततो भवेयुर्यथोक्ता दिवसाः** । यथा विंशिकायाः स्थापनाया द्वौ मासौ तौ द्विरूपसहितौ क्रियेते जाताश्चत्वारस्ते पञ्चभिर्गुण्यन्ते । आगतं विंशिकास्थापनाया विंशतिर्दिनानि । तथा पाक्षिक्यामारोपणायामेको मासः । स द्विरूपसहितः कृतो जाताः त्रयः ते पञ्चभिर्गुण्यन्ते । आगतं पाक्षिक्यारोपणाया पञ्चदश दिनानि । एवं सर्वत्र भावनीयं ।। तदेवं करणान्यभिधायोपसंहारमाह—

**ठवणारोवणसहिआ संचयमासा हवंति एवइआ । कत्तो किं गहिअं ति अ ठवणामासे ततो सोहे**' ।।

(व्य०सू० ३७४)

पूर्वं **ठवणारोवण दिवसे माणाउ विसोहइत्तु**' (उपर्युक्ता व्य.सू. ३६९ गाथा) इत्यादि करणवशात् ये लब्धा मासास्तेऽनन्तरोक्तकरणवशादानीता ये **स्थापनारोपणामासाः तत्सहिताः** क्रियन्ते, ततः शिष्येभ्य एवं प्ररूप्यते।

अस्यां स्थापनायामस्यां चारोपणायामेतावन्तः **सञ्चयमासाः** सर्वप्रायश्चित्तसङ्कलनमासा **भवन्ति** । अथ तस्यां स्थापनायामारोपणायां च सञ्चयमासानां मध्ये **कुतो मासात् किं गृहीतम्** ? अत्र करणमाह **ठवणामासे ततो सोहे'** । ततः सञ्चयमाससङ्ख्यातः स्थापनामासान् शोधयेत् । शोधिते च सति—

**दिवसेहिं जइहिं मासो निप्फन्नो हवइ सव्वरुवणाणं । तइहिं गुणिआउ मासा ठवणादिणजुआउ छम्मासा'** ।।

(व्य०सू० ३७५)

**सर्वासामारोपणानां यतिभिर्दिवसैर्मासो भवति निष्पन्नस्ततिभिर्गुणितास्ते** कर्तव्याः । पुनः **स्थापनादिनयुक्तास्ततस्ते षण्मासा** भवन्ति । यथा प्रथमायां स्थापनायामारोपणायां च त्रयोदश सञ्चयमासास्तेभ्यः स्थापनामासौ द्वौ शोधितौ स्थिता एकादश । अत्रारोपणायामेको मासः, स च पञ्चदशभिर्दिनैर्निष्पन्न इति ते एकादश पञ्चदशभिर्गुण्यन्ते । जातं पञ्चषष्टं शतं । ततो विंशतिदिवसाः स्थापनासत्काः प्रक्षिप्यन्ते । जातं पञ्चाशीतं शतं पञ्चझोष इति ते त्यक्ताः । जाताः षण्मासाः । आगतं द्वाभ्यां स्थापनीकृताभ्यां मासाभ्यां दश दश दिनानि गृहीतानि । शेषेभ्यस्त्वेकादशेभ्यः पञ्चदश पञ्चदश दिनानि । केवलं तन्मध्यात् पञ्चझोषः कृतः पञ्च दिनानि त्यक्तानीति भावः । एतान्येव च प्राक् राशिसमकरणार्थं प्रक्षिप्तानीति समकरणः प्रक्षेपणीयो राशिर्झोषशब्देनोक्तः । एवं सर्वत्र झोषभावना ज्ञेया । तथा विंशिकायां स्थापनायां विंशिकायां चारोपणायामष्टादश किल सञ्चयमासाः तेभ्यो द्वौ स्थापनामासौ शोधितौ । जाताः षोडश । अत्र विंशतिदिनारोपणा द्विमासेत्येकैको मासो दशभिर्दिनैर्निष्पन्नः, ततस्ते षोडश दशभिर्गुण्यन्ते । जातं षष्टं शतं १६० । ततः स्थापनादिवसा विंशतिः प्रक्षिप्यन्ते । जातमशीतिशतम् । आगतमत्र द्वाभ्यां स्थापनामासाभ्यां दश दश वासरा गृहीताः । शेषेभ्योऽपि षोडशेभ्यो गात्रतो दश दशेति । तथा विंशिकायां स्थापनायां पञ्चविंशतिकायां चारोपणायां त्रयोविंशतिः सञ्चयमासास्तेभ्यो द्वौ स्थापनामासौ शोधितौ । जाता एकविंशतिः । पञ्चविंशतिदिनारोपणा त्रिभिर्मासैर्निष्पन्नेत्येकैको मासः स त्रिभागैरष्टभिर्दिनैर्निष्पन्नस्तत एकविंशतिरष्टभिर्दिनैर्गुणिता जातमष्टषष्टं शतं त्रिभागगुणने च लब्धाः सप्त तेपि तत्र प्रक्षिप्यन्ते । जातं पञ्चसप्ततं शतं तत्र विंशतिः स्थापनादिवसाः प्रक्षिप्यन्ते । जातं पञ्चनवतं शतं १९५ । तत्र पञ्चदश दिनानि झोष इति तान् अपनीयन्ते जातमशीतं शतम् । आगतमत्र द्वाभ्यां स्थापनीकृतमासाभ्यां दश दश दिवसा गृहीताः, शेषेभ्यस्त्वेकविंशतिमासेभ्यो गात्रतोऽष्टावष्टौ दिवसाः सत्रिभागाः, केवलं तत्रापि पञ्चदश दिनानि झोषीकृतानि । तदेवं स्थापनातः शेषमासेभ्य गात्रतो यत् गृहीतं तत्प्रतिपादितम् ।। अधुना शेषमासेभ्यो यद् येभ्यो विशेषतो गृहीतं तत्प्रतिपादनार्थं करणमाह—

**रुवणाए जइ मासा तइभागं तं करे तिपंचगुणं । सेसं च पंचगुणिअं ठवणादिवसाजुआ दिवसा'** ।।

(व्य०सू० ३७६)

स्थापनामासेषु शोधितेषु यच्छेषमवतिष्ठते तत **आरोपणायां यति मासाः ततिभागं** तावत्सङ्ख्याकभागं

करोति । तत्राद्यं **त्रिपञ्चगुणं** पञ्चदशगुणं **करोति, शेषं** तु समस्तमपि **पञ्चगुणम्** । एतच्चैवं द्रष्टव्यम्—पाक्षिक्यादिष्वारोपणादिषु यदि पुनरेकदिना द्विदिना यावच्चतुर्दशदिना आरोपणा तदा यति दिनारोपणा तति गणं कुर्यात् । ततः **ते दिवसाः स्थापनादिवसयुताः** क्रियन्ते ततो दिवसाः षण्मासदिवसा भवन्ति । तद्यथा—प्रथमायां स्थापनायां प्रथमायां चारोपणायां त्रयोदश सञ्चयमासाः, तेभ्यो द्वौ स्थापनामासौ शोधितौ जाता एकादश । अधिकृतारोपणा एकमासनिष्पन्नेति । ते एकादश एकभागेन क्रियन्ते । एकभागकृतं च तत्तथारूपमेव भवतीति समुदिता एव ते एकादश । ततः **तिपंचगुणिअ'** मिति वचनात् पञ्चदशभिर्गुण्यन्ते । जातं पञ्चषष्टं शतं १६५ । तत्र स्थापनादिवसा विंशतिः प्रक्षिप्ता जातं पञ्चाशीतं शतं, ततः पञ्च दिनानि झोषीकृतानीति तान्यपसार्यन्ते । जातमशीतं शतम् । आगतं द्वाभ्यां स्थापनाकृतमासाभ्यां दश दश दिनानि गृहीतानि शेषेभ्यस्त्वेकादशमासेभ्यः पञ्चदश पञ्चदश दिनानि यावत् झोषीकृतानि । तथा विंशिकायां स्थापनायां विंशिकायां चारोपणायामष्टादश सञ्चयमासाः, तेभ्यो द्वौ स्थापनामासावपनीतौ । जाताः षोडश । ततोऽत्रारोपणा द्वाभ्यां मासाभ्यां निष्पन्नेति षोडश द्वाभ्यां भागाभ्यां क्रियन्ते । उपर्यष्टौ अधोप्यष्टौ । तत्रोपरितनमाद्यभागं पञ्चदशभिर्गुणयेत् । जातं विंशं शतं १२० । अधस्तनास्त्वष्टौ पञ्चभिर्गुण्यन्ते । जाता चत्वारिंशत् ४० । उभयमीलने जातं षष्टं शतं १६०। अत्र स्थापनादिवसा विंशतिः प्रक्षिप्ता जातमशीतं शतम्, आगतमत्र द्वाभ्यां स्थापनामासाभ्यां दश दश दिनानि गृहीतानि । अष्टाभ्यो मासेभ्यः पञ्चदश पञ्चदश । अन्ये त्वष्टाभ्यः पञ्च पञ्चेति । तथा विंशिकायां स्थापनायां पञ्चविंशिकायां चारोपणायां त्रयोविंशतिः सञ्चयमासास्तेभ्यो द्वौ स्थापनामासौ शोधितौ जाता एकविंशतिरत्रारोपणा त्रिभिर्मासैर्निष्पन्नेति ते एकविंशतिः सञ्चयमासास्त्रिभागाः क्रियन्ते । जातास्त्रयः सप्तकाः पुञ्जाः । तत्र प्रथमसप्तकः पञ्चदशभिर्गुण्यन्ते जातं पञ्चोत्तरं शतम्, तत्र पक्षो झोष इति पञ्चदश शोध्यन्ते जाता नवतिः ९०। शेषौ च द्वौ भागौ सप्तकौ प्रत्येकं पञ्चभिर्गुण्येते । जाता उभयत्र प्रत्येकं पञ्चत्रिंशत् । उभयमीलने सप्ततिः, सा पूर्वराशौ क्षिप्ता जातं षष्ट्यधिकं शतं १६०। तत्र विंशति स्थापनादिवसाः प्रक्षिप्ता जातमशीतं शतमागतमत्र द्वाभ्यां स्थापनामासाभ्यां दश दश वासरा गृहीताः, सप्तभ्यो मासेभ्यः पञ्चदश पञ्चदश, चतुर्दशभ्यो मासेभ्यः पञ्च पञ्च पञ्चदश वासराश्च झोषीकृता इति । एवं सर्वत्र भावनीयम् ।।

अथ **दिवसा पंचहिं भइआ'** (उपर्युक्ता व्य.सू. ३७३ गाथा) इत्यादि करणं यत्र न प्रवर्त्तते तत्र विधिमाह—

**जत्थ य दुरूवहीणं न हुज्ज भागं च पञ्चहिं न दिज्जा । तहिं ठवणरुवणमासो एगो उ दिणा उ ते चेव' ।।**

(व्य०सू० ३७८)

**यत्र** पुनः स्थापनासु आरोपणासु पञ्चदिनादिकासु **पञ्चभिर्भागे** हृते लब्धं तत् **द्विरूपहीनं न भवेत्** । पञ्चदिनादि—कासु नवदिनपर्यन्तासु द्वयोरेव रूपयोरसम्भवात् । दशदिनादिकासु तु चतुर्दशदिनपर्यन्तासु द्विरूपहीनतायां शून्यतापत्तेः । यदि वा यासु स्थापनास्वारोपणासु चैकदिनादिषु चतुर्दिनपर्यन्तासु **पञ्चभिर्भागमुपरितनो राशिर्न**

दद्यात् स्तोकत्वात्तत्र तासु **स्थापनास्वारोपणासु चैको मासो** द्रष्टव्यः । **दिणा उ ते चेव**' त्ति । दिनान्यपि तान्येव यान्युपात्तानि । न पुनर्मासस‌ङ्ख्यां द्विरूपसहितां कृत्वा पञ्चभिश्च गुणयित्वा दिनान्यानेतव्यानीति भावः । अथ यत्रोत्कृष्टा स्थापनारोपणा वा स्थापनारोपणाभ्यामेव षण्णां मासानां परिपूर्णभवनात् । **ठवणारोवणदिवसे माणाउ विसोहइत्तु जं सेस**' (उपर्युक्ता व्य.सू. ३६९ गाथा) मित्यादिकरणं न प्रवर्त्तते, तदप्रवृत्तौ च कथं सञ्चयमाससङ्कलनं कर्तव्यम् ? तत आह—

**उक्कस्सारूवणाणं मासा जे हुंति करणनिद्दिट्ठा । ते ठवणामासजुआ संचयमासाउ सव्वासिं**' ।।

(व्य०सू० ३८१)

सर्वासामुत्कृष्टानामारोपणानां **ये मासा भवन्ति करणनिर्दिष्टाः** '**दिवसा पंचहिं भइआ**' (उपर्युक्ता व्य.सू. ३७३ गाथा) इत्यादिना आरोपणाकरणेन निर्दिष्टास्ते **स्थापनामासयुताः** स्थापनायां करणवशतो लब्धा मासास्तैः संयुक्ताः **सञ्चयमासा** द्रष्टव्याः । यथा विंशिकायां स्थापनायां षष्टदिनशतायामारोपणायां द्वात्रिंशन्मासाः । तथाहि—स्थापनायां द्वौ मासौ लब्धौ, तौ च प्रागेव भावितौ आरोपणायाः पञ्चभिर्भागो ह्रियते, लब्धा द्वात्रिंशत् सा द्विरूपहीना क्रियते, जाताः त्रिंशत् । स्थापनामासौ तत्र प्रक्षिप्तावागतं द्वात्रिंशत् प्रतिसेविता मासाः । अथात्र कुतो मासात् किं गृहीतम् ? उच्यते—**द्वौ द्वात्रिंशतः सञ्चयमासेभ्यः स्थापनामासौ** शोध्येते । स्थिता त्रिंशन् मासास्त्रिंशता मासैर्निष्पन्नास्त्रिंशद्भागाः क्रियन्ते । आगत एकैकस्मिन् भागे एकैको मासः । तत्र प्रथमभागः पञ्चदशभिर्गुण्यते जाताः पञ्चदश, शेषा एकोनत्रिंशत् पञ्चभिर्गुण्यन्ते जातं पञ्चचत्वारिंशं शतं १४५ । उभयमीलने षष्टं शतम् १६० । अत्र स्थापनादिवसा विंशतिः प्रक्षिप्ता जातमशीतं शतम् । आगतमत्र द्वाभ्यां स्थापनामासाभ्यां दश दश दिवसा गृहीताः । एकस्मात् पञ्चदश, शेषेभ्यः पञ्च पञ्चेति । एवं सर्वत्र भावनीयम् । श्रीवर्द्धमानतीर्थे च षाण्मासिकमेवोत्कृष्टं तपो दातव्यं नाधिकम् । यदुक्तम्—

**बारस अट्ठ य छक्कग माणं भणिअं जिणेहिं सोहिकरं । तेण परं जे मासा संहण्णंता परिसडंति**' ।।

(व्य०सू० ४०२, नि०भा० ६४६६)

**मीयते** परिच्छिद्यते वस्त्वनेनेति **मानम्** । तत् द्विधा—द्रव्ये भावे च । तत्र द्रव्येषु प्रस्थकादिषु, भावतः पुनरिदं **मानं** प्रायश्चित्तमानं **जिनैस्**तीर्थकृद्भिस्त्रिविधं **शोधिकरं** भणितम् । तद्यथा—प्रथमतीर्थकरस्य **द्वादश** मासाः, मध्यमतीर्थकृता**मष्टौ मासाः**, वर्द्धमानस्वामिनः **षट्कं** षण्मासाः । इतोऽधिकं न दीयते किन्तु बहुष्वपि **प्रतिसेवितेषु मासेष्वेतावन्मात्रमेव** । अत्र प्रस्थकदृष्टान्तो यथा—प्रस्थकेन मीयमानं तावन्मीयते यावत्प्रस्थकस्य शिखा परिपूर्णा भवति । ततः परमधिकमारोह्यमाणमपि परिपतति । एवं षण्णां मासानामधिकं यद्यपि प्रतिसेवितं तथापि तत् स्थापनारोपणाप्रकारेण संहन्यमानं परिशटति । तथा चाह— '**तेण पर**' मित्यादि । तत उक्तरूपात् षण्मासादिकान् मानात् '**पर**' मित्यव्ययं ये मासास्ते स्थापनारोपणाप्रकारेण **संहन्यमानाः** संघात्यमानाः

**परिशटन्ति** । तावन्मात्रेण च प्रायश्चित्तप्रतिपत्तारः शुद्ध्यन्ति शुद्धस्वभावत्वात् । भगवतां तीर्थकृतामाज्ञैषा सम्यगनुष्ठेया स्थापनारोपणाराशिज्ञानसद्भावे इत्थमुक्तम् ।।२७३।। यदा तु स्थापनारोपणाराशिर्न ज्ञायते तदा कस्मान्मासात् कियद्दिनानि गृह्यन्ते ? इति कथनार्थमाह—

**अहवाऽऽगयमासहिए असीइसए लद्धमासमासदिणे ।**
**मासगुणे सेसदिणीकयसहिए दिज्ज असि(सी?)इसयं ।।२७४।।**

व्याख्या—**अथवेति** प्रकारान्तरोपन्यासे । तदेव प्रकारान्तरं दर्शयति । तथाहि—यदा स्थापनारोपणाराशिर्न ज्ञायते विस्मृतत्वादिना तदा **आगतमासा** ये आलोचकशिष्यमुखात् प्रतिसेविता मासाः श्रुताः तैरेव **मासैरशीतशतस्य** षण्मासदिनसङ्ख्यारूपस्य भागो **ह्रियते**, हृते च भागे **यल्लब्धं** तत् **मासात् मासात्** ग्राह्यमानम् । एकैकस्मान्मासात्तावन्ति दिनानि गृह्यन्ते इत्यर्थः । इह यदुद्धरितं[A] ते दिनभागा अवबोद्धव्याः । ततस्तानि प्रतिमासग्राह्यदिनानि **मासगुणानि** प्रतिसेवितमासगुणितानि क्रियन्ते । शेषाश्च ये दिनभागास्तेप्यागतमासैस्तैरेव गुणयित्वा भागं हृत्वा दिनानि कार्याणि । ततस्तानि पूर्वागतदिनरात्रौ प्रक्षिप्यन्ते, जातमशीतं दिनशतं षाण्मासिकमित्यर्थः। यदा स्थापनारोपणाराशिर्नावगम्यते तदाऽनेन करणप्रकारेणैवं षाण्मासिकं कृत्वा दद्यादिति भावः । यथा श्रुतमासाः १३ एभिरस्मात् १८० राशेर्भागे हृते लब्धास्त्रयोदश उद्धरितं[A] ११ ते लब्धास्त्रयोदश श्रुतमासैस्त्रयोदशभिर्गुणिता जातं १६९ ते च शेषा एकादश तैः श्रुतमासैस्त्रयोदशभिर्गुणिता जातम् १४३। अस्य च तैरेव त्रयोदशभिर्भागे हृते लब्धा एकादश । एतेषां च १६९ पूर्वराशौ प्रक्षेपे जातमशीतं शतम् १८०। एवं सप्रपञ्चं तपःप्रायश्चित्तं प्रदर्शितम् । एतच्च सकलं स्थविरकल्पिकानामनाचारमेवाश्रित्य भवति न पुनरतिक्रमव्यतिक्रमातीचारान् । यदाह—

**'सव्वे वि अ पच्छित्ता जे सुत्ते ते पडुच्चऽणायारं । थेराण भवे कप्पे जिणकप्पे चउसु वि पएसु'** ।।
(व्य०सू० ४३४, नि०भा० ६४९९)

**यानि** कानिचित् **सूत्रेऽ**भिहितानि **प्रायश्चित्तानि** तानि **सर्वाण्यपि स्थविराणां** कल्पे स्थविरकल्पिकाना**मनाचारं प्रतीत्य** भवन्ति । यतः स्थविरकल्पिकानां त्रिष्वतिक्रमादिषु पदेषु प्रायश्चित्तं न भवति । तथाहि—प्रतिश्रुतेऽपि यदि स्वतः परतो वा प्रतिबोधितः पदभेदं न कुरुते, कृतेपि वा पदभेदे न गृह्णाति, गृहीतेऽपि यदि न भुङ्क्ते किन्तु परिष्ठापयति, तदा स मिथ्यादुष्कृतमात्रप्रदानेनापि शुद्ध्यतीति न सूत्राभिहित प्रायश्चित्तविषयः । भुञ्जानस्त्वनाचारे वर्तते इति तस्य सूत्रोक्तप्रायश्चित्तविषयता । **जिनकल्पे** जिनकल्पिकानां पुन**श्चतुर्ष्व**प्यतिक्रमादिषु **पदेषु** प्रायश्चित्तं भवति । स्थविरकल्पिकानां च मनसापन्नेऽपराधे तपः प्रायश्चित्तं नास्ति ।। तथा चोक्तम्—

**'जीवो पमायबहुलो पडिवक्खे दुक्करं ठवेउं जे । कित्तिअमित्तं वुज्झइ पच्छित्तं दुग्गयरिणीव'** ।।

**अयं जीवः प्रमादबहुलो**ऽनादिभवाभ्यस्तप्रमादभावनाभावितः ततः **प्रतिपक्षे**ऽप्रमादे **स्थापयितुं दुष्करं** भवति ।

---

**A.** अवशिष्टम् ।

दुःखेनाऽप्रमादभावनायां स्थाप्यत इत्यर्थः । **जे** इति पादपूरणे । अतो **दुर्गतऋणिक इव** दरिद्राधमर्ण इवातिप्रभूतं ऋणं अतिचपलचित्तसम्भवापराधवशादयं प्रमादबहुलो जीवः पदे पदे समापद्यमानं **कियन्मात्रं प्रायश्चित्तं वक्ष्यति** वोढुं शक्ष्यतीति नास्ति मनसापन्नेऽपराधे तपःप्रायश्चित्तं स्थविरकल्पिकानाम् । आलोचनाप्रतिक्रमण—प्रायश्चित्ते तु तत्रापि भवत इति मन्तव्यमिति । एष सप्रपञ्चस्तपोर्हप्रायश्चित्तविधिः ।।२७४।।

इदानीं छेदार्हप्रायश्चित्तं गाथात्रयेणाह—

**तवगव्विओ तवस्स य असमत्थो तवमसद्दहंतो अ ।**
**तवसा व जो न दम्मई अइपरिणाममप्पसंगी अ ।।२७५।।**
**सुबहुत्तरगुणभंसी छेआवत्तिसु पसज्जमाणो अ ।**
**पासत्थाइ जो वि अ जईण पडितप्पओ बहुसो ।।२७६।।**
**उक्कोसं तवभूमिं समईओ सावसेसचरणो अ ।**
**छेअं पणगाईअं पावइ जा धरइ परिआओ ।।२७७।।**

**(त्रिभिर्विशेषकम्)**

व्याख्या—**तपोगर्वितः** षण्मासक्षपकोऽन्यो वा विकृष्टतपःकरणक्षमः । **तपसश्चासमर्थो**ऽसहिष्णुः ग्लानो बालो वृद्धो वा । **तपोऽश्रद्दधानश्च** । **तपसा** वा पुनःपुनर्दीयमानेनापि **यो न दम्यते** । **अतिपरिणामको**ऽपवादैकप्रसक्तः । **अतिप्रसंगी वा** यो मुहुर्मुहुस्तदेवातिचारपदं सेवते बहुतरं वाऽतिचारस्थानं सेवते । तथा **सुबहूनुत्तरगुणान्** पिण्डविशुद्ध्यादीन् **भ्रंशयति** विनाशयतीत्येवंशीलः **सुबहूत्तरगुणभ्रंशी** । **छेदापत्तिषु प्रसजंश्च** येनातिचारेण छेदापत्तिर्भवति तमेवातिचारं पुनःपुनर्यः करोति । योऽपि च **पार्श्वस्थादिः**, आदिशब्दादवसन्नः **कुशीलः संसक्तो नित्यवासी वा यतीनां** साधूनां संविग्नानां **बहुशो**ऽनेकशः **परितर्पको** वैयावृत्त्यकरः । तथा **उत्कृष्टा तपोभूमिः** आदिजिनतीर्थे संवत्सरं मध्यमजिनतीर्थेष्वष्टौ मासाः श्रीवीरतीर्थे षण्मासाः, तां **तपोभूमिमतिक्रान्तः** तदधिकप्रायश्चित्तयोग्यमतीचारजातं कृतवानित्यर्थः । **सावशेषचरणश्च** क्रियमाणेऽपि पर्यायछेदे यस्य सावशेषश्चरणपर्यायो भवति स साधुः पूर्वगाथाद्वयोक्तश्च तपोगर्वितादिः तपोऽर्हप्रायश्चित्तापत्तावपि **पञ्चकादिकम्**, आदिशब्दाद्दशक—पञ्चदशकादिकं अतीचारानुमानेन **छेदं** व्रतपर्यायछेदनरूपं प्राप्नोति । **यावत्पर्यायं धरति** सर्वपर्यायच्छेदो यावन्न भवतीत्यर्थः । सर्वछेदे हि मूलं स्यादिति ।।२७५-२७६-२७७।।

उक्तं छेदार्हम् । अधुना मूलार्हं गाथाचतुष्टयेनाह—

**आउट्टिआइ पंचिंदिघाए मेहुणे अ दप्पेणं ।**
**सेसेसुक्कोसाभिक्खासेवणाईसु तीसुंपि ।।२७८।।**
**तवगव्विआइएसु अ मूलुत्तरदोसवइअरगएसु ।**
**दंसणचरित्तवंते चिअत्तकिच्चे अ सेहे अ ।।२७९।।**

**अच्चंतोसन्नेसु अ परलिंगदुगे अ मूलकम्मे अ।**
**भिक्खुंमि अ विहिअतवेऽणवट्टपारंचियं पत्ते ।।२८०।।**
**छेएण उ परिआएऽणवट्टपारंचिआवसाणे अ।**
**मूलं मूलावत्तिसु बहुसो अ पसज्जओ भणियं ।।२८१।।**

(चतुर्भिः कलापकम्)

व्याख्या—**आकुट्टिकया पञ्चेन्द्रियघाते मैथुने च दर्पेण सेविते** सतीवादमस्या नाशयामीतिबुद्ध्या स्त्रीसेवनायां। **शेषेषु च** मृषावादाऽदत्तादानपरिग्रहेषु **त्रिष्वप्याकुट्टिकया उत्कर्षतोऽभीक्ष्णं वा** पुनः पुनरासेवनादिषु **आदि**— शब्दादाकुट्टिकया पञ्चानामप्येषां कारणानुमत्योश्च मूलम् । तथा **तपोगर्वितादिषु** तपोगर्वित—तपोऽसमर्थ तपोऽश्रद्दधान—तपोऽदम्यमानेषु बहुशो **मूलोत्तरदोषव्यतिकरगतेषु । मूलगुणा उत्तरगुणाश्च** बहुप्रकारास्तेषां **दोषा** दूषणं भङ्गकरणं तस्य **व्यतिकरः** सम्पर्कस्तं **गतेषु** बहुशो मूलोत्तरगुणभङ्गकारिष्वित्यर्थः । **वान्तदर्शनचारित्रे** इह दर्शने वान्ते नियमाच्चारित्रं वान्तमेव । चारित्रे पुनर्वान्ते दर्शने भजना—वान्तचारित्रोऽपि कोऽपि दर्शनं वमति, कोऽपि न वमति । ततो वान्तदर्शने वान्तचारित्रे च । त्यक्तानि कृत्यानि दशविधचक्र— वालसामाचारीरूपाणि सर्वाणि येन **स त्यक्तकृत्यस्तस्मिन् । शैक्षे** च नवदीक्षितेऽनुपस्थापिते एतेषु सर्वेषु **मूलम्** । तथा **अत्यन्तावसन्नेषु** च । अवसन्ना एव प्रव्राजिताः संविग्नैर्वा प्रव्राजितमात्रा एवावसन्नतया विहृतास्तेऽत्यन्तावसन्नास्तेषु । **परलिङ्गद्विके । परलिङ्गं** गृहस्थलिङ्गं कच्छाबन्धनादिगृहस्थवेषरूपम् अन्यतीर्थि— कलिङ्गं च तापसादिवेषरूपम् । तयोराकुट्टिकया दर्पेण वा स्वयं करणे, **मूलकर्मणि** च औषधादिना स्त्रीणां गर्भाधानशाटनकरणरूपे । **भिक्षौ च** विहिततपसि । विहितं—दत्तं गुरुभिस्तपोरूपप्रायश्चित्तं यस्य तस्मिन् । एवमङ्गीकृततपःप्रायश्चित्ते पुनरपि **छेदमूले** अतिक्रम्य तथाविधाऽतिचारसेवनयाऽ**नवस्थाप्यं पाराञ्चिकं** वापि प्राप्ते **मूलम्** । कोऽर्थः ? भिक्षोर्नवमदशमप्रायश्चित्तापत्तावपि मूलमेव प्रायश्चित्तं भवति । आचार्योपाध्याययोस्तु पाराञ्चिकापत्तावप्यऽनवस्थाप्यमेव । यदुक्तं भाष्ये—

**इत्थ य जह नवदसमे आवन्नस्सा वि अ भिक्खुणो मूलं । दिज्जइ तहाभिसेगे परं पयं होइ नवमं तु'** ।। अभिषेकशब्देनाचार्योपाध्यायौ उच्येते, परमत्राचार्यस्याकृतकरणस्योपाध्यायस्य तु कृतकरणस्यैतत् ज्ञेयम् । कृतकरणस्याचार्यस्यान्त्यप्रायश्चित्तप्रतिपत्तिभणनात् । तथा **छेदेन** पुनःपुनरतीचारमाश्रित्य क्रियमाणेन व्रतपर्याये निरवशेषेऽपि छिन्ने इति शेषः मूलम् । **अनवस्थाप्यपाराञ्चिकयोरनुष्ठितयोरनन्तरं** पुनस्तथाविधाऽतिचारसेवनया तदापत्तावपि **मूलमेव** दीयते । **मूलापत्तिषु** उपचारान्मूलापत्तिकारणेष्वतिचारेषु **बहुशश्च प्रसजतः** पुनः पुनः प्रसक्तिं कुर्वाणस्य **मूलम्** । एतेषु यथोक्तस्थानेषु सर्वेषु मूलं प्रायश्चित्तं भणितम् ।।२७८-२७९-२८०-२८१।।

पुनरप्येकया गाथया मूलमेवाह—

**तवईअमसद्दहए तवबलिए चेव होइ परिआए ।**
**दुब्बलअप्परिणामे अथिर अबहुस्सुए मूलं ।।२८२।।**

व्याख्या—यो मासादिकं षण्मासपर्यन्तं **तपोऽतीतो** व्युत्क्रान्तः । किमुक्तं भवति—मासादिना षण्मासपर्यन्तेन तपसा यो न शुद्ध्यति, तपोग्रहणमुपलक्षणं देशच्छेदमपि योऽतीतो देशच्छेदेनापि यो न शुद्ध्यतीति भावः । **तस्य मूलं दीयते** इति सर्वत्र सम्बध्यते । तथा **असद्दहए'** इति । **अश्रद्दधानो** नाम मिथ्यादृष्टिः । ततो योऽश्रद्दधान एव सन् व्रतेषु स्थापितः पश्चात् सम्यक्त्वं प्रतिपन्नः सन् सम्यगावृत्तो भवति तस्य मूलं देयम् । यथा गोविन्दवाचकस्य दत्तमिति । **तवबलिए'** त्ति तपसा **बलिको** बलिष्ठः तपोबलिकः । किमुक्तं भवति—महतापि तपसा यो न क्लाम्यति, यत्र तत्र स्वल्पे प्रयोजने तपः करिष्यामीति विचिन्त्य प्रतिसेवते । यद्वा षाण्मासिके तपसि दत्ते वदति—समर्थोऽहमन्यदपि तपः कर्तुं तदपि मे देहीति तस्मिन् तपोबलिके **मूलम्** । **पर्याये'** इति यस्य च्छेदेन छिद्यमानः पर्यायो न पूर्यते स्तोकत्वात् । अथवा छेदपर्यायं यो न सम्यक् श्रद्दधाति । यथा कोऽय **मर्द्धजरतीयो'** न्यायः कियत् पर्यायस्य छिद्यते कियन्नेति । यदि छिद्यते तर्हि मूलत एव छिद्यतां यदि वा न किमपीति । यदि वा वक्ति—रत्नाधिकोऽहं बहुकेऽपि परिछिन्ने पर्याये अस्ति मे दीर्घः पर्याय इति न किमपि छेत्स्यति तस्य सर्वस्यापि पर्याये हीनस्य पर्याये श्रद्धानरहितस्य पर्याये गर्वितस्य **मूलम्** । तथा यो बहुप्रायश्चित्तमापन्नोऽथ च धृति—संहननाभ्यां दुर्बलत्वात्तपः कर्तुमसमर्थस्तस्मिन् **दुर्बले मूलम्** । तथा **अपरिणामत्वात्** ब्रूते—यदेतत्तपः षाण्मासिकं युष्माभिर्मे दत्तमेतेन नाहं शुद्ध्यामि प्रायश्चित्तस्य बहुत्वात् **तस्मिन्नपरिणामे मूलम्** । तथा यो धृतिदुर्बलतया पुनःपुनः प्रतिसेवते **तस्मिन्नस्थिरे** धृत्यवष्टम्भरहिते **मूलम्**। तथा अबहुश्रुतोऽगीतार्थः । अथवाऽनवस्थाप्यं पाराञ्चिकं वा आपन्नस्तस्य वाऽबहुश्रुततया तद्दानायोग्यता तस्मिन्नप्यबहुश्रुते मूलं दातव्यमिति । अभिहितं मूलार्हं प्रायश्चित्तम् ।।२८२।। अधुनाऽनवस्थाप्यार्हं तदाह—

**उक्कोसं बहुसो वा पउट्ठचित्तो वि तेणिअं कुणइ ।**
**पहरइ जो अ सपक्खे निरवेक्खो घोरपरिणामो ।।२८३।।**

व्याख्या—**उत्कृष्टं** उत्कृष्टवस्तुविषयं **बहुशो वा** पौनःपुन्येन **प्रदुष्टचित्तो वा** सङ्क्लिष्टमनाः क्रोधलोभादि—कलुषितमानसो यः **स्तैन्यं** साधर्मिकस्तैन्यं अन्यधार्मिकस्तैन्यं **करोति** । तत्र साधर्मिकाः साधवस्तेषां सत्कस्य द्रव्यतः **सचित्तस्य** शिष्यादेः । **अचित्तस्योत्कृष्टोपध्यादेः** । मिश्रस्योपधिसहितस्य शिष्यादे**श्चौर्यं कुर्वन्** । क्षेत्रतोऽन्यसंयतावगृहीतक्षेत्रे तदनुज्ञां विनाऽवतिष्ठमानः । कालतो दिवा वा रात्रौ वा । भावतो रागेण वा द्वेषेण वा । अन्यधार्मिकाः शाक्यादयो गृहस्था वा तेषां सत्कस्याहारोपधिशय्यादेः स्तैन्यं कुर्वाणेऽनवस्थाप्यः क्रियत इत्युत्तरगाथाऽवयवेन योगः । उत्तरार्द्धेन च अत्र हत्थायालो गृहीतः । स च त्रिधा । अत्थायाणं दलमाणे हत्थालंबं दलमाणे हत्थायालं दलमाणे अ । क्रमेणैषां व्याख्या — अर्थादानं द्रव्योपादानकारणमष्टाङ्गनिमित्तं **तद्ददानः** प्रयुञ्जान इत्यर्थः । तत्र कथानकम्—

वणिजावुज्जयिन्यां[A] द्वौ प्रायः पृष्ट्वा गुरून् सदा । पणायमानौ पण्यौघैः परमामृद्धिमीयतुः ।१।
औज्झद् गुरूणां जामेयो भोगार्थी व्रतमन्यदा । ततस्तैः कृपयोचे स विनार्थैः किं करिष्यसि ? ।२।
तथाहि वणिजौ तौ त्वं भणाऽर्थं मे प्रयच्छतम् । गुर्वादेशात्ततः सोऽपि गत्वा तौ भणति स्म तत् ।३।
अथैकः स्माह भोः ! कस्मादस्माकं द्रव्यसञ्चयः । शकुनी रूपकान् भद्र ! कुत्रापि हदतेऽत्र किम् ? ।४।
अढौकयद् द्वितीयस्तु तस्याग्रे द्रविणं बहु । ऊचे चेदं गृहाण त्वं यथेच्छं सोऽपि चाग्रहीत् ।५।
द्वितीयेऽब्दे स तैर्द्रव्य-प्रदः पृच्छन्न भण्यते । क्रीणीहि तृणकाष्ठादि स्थापयेश्च पुराद् बहिः ।६।
द्वितीयकस्तु तैरुक्तः क्रीत्वा स्नेहं गुडं कणान् । वस्त्रकर्पासकाष्ठादीन् पुरमध्ये निधेहि भोः ।७।
वर्षारम्भे समस्तेषु च्छादितेष्वथ वेश्मसु । दग्धं सर्वं पुरं जज्ञे तृणकाष्ठमहर्घता ।८।
प्राज्यं तदार्जयद् वित्तं गुरुजामेयवित्तदः । दग्धं सर्वं द्वितीयस्य सोऽथाभ्येत्यावदद् गुरुम् ।९।
किं न ज्ञातमिदं पूज्या गाढं मुष्टोऽहमैषमः[B] । निमित्त्यूचे निमित्तं नः शकुनो हदतेऽत्र किम्? ।१०।
तथा-अन्यथापि वा किञ्चित् स्यात् कदाचित्कथञ्चन । ततो रुष्टं गुरुं ज्ञात्वात्यर्थं क्षमयति स्म सः ।११।

---

**A.** उज्जेणीए एगो ओसन्नायरिओ नेमित्तितो । तस्स य दुन्नि मित्ता वाणियगा, ते तं आपुच्छिउं आपुच्छिउं ववहरंति-किं भंडं गिण्हामो मुयामो वा ? एवं ते इस्सरीभूया । तस्स य आयरियस्स भागिणेज्जो भोगाभिलासी आगम्म तं आयरियं केवइए मग्गति ताहे आयरियेणं खुड्डुएण समं तेसिं दोण्हं पि मित्ताणं सगासं पेसवितो-रूवगसहस्सं देहिं । तेण गंतुं आयरियवयणेणं मग्गितो-देहि । भणइ-किं मम सउणी रूवगा हगंति ? नत्थि मम एत्तिया, वीसमेत्ते देमिं । तेण नेच्छियं, आयरियस्स य निवेदियं । ताहे आयरिएण बितियमित्तस्स सगासं पेसवितो, मग्गितो य आयरियवयणेणं । तेण चंगोडए काउं बहू णवलया दंसिया— एत्तो जावतिएहिं भे रूवएहिं इच्छा तावतिए गिण्हह । तेहिं आगंतुं आयरियस्स उवणीतो नउलगो; ताहे भाइणिज्जस्स दिन्नो । बितियवरिसे ते वणियगा दो वि आयरियं पुच्छंति— एसमंवरिसे केरिसं भंडं गेण्हामो ? आयरिएहिं सउणिवाइत्तो भणितो-जत्तितो ते घरसारो तेण कप्पास-घय-गुले घेत्तुं अंतोघरे संगोवेह । बितिओ अप्पसारियं भणितो-तुमं सुबहुं तण-कट्ठ-वंसे धण्णं च घेत्तुं बाहिं नगरस्स निरग्गेयट्ठाणे संगोवाहि । तदा य अणवुट्ठी जाया, अह अग्गी उट्ठितो, सव्वं नगरं दड्ढं । सउणीइत्तस्स सव्वं कप्पासाति दड्ढं, बितियस्स न दड्ढं, ताहे तेण तं तण-कट्ठं धण्णं च सुमहग्घं विक्किणियं, अणेगाणं सयसहस्साणं आभागी जातो । तओ सउणियाइत्तो आयरियं भणति-किह भे निमित्तं विसंवतियं ? आयरिएणं भणियं-किं मम निमित्तं सउणीया हगइ ? तओ पायपडिएणं खामिओ । (बृ०क० ५११४ टीका)

**B.** अस्मिन् वर्षे ।

एवंविधार्थोपादानकारी आचार्यः स्वस्य महाव्रतान्यारोपयितुमभ्यर्थयमानोऽपि तद्दोषकरणनिवृत्तोऽपि तत्र क्षेत्रे महाव्रतेषु न स्थाप्यते । तथा हस्तालम्ब इव हस्तालम्बस्तं ददानः । अशिवे पुररोधादौ तत्प्रशमनार्थमभिचारमन्त्रादीन् प्रयुञ्जान इत्यर्थः । तथा हस्तेनाताडनं हस्तातालस्तं ददानः । यष्टिमुष्टिलगुटादिभिरात्मनः परस्य च मरणभयनिरपेक्ष **सपक्षे**, चशब्दात् **परपक्षे च घोरपरिणामो** निर्दयो **यः प्रहरति** । एते त्रयोऽप्यनवस्थाप्याः क्रियन्ते । यदि वा आचार्यादीन् कोऽपि हिनस्ति ततस्तन्मारणेनापि तान् रक्षेत् । यदाह—

**आयरिअस्स विणासे गच्छे अहवा वि कुलगणे संघे । पंचिंदिअवोरमणं पि काउं नित्थारणं कुज्जा ।।**
**एवं तु करिंतेणं अब्बुच्छित्ती कया उ तित्थंमि । जइ वि सरीरावाओ तहविह आराहओ सो उ' ।।**

यस्तु समर्थोऽप्यागाढे प्रयोजने न प्रगल्भते स विराधकः ।।२८३।। तथा—

**अभिसेओ सव्वेसु वि बहुसो पारंचिआवराहेसु ।**
**अणवट्ठप्पावत्तिसु पसज्जमाणो अणेगासु ।।२८४।।**

व्याख्या—**इहाभिषेक** उपाध्यायः । स येषु येष्वपराधेषु पाराञ्चिकमापद्यते तेषु **बहुशः पाराञ्चिकापराधेषु** कृतेषु **सर्वेष्वपि** शुद्धिनिमित्तमनवस्थाप्यः क्रियते । यथा भिक्षोरनवस्थाप्यपाराञ्चिके अपि प्राप्तस्य मूलमेव परमं प्रायश्चित्तं भवति । एवमुपाध्यायस्याप्यनवस्थाप्यमेव परमम् । तथा **अनवस्थाप्यापत्तिषु अनेकासु** अनवस्थाप्यापत्तिहेतवो येऽनेकाऽतिचारास्तेषु **प्रसजन्** प्रसक्तो भवन्नुपाध्यायोऽनवस्थाप्यः क्रियते ।।२८४।।

स चानवस्थाप्यः क्रियमाणः कस्मिन् कस्मिन् विषये क्रियत ? इत्याह—

**कीरइ अणवट्ठप्पो सो लिंगखित्तकालओ तवओ ।**
**लिंगेण दव्वभावे भणिओ पव्वावणाणरिहो' ।।२८५।।**

व्याख्या—**क्रियते** तथाविधापराधकारित्वान्महाव्रतेषु लिङ्गे वा नावस्थाप्यत **इत्यनवस्थाप्यः । स** चतुर्धा— **लिङ्गतः क्षेत्रतः कालतस्तपोविशेषतश्चेति । लिङ्गं द्विधा—द्रव्ये भावे च** । तत्र **द्रव्यलिङ्गं** रजोहरणादि, **भावलिङ्गं** महाव्रतादि । अत्र चतुर्भङ्गी—द्रव्यलिङ्गेन भावलिङ्गेन चानवस्थाप्य इत्येको भङ्गः । द्रव्यलिङ्गेना—नवस्थाप्यो न भावलिङ्गेनेति द्वितीयः । भावलिङ्गेनानवस्थाप्यो न द्रव्यलिङ्गेनेति तृतीयः । उभाभ्यामपि नानवस्थाप्य इति चतुर्थः । इह **द्रव्यलिङ्गेन भावलिङ्गेन** चानवस्थाप्यः **प्रथमभङ्गस्थः प्रव्राजनानर्हो भणितः** ।।२८५।।

लिङ्गानवस्थाप्यादि चातुर्विध्यमेव विवृण्वन्नाह —

**अप्पडिविरओसन्नो न भावलिंगारिहोणवट्ठप्पो ।**
**जो जत्थ जेण दूसइ पडिसिद्धो तत्थ सो खित्ते' ।।२८६।।**

व्याख्या—**अप्रतिविरतः** साधर्मिकान्यधार्मिकस्तैन्यात् प्रदुष्टचित्तत्वेनानिवृत्तः सपक्षपरपक्षप्रहरणोद्यतश्च निरपेक्षोऽनुपशान्तवैरो यः स द्रव्यभावलिङ्गाभ्यामनवस्थाप्यो—ऽनवस्थाप्यप्रथमभङ्गवर्त्ती क्रियते । हस्तालम्बदायी

अर्थादानकारी वाऽवसन्नादिकश्च तत्तद्दोषानिवृत्तौ **न भावलिङ्गार्हः** । अयं भावः—स द्रव्यलिङ्गी भवति, न भावलिङ्गमर्हति । **भावलिङ्गमपेक्ष्यानवस्थाप्य** तृतीयभङ्गवर्त्ती भवतीत्यर्थः। द्वितीय—चतुर्थभङ्गौ पुनर्न सम्भवत इति । क्षेत्रतोऽनवस्थाप्यो **यो यत्र** क्षेत्रे **येन** कर्मणा **दूष्यते** स तद्दोषकरणनिवृत्तोऽपि **तत्र क्षेत्रे प्रतिषिद्धो** महाव्रतेषु स्थापने निराकृतः । यथार्थादानकारी तत्रैव क्षेत्रे महाव्रतेषु न स्थाप्यते । यतः पूर्वाभ्यासात्तं लोको निमित्तं पृच्छेत् । स च तं निमित्तज्ञानजमृद्धिगौरवं सोढुमक्षमः कदाचित् कथयेत्, ततोऽन्यत्र नीत्वोपस्थाप्यः । उत्तमार्थप्रतिपन्नस्य पुनस्तत्रापि—स्वस्थानेऽपि स्थितस्य महाव्रतारोपः कार्य एव ।।२८६।।

उक्तौ लिङ्गक्षेत्रानवस्थाप्यौ । कालतपोऽनवस्थाप्यावाह —

**जत्तियमित्तं कालं तवसा उ जहन्नएण छम्मासा ।**
**संवच्छरमुक्कोसं आसायइ जो जिणाईणं' ।।२८७।।**

व्याख्या—यो **यावन्तं कालं** दोषान्नोपरमते तावन्तं कालमनवस्थाप्यः क्रियते । **तपसा** त्वनवस्थाप्यो द्विधा—आशातनाऽनवस्थाप्यः प्रतिसेवनाऽनवस्थाप्यश्च । तत्र **जिनादीनां** तीर्थकर—सङ्घ—श्रुता—ऽऽचार्य—महर्द्धिकगणधराणामाशातनं **यः कुर्यात्**, यथा तीर्थकरैः सर्वोपायकुशलैरपि गृहवासत्यागादिकाऽतिकर्कशा देशना कृता यदि च गृहवासो न श्रेयान् ततः किमिति स्वयं गृहवासे वसन्ति स्म भोगाँश्च भुक्तवन्तः ? इत्येवं तीर्थकृतोऽधिक्षिपेत् सङ्घं च दृष्ट्वाऽवज्ञया वदेत्—हुं हुं दृष्टा मयाऽरण्येऽपि सङ्घाः श्रृगाल—श्वान—वृक—चित्रकादीनामिति । श्रुतं चैवमधिक्षिपति यथा —

**काया वया य तेच्चिय पुणोवि ते च्चिय पमाय—अपमाया । मोक्खस्स देसणाए जोइसजोणीहि किं कज्जं' ?।।**
(नि०भा०३३०८, बृ०क० ४९७९)

आचार्यं च जात्यादिभिरधिक्षिपति । महर्द्धिकाश्च गणभृतो गौतमादयः, यो वा यस्मिन् युगे प्रधानभूतस्तान् ऋद्धि—रस—सातगौरवप्रसक्ताः कथका इव लोकाऽऽवर्जनोद्यता इत्यादिवाक्यैरधिक्षिपति (स)आशातनातपो—ऽनवस्थाप्यः । स **जघन्येन षण्मासानुत्कर्षतः संवत्सरं** यावत्तपः कुर्वन् कर्त्तव्यः । तावता च तपसा क्षपिताशातनाजनितकर्मत्वात्तदूर्ध्वं महाव्रतेषु स्थाप्यते । प्रतिसेवनानवस्थाप्यश्चोत्तरगाथायां वक्ष्यते ।।२८७।।

सा चेयम्—

**वासं बारस वासा पडिसेवी कारणा उ सव्वोवि ।**
**थोवं थोवयरं वा वहिज्ज मुंचिज्ज वा सव्वं' ।।२८८।।**

व्याख्या—**प्रतिसेवी** प्रतिसेवनानवस्थाप्यः साधर्मिकाऽन्यधार्मिकस्तैन्याभ्यां हस्तातालादिभिश्च भवति । स च **जघन्यतो वर्षमुत्कृष्टतो द्वादश वर्षाणि** । तदनन्तरं व्रतेषु स्थाप्यते । स चानवस्थाप्यः संहननादिगुणयुक्त एव क्रियते, अन्यस्य तु मूलमेव दीयते। तथा चोक्तम् —

**'संघयण–विरिय–आगम–सुत्तत्थविहीइ जो समग्गो अ । तवसी निग्गहजुत्तो पवयणसारे अ गहिअत्थे''** ।।
**'तिलतुसतिभागमित्तो वि जस्स असुहो न विज्जई भावो । निज्जूहणारिहो सो सेसे निज्जूहणा नत्थि''** ।।
(बृ०क० ५०२९-५०३०, गु०वि० २/३१३ - ३१४)
**'एअगुणसंपउत्तो पावइ अणवट्ठमुत्तमगुणोहो । एअगुणविप्पहीणे तारिसगंमी भवे मूलं''** ।।
(बृ०क० ५०३१)

**तवसी** तपश्चरणवान् **निग्गहजुत्तो** जितेन्द्रियः **निज्जूहणारिहो** गच्छात्पृथक्करणार्हः । अपवादतस्त्वनन्यसाध्य–कुलगणसङ्घकार्यकारी । बहुजनसाध्यं च कार्यं शृङ्गनादितमुच्यते, तत्साधकश्चायमित्यतः कारणात् **सर्वोऽपि** द्विप्रकारोऽपि आशातनाप्रतिसेवनानवस्थाप्यतपो **न कारयेदित्यर्थः** ।।२८८।।

यस्त्वनवस्थाप्यतपः प्रतिपद्यते, तद्विधिमाह—

**वंदइ न य वंदिज्जइ परिहारतवं सुदुच्चरं चरइ ।**
**संवासो से कप्पइ नालवणाईणि सेसाणि' ।।२८९।।**

व्याख्या—अनवस्थाप्यतपश्चरणकरणकालं यावत्स्वगणं गीतार्थे निक्षिप्याचार्य उपाध्यायो वा प्रशस्तेषु द्रव्यक्षेत्रकालभावेषु । तत्र द्रव्यतो वटादौ क्षीरवृक्षे । क्षेत्रत इक्षुशालिक्षेत्रकुसुमितवनखण्डप्रदक्षिणावर्त्तजलपद्म–सरश्चैत्यगृहादिषु । कालतः पूर्वाह्णे । भावतः प्रशस्तेषु चन्द्रताराबलेसु सन्ध्यागतादिनक्षत्रवर्ज्जमालोचनां प्रयुङ्क्ते—स्वातिचारं प्रकाशयति । सन्ध्यागतादीनि चैतानि—

**'संझागयं रविगयं विड्डेरं सग्गहं विलंबि च । राहुहयं[A] गहभिन्नं च वज्जए सत्त नक्खत्ते'** ।।
(व्य०सू० ३०९, नि०भा० ६३८४)

तत्र लोकश्रीटीकाकारव्याख्या—सूर्ययुक्तादनन्तरं नक्षत्रं **सन्ध्यागतम्** । रविर्यत्र चारवशाद्वर्त्तते तद् **रविगतम्** । यस्मिन्नक्षत्रे ग्रहो वक्रमुपयाति युद्धं वा विधत्ते **तद्विड्डेरम्**। भौमादिक्रूरग्रहैरेवोपयुक्तं नक्षत्रं **सग्रहम्** । सूर्यास्तकाले यन्नक्षत्रमुदेति **तद्विलम्बितम्** । राहुणा मुखेनाक्रान्तं पुच्छेन वा तद् **राहुहतम्** । अन्ये त्वाहुर्यस्मिन्नक्षत्रे ग्रहणमासीत्तद्यावद् रविणा न युक्तं तावद् राहुहतमिति । यन्मध्यं ग्रहो विभिद्य निर्गच्छति **तद्ग्रहभिन्नम्** । केचित्त्वेवं ब्रुवते—

**'जंमि रविनक्खत्ते ततो संझागयं तु चउदसमं । विड्डेरं बीइज्जं होइ चउत्थं विलंबि च'** ।।
आलोचनानन्तरं च जघन्येन मासमुत्कर्षतः षण्मासादिकमनवस्थाप्यतपः प्रपद्यमाने आलोचनादायकः कायोत्सर्गं करोति । एअस्सायरिअस्स अणवट्ठप्पतवस्स निरुवसग्गनिमित्तं ठामि काउस्सग्गं अन्नत्थू–ससिएण'मित्यादि वोसिरामीति यावत् । चतुर्विंशतिस्तवमनुचिन्त्य पारयित्वा चतुर्विंशतिस्तवमुच्चार्याऽऽचार्यो वक्ति—

**'एस तवं पडिवज्जइ न किंचि आलवइ मा य आलवह । अत्तट्ठचिंतगस्स उ वाघाओ भे न कायव्वो'** ।।
(व्य०सू० ५४९, नि०भा० ६५९५)

---

**A.** राहुगतं इत्यपि पाठः ।

एष युष्मान्नालापयिष्यति युष्माभिरपि नालाप्यः । एष सूत्रार्थौ शरीरवार्तां वा न प्रक्ष्यति युष्माभिरपि न पृच्छ्यः । खेलमल्लकमात्रकादिकं वा नास्य ग्राह्यमर्पणीयं वा । उपकरणं परस्परं न प्रतिलेख्यम् । भक्तपानं परस्परं न ग्राह्यम् । सङ्घाटकेऽस्य न मिलनीयम् । अनेन सहैकमण्डल्यां न भोक्तव्यम् । किमप्यनेन सार्द्धं न कार्यं कार्यमिति । अधुना गाथाक्षरार्थः—**प्रतिपन्नानवस्थाप्यतपाः** शैक्षादीनपि **वन्दते, न** चासौ **वन्द्यते** । **परिहारतपश्च** पारिहारिकसाधूनां तपः ग्रीष्मे चतुर्थषष्ठाष्टमानि । शिशिरे षष्ठाष्टमदशमानि । वर्षास्वष्टमदशमद्वादशानि जघन्यमध्यमोत्कृष्टानि । पारणके च निर्लेपभक्तमित्येवंरूपं **सुदुश्चरं तपश्चरति** । **संवासः** सहवासो गच्छेनास्य एकक्षेत्रे एकोपाश्रये एकस्मिन् पार्श्वे शेषसाध्वपरिभोग्यप्रदेशे **कल्पते, नालपनादीनि शेषाणीत्येष** सङ्क्षेपतोऽनवस्थाप्यविधिः ।।२८९।।

उक्तमनवस्थाप्यार्हम् । साम्प्रतं पाराञ्चिकमाह—

**तित्थयरपवयणे सुअं आयरिअं गणहरं महड्डिअं ।**
**आसायंतो बहुसो आभिनिवेसेण पारंची ।।२९०।।**

(गु०वि० ३/१२)

व्याख्या—**तीर्थकरादीन् आशातयन्** हीलयन् आशातनापाराञ्चिको भवति ।।२९०।।

प्रतिसेवनापाराञ्चिकमाह—

**जो उ सलिंगे दुट्ठो कसायविसएहिं रायवहगो अ ।**
**रायग्गमहिसिपडिसेवओ अ बहुसो पगासो अ ।।२९१।।**

व्याख्या—इह प्रतिसेवनापाराञ्चिकस्त्रिधा **दुष्टो मूढोऽन्योन्यं कुर्वाणश्च** । यदाह—

**पडिसेवणपारंची तिविहो सो होइ आणुपुव्वीए । दुट्ठे अपमत्ते आनायव्वे अन्नमन्ने अ'** ।।

**यश्च दुष्टः** स **द्विधा कषायतो विषयतश्च** । **पुनरेकैको** द्विधा । **'सलिङ्ग'**त्ति । **समानलिङ्गे** सपक्षे श्रमणश्रमणीरूपे, **चकारात्** परलिङ्गे च परपक्षे गृहस्थेऽन्यतीर्थिके वा । ततश्च सपक्षपरपक्षाभ्यां कषायदुष्टे विषयदुष्टे च चत्वारश्चत्वारो भङ्गा भवन्ति । तत्रैवं कषायदुष्टे भङ्गचतुष्टयं—सपक्षकषायदुष्टः परपक्षकषायदुष्टश्चेत्येको भङ्गः । सपक्षकषायदुष्टो न परपक्षकषायदुष्ट इति द्वितीयः । न सपक्षकषायदुष्टः परपक्षकषायदुष्ट इति तृतीयः । उभाभ्यामपि न दुष्ट इति चतुर्थः शुद्धो भङ्गः । उक्तं च—

**दुविहो अ होइ दुट्ठो कसायदुट्ठो अ विसयदुट्ठो अ । दुविहो कसायदुट्ठो सपक्खपरपक्ख चउभङ्गो'** ।।

(नि०भा ३६८१, बृ०क० ४९८६)

तत्र सपक्षकषायदुष्टे चत्वार्युदाहरणानि—सासवनाले, मुहणंतए अ, सिहरिणि, उलूगच्छी । सासवनालं ति सर्षपभर्जिका ।

**साधुः[A] कोपि गतो भिक्षां लब्ध्वा सर्षपभर्जिकाम् । रुच्यां सुसंस्कृतां गृद्धोऽप्याचार्याणामढौकयत्** ।।१।।

**भुक्ता सर्वापि साचार्यैः साधुश्चाक्रोशयत् स तान् । ततस्तैः क्षमितोप्युच्चैरूचे भङ्क्ष्यामि ते रदान्** ।।२।।

**A. सर्षपभर्जिकायाः विस्तरतः दृष्टान्ताय अस्य ग्रन्थस्य मूलगाथा ३२, पृ.क्र. ३५, उपरि टिप्पणी द्रष्टव्या ।**

गुरुणाऽचिन्ति मामेष मा वधदसमाधिना । स्वगणेऽन्यमथाचार्यं कृत्वा चागाद् गणान्तरे ।।३।।
मृतश्चानशनात्तत्र सोऽथ दुष्टोऽवदन् मुनीन् । गुरवः क्वागमन्नूचुर्न विद्मोऽन्यतोऽथ सः ।।४।।
ज्ञात्वा तत्राऽगमत्तांश्चापृच्छत् साधून् गुरुः क्व मे । तैरूचेऽद्य मृतस्त्यक्तं श्मशानेऽस्ति च तद्वपुः ।।५।।
गत्वा तत्राथ तद्दन्तान् स भनक्ति च वक्ति च । खादिष्यसि पुनः किं मे रुच्यां सर्षपभर्जिकाम् ? ।।६।।
अन्य[1] कोऽपि मुनिर्लब्ध्वा मुखानन्तकमुज्ज्वलम् । गुरोरढौकयत्तच्चाददे तैः सोऽपि रुष्टवान् ।।७।।
तदेवार्पयतोऽप्यस्य नाददे किं पुनर्निशि । तल्लास्यसीति जल्पन् स गुरुं गाढं गलेऽग्रहीत् ।।८।।
संमूढो गुरुरप्येनं ततो द्वावपि तौ मृतौ । साधुना[2] केनचित्क्वापि लब्धा शिखरिणी शुभा ।।९।।
तथा निमन्त्रितस्तेन गुरुस्तां निखिलां पपौ । तं सोऽथाश्मानमुद्दीर्य हिंसन्नन्यैर्न्यवार्यत ।।१०।।
तथाप्यनुपशान्ते च तस्मिन्ननशनं गुरुः । स्वगच्छ एव विदधे नान्यं गच्छं जगाम सः ।।११।।
अस्तंगते[3]ऽपि कोऽप्यर्के सीव्यन् गुरुभिरौच्यत । उलूकाक्षोऽसि भिक्षो ! त्वं स रुष्टो गुरुमूचिवान् ।।१२।।
तदैवं वदतो द्वे अप्यक्षिणी उद्धराम्यहं । अथासौ गुरुणा गाढं क्षमितोऽपि न शान्तवान् ।।१३।।
ततो रजोहृतेर्लोह[A]मयीमाकृष्य कीलिकाम् । रोषाध्मातः स दुष्टात्मा समुद्दध्रेऽक्षिणी गुरोः' ।।१४।।

---

१. अथ मुखानन्तकदृष्टान्तमाह—
एकेन साधुना मुखानन्तकमतीवोज्ज्वलं लब्धम्, तस्य च गुरुभिर्ग्रहणं कृतम् । तत्रापि 'एवमेव' पूर्वाख्यानकसदृशं वक्तव्यम् । नवरं तत् पुनर्मुखानन्तकं प्रत्यर्पयतोऽपि न गृहीतम् । ततो गुरुणा स्वगण एव भक्तं प्रत्याख्यातम् । निशायां च विरहं लब्ध्वा 'मुखानन्तकं गृह्णासि' इति भणता गाढतरं गले ग्रहणं कृतम् । सम्मूढेन च 'इतरेणापि' गुरुणा स गलके गृहीतः । एवं द्वावपि मृतौ ।। (बृ०क० ४९९० टीका)

२. शिखरिणीदृष्टान्तमाह—
एकेन साधुना उत्कृष्टा शिखरिणी लब्धा । सा च गुरूणामालोचिता, तया च गुरवः छन्दिताः—निमन्त्रिताः । सा च तैः सर्वाऽप्यापीता । ततः स साधुः प्रद्वेषमुपगतो मारणार्थं दण्डकमुद्गीर्णवान् । स गुरुभिः क्षामितोऽपि यदा नोपशाम्यति तदा भक्तपरिज्ञा कृता । नवरमिह 'सः' आचार्योऽन्यस्मिन् गणे न गतः । तस्य च समाधिना कालगतस्य शरीरकं तेन पापात्मना दण्डकेन कुट्टितम् ।। (बृ०क० ४९९२ टीका)

३. उलूकाक्षदृष्टान्तमाह—
एकः साधुरस्तङ्गतेऽपि सूर्ये सीव्यन् अपरेण साधुना परिहासेन भणितः—उलूकाक्ष ! किमेवमस्तङ्गतेऽपि सूर्ये सीव्यसि ? स प्राह—एवं भणतस्तव द्वे अप्यक्षिणी उत्खनामि । अत्रापि सर्वोऽपि प्रथमाख्यानकगमो मन्तव्यः । नवरमिह स्वगणे प्रत्याख्यातभक्तस्य कालगतस्य रजोहरणाद् अयोमयीं कीलिकामाकृष्य 'मां उलूकाक्षं भणसि ?' इति ब्रुवाणो द्वे अप्यक्षिणी उद्धृत्य तस्य ढौकयति, 'वैरं मया निर्यामितम्' इति कृत्वा ।। (बृ०क० ४९९१ टीका)

---

**A.** रजोहरणाद् अयोमयीं कीलिकामाकृष्य इत्यर्थः ।

एते चत्वारोऽपि साधवो दुष्टत्वाल्लिङ्गपाराञ्चिकाः । परपक्षकषायदुष्टस्तु **राजवधक** उदायिनृपमारकवत् । विषयदुष्टे चैवं भङ्गचतुष्टयं—स्वलिङ्गी स्वलिङ्गीनीं साध्वीं सेवते १, स्वलिङ्गी गृहिलिङ्गां स्त्रियं २, स्वलिङ्गी अन्यलिङ्गिनीं परिव्राजिकादिकाम् ३, अन्यलिङ्गी चान्यलिङ्गामिति ४, शून्योऽयं भङ्गः । तत्राद्यो विषयदुष्टः—

**'पावाणं पावयरो दिट्ठिब्भासे वि सो न कायव्वो । जो जिणमुद्दं समणिं नमिऊण तमेव धरिसेइ'** ।।

(बृ०क० ५००९)

द्वितीयविषयदुष्टस्तु **बहुशः** पौनःपुन्येन **प्रकाशो** लोकविदितः **राजाग्रमहिषीप्रतिसेवकः** । अग्रमहिषीग्रहणादन्यापि या काचिदिष्टा राज्ञस्तत्सेवकश्च, चशब्दाद्युवराजसेनापत्याद्यग्रमहिषीसेवकश्च । द्वावप्येतौ लिङ्गपाराञ्चिकौ । तृतीयविषयदुष्टस्यातिशयी लिङ्गं दद्यान्नान्यः । अनतिशयी तु तस्यापि लिङ्गपाराञ्चिकमेव दत्त इत्यर्थः । अत्राह शिष्यः—सामान्यस्त्रीसेवकः साधुः किं न पाराञ्चिकः ? उच्यते बह्वपाया राजाद्यग्रमहिष्यः । तत्सेवने कुलगणसङ्घाचार्याणां **प्रस्तारः** संहाररूपो निर्विषयता वा स्यात् । इतरस्त्रीषु पुनर्व्रतभङ्ग एव दोषः । दोषवतः एव चैकस्यापाय इति तस्य मूलम् ।।२९१।। व्याख्यातो दुष्टपाराञ्चिको, मूढपाराञ्चिकमाह—

**थीणद्धिमहादोसो अन्नुन्नासेवणापसत्तो अ ।**
**चरमठाणावत्तिसु बहुसो अ पसज्जए जो अ ।।२९२।।**

व्याख्या—**स्त्यानर्द्धिः** दर्शनावरणीयकर्मभेदरूपस्य निद्रापञ्चकस्य पञ्चमो भेदः । यदुदयेऽतिसङ्क्लिष्टपरिणामा—द्दिनदृष्टमर्थमुत्थाय प्रसाधयति केशवार्द्धबलश्च जायते । तदनुदयेऽपि च स शेषपुरुषेभ्यस्त्रिचतुर्गुणबलो भवति । इयं च प्रथमसंहननिन एव भवति । अयमेव च **महान् दोषो** यस्य स **स्त्यानर्द्धि महादोषः** । अयं च मूढः प्रमत्तश्च कथ्यते । एते च पुद्गल[१]—मोदक[२]—हस्तिदन्त[३]—कुम्भकार[४]—वटशाखा[५]साधवः पञ्च स्त्यानर्द्ध्यामुदाहरणानि । तद्यथा—

[१] **एकः कौटुम्बिको ग्रामे मांसमेवात्त्यनेकधा । श्रुत्वा धर्मं स केषाञ्चित् समीपे व्रतमग्रहीत् ।।१।।**

---

१. एगम्मि गामे एगो कोडुंबी पक्काणि य तलियाणि य तिम्मणेसु अ अणेगसो मंसप्पगारे भक्खेइ । सो अ तहारूवाणं थेराणं अंतिए धम्मं सोउं पव्वइओ गामाइसु विहरइ । तेण य एगत्थ गामे महिसो विगिच्चमाणो दिट्ठो । तस्स मंसे अभिलासो जातो । सो तेण अभिलासेण अव्वोच्छिन्नेणेव भिक्खं हिंडित्ता अव्वोच्छिन्नेणेव भुत्तो, एवं अव्वोच्छिन्नेण वियारभूमिं गतो । चरिमा सुत्तपोरिसी कया, आवस्सयं काउं पातोसिया पोरिसी विहिता । तदभिलासी चेव सुत्तो, सुत्तस्सेव थीणद्धी जाया । सो उट्ठिओ, अणाभोगणिव्वत्तिएणं करणेणं गतो महिसमंडलं, अन्नं महिसं हंतु भक्खित्ता सेसं आगंतु उवस्सयस्स उवरिं ठवितं । पच्चूसे गुरूणं आलोएइ—एरिसो सुविणो दिट्ठो । साहूहिं दिसावलोकं करेंतेहिं दिट्ठं कुणिमं, जाणियं जहा—एस थीणद्धी । ताहे लिंगपारंचियं पच्छित्तं से दिन्नं ।।

अथ गाथाक्षरार्थः—पिशिताशी कश्चित् 'पूर्वं' गृहवासे आसीत् । स च महिषं विकर्त्तितं दृष्ट्वा सञ्जाततद्भक्षणा—भिलाषः 'तत्र' महिषमण्डले 'निशि' रात्रौ गत्वा अन्यं महिषं हत्वा खादति । 'शेषम्' उद्धरितमुपाश्रये नयति ।।

विचरंश्च क्वचिद् ग्रामे महिषं पिशितार्थिभिः । विभिद्यमानमद्राक्षीत् ततोऽभूत्तत्र सस्पृहः ।।२।।
सोऽव्युच्छिन्नतदाकाङ्क्षो भुक्तो यातो बहिर्भुवम् । सूत्रस्य पौरुषीं चान्त्यां चक्रे सुप्तस्तथा निशि ।।३।।
जातस्त्यानर्द्धिरेषोऽथ गत्वा महिषमण्डलम् । हत्वैकं भुक्तवान् शेषमेत्य सद्मोपरि न्यधात् ।।४।।
इदृग् दृष्टः प्रगे स्वप्न इत्यालोचितवान् गुरोः । दिशो विलोकने तच्च मुनिभिर्मांसमीक्षितम् ।।५।।
[२]सोऽथ स्त्यानर्द्धिमान् ज्ञात्वा लिङ्गपाराञ्चिकः कृतः । साधुर्भिक्षां भ्रमन् कोऽपि मोदकान् वीक्ष्य कुत्रचित् ।।६।।
चिरमैक्षिष्ट गृद्धस्तानलब्ध्वाऽशेत तन्मनाः । जातस्त्यानर्द्धिरुत्थाय गत्वा तद्भवनं निशि ।।७।।
भित्त्वा कपाटमत्ति स्म मोदकानुद्धृतानथ । पात्रे भृत्वाश्रये प्राप्तः प्रातः स्वप्नं न्यवेदयत् ।।८।।
दृष्टाः पादोनपौरुष्यां ते पात्रप्रतिलेखने । लिङ्गपाराञ्चिकः सोऽपि ततो गुरुभिरादधे ।।९।।
[३]एकः साधुर्गतो भिक्षां त्रासितः करिणा ततः । पलायितः कथमपि तस्मिन् रुष्टश्च सुप्तवान् ।।१०।।
जातस्त्यानर्द्धिरुत्थाय गत्वा व्यापाद्य तं गजम् । आनीय दन्तमुसले विन्यस्योपाश्रयोपरि ।।११।।
पुनः सुप्तः प्रगे स्वप्नं व्याचक्रेऽथ तपोधनैः । दृष्ट्वा दन्तान् स विज्ञातो लिङ्गपाराञ्चिकः कृतः ।।१२।।
[४]गच्छे महति कस्मिंश्चित् प्राव्राजीत् कुम्भकारकः । सुप्तः स्त्यानर्द्धिभाग् रात्रौ मृत्तिकाभ्यासतः स तु ।।१३।।

२. **लड्डुकदृष्टान्तमाह—**

एकः साधुर्भिक्षां हिण्डमानो मोदकभक्तं पश्यति । तच्च सुचिरमवलोकितमवभाषितं च, परं न लब्धम् । ततस्तदलब्ध्वा तदध्यवसायपरिणत एव प्रसुप्तः, रात्रौ तत्र गत्वा गृहस्य कपाटौ भङ्क्त्वा मोदकान् भक्षयति, शेषैमोदकैर्भाजनं भृत्वा समागतः । प्राभातिके आवश्यके विकटयति—ईदृशः स्वप्नो मया दृष्ट इति । ततः प्रभाते मोदकभृतं भाजनं दृष्ट्वा ज्ञातम्, यथा—स्त्यानर्द्धिरिति । तस्यापि लिङ्गपाराञ्चिकं दत्तम् । शेषं पुद्गलाख्यानकवद् वक्तव्यम् ।।

३. **दन्तदृष्टान्तमाह—**

अपरः कोऽपि साधुर्गृहस्थभावे मत्तहस्तिना शुण्डामुत्क्षिप्य धावता धाटितः, पलायमानो महता कष्टेन छुट्टितः । एष चूर्ण्यभिप्रायः । **निशीथचूर्णिकृता** तु— 'एगो साहू गोयरनिग्गतो हत्थिणा पक्खित्तो' इति लिखितम् । एवमुभयथाऽपि तं हस्तिकृतं पराभवं स्मृत्वा स साधुः तस्योपरि प्रद्वेषमापन्नः प्रसुप्तः । उदीर्णस्त्यानर्द्धिश्चोत्थाय पुरकपाटौ भङ्क्त्वा हस्तिशालां गत्वा तस्य हस्तिनो व्यापादनं कृत्वा दन्तानुत्खन्य वसतेर्बहिः स्थापयित्वा भूयोऽपि प्रसुप्तः । प्रभाते च **विकटना** स्वप्नमालोचयति । साधुभिश्च दिगवलोकनं कुर्वाणैर्गजदन्तौ वीक्षितौ । ततः **स्त्यानर्द्धिमान् असौ'** इति ज्ञात्वा लिङ्गपाराञ्चिकः कृतः ।।

४. **फरुसकदृष्टान्तमाह—**

**अपरः'** कश्चित् **फरुसकः'** कुम्भकारः क्वापि गच्छे मुण्डो जातः, प्रव्रजित इत्यर्थः । तस्य रात्रौ प्रसुप्तस्य स्त्यानर्द्धिरुदीर्णा । स च पूर्वं मृत्तिकाच्छेदाभ्यासी ततो मृत्तिकापिण्डानिव समीपप्रसुप्तानां साधूनां शिरांसि छेत्तुमारब्धः । तानि च शिरांसि कडेवराणि चैकान्ते अपोज्झति । शेषाः साधवोऽपसृताः । स च भूयोऽपि प्रसुप्तः । ततः प्रभाते **ईदृशः स्वप्नो मया दृष्टः'** इति विकटना कृता । प्रभाते च साधूनां शिरांसि कडेवराणि च पृथग्भूतानि दृष्ट्वा ज्ञातम्, यथा—स्त्यानर्द्धिरिति । लिङ्गपाराञ्चिकं दत्तम् ।।

**समीपस्थितसाधूनां छेदं छेदं शिरांस्यधीः[A]। एकान्ते न्यक्षिपत्तानि शिर्षाणि च वपूंषि च ।।१४।।**
**शेषा अपसृता भूयः सुप्तः स्वप्नं प्रगेऽवदत्। मृतान् वीक्ष्याथ साधून् स लिङ्गपाराञ्चिकः कृतः ।।१५।।**
**[5]वटस्याधोऽध्वना कश्चिद् भिक्षाचर्यां गतो मुनिः । भृतपात्रो वलन् वेगात् क्षुत्तृड्ग्रीष्मार्कतापितः ।।१६।।**
**तच्छाखायामास्फलितो रुष्टस्तस्यामसौ निशि । स्त्यानद्धर्युदयतो गत्वा भङ्क्त्वा शाखां समागतः ।।१७।।**
**विन्यस्योपाश्रयद्वारे सुप्तः स्वप्नं न्यवेदयत्। प्रातः स्त्यानर्द्धिमान् ज्ञात्वा लिङ्गपाराञ्चिकः कृतः ।।१८।।**
**केप्याहुः प्राग् वनेभोऽभूत् सोऽथ स्त्यानर्द्धिमान्नरः । सञ्जातप्राग्भवाभ्यासाद्वटशाखां ततोऽभनक् ।।१९।।**

उक्तो मूढपाराञ्चिकः । **अन्योन्यकुर्वाणः** पाराञ्चिकस्तु **अन्नोन्नासेवणापसत्तो अ' अन्योन्यं'** पुरुषः पुरुषान्तरेण सह परस्परं मुखपायुप्रयोगतो मैथुनासेवायां प्रसक्तः । तथा **चरमस्थानं** पाराञ्चिकं तदापत्तिहेतवोऽतिचारास्तेषु **बहुशः** पौनःपुन्येन यश्च **प्रसजति** प्रसक्तो भवति स पाराञ्चिकः क्रियत इत्यर्थः ।।२९२।। एतदेवाह—

**सो कीरइ पारंचिअ लिंगाओ खित्तकालओ तवओ ।**
**संपागडपडिसेवी लिंगाओ थीणगिद्धि अ ।।२९३।।**

व्याख्या—**पाराञ्चिकश्चतुर्धा—लिङ्गतः क्षेत्रतः कालतस्तपोविशेषतश्च** । तत्र लिङ्गपाराञ्चिके द्रव्यभावलिङ्गाभ्यां चतुर्भङ्गी । द्रव्यलिङ्गेन पाराञ्चिको भावलिङ्गेन च १, द्रव्यलिङ्गेन पाराञ्चिको, न भावलिङ्गेन २, भावलिङ्गेन पाराञ्चिको, न द्रव्यलिङ्गेन ३, उभाभ्यामपि न पाराञ्चिक इति चतुर्थः शुद्धः । तत्र **सम्प्रकटप्रतिसेवी** राजाग्रमहिष्यादिसेवकः **स्त्यानर्द्धिमांश्च** चशब्दादन्योन्यासेवनाप्रसक्तो राजवधकश्च । **लिङ्गतः** पाराञ्चिको—द्रव्यभावलिङ्गाभ्यां पाराञ्चिकः क्रियत इत्यर्थः ।।२९३।। क्षेत्रपाराञ्चिकं गाथाद्वयेनाह—

**वसहि—निवेसण—पाडग—साहि—निओगपुर—देस—रज्जाओ ।**
**खित्ताओ पारंची कुलगणसंघालयाओ वा ।।२९४।।**

---

५. **वटशालाभञ्जनदृष्टान्तमाह—**

एकः साधुः **उद्भ्रामकः'** भिक्षाचर्यां गतः । तत्र ग्रामद्वयस्यापान्तराले वटवृक्षो महान् विद्यते । स च साधुर्गाढतरमुष्णाभिहतो भरितभाजनस्तृषित—बुभुक्षित ईर्योपयुक्तो वेगेनाऽऽगच्छन् **वडसालेण'** त्ति लिङ्गव्यत्ययाद् वटपादपस्य शालया शिरसि घट्टितः सुष्ठुतरं परितापितः । ततो वटस्योपरि प्रद्वेषमुपगतः तदध्यवसायपरिणतश्च प्रसुप्तः । उदीर्णस्त्यानार्द्धिश्चोत्थाय तत्र गत्वा वटपादपं भङ्क्त्वा उन्मूल्य तदीयां शालामानीयोपाश्रयोपरि स्थापितवान् । **उत्सर्गे च'** आवश्यककायोत्सर्गत्रिके कृते **गोसे च'** प्रभाते तथैव गुरूणामालोचयति । ततो दिगवलोके कृते तथैव ज्ञातम्, लिङ्गपाराञ्चिकः कृतश्च । केचिदाचार्या ब्रुवते—स पूर्वभवे वनहस्ती बभूव, ततो मनुजभवमागतस्य प्रव्रजितस्योदीर्णस्त्यानर्द्धेः पूर्वभवाभ्यासाद् वटशालाभञ्जनमभवत् । शेषं प्राग्वत् ।।

---

**A.** मूर्खः ।

**जत्थुप्पन्नो दोसो उप्पज्जिस्सइ व जत्थ नाऊणं ।**
**तत्तो तत्तो कीरइ खित्ताओ खित्तपारंची ।।२९५।।**

व्याख्या—**वसतिः** प्रस्तावाद् ग्रामः । **निवेशनम्** एकनिर्गमप्रवेशद्वारो ग्रामयोरन्तराले द्व्यादिगृहाणां सन्निवेशः । एवंविधस्वरूप एव ग्रामान्तर्गतः **पाटकः** । **साही** शाखा शाखारूपेण श्रेणिक्रमेण स्थिता ग्रामगृहाणामेकतः परिपाटिः । **नियोगपुर, निश्चिता योगा** दिनकृत्यव्यापारा यस्य स **नियोगो** राजा तस्य **पुरं** राजधानी । **देशो** जनपदः । **राज्यं** राष्ट्रम् । यावत्सु देशेष्वेकभूपतेराज्ञा तावद्देशप्रमाणम् । एषां द्वन्द्वस्तस्मात् **क्षेत्रात् पाराञ्चिकः** । **कुलगणसङ्घालयाद्वा** कुलगणसङ्घानामाऽऽसामस्त्येन **यत्र क्षेत्रे लयनं** मिलनं तस्माद्वा । **यत्र** क्षेत्रे वसतिनिवेशनादिके **उत्पन्नो दोषः** पाराञ्चिककारी **उत्पत्स्यते वा यत्र तिष्ठतो दोषस्तद् ज्ञात्वा ततस्ततः क्षेत्रात्क्षेत्रपाराञ्चिकः क्रियते** ।।२९४-२९५।। कालतपःपाराञ्चिकावाह—

**जत्तिअमित्तं कालं तवसा पारंचिअस्स वि स एव ।**
**कालो दुविगप्पस्स वि अणवट्ठप्पस्स जो भणिओ ।।२९६।।**

व्याख्या— 'सूचकत्वात् सूत्रस्य' **यो यावन्तं** कालमनुपशान्तदोषोऽनुपरतपाराञ्चिकापत्तिहेत्वतिचारः **स तावन्तं कालं कालपाराञ्चिकः** । **तपसा पाराञ्चिको** द्विविधः—आशातनापाराञ्चिकः प्रतिसेवनापाराञ्चिकश्च । आद्यः प्रागुक्तरूपः । प्रतिसेवनापाराञ्चिकस्त्रिधा—दुष्टः प्रमत्तोऽन्योन्यकुर्वाणश्च । आद्यान्त्यभेदौ प्रागुक्तरूपौ । **प्रमत्तो** मूढः । स पञ्चधा—कषाय—विकथा—मद्ये—न्द्रिय—निद्राख्यैः प्रमादभेदैर्विस्तरेणाख्येयः । **अस्य च तपःपाराञ्चिकस्य द्विविकल्पस्यापि स एव कालः** प्रमाणसमयो **यः पूर्वमनवस्थाप्यस्याभिहितः** । तस्य चेयं योजना आशातनातपःपाराञ्चिकस्य जघन्येन षण्मासा उत्कर्षेण वर्षम् । प्रतिसेवनापाराञ्चिकस्य तु जघन्येन वर्षम् । उत्कर्षेण द्वादश वर्षाणि । तथा पाराञ्चिकमप्यनवस्थाप्यमिव संहननादिगुणवत एव दीयते । तपोऽपि पारिहारिकाख्यमनवस्थाप्यस्येव पाराञ्चिकस्यापि भवति ।।२९६।। प्रतिपन्नपाराञ्चिकस्य साधोर्विधिमाह—

**एगागी खित्तबहिं कुणइ तवं सुविउलं महासत्तो ।**
**अवलोअणमायरिओ पइदिणमेगो कुणइ तस्स ।।२९७।।**

व्याख्या—**एकाकी महासत्त्वो** जिनकल्पिकप्रतिरूपः **क्षेत्राद् बहिः** स्थितः **सुविपुलं** पारिहारिकतपोरूपं **तपः करोति** । स च यत्र यत्र क्षेत्रे आचार्यो विहरति ततस्ततः क्षेत्रादर्द्धयोजनं परिहृत्य बहिः तिष्ठति । बहिः स्थितस्य च **तस्याचार्यः प्रतिदिवसमवलोकनं करोति** । सूत्रार्थौ पोरुष्यौ द्वे अपि दत्त्वा तस्य समीपं याति । अर्थपौरुषीमदत्त्वा वा याति । अथवा द्वे अप्यदत्त्वा याति । अथाचार्यो दुर्बलः तत्समीपं गन्तुमक्षमः कुलगणादिकार्येण वा व्यापृतः ततो गीतार्थं शिष्यं तत्र प्रेषयति । तत्र आचार्यस्याचार्यप्रेषितस्य वा शिष्यस्य तत्समीपं गच्छतस्तत्समीपादागच्छतो वाऽपान्तराले साधवो भक्तं पानं चोपनयन्ति । पाराञ्चिकसाधुस्तु यद्यग्लानस्तदा स्वयमेव भक्तपानादिकमानयति ।

प्रतिलेखनामुद्वर्त्तनादिकं च करोति । अथ ग्लानः ततः तस्याचार्योऽन्यो वा साधुर्भक्तपानाद्युपनयति । प्रतिलेखनामुद्वर्तनादिकं च करोति । सूत्रार्थेषु चाचार्योऽन्यो वा तस्य पृच्छायामुत्तरमपि ददाति । एवमेतत्संक्षेपतः पाराश्चिकं भणितम् ।।२९७।। पुनरनवस्थाप्यपाराञ्चिकयोर्विशेषस्वरूपमाह—

**अणवट्ठप्पो तवसा तवपारंची अ दो वि वुच्छिन्ना ।**
**चउद्दसपुव्वधरंमि धरंति सेसा उ जा तित्थं ।।२९८।।**

व्याख्या—**तपोऽनवस्थाप्यस्तपःपाराश्चिकश्च चतुर्दशपूर्वधरे श्रीभद्रबाहुस्वामिनि द्वावपि व्यवच्छिन्नौ** । **शेषास्तु** लिङ्गक्षेत्रकालानवस्थाप्यपाराञ्चिका यावत् **तीर्थं धरन्ति** अनुव्रजन्ति भवन्तीत्यर्थः ।।२९८।।

अथ साम्प्रतं केषां साधूनां कियन्ति प्रायश्चित्तानि भवन्तीति गाथाद्वयेन दर्शयन्नाह—

**सामाइअसंजयाणं पच्छित्ता छेयमूलरहिअट्ठा ।**
**थेराण जिणाणं पुण तवअंतं छव्विहं होइ ।।२९९।।**

व्याख्या—**सामायिकसंयतानां स्थविराणां** स्थविरकल्पिकानां **छेदमूलरहितानि शेषाण्यष्टौ प्रायश्चित्तानि** भवन्ति। **जिनानां** जिनकल्पिकानां **पुनः** सामायिकसंयतानां **तपःपर्यन्तं षड्विधं** प्रायश्चित्तं **भवति** ।।२९९।।

**छेओवट्ठावणिए पायच्छित्ता हवंति सव्वे वि ।**
**थेराण जिणाणं पुण मूलंतं अट्ठहा होइ ।।३००।।**

व्याख्या—**छेदोपस्थापनीये** संयमे वर्त्तमानानां **स्थविराणां सर्वाण्यपि** प्रायश्चित्तानि **भवन्ति** । **जिनकल्पिकानां पुनर्मूलपर्यन्तमष्टधा भवति** । एते (२९९-३०० द्वे) गाथे **'दसविहमालोअणे'** त्यादिगाथावृत्तौ (अत्र ग्रन्थे मूलगाथा ४ टीकायां) पञ्चचारित्रविषयप्रायश्चित्तदर्शनाधिकारे पूर्वं व्याख्याते अपि सम्प्रति चारित्रद्वयसद्भावात् तद्विषयप्रायश्चित्तप्रतिपादकत्वेन सूत्रान्तर्गते कृते इति पुनर्व्याख्याते । एवं दशविधमपि प्रायश्चित्तं क्रमेण प्रदर्शितम् ।।३००।।

अथ साधूनां योगविधिविषयातिचारप्रायश्चित्तं गाथात्रयेणोपदर्शयति—

**समणुन्नसमुद्देसे दिणसमकाले अ कालि अस्सुद्धे ।**
**वमणे निसि वोसरणे वितहमणुट्ठाणकरणे अ ।।३०१।।**
**अइरित्तुसंघट्टीअ—भत्तपरिट्ठवणि थंडिलाणं च ।**
**तह कालमंडलाणं च अपेहेणे कलहविकहासु ।।३०२।।**
**जोगेसु दिवसवुड्ढीति पंचमाईहिं सेसखलिएहिं ।**
**तिहिं विगइमउलिएहिं इअरेहिं पंच सत्तहि वा ।।३०३।।**

व्याख्या—**समनुज्ञासमुद्देशयोः** अङ्गश्रुतस्कन्धानामनुज्ञासमुद्देशयोर्दिवसे **काले अशुद्धे** सति । योगप्रवेशानन्तरं **दिनसमेषु** दिनप्रमाणेषु कालेष्वसत्सु । **वमने** वान्तौ । **निशि व्युत्सर्जने** अकालसञ्ज्ञायाम् । **वितथमनुष्ठानकरणे च** अन्यथा सतोऽनुष्ठानस्यान्यथाकरणे च । **'जोगेसु दिवसवुड्ढी'** इत्यग्रेतनगाथाऽवयवसम्बन्धादेतेषु सर्वेष्वपि पदेषु प्रत्येकयोगमध्ये **दिवसवृद्धिः स्यात्** । तथाऽतिरिक्तमधिकीभूतं **उत्संघट्टितं** संघट्टकात् स्फिटितम् एवंविधं **यद्भक्तं तस्य परिष्ठापने** । **स्थण्डिलानाम्** उच्चारप्रस्रवणभूमिमात्रकादीनां कालमण्डलभूमीनां च **अप्रतिलेखने** । **कलहे** रोषावेशविसंस्थुलभाषणादिरूपे साध्वादिभिः सह कृते । **विकथासु** विरुद्धासु स्त्र्यादिसम्बद्धासु कथासु च कृतासु **प्रत्येकं योगमध्ये दिनवृद्धिर्भवति** । **शेषस्खलितैः** शेषैरुक्तेभ्यो व्यतिरिक्तैः स्खलितैरविधिरूपपदैरुत्कृष्टमध्यमजघन्यलक्षणै**स्त्रिभिः पञ्चभि**रादिशब्दात् सप्तभिर्वा दिवसवृद्धिर्भवति । **त्रिभिर्विकृति–महुलिकै**र्निरन्तरैर्योगमध्ये दिवसवृद्धिर्भवति । **इतरैः** पुनर्महुलिकैः पञ्चभिः सप्तभिर्वा ।।२०१-२०२-२०३।।

अत्र श्रीचन्द्रसूरिसमुद्धृत १४५० ग्रन्थमितसामाचार्यन्तरगतप्रायश्चित्तप्रकारान्तरदर्शनायाह—

**उस्संघट्टिअकम्मिअभोगे लेवाडसंनिही वमणे ।**
**थंडिलअपेह संखड कोहाइ महव्वयइआरे ।।३०४।।**
**परपरिवाए पेसुन्न आल पुत्थाइथुक्कभूपडणे ।**
**रयहरचोले उग्गहफिडिए उवविट्ठपडिकमणे ।।३०५।।**
**पडिकमणकालभोअण–उद्देसगमाइभूमिओहीणं ।**
**गुरुग अपेहे एगेगं आवस्सिनिसीहिआभंगे ।।३०६।।**

व्याख्या—योगमध्ये उत्संघट्टितभक्तादिपरिभोगे । आधाकर्मिकभक्तादिपरिभोगे । लेपकृद् द्रव्यसन्निधौ । **वमने** । **स्थण्डिलानामप्रतिलेखने** । **सङ्खडे** कलहे । **क्रोधादौ** तथाविधक्रोधे, आदिशब्दात्तथाविधमानमायालोभेषु । **महाव्रतातिचारे** पञ्चमहाव्रतरात्रिभोजनविरमणरूपमूलगुणातिचारे । **परपरिवादे** परेषां दूषणभाषणेऽपि । **पैशुन्ये** पिशुनत्वे प्रच्छन्नं परदोषप्रकटने । **आलमभ्याख्यानं** तत्प्रदाने । **'पुत्थाइथुक्कभूपडणे'** इति **पुस्तकादेः** पुस्तक–पट्टिकादेर्ज्ञानोपकरणस्य **थुक्केन** निष्ठीवनेन भरणे **भूपतने** प्रमादादिना भूमौ पातने, उपलक्षणत्वात् कक्षाप्रक्षेपे दुर्गन्धहस्तेन ग्रहणे च । **रजोहरणे चोलपट्टे चावग्रहात् स्फिटिते**ऽपगते । **उपविष्टप्रतिक्रमणे** उपविष्टेन प्रतिक्रमणकरणे । **प्रतिक्रमणकालभोजनोद्देशकादिभूमीनामप्रमार्जने** उपधे**रप्रतिलेखने** च **गुरुकाः** । एतेषु सर्वेष्वपि गाथात्रयोपात्तेष्वपराधपदेषु **चत्वारो गुरुकाः** प्रायश्चित्तं योगमध्येऽपि भवतीत्यर्थः । तथा **आवश्यकी–नैषेधिकीभङ्गे पञ्चकं** पञ्चकाख्यं **प्रायश्चित्तं भवति** ।।३०४-३०५-३०६।।

अथ शास्त्रसमाप्त्यर्थमुपसंहारगाथामाह—

**इअ जीअनिसीहाई अणुसारेणं जईण पच्छित्तं ।**
**लेसेणं सपरट्ठा भणिअं सोहंतु गीअत्था ।।३०७।।**

व्याख्या—**इति** एवं प्रदर्शितप्रकारेण । **जीतनिशीथाद्यनुसारेण** । **जीतं** जीतकल्पः **निशीथं** कल्पाध्ययनम्, **आदिशब्दात्** **कल्पव्यवहाराध्ययनसामाचारीपरिग्रहः** । एतेषां महाग्रन्थानामनुसारेण अनुगमनेन, यथा एतेषु महाग्रन्थेषु प्रायश्चित्तं प्रतिपादितं तथैवात्रापीत्यर्थः । **यतीनां प्रायश्चित्तं लेशेन** अंशेन **स्वपरार्थं** स्वपरहितनिमित्तं **भणितं** प्रतिपादितम् । इदं च यद्यपि परमागमानुसारेणैव भणितं तथापि **गीतार्थाः** श्रीनिशीथादिछेदग्रन्थधारिणः **शोधयन्तु** अपनयन्त्वत्र दूषणानि प्रमादादिजनितानि । अत्र च जीतकल्पसूत्रे पुरातनजीतकल्पसूत्रगता एव तद्रूपाः कियत्यो गाथाः सन्ति । कियत्यः पुनः श्रीनिशीथादिग्रन्थानुगतास्तद्रूपा एव । कियत्यस्तु श्रीनिशीथादिमहाग्रन्थगतार्थसार्थलेशलेशग्रहणेन ग्रथिताः । कतिपयाः पुनः सुखप्रतिपत्त्यर्थं पुरातनजीतकल्पगत—मुकुलितार्थविस्तारणेन विरचिताः, स्वल्पाः पुनः सुविहितजनाचीर्णजीतानुगतसामाचारीगताः । एतासां च गाथानां विवरणमपि प्रायस्तद्रूपमेव तत्तद्ग्रन्थगतमत्र लिखितमस्तीत्यवगन्तव्यम् । इदं चैवंविधं जीतकल्पसूत्रं कालानुभावतः प्रायो निराधारपारमेश्वरप्रवचनाधारभूतैः निर्मलसंयमकमलाहृदयालङ्कारहारकल्पैः सकलसुविहित—व्रातशिरोमणिभिः विश्वविख्यातश्रीतपामहागच्छगगनाङ्गणनभोमणिभिः परमगुरुश्रीसोमप्रभसूरिभिः पवित्रचारित्रैकतानमानसैः मन्दतरमेधाधारणाधिगमविनेयजनानुग्रहार्थमेव अमुद्रसकलपरमागमसमुद्र—महाप्रयत्नेनावगाह्याऽमृतकल्पं प्रकटमकारीति ।।३०७।।

**इति यतिजीतकल्पवृत्तिर्जगत्प्रतीतश्रीतपागच्छाधिराजसुविहितशिरोमणिभट्टारकप्रभुश्रीदेवसुन्दरसूरिशिष्यश्री—साधुरत्नसूरिकृता ।।**

**वर्षे तर्क्कशराब्धिचन्द्रगणिते १४५६ श्रीविक्रमार्काद् गते**
**गुर्वादेशवशाद्विलोक्य सकलाः कल्पादिशास्त्रावलीः ।**
**सूरिश्रीयुतदेवसुन्दरगुरोः शिष्याग्रणीरातनो—**
**देतां श्रीयतिजीतकल्पविवृतिं श्रीसाधुरत्नाह्वयः ।। ( शार्दूलविक्रीडितम् )**
**प्राज्ञैरुद्देशतो वृत्तौ ग्रन्थमानं विनिश्चितम् ।**
**सहस्राः पञ्च श्लोकानां शतैः सप्तभिरन्वितः (५७००) ।। (अनुष्टुप् )**

## परिशिष्टम् – १

### जइ–जीयकप्पो मूलगाथायाः पूर्वार्धोत्तरार्धयोः अकारादिक्रमः (पू. = पूर्वार्धः, उ. = उत्तरार्धः)

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः |
|---|---|
| अइपरंपरठविए मीसेसु | १४० पू. |
| अइपरंपरापिहिए मीसेहिं | १४४ पू. |
| अइरतिरोछाड्डिअए | १६४ पू. |
| अइरतिरोछड्डिए पणगं | १६४ उ. |
| अइरतिरोसाहरिए पणगं | १४७ उ. |
| अइरतिरोसाहरिए | १४७ पू. |
| अइरपरंपरठविए पणगं | १४० उ. |
| अइरपरंपरापिहिए पणगं | १४४ उ. |
| अइरित्तुसंघट्टीअ | ३०२ पू. |
| अकएसु अ तेसु पुणो | २१२ पू. |
| अक्खनिसिज्जअविहि चउ | ३४ उ. |
| अगरहिसंसत्त | १३८ पू. |
| अच्चंतोसन्नेसु अ | २८० पू. |
| अट्ठमछट्ठचउत्थं | २६६ पू. |
| अट्ठमछट्ठचउत्थं | २६४ उ. |
| अट्ठमदसमदुवालस जिट्ट | २५८ उ. |
| अट्ठेव य ऊसासा | २२ उ. |
| अडछगचउरदुगाओ | ४७ पू. |
| अणवट्ठप्पावत्तिसु | २८४ उ. |
| अणवट्ठप्पो तवसा | २९८ पू. |
| अणसणमाई | २३१ पू. |
| अद्धेण छिन्नसेसं | ६५ पू. |
| अन्नह भिन्ने लहुगा | २०२ उ. |
| अपत्तापत्तावत्त | २४ उ. |
| अपरिणमंत छकाए | १६० पू. |
| अप्पत्ते अकहित्ता | ३२ पू. |
| अप्पडिविरओसन्नोन | २८६ पू. |
| अप्पपरदव्वकीए | ११३ पू. |
| अप्पपरदव्वभावेहि | ११२ उ. |
| अप्पेहऽपमज्जणि | १९९ पू. |
| अप्फासु धूमजोई | १८० उ. |
| अप्फासुएण देसे | १८० पू. |
| अभिसेओ सव्वेसु | २८४ पू. |
| अभिहडमुत्तं दुविहं | ११६ पू. |
| अमणुन्नं च इअ | १६९ उ. |
| अलस अणुबद्धरोसे | ७८ उ. |
| अवलोअणमायरिओ | २९७ उ. |
| अविगडिअंमि असुद्धो | ७ उ. |
| अविहिविगिंचिणिआए | २०८ उ. |
| अविहीइ कासजिंभिअ | १० पू. |
| अव्वत्ते अप्पत्ते लहुगा | २६ पू. |
| असणे अकारणं | १७० पू. |
| असिणेहसिणेहगएऽ- | १०३ उ. |
| असहे इक्किक्क | २६७ उ. |
| असहस्स तंपि हसइ | २६८ पू. |
| अहछंद अभुट्ठंजलिकरणे | २२२ पू. |
| अहमवि अ न वंदिस्सं | ६९ उ. |
| अहवाऽऽगयमासहिए | २७४ पू. |
| अहवा चउगुरुगाई | ५९ उ. |
| अह लोउत्तरलोइअभेएणं | ११४ पू. |
| अहवा संतासंते | २७ उ. |
| अहिगरणविगइजोगे | ७८ पू. |
| आइन्न जयण कारण | २०६ पू. |
| आउट्टिआइ ठाणंतरं व | २५३ पू. |
| आउट्टिआइ पंचिंदिघाए | २७८ पू. |
| आउट्टिआइ दप्पपमायकप्पेहिं | २५१ पू. |
| आउत्तस्स तदुभयं | १५ उ. |
| आऊतेऊविज्जुफुसणे | ४४ पू. |
| आगाढाणागाढस्स सव्वभंगे | ३५ पू. |
| आजीवणाइपिंडो पच्छित्तं | १२६ उ. |
| आणऽणवत्थुड्डाहो विराहणा | २२६ उ. |
| आणाइविराहणया | ४१ उ. |
| आणाभंगे चउगु | १७५ पू. |
| आपिट्टणा स(सं?)मुच्छण | ६३ उ. |
| आभोगेण वि तणुएसु | १२ पू. |
| आयरिअपायमूले | ५ उ. |
| आयरिअपारिभासी | २५ उ. |
| आयरिअस्स उ गुरुगा | ३१ उ. |
| आयरिओ आयरिअं | ५६ पू. |
| आयरिओ एगं न भणे | ६१ पू. |
| आयरिओ चउमासे | ७६ पू. |
| आलोअणकालंमि वि | २५४ पू. |
| आवस्सय सज्झाए | ८० पू. |
| आसायंतो बहुसो | २९० उ. |
| आसुररक्खसभागे | १९४ पू. |
| आहाकम्मे चउगुरु | १०४ पू. |
| आहाराइग्गहणे तह | ६ पू. |
| आहाराई दव्वं बलिअं | २४७ पू. |
| इअ उग्गमदोसाणं | १२३ उ. |
| इअ एसणदोसाणं | १६६ पू. |
| इअ छच्चउरदुगाउ | ४८ पू. |
| इअ जीअनिसीहाइ | ३०७ पू. |
| इअ दव्वाइ बहुगुणे | २५५ पू. |
| इअ महिअणंततसगमि | ५० पू. |
| इअरीए सव्वेसिं | १९० उ. |
| इअ हिट्ठमुहे हासे | २६८ उ. |
| इंगाले चउगुरुगा | १६७ पू. |
| इगनइबहुसंघट्टे गुरुगो | ४५ पू. |
| इगबितिचउपंचिंदिअवहंमि | ५२ पू. |
| इगबितिचउरपणिंदिस | ५२ उ. |
| इग—विगल—पणिंदिसु | ५४ पू. |
| इच्छाईणमकरणे | ९ उ. |
| इत्तो च्चिअ ठाणंतरमेगं | २५२ उ. |
| इह दसमट्ठमछट्ठा | २६५ पू. |
| उउबद्धंमि अनला | २ पू. |
| उक्कट्ठपिट्ठकुक्कुसभेआ | १३६ पू. |
| उक्किट्ठजहन्नमज्झिम | १२० पू. |
| उकिट्ठिगीअछेलिअ | २२१ उ. |
| उक्कोसं तवभूमिं | २७७ पू. |
| उक्कोसं बहुसो वा | २८३ पू. |
| उक्कोसमज्जहीणा आवत्ती | २६२ पू. |
| उक्कोसुक्कोसुक्कोसमज्झ | २६२ उ. |
| उच्चारविहारावणि | ६ उ. |
| उच्चारे पासवणे | १९ उ. |
| उडुवसहि दो पमज्जण | १९१ पू. |
| उडुवासा समईसा | १८४ पू. |
| उत्तरगुणि लहुग | २०१ उ. |
| उत्तुअमाणे लहुगा | ५८ उ. |
| उद्दवणे वि अ कमसो | १५४ उ. |
| उद्देसज्झयणसुअखंधंगेसु | २३ पू. |
| उद्देससमुद्देसादेस | १०५ उ. |
| उद्देससमुद्देसे सत्तावीसं | २२ पू. |
| उद्धरिअसव्वसल्लो | ४ उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| उप्परिवाडीगहणे | २०० | उ. |
| उप्पायगउप्पन्ने संबद्धे | ६३ | पू. |
| उवउत्तो वि न याणइ | १४ | उ. |
| उवगरणपूइ मासलहु | १०८ | पू. |
| उवटावणि चउगुरुगा | ३२ | उ. |
| उववासछट्ठअट्ठम जहन्न | २५८ | पू. |
| उवसंपया विहारे | ८ | उ. |
| उवहिममत्ते लहुगा | ९९ | पू. |
| उवही(हि?)हरणे गुरुगा | १ | पू. |
| उस्संघट्टिअकम्मिअभोगे | ३०४ | पू. |
| एआरिसं विउसज्ज | २९ | पू. |
| एअं पुण सव्वं | २४६ | पू. |
| एगाइ जा छमासं | २६९ | पू. |
| एगाइदसंतेसुं एगाइदसंतयं | १५६ | पू. |
| एगा कम्मिअ वसही | १८९ | पू. |
| एगागी खित्तबहिं कुणइ | २९७ | पू. |
| एगे अपरिणए | २८ | पू. |
| एगे गिलाणि पाहुडि | ३० | पू. |
| एमेव(ऽ?)संखडेवी | ७० | पू. |
| एवं दिवसे दिवसे | ७४ | पू. |
| ओगासे संथारुवसयकुल | ९८ | पू. |
| ओरालिए हिरण्णे | ९४ | उ. |
| ओहविभागे अ तहिं | १०४ | उ. |
| ओहेण दव्वभावा— | १५९ | पू. |
| ओसन्नगिहिसु लहुगा | ९९ | उ. |
| अंतो बहिं च दद्धे | २०२ | पू. |
| कयपवयणप्पणामो | १ | पू. |
| कंकणिअकंडगाई | २३९ | पू. |
| कंदप्पहासविगहाइएसु | १२ | उ. |
| कंदप्पहासविगहाकसाय | १० | उ. |
| कत्तइ लोढइ पिंजइ | १५२ | उ. |
| कप्पेण पडिक्कमणं | २५३ | उ. |
| कमसो भिन्नं लहुगुरु | २११ | उ. |
| कम्मसमुद्देसाइसु तिसु | १०७ | पू. |
| करकम्मस्स य करणे | ८७ | उ. |
| करणिज्जा जे जोगा | ५ | पू. |
| कागनिवारणि लहुओ | ९७ | पू. |
| कागाइसाणगोणे | ९३ | उ. |
| कारणगहि उव्वरिअं | १७ | उ. |
| कारणविणिग्गयस्स य | ८ | पू. |
| कारणविहिपरिकम्मे | २०३ | पू. |
| कारणि कम्मिअवसहीइ | १८९ | उ. |
| कारिंते पणकल्लं | २३९ | उ. |
| कालाइआइ लहुगो | १८७ | पू. |
| कालाइक्कंतउवट्ठाण | १८३ | पू. |
| कालाइक्कमणाइसु | २३ | उ. |
| कालाद्धाणाइच्छिअ | १७ | पू. |
| कालोदुविगप्पस्स वि | २९६ | उ. |
| कीरइ अणवट्ठप्पो सो | २८५ | पू. |
| कोऊहलं व गमणं | ८६ | पू. |
| कोहे बहुदेवसिए | २९३ | पू. |
| खंडइ पीसइ भुंजइ | १५० | उ. |
| खलिअस्स य सव्वत्थ | ११ | पू. |
| खामिअविउसविआइं | ६२ | पू. |
| खारूमि भावे दव्वे | १७३ | पू. |
| खित्ताओ पारंची | २९४ | उ. |
| खुड्डगभिक्खू | ४० | उ. |
| गंतीकमणीभोगे | ४९ | पू. |
| गच्छगयनिग्गयाणं लहुगा | १६८ | पू. |
| गच्छा अणिग्गयस्सा | ७३ | पू. |
| गच्छो उ दुन्नि मासे | ७५ | पू. |
| गमणागमणविहारे सुअंमि | १८ | पू. |
| गरहिअअचित्तमक्खिअ | १३७ | उ. |
| गरहिअइअरेहिं | १३७ | पू. |
| गाउअलहुगाढत्तं बत्तीसं | ४९ | उ. |
| गिम्हसिसिरवासासुं | २४९ | पू. |
| गिलाणे बहुरोगी | २८ | उ. |
| गिहिमत्ते पलिअंके | २०५ | पू. |
| गिहिमाइणा तदुत्तरकरणे | २३७ | उ. |
| गिहिणा उवहिवहावणि | २३६ | उ. |
| गिहिणोऽवरज्झमाणे | ९६ | पू. |
| गुत्तीसमिइपमाए गुरुणो | ९ | पू. |
| गुरु उवहिअपडिलेहे | २१७ | पू. |
| गुरुग अपेहे एगेगं | ३०६ | उ. |
| गुरुगा आयविराहणि | १७५ | उ. |
| गुरुगाऽऽयरिअ— | ३८ | पू. |
| गुरुगाइ छल्लहुंतं | ५१ | उ. |
| गुरुगा गुरुगा लहुगा | १९२ | उ. |
| गुरुगा सपच्चवाए | ४६ | उ. |
| गुरुगा हिरण्णमाई | ९५ | उ. |
| गुरुगो अ बालवुड्ढे | ३८ | उ. |
| गुरुगो इअरे लहुगो | २०९ | उ. |
| गुरुगो दगुल्लवत्थाघट्टणे | २२० | पू. |
| गुरुगो लहुगो दोसे | २२९ | पू. |
| गुरुमासो चउलहुअं | १०६ | उ. |
| गुरुलहुअ छप्पणमासा | २६१ | पू. |
| गुरु लहु लहुस ति | २६० | पू. |
| गुरुवसभभिक्खुखुड्डे | २३० | पू. |
| गुरुवसभभिक्खुथेरे | ३९ | उ. |
| घट्टंती गाहंती आरंभंती | १५३ | उ. |
| हारिअधोउग्गामि | १९७ | पू. |
| हीणं वा अहिअं वा | २५४ | उ. |
| हीणयरे हीणयरं हीणयरे | २५५ | उ. |
| हीणे मज्झुक्कोसे कमेण | ५५ | उ. |
| चउगुरु अचित्तगुरुसाहरिए | १४९ | पू. |
| चउगुरुग विभूसाए | २०४ | उ. |
| चउगुरुग रायपिंडे | २०५ | उ. |
| चउगुरु मासगुरु कमा | १४१ | उ. |
| चउगुरु मासगुरु कमा | १४५ | उ. |
| चउगुरुमासगुरु कमा | १४८ | उ. |
| चउगुरुमासगुरु कमा | १६५ | उ. |
| चउगुरु सचित्तअणंतमीसिए | १५८ | पू. |
| चउछट्ठट्ठमऽकरणे | २३२ | पू. |
| चउद्दसपुव्वधरंमि धर | २९८ | उ. |
| चउभंगी इअ सत्तसु | १९९ | उ. |
| चउभेए उद्दिट्ठे लहुमासो | १०६ | पू. |
| चउमासवरिससवु— | २४२ | उ. |
| चउरो चउगुरु अहवा | ५९ | पू. |
| चउरो वंदणलावं तेण | ७६ | उ. |
| चउलहु अ मासलहुआ | १३९ | उ. |
| चउलहुअमासलहुआ | १४३ | उ. |
| चउलहुअमासलहुआ | १४६ | उ. |
| चउलहु अ मासलहुआ | १६३ | उ. |
| चउलहु अह चउगुरुअं | १२५ | उ. |
| चउलहुअं लहइ मुणी | १६२ | पू. |
| चउलहुअं सेसदुगे | ११९ | उ. |
| चउलहु—गुरु—लहुमासो | ४४ | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| चउलहु दूईपिंडे | १२४ | उ. |
| चउलहु पुत्थयपणए | २१४ | उ. |
| चउलहु भागे पाए | २१० | पू. |
| चउलहु वणीमगपिंडे | १२७ | पू. |
| चउलहु सेसे सव्वहिं | ८१ | उ. |
| चत्तारि छच्च लहु गुरु | ९८ | उ. |
| चरमं सपच्चवायं | ११६ | उ. |
| चरमठाणावत्तिसु बहुसो | २९२ | उ. |
| चिर—इत्तरभेएणं | १०९ | उ. |
| चिरठविए लहुमासो | ११० | पू. |
| छउमत्थस्स विसोही | ५ | उ. |
| छक्कायवग्गहत्था समणट्ठा | १५३ | पू. |
| छट्ठचउत्थायामं लहुपक्खे | २६५ | उ. |
| छट्ठंतं तव लहुमट्टमाइ | २७० | पू. |
| छड्डिअमिह पुढवाइसु | १६२ | उ. |
| छड्डिअ सचित्तभूदगसिहिप | १६३ | पू. |
| छल्लहु अकालधुअणे | २१५ | पू. |
| छिन्नकरचरणगुव्विणि | १५० | पू. |
| छेआइमसद्दहओ मिउणो | २४५ | पू. |
| छेआईए वि तवो | २४५ | उ. |
| छेएण उ | २८१ | पू. |
| छेएणाछिन्नपरिआए | २७२ | उ. |
| छेओ मूलं च तहा | ६४ | उ. |
| छेओवट्ठावणिए पायच्छित्ता | ३०० | पू. |
| छेअं पणगाईअं पावइ | २७७ | उ. |
| जं एगकम्मदोसो | १९० | पू. |
| जं चन्नं करणिज्जं | ७ | पू. |
| जं जीअदाणमुत्तं एअं | २५२ | पू. |
| जइ छम्मास परेण वि | २७३ | पू. |
| जइ वारि न सारेई | ७४ | उ. |
| जत्तिअमित्तं कालं तवसा | २९६ | पू. |
| जतुछगणाइविलित्तुब्भिन्नं | ११८ | उ. |
| जत्तियमित्तं कालं तवसा | २८७ | पू. |
| जत्थाऽऽइन्नं सव्वे | २०६ | उ. |
| जत्थुप्पन्नो दोसो | २९५ | पू. |
| जलतेअबहुलफुसणे छग्गुरु | ५३ | पू. |
| जहन्नुक्कोस जहन्नगमज्झा | २६३ | उ. |
| जाइकुलसिप्पगणकम्म— | १२६ | पू. |
| जावइअं वा विसइअं | २५० | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| जावंतिअ—जइ—पासंडि | १०८ | उ. |
| जावंतिअजइपासंडि | १२२ | उ. |
| जावंतिअ वसही तेहिं | १८५ | पू. |
| जावंति मिसि चउलहु | १०९ | पू. |
| जिणजिणहरठवणगुरू गुरु | ३६ | पू. |
| जीअव्ववहारगयं | १ | उ. |
| जीएणं गुरुमासो | २३५ | उ. |
| जो उ सलिंगे दुट्ठो | २९१ | पू. |
| जोगस्स कमा छल्लहु | ३५ | उ. |
| जोगेसु दिवसवुड्ढीति | ३०३ | पू. |
| जो जत्थ जेण दूसइ | २८६ | उ. |
| झोसिज्जइ सुबहुं पि | २५६ | पू. |
| ठंतस्स पढमतइए लहुगो | १८८ | उ. |
| उग्गिन्न दिन्न अमए | ७२ | उ. |
| ठवइ बलिं उवउत्तइ | १५१ | पू. |
| ठवणमणापुच्छाए | २३५ | पू. |
| ठवणरुवणाइ ते वि हु | २७३ | उ. |
| ठविए सचित्त | १३९ | पू. |
| तं दसविहमालोअणपडि— | ४ | पू. |
| तंमि वि बहुवारकए | ९० | उ. |
| तं लहुमवि कालगुरु | २७० | उ. |
| तइए कालगुरु लहू | १७४ | पू. |
| तणवितणसंजयट्ठा | १९२ | पू. |
| तण—डगल—छार | ८२ | पू. |
| तत्तो तत्तो कीरइ | २९५ | उ. |
| तत्थ कमेणं पणगं | १३४ | पू. |
| तत्थोवहिनिप्फन्नं | ८३ | उ. |
| तद्दिणनिअत्तसुद्धो न | २४३ | उ. |
| तन्न जुज्जइ जम्हा | १७१ | उ. |
| तवईअमसद्दहए तवबलिए | २८२ | पू. |
| तवकाल गुरुअ लहुअं | २६९ | उ. |
| तवकालेहिं विसिट्ठो | २०३ | उ. |
| तवगव्विआइएसु अ | २७९ | पू. |
| तह पाडिअलद्धेवि हु | १९६ | उ. |
| तवगव्विओ तवस्स य | २७५ | पू. |
| तवगुरुकालगुरुकमा | १७९ | उ. |
| तवछेयमूलअणवट्ठया य | ४ | उ. |
| तवसा व जो न | २७५ | उ. |
| तवसो अ पहाणंगं | २ | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| तह कारणाऽणाहारे | १६७ | उ. |
| तह कालमंडलाणं च | ३०२ | उ. |
| तह खवणंबिल आसण | २६६ | उ. |
| तह गुरुअचित्तपिहिअं | १४२ | पू. |
| तह य कवाडुब्भिन्नं | ११९ | पू. |
| तहिं बारस दसममट्ठम | २६४ | पू. |
| तावइआ चउगुरुगा | ४३ | उ. |
| तावो भेओ अयसो | ६० | पू. |
| तिंतिणिए चलचित्ते | २५ | पू. |
| तित्थयरपवयणो सुअं | २९० | पू. |
| ति नव सगवीस | २५७ | पू. |
| तिविहे वि तत्थ चउलहु | १२२ | पू. |
| तिविहे वि हु लहुमासो | १३६ | उ. |
| तिविहो निमित्तपिंडो | १२५ | पू. |
| तिविहोवहिणो विच्चुअ | १९६ | पू. |
| तिविहोवहिम्मि गुरु लहुग | १९७ | उ. |
| तिहिं विगइमउलिएहिं | ३०३ | उ. |
| तुंबयदारुअमट्टिअपायं | २०० | पू. |
| तुंबाइबीअवणयणि | २२५ | उ. |
| ते गुरुगणंति साइमि | १७४ | उ. |
| तुसभूइबिंदुमित्ताहारे | १०२ | पू. |
| तेण परं दसगं चिअ | १५६ | उ. |
| ते पावा नायव्वा | ६२ | उ. |
| थंडिलअपेह संखड | ३०४ | उ. |
| थल—घट्ट—लेव—लेवोवरि | ४७ | उ. |
| थिरसंकमेण लहुगो | ४६ | पू. |
| थीणद्धिमहादोसा | २९२ | पू. |
| थीमेहुण संकाए | २२२ | उ. |
| थीवयवफासि लहुगा | ९१ | उ. |
| थेरपहुपंडवेविर जरि | १४९ | उ. |
| थेराण जिणाणं पुण | २९९ | उ. |
| थेराण जिणाणं पुण | ३०० | उ. |
| थोवं थोवयरं वा | २८८ | उ. |
| दंसणचरित्तवंते | २७९ | उ. |
| दगमक्खिअं पि चउहा | १३४ | उ. |
| दगमट्टिजलुगमुअणे | २१९ | उ. |
| दप्पेणं पंचिदियवोरमणे | २४१ | पू. |
| दव्वं खित्तं कालं | २५१ | उ. |
| दव्वंमि असंलीणे | २२८ | पू. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| दव्वादविदिन्ने पुण | ८२ | उ. |
| दव्वापरिणमिए पुण जं | १५९ | उ. |
| दसपु(प?)रओ दसगं | ५४ | उ. |
| दसमाई पुरिमंता सिसिरे | २६७ | पू. |
| दाणं विभागओ पुण | २४६ | उ. |
| दाणे निरंतरे वा | २७१ | पू. |
| दिंतेसु एसु चउलहु | १५२ | पू. |
| दिअगहिअ दिआभुत्ते अ | १०१ | उ. |
| दिज्जाहि दुब्बलं | २४७ | उ. |
| दिज्जाहि लहुअदाणं | ६५ | उ. |
| दिट्ठी परिणय करणे | ८६ | उ. |
| दिट्ठी(ट्ठि?)मोहे अपसंसण | ३७ | उ. |
| दिवसनिसि पढमचरिमे | २२६ | पू. |
| दीहद्धाणासेविसु | २४१ | उ. |
| दुच्चिंतिअ दुब्भासिअ | १४ | पू. |
| दुतिचउकल्ला व कमा | ५३ | उ. |
| दुब्बलअप्परिणामे अथिर | २८२ | उ. |
| दुविहं तु पूइकम्मं | १०७ | उ. |
| दुविहं मक्खिअमुत्तं | १३१ | उ. |
| दुविहतवपरूवणया | २२७ | पू. |
| दूमिअधूमि(वि)अ वासिअ | १७८ | पू. |
| देसिअराइअपक्खिअ | २१ | पू. |
| दो सड्ढदिवस पणगं | ६६ | पू. |
| दोसे न कोहमाणे | २२९ | उ. |
| दोसेहि उपेहते | १९५ | उ. |
| धाईउ पंच खीराईभेअओ | १२४ | पू. |
| धावणडेवणसंहरिसगमणकि | २२१ | पू. |
| नवइ दिण पणहिअसयं | ६७ | उ. |
| नवतवसुअववहारो जते | २५७ | उ. |
| नववासवुट्ठिकिसलय | ४३ | पू. |
| नरतिरिसंसत्ताए लहुगा | १८२ | उ. |
| नाउं विहिणा | २४९ | उ. |
| नाणे दंसणचरणे | २३४ | पू. |
| नावानइसंतारे पायच्छित्तं | १८ | उ. |
| नासिअ हारविए | १९८ | उ. |
| निअअग्गपिंडि लहुगो | १६९ | पू. |
| निक्खित्तं पुढवाइसु | १३८ | उ. |
| निक्खित्तु छिन्नकालं | १९३ | उ. |
| निच्छुभणमसंपत्ते लहुगं | ७० | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| निपच्चवायपरगामआहडे | ११७ | उ. |
| निम्मीसमीसकद्दम | १३३ | उ. |
| नियमे चेइवंदणि | २२३ | उ. |
| निरवायपरिरयासइ | ४८ | उ. |
| निविअपुरिमासणंबिल | २५९ | पू. |
| निव्विगइ निब्बलोमे | ८८ | पू. |
| पंचाई लहुगुरुगा | ९५ | पू. |
| पंचिंदिसु गुरुमासाइ | १५५ | उ. |
| पंतावणसंकप्पे छल्लहुगा | ७१ | उ. |
| पच्छा नायमसुद्धं | १६ | उ. |
| पच्छित्तं तेण तयं | ३ | उ. |
| पडिकमणकालभोअण | ३०६ | पू. |
| पडिकमणाकरणे | २२४ | उ. |
| पडिबद्धसिज्ज दव्वे | ८४ | पू. |
| पडिलेहणकालंमि वि | २४० | उ. |
| पढमबितिचाउलोदगि | १७२ | पू. |
| पढमाइ पोरिसीए बिअ | ८९ | पू. |
| पढमुस्सेइममुदयं न | १७१ | पू. |
| पढमे कालतवगुरू | १७३ | उ. |
| पणगाइ छग्गुरुतं | ६८ | उ. |
| पणवीस सड्ढसगवीस | ६७ | पू. |
| पनरसपएसु चउगुरु | ८५ | उ. |
| पनरस सड्ढसतरस | ६६ | उ. |
| परपरिवाए पेसुन्न | ३०५ | पू. |
| परभावक्कीए पुण | ११३ | उ. |
| परिअट्टिअं पि दुविहं | ११५ | पू. |
| परिवाराइनिमित्तं | १०० | पू. |
| पहरइ जो अ सपक्खे | २८३ | उ. |
| पहरणमग्गणि छग्गुरु | ७२ | पू. |
| पाणम्मि गुरुग विअडे | १७० | उ. |
| पाणासंवरि भिन्नं | २३३ | पू. |
| पाणिवहाई सुमिणे | २० | उ. |
| पायडपयासकरणं तं | १११ | उ. |
| पासंडिअट्ठविहिआ महवज्जा | १८६ | पू. |
| पासत्थाइ जो वि अ | २७६ | उ. |
| पासत्थाइसु लहुगा | २४४ | उ. |
| पासवणठाणरूवे सद्दे | ८४ | उ. |
| पाहुडिआ वि अ | ११० | उ. |
| पिंडम्मि व वत्थम्मि | १९४ | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| पिंडोवहिसिज्जाई गहिअं | १६ | पू. |
| पिट्टिवंसो दो धारणा | १७६ | पू. |
| पिहिए सचित्तभूदग | १४३ | पू. |
| पिहिअं तिहा अभिहिअं | १४२ | उ. |
| पीईसुन्नणि पिसुणे | २७ | पू. |
| पुढवाइएसु | ४२ | पू. |
| पुढवाइजिउम्मीसे चउलहु | १५७ | पू. |
| पुढवीमक्खिअमित्थं चउव्विहं | १३२ | उ. |
| पुरिमचरिमासु पत्तादपेहि | २२३ | पू. |
| पुरिसतिरिएहि लहुगा | २२८ | उ. |
| पुरिसस्सित्थीफासे चउलहु | ९२ | पू. |
| पुव्वमपिहि अथंडिल | २१२ | उ. |
| फासुअ अफासुए | १०३ | पू. |
| फिडिए सयमुस्सारिअ | २११ | पू. |
| बायरपाहुडिआए चउगुरु | १११ | पू. |
| बारसविहं विभागे | १०५ | पू. |
| बीओसे मीसेसु अ | ५० | उ. |
| बिट्टपडिकमणि लहुगा | २२४ | पू. |
| भत्तट्ठं सज्झायं | ७५ | उ. |
| भत्ते पाणे सयणासणे | १९ | पू. |
| भावपडिबद्धि | ८५ | पू. |
| भिक्खट्ठपविट्ठाणं | १६८ | उ. |
| भिक्खुंमि अ | २८० | उ. |
| भिन्न कालद्धाणाइत्थि | २०८ | पू. |
| भिन्नमपेहे वसही | २१८ | पू. |
| भिन्न—लहु—गुरु—लहुगा | २४ | पू. |
| भिन्नं लहु—गुरु—चउलहु | ४२ | उ. |
| भूअपमज्जणुओग—काल | ३४ | पू. |
| भूजलसिहिपवणपरित्त | १५४ | पू. |
| भूदगवणमक्खिअम्मिअ | १३२ | पू. |
| भूतिगअपेह अज्झुसिरतण | २१४ | पू. |
| मंडलिअपडिक्कमणे समं | २१६ | उ. |
| मज्झ सवासा इत्ति | ९७ | उ. |
| मज्झुक्कोसा | २६३ | पू. |
| मत्तविणु बहिनिरोहे | २१५ | उ. |
| महसावज्ज जइट्ठा | १८६ | उ. |
| महावज्जाइसु गुरुगा | १८७ | उ. |
| मायाए मासगुरुं | १२८ | उ. |
| मासगुणे सेसदिणी— | २७४ | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| मासगुरु दुविहं पुण | १५८ | उ. |
| मासलहु पढमभेए | १२३ | पू. |
| मासलहु पयडकरणे | ११२ | पू. |
| मासलहु सग्गामाहडम्मि | ११८ | पू. |
| मिच्छत्तीणं उववूह—भत्ति | ४० | पू. |
| मिस्सपुढवाइमीसे मासलहुं | १५७ | उ. |
| मीस छकायापरिणय | १६० | उ. |
| मीसाणंतपरिणए गुरुमासो | १६१ | उ. |
| मूलं इत्थितिरिक्खिन | ९१ | पू. |
| मूलं च मूलकम्मे | १३० | उ. |
| मूलं छेअं छम्मासमेव | ८९ | उ. |
| मूलं तु पडिक्कंते | ७७ | पू. |
| मूलं मूलावत्तिसु | २८१ | उ. |
| मूलगुणेहिं असुद्धा एसा | १७६ | उ. |
| मूलुत्तरचउभंगो पढमे | १७९ | पू. |
| मुहकरणं मूलगुणा | २०१ | पू. |
| मुहणंतयरयहरणे | १९८ | पू. |
| मोसाइसु मेहुणवज्जिएसु | ५५ | पू. |
| रयहरचोले उग्गहफिडिए | ३०५ | उ. |
| रागद्दोसविमुक्को | ६१ | उ. |
| रायग्गमहिसिपडिसेवओ | २९१ | उ. |
| लद्धुं न निवेएई | ८३ | पू. |
| लसुणाइसु लहुमासो | २१३ | उ. |
| लहु अप्पे वि हु तलि | २२५ | पू. |
| लहु कायब्भंग | २१६ | पू. |
| लहुगं संतरफासे | ९२ | उ. |
| लहुगसचित्ते तुरिए | १७२ | उ. |
| लहुग समणट्टघोए | १९३ | पू. |
| लहुगा गुरुगज्जाणं | २१७ | उ. |
| लहुगा गुरुगो लहुगो | १९५ | पू. |
| लहुगा निंबाइतयाइ | १०२ | उ. |
| लहुगा य हुंति | २६ | उ. |
| लहु—गुरु—लहुगा | ३६ | उ. |
| लहु गुरु लहुगा | २३२ | उ. |
| लहुगुरु लहुगा गुरुगा | ८७ | पू. |
| लहुगुरुलहुगा वा | ३३ | उ. |
| लहुगो अ उवेहाए | ५८ | पू. |
| लहुगो इरिओवओगाकरणे | २१० | उ. |
| लहुगो लहुगा गुरुगा | ६४ | पू. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| लहु तदहिअ तंमत्तं | २३३ | उ. |
| लहुतमलहुतरलहुओ | २६० | उ. |
| लहुमासभिन्नवीसं | २६१ | उ. |
| लहुमासाई चउगुरुअंतं | १५५ | पू. |
| लहुमासो अ जहन्ने | १२० | उ. |
| लिंगेण दव्वभावे | २८५ | उ. |
| लुक्खंमि अ हीणतरं | २४८ | उ. |
| लुक्खं सीअल साहारणं | २४८ | पू. |
| लेवाडसुक्कसंनिहिभोगे | १०१ | पू. |
| लेवे लेवोवरि—कुंभ—तुंब | ४५ | उ. |
| लेसेणं सपरट्ठा | ३०७ | उ. |
| लोउत्तरि मासलहू | ११४ | उ. |
| लोउत्तरि मासलहू | ११५ | उ. |
| वंदइ न य वंदिज्जइ | २८९ | पू. |
| वंसगकडणुक्कंबणछायणलेव | १७७ | पू. |
| वज्जा य महावज्जा | १८३ | उ. |
| वज्जा सगिहं दाउं | १८५ | उ. |
| वणमक्खिअं तु | १३५ | उ. |
| वमणे निसि | ३०१ | उ. |
| वयभंगे लहु सहसप्पमायओ | २३१ | उ. |
| वरिसंताणि अभोगे लहुगा | २१९ | पू. |
| वसभाइसु अंति कमा | ५७ | उ. |
| वसभे छग्गुरुगाई | ५७ | पू. |
| वसहि—निवेसण—पाडग | २९४ | पू. |
| वसहि बहुसो पमज्जणि | १९१ | उ. |
| वसहे छग्गुरु भिक्खुंमि | ५६ | उ. |
| वायरसुहुमं च तहा | १२७ | उ. |
| वारेऊण न कप्पइ | ९६ | उ. |
| वासं बारस वासा | २८८ | पू. |
| विगलाण घट्टणाइसु | ५१ | पू. |
| विज्जाइसुविणलक्खणकोउ | २३६ | पू. |
| विज्जामते चुन्ने | १३० | पू. |
| विरिअं न हावइज्जा | २३४ | उ. |
| वीआरे गेलन्ने | ८० | उ. |
| वेआवच्चगरस्स उ | २५६ | उ. |
| वेआवच्ची हिंडण | ८८ | उ. |
| सुद्धो लहु३ लहु११ | २०७ | उ. |
| संकाइसु तिसु देसे | ३७ | पू. |
| संकिअदोससमाणं | १३१ | पू. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| संजमहेउं लेवो न | २०४ | पू. |
| संजोअणाइ चउगुरु | १६६ | उ. |
| संपागडपडिसेवी लिंगाओ | २९३ | उ. |
| संसत्ताए काएहिं | १८२ | पू. |
| संभमभयाउरावइ | १३ | पू. |
| संवच्छरमुक्कोसं आसायइ | २८७ | उ. |
| संवच्छरमुस्सग्गे कयंमि | ७७ | उ. |
| संवरविणिज्जराओ मुक्खस्स | २ | पू. |
| संवासो से कप्पइ | २८९ | उ. |
| संविग्गपक्खिआणं | १० | उ. |
| संविग्गभाविएणं | ३ | उ. |
| संविग्गे अमणुन्ने एवं | २४४ | पू. |
| संविग्गो साविक्खो | २४३ | पू. |
| संसट्ठदाणगहणे कल्लं | २४० | पू. |
| संसट्ठासंसट्ठे निद्धे | २०९ | पू. |
| सचित्तअणंतेणं | १४५ | पू. |
| सचित्तणंतकाए अपरिणए | १६१ | पू. |
| सचित्तणंतकाये | १६५ | पू. |
| सचित्तमंतकाए | १४१ | पू. |
| सच्चित्तअणंतेसु | १४८ | पू. |
| सज्झायकालगोअरचरिआई | २१८ | उ. |
| सज्झाय—भिक्ख—भत्तट्ठ | ७३ | उ. |
| सट्ठसयं पणसट्ठं | ६८ | पू. |
| सत्तरत्तं तवो होइ | २७२ | पू. |
| सत्तीइ सुत्तपोरिसि | २३० | उ. |
| सपच्चवायपरगाम | ११७ | पू. |
| सपरहिअधारणट्ठा | १ | उ. |
| सपरिकम्मा वसही | १७७ | उ. |
| समणहिगरणे पडिणीअ | ७९ | पू. |
| समणुन्नसमुद्देसे | ३०१ | पू. |
| समिईसु अ गुत्तीसु अ | ४१ | पू. |
| सयमद्धं तिन्नि | २१ | उ. |
| सल्लुद्धरणनिमित्तं खित्तंमि | ७ | पू. |
| सव्वत्थ होइ लहुओ | २२७ | उ. |
| सव्ववयाईआरे | १३ | उ. |
| सव्वेसु वि बीअपए | १५ | पू. |
| सव्वोवहिकप्पंमि अ | २४२ | पू. |
| ससरक्खमक्खिअं तह | १३३ | पू. |
| ससिणिद्धं उदउल्लं | १३५ | पू. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| सहसाणाभोगेण व | ११ | उ. |
| सहसा व पमाएणं | ६९ | पू. |
| सा चेव उवट्ठाणा | १८४ | उ. |
| सामण्णेणं सुत्तासायणि | ३३ | पू. |
| सामाइअसंजयाणं | २९९ | पू. |
| सामान्नेणं गुरुगा | ३९ | पू. |
| सामिपहुतेणकए तिविहे | १२१ | पू. |
| सारूवी—पच्छाकड | १२ | उ. |
| सारो चरणं तस्स वि | ३ | पू. |
| सावज्जबहुपडिणीअ | ८१ | पू. |
| साहम्मिय त्ति | १०० | उ. |
| साहरिअ सजिअ | १४६ | पू. |
| साहारण—चुल्लग | १२१ | उ. |
| साहारणचोरिअगं देइ | १५१ | उ. |
| साहुपओसो संसारवड्डणो | ६० | उ. |
| साहूहिं लेहसालं | २३८ | पू. |
| सिअउसिणोदगफासुअअफासु | १८८ | पू. |
| सित्ता संमट्ठावि अ | १७८ | उ. |
| सिसुकीलनघरकम्मं | २३८ | उ. |
| सीसपडिच्छायरिए | २९ | उ. |
| सीसपडिच्छे पाहुडि | ३१ | पू. |
| सुअववहारुवएसा ओहेण | २५९ | उ. |
| सुइमाई इक्किक्का | २३७ | पू. |
| सुगुरूण अलाभंमि | १० | पू. |
| सुत्तविहिणाऽविलंबं जं | २७१ | उ. |
| सुत्थे वसओ वासुवरि | २२० | उ. |
| सुन्नवसहीइ गुरुगा | १८१ | उ. |
| सुबहुत्तरगुणभंसी | २७६ | पू. |
| सुहुमाए मासलहु | १२८ | पू. |
| सुहुमो अ बायरो वा | ९३ | पू. |
| सेवामि त्ति अ मिहुणं | ९० | पू. |
| सेसाण हुंति लहुगा | ७९ | उ. |
| सेसे पढम ति इगदस | २०७ | पू. |
| सेसे सीसे गुरुगा | ३० | उ. |
| सेसेसुक्कोसाभिक्खासेवणाईसु | २७८ | उ. |
| सेसेसु फासुएणं देसे | १८१ | पू. |
| सेहाई पडिकुट्ठे | ९४ | पू. |
| सो कीरइ पारंचिअ | २९३ | पू. |
| हट्ठगिलाणा भावंमि | २५० | पू. |

## परिशिष्ट – २

### जइ–जीयकप्पो अवान्तरगाथानां अकारादिक्रमः


| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| अइभार चुडण पणए | १४२ |
| अइसेसिइड्ढिधम्मकहिवाइआयरिअ | ४३ |
| अक्खा संथारो वा | १२९ |
| अट्ठारस पुरिसेसुं | ३४ |
| अणसणमूणोअरिआ वित्तीसंखेवणं | १५९ |
| अणहीआ खलु जेणं | ३ |
| अपच्चयो अवन्नो पसंगदोसो | १६२ |
| अप्पत्ति च्चिअ वासे | १४२ |
| अप्पा मूलगुणेसुं | १६ |
| अप्पाहारस्स न इंदिआइं | १०४ |
| अब्भुट्ठाणे आसण किंकर | १५४ |
| अलसं भणंति बाहिं | ७० |
| अलाभरोगतणफासा | १२ |
| अल्लीणा नाणाइसु | १५ |
| अवधारेउं सीसो | ८ |
| अवराहे लहुगतरो | ११५ |
| अवसगमणे दिसासुं | १८ |
| अविअ हु सव्व | ११४ |
| असंजयाण भिक्खू कज्जेसु | १५४ |
| असणाईआ चउरो पाउंछण | १०७ |
| असणाइआ चउरो वत्थे | १३४ |
| असिवे ओमोदरिए | १२६ |
| असिवे ओमोदरिए रायद्दुट्ठे | १५७ |
| अह जारिसओ देसो | १५३ |
| आचेलुक्कुद्देसिअ सिज्जायररायपिंड | १६९ |
| आपुच्छणा उ कज्जे | १८ |
| आमे घडे निहित्तं | १ |
| आयके उवसग्गे | १०५ |
| आयरिअ–गिलाणाण य | १४२ |
| आयरिअस्स विणासे | १९३ |
| आलोअणा पडिकमणे | १३ |
| आलोअणा विवेगो | १३ |
| आलोअणा विवेगो अ तइअं | १४ |
| आवत्तितवो एसो नवभेओ | १७६ |
| आवासगं अनिअयं | १५० |
| आवासग सज्झाए | १५० |
| आहाकम्मामंतण पडिसुणमाणे | १६० |
| आहार उवहि देहे | १५३ |
| आहारादीणट्ठा जसहेउं | १५२ |
| इअ एस तेरसविहो | १२८ |
| इक्कल्लेण न लब्भा | ७० |
| इच्छा मिच्छा तहक्कारो | १८ |
| इत्थं पुण बहुतरगा भिक्खुण(णो?) | १७० |
| इत्थ य जह नवदसमे | १९० |
| उउबद्धंमि न अनला | ३ |
| उउबद्धधुवण बाओस | १४१ |
| उउबद्धपीठफलगो ओसन्नं | १५१ |
| उक्करसारूवणाणं मासा | १८७ |
| उक्कोस तिसामासे | १३३ |
| उक्कोसो अट्ठविहो | १२८ |
| उक्कोसं तवभूमिं | ९ |
| उग्गमदोसादीया पासत्थाई | १५६ |
| उड्डाहरक्खणट्ठा संजमहेउं | ७२ |
| उत्थिताः साधवः | १९ |
| उवसंपय पंचविहा सुअ | १७ |
| उस्सग्गेण उ सुज्झइ | ९ |
| उस्सेइमसंसेइमचाउलओदगं च | ११० |
| उस्सुत्तमणुवदिट्ठं | १४७ |
| एअगुणसंपउत्तो पावइ | १९५ |
| एआइ अट्ठ ठाणाइं | ५५ |
| एए चेव दुवालस | १२८ |
| एएसामण्णतरं जे भिक्खु | १५४ |
| एएहिं दाणेहिं आवत्तिओ | १७८ |
| एअं नाऊण तहिं | १० |
| एगूणवीसगस्स उ | २६ |
| एगेण कयमकज्जं करेइ | ११७ |
| एमेव उवहिसिज्जा | २७ |
| एमेव देहवाओ | ५३ |
| एवं तावुग्घाए | ९ |
| एवं तु करितेणं | १९३ |
| एष नवविधतपोदानलक्षणः | १६८ |
| एस तवं पडिवज्जइ न | १९५ |
| एहि भणिओ उ वच्चइ | २९ |
| ओहेण जस्स गहणं | १५ |

| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| ओहेण जस्स गहणं | १२८ |
| अंतोबहिसंजोअण आहारे | २७ |
| कज्जविवत्तिं दट्ठूण भणइ | २८ |
| कप्पटिआदओ वि अ चउरो | १६९ |
| कप्पतिअ पडिग्गहगो | १२८ |
| कांजिअआयामासइ | ११० |
| कामं खलु धम्मकहा | १५२ |
| काम ! जानामि ते | ७८ |
| कामी सघरंगणओ थूलपइण्णा | १५६ |
| कायाणं छक्क जोगंमि | ८ |
| काया वया य तेच्चिय | १९४ |
| कालातीते काले | ८१ |
| किं पुण जगजीवसुहावहेण | १५८ |
| केप्याहुः प्राग् वनेभोऽभूत् | २०० |
| कोउअ भूतीकम्मं | १५० |
| कोहे माणे अ | ५५ |
| खंधे दुवारसंजइगरुलद्धंसो | १२५ |
| खित्तं गओ अ | १४९ |
| खुहा पिवासा सीउण्हं | १२ |
| गइठाणभासभावे लहुगो | २८ |
| गवाशनानां स गिरः शृणोति | १५६ |
| गिम्हासु अट्ठमं दिज्जा | १६८ |
| गिम्हासु चउत्थं दिज्जा | १६८ |
| गिम्हासु छट्ठगं दिज्जा | १६८ |
| गिहिनिक्खमणपवेसे | १५४ |
| गीअत्थेणं दिन्नं | १० |
| गुणपरिवड्ढिनिमित्तं कालातीते | १४६ |
| गुत्तो पुण जो साहू | ४४ |
| गुरुपक्खे छम्मासो पणमासो | १७६ |
| गुरुपक्खे नव एए | १७६ |
| गुरुपक्खो उक्कोसो मज्झ | १७६ |
| गुरुलहुलहुसगपक्खे इक्किक्को | १७६ |
| गुव्विणी बालवच्छा अ | ३४ |
| घित्तव्वमलेवकडं लेवकडमाहु | १०१ |
| चउफलपुत्ती सीसे बहुपावरणाउ | १२५ |
| चउरंगुलदीहो वा | १४० |
| चउरो अ दिव्विआ भागा | १२४ |
| चारे वेरज्जे वा | १४८ |
| चिंचिणि अत्थुर पाउर | १२९ |
| चोद्दस्सवासस्स तहा | २६ |
| छंदं निरुत्तं सद्दं | १५३ |
| छक्कायदयावंतो वि | ९७ |
| छक्कायाण विराहण | १३६ |
| छब्भागंगुल पणगे | ९ |
| छिन्दित्तु तयं भाणं | ९ |
| छेओवट्ठावणिए पायच्छित्ता | १४ |
| जं अज्जिअं चरित्तं | ५८ |
| जं अज्जिअं समीखल्लएहिं | ५८ |
| जं केवलिणा भणिअं | २६ |
| जं जं सुअमत्थो वा | २८ |
| जं जाणिज्ज चिराधोअं | ११३ |
| जं तु निरंतरदाणं जस्स | १७९ |
| जं पुव्वं निअयं | १५२ |
| जंमि रविनक्खत्ते ततो | १९५ |
| जइ एगभाणजिमिआ गिहिणो | १५८ |
| जइ तेसिं जीवाणं | १४१ |
| जइ पुण पव्वावेई | १४४ |
| जत्तिअमित्ता वाराउ मुंचई | १४१ |
| जत्थ पुण देइ सुद्धं भागं | १८३ |
| जत्थ य दुरूवहीणं न | १८६ |
| जाणंतु ता इमे समणा | १६३ |
| जलदोणमद्धभारं समुहाइं | १६३ |
| जातस्त्यानर्द्धिरिषोऽथ गत्वा | १९९ |
| जह जलमवगाहिंतो बहुचेलो | १६९ |
| जह बालो जंपंतो | १३ |
| जावंतिअमुद्देसं पासंडीणं | ८४ |
| जावंतिआ पगणिआ सखित्त | १३७ |
| जावट्ठिय इक्किक्कं तं | १७८ |
| जाव न बहुप्पसन्नं | ११२ |
| जुत्तमदाणमसीले कडसामइओ उ | १५६ |
| जे भिक्खू असणादी | १५६ |
| जे भिक्खू वत्थाई | १५७ |
| जे भिक्खू वत्थादी | १५७ |
| जो जहसत्तो बहुतरगुणो व | १७० |
| ठवणादिवसे माणा विसोहइत्ताण | १८३ |
| ठवणा वीसिअ पक्खिअ | १८१ |

| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| ठवणारोवणदिवसे माणाउ | १८२ |
| ठवणारोवणसहिआ संचयमासा | १८४ |
| ठिअकप्पंमि दसविहे ठवणाकप्पे | १५७ |
| डहरो अकुलीणुत्ति अ | १८ |
| डहरो अकुलीणुत्ति अ | २९ |
| तं होइ सइंगालं | १०५ |
| तणडगलछारमल्लगसिज्जा | १०७ |
| तत्थ कुलं विण्णेअं | १५ |
| तवकाले आसज्जउ गुरू | १७९ |
| तह थोव—जुण्ण—कुच्छिअचेलेहिं | १६९ |
| तह धिइसंघयणोभयसंपन्ना | १६९ |
| तहविह न सव्वकालं | १५२ |
| तहिअं दुन्नि अ | १२९ |
| तहेवाऽसंजयं धीरो | ५ |
| तिअ सीअं समणाणं | १०१ |
| तिण्हमन्नयरागस्स | ४ |
| तित्थंकरपडिकुट्ठो आणाण्णाउग्गमो | १०८ |
| तिन्नि विहत्थि चउरंगुलं | १३३ |
| तिन्नेव य पच्छागा | १२८ |
| तिन्नेव य पच्छागा | १२८ |
| तिलतुसतिभागमित्तो वि जस्स | १९५ |
| तिवरिसपरिआयस्स उ | २५ |
| तिंबुरुअदारुअंपि व अग्गाहिअं | २७ |
| तेनोक्तं हेतुना केन | १९ |
| तेसु उ तमणुण्णायं | ७४ |
| दंडविदंडगलट्टीविलट्ठि तह | १२९ |
| दंतच्छिन्नमलित्तं हरिअठिअ | १४८ |
| दंसणनाणचरित्ते | ४ |
| दंसणनाणचरित्ते तवे | १४९ |
| दंसणनाणचरित्ते सत्थो | १४९ |
| दप्प—अकप्प—निरालंब | ४ |
| दव्वं खित्तं कालं | १६७ |
| दस—कप्प—ववहारा | २६ |
| दसवासस्स य विवाहो | २६ |
| दावद्दविओ गइचंचलो | २८ |
| दासे दुट्ठे अ मूढे | ३४ |
| दिवसा पंचहिं भइआ | १८४ |
| दिवसेहिं जइहिं मासो | १८५ |
| दिव्वा माणुस्सया | १२ |

| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| दिव्वेसु उत्तमो लाभो | १२४ |
| दीहो वा हस्सो वा | १४० |
| दुविह तिविहेण रुंभइ | १५५ |
| दृष्टाः पादोनपौरुष्यां | १९९ |
| दुविहे गेलन्नम्मी निमंतणा | १०८ |
| दुविहो अ होइ दुट्ठो | १९६ |
| दुविहो खलु पासत्थो | १४९ |
| नच्चुप्पइअं दुक्खं | १३७ |
| नत्थेअंमि जमिच्छह | ७० |
| नित्यालीनप्रलीनाङ्गः | १४ |
| पंचमहव्वयभेओ छक्कायवहो | २९ |
| पंचासवप्पवत्तो जो खलु | १५२ |
| पंडए वाइए कीवे | ३६ |
| पउमुप्पले अ कुसलं | १३३ |
| पगामं च निगामं | १०४ |
| पट्ठविइआ य ठविआ | १७९ |
| पट्ठविइआ वहंते वेआवच्च | १७९ |
| पडिलेहणमुहपत्ती रयहरणनिसिज्ज | १४७ |
| पडिसेवणपारंची तिविहो | १९६ |
| पढमस्स य कज्जस्सा | ६ |
| पढमस्स य कज्जस्सा | ८ |
| पणगाइसंगहो होइ पंजरा | ६९ |
| पत्तं पत्ताबंधो पायठवणं | १२८ |
| पत्तं वा उच्छेदे | ७३ |
| पत्तगधारीणं पुण नवाइभेआ | १२८ |
| पत्ताबंधो पडला रयहरणं | १२८ |
| पयला उल्ले मरुए | १८ |
| परिहारविसुद्धीए मूलंता | १४ |
| पायच्छित्तं विणयो वेआवच्चं | १५९ |
| पावाणं पावयरो दिट्ठिब्भासे | १९८ |
| पासत्थ अहाछंदे कुसील | १५१ |
| पासत्थासन्नाणं कुसील | १५५ |
| पासोत्ति बंधणंति अ | १५० |
| पिंडस्स जा विसोहा | १२ |
| पीठ(ढ?)निसिज्जा दंडगपमज्जणं | १२९ |
| पुरिसा गीआगीआ सहासहा | १६९ |
| पुव्वं अपासिऊणं छूढे | २१ |
| पैशाचिकमाख्यानं श्रुत्वा | ७८ |
| प्रमाणानि प्रमाणस्थै | ११४ |

| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| बउसपडिसेवगाणं | १३ |
| बत्तीसं किर कवला | १०४ |
| बत्तीसाई जा इक्कघास | ११५ |
| बहुसो बहुस्सुएहिं | ११ |
| बारस अट्ठ य छक्कग | १८७ |
| बारसवासस्स तहा | २६ |
| बाले वुड्ढे नपुंसे | ३४ |
| बाहल्लपुहत्तेहिं गंडीपुत्थो | १४० |
| बिअ—तिअ—चउक्क—पणगं | १२८ |
| बिइअपदं गेलन्ने असहू | १२५ |
| बिइअस्स य कज्जस्सा | १० |
| बीअस्स य कज्जस्सा | ६ |
| भंडगपासगलग्गा उत्तेडा | १११ |
| भत्तस्स व पाणस्स व | १३३ |
| भासाचवलो चउहा | २८ |
| भिक्खविआरविहारे दुइज्जंता | १२५ |
| भूमावघर्षयन् पादं | १५ |
| मज्झुक्कोसो मज्झिममज्झो तह | १७६ |
| मण—वयण—कायगुत्तो | १३८ |
| मद्दवकरणं नाणं तेणेव | ३० |
| मनोयोगः पुनरयं | १५ |
| मरिज्ज सह विज्जाए | ३१ |
| महिलासहावो सरवन्नभेओ | ३६ |
| माताप्येका पिताप्येको | १५७ |
| मासचउमासछक्के | ९ |
| मिच्छत्ते संकाई जहेअ | ११६ |
| मूले कंदे खंधे तया | ११३ |
| रधणकिसिवाणिज्जं पव्वत्तइ | १५६ |
| रयहरणं मुहपत्ती दुविहो | १२८ |
| रसहेउं संयोगो पडिसिद्धो | १०४ |
| रुवणाए जइ मासा | १८५ |
| लट्ठी आयपमाणा विलट्ठि | १२९ |
| लहु—भिन्नमास—वीसा | १७६ |
| लोइअववहारेसु लोए | १५३ |
| वंदिअ पणमिअ अंजलि | १५५ |
| वत्तणुवत्तपवत्तो बहुसो | ११ |
| वत्तो नामं एक्कसि | ११ |
| वयछक्कं कायछक्कं | ३ |
| वयछक्कमिंदिआणं च | ८ |
| वर्द्धन्ते पञ्च कौन्तेय ! | १५९ |
| वालमई सुत्तमई | १२९ |
| वासत्ताणाईओ मज्झिमगो | १२९ |
| वाससिसिरेसु वाओ | ५३ |
| विगइं विगईभीओ | १०९ |
| वेअणवेआवच्चे इरिअट्ठाए | १०५ |
| संखडिभत्तुव्वरिअं चउण्हमुद्दिसइ | ८४ |
| संघयण—विरिय—आगम— | १९५ |
| संघस्सायरिअस्स य | ४ |
| संझागयं रविगयं विड्डेरं | १९५ |
| संटिअम्मि भवे लाभो | १३३ |
| संथारुत्तरपट्टो अहवा | १२९ |
| सगडद्दहसमभोमे अविअ | ११४ |
| सत्तरत्तं तवो होइ | १५५ |
| समिई पयाररूवा गुत्ता | ४४ |
| समिओ नियमा गुत्तो | ४४ |
| समितीण य गुत्तीण | ४४ |
| सव्वे वि अ पच्छित्ता जे | १८८ |
| सव्वे वि खलु गिहत्था | १५६ |
| सागारिआदि पलिअंक | १४८ |
| साधारणे विरेगं साहइ | १५३ |
| सामाइअ पारेऊण निग्गओ | १५६ |
| सामाइअसंजयाणं पच्छित्ता | १४ |
| सामायारिं वितहं | १५१ |
| सिआ एगयओ लद्धुं | १६२ |
| सिज्जातर कुलनिस्सिअ | १५० |
| सुक्कोदणस्स भरिअं दुगाउ | १३३ |
| सुत्तत्थपोरिसीणं अकरणे | १६० |
| सुहसीलतेणगहीए भवपल्लिं | ७४ |
| सूइज्जइ अणुरागो दाणेणं | १५६ |
| सोऊण तस्स | ८ |
| सोऊण य घोसणयं | ११६ |
| सोगंधिए आसित्ते वद्धिए | ३६ |
| सोलसवासाईसु अ | २६ |
| सो ववहारविहिन्नू | ८ |
| हिआहारा मिआहारा | १०४ |
| हितं मितं प्रियं | १५ |
| हुंडे चरित्तभेओ सबलम्मि | १३३ |

## यन्त्र–स्थापना

| | | | | |
|---|---|---|---|---|
| | **६।५ उत्कृष्टापत्तौ** | | **४।३ मध्यमापत्तौ** | |
| गुरुतमपक्षे उ०उ० | गुरुतमपक्षे उ०म० | गुरुतमपक्षे उ०ज० | गुरुतरपक्षे म०उ० | गुरुतरपक्षे म०म० |
| १२ | १० | ८ | १० | ८ |
| | **२७१/२ उत्कृष्टापत्तौ** | | **२५ मध्यमापत्तौ** | |
| लघुतमपक्षे उ०उ० | लघुतमपक्षे उ०म० | लघुतमपक्षे उ०ज० | लघुतरपक्षे म०उ० | लघुतरपक्षे म०म० |
| १० | ८ | ६ | ८ | ६ |
| | **१५ उत्कृष्टापत्तौ** | | **१० मध्यमापत्तौ** | |
| लघुस्वतमपक्षे उ०उ० | लघुस्वतमपक्षे उ०म० | लघुस्वतमपक्षे उ०ज० | लघुस्वतरपक्षे म०उ० | लघुस्वतरपक्षे म०म० |
| ८ | ६ | ४ | ६ | ४ |
| | **६।५ उत्कृष्टापत्तौ** | | **४।३ मध्यमापत्तौ** | |
| गुरुतमपक्षे उ०उ० | गुरुतमपक्षे उ०म० | गुरुतमपक्षे उ०ज० | गुरुतरपक्षे म०उ० | गुरुतरपक्षे म०म० |
| १० | ८ | ६ | ८ | ६ |
| | **२७१/२ उत्कृष्टापत्तौ** | | **२५ मध्यमापत्तौ** | |
| लघुतमपक्षे उ०उ० | लघुतमपक्षे उ०म० | लघुतमपक्षे उ०ज० | लघुतरपक्षे म०उ० | लघुतरपक्षे म०म० |
| ८ | ६ | ४ | ६ | ४ |
| | **१५ उत्कृष्टापत्तौ** | | **१० मध्यमापत्तौ** | |
| लघुस्वतमपक्षे उ०उ० | लघुस्वतमपक्षे उ०म० | लघुस्वतमपक्षे उ०ज० | लघुस्वतरपक्षे म०उ० | लघुस्वतरपक्षे म०म० |
| ६ | ४ | आं० | ४ | आं० |
| | **६।५ उत्कृष्टापत्तौ** | | **४।३ मध्यमापत्तौ** | |
| गुरुतमपक्षे उ०उ० | गुरुतमपक्षे उ०म० | गुरुतमपक्षे उ०ज० | गुरुतरपक्षे म०उ० | गुरुतरपक्षे म०म० |
| ८ | ६ | ४ | ६ | ४ |
| | **२७१/२ उत्कृष्टापत्तौ** | | **२५ मध्यमापत्तौ** | |
| लघुतमपक्षे उ०उ० | लघुतमपक्षे उ०म० | लघुतमपक्षे उ०ज० | लघुतरपक्षे म०उ० | लघुतरपक्षे म०म० |
| ६ | ४ | आं० | ४ | आं० |
| | **१५ उत्कृष्टापत्तौ** | | **१० मध्यमापत्तौ** | |
| लघुस्वतमपक्षे उ०उ० | लघुस्वतमपक्षे उ०म० | लघुस्वतमपक्षे उ०ज० | लघुस्वतरपक्षे म०उ० | लघुस्वतरपक्षे म०म० |
| ४ | आं० | ए० | आं० | ए० |

## परिशिष्ट – ३ यन्त्र–स्थापना

### वर्षासु तपोदानयन्त्रकम्

| | | | | |
|---|---|---|---|---|
| | २।१ जघन्यापत्तौ | | | |
| गुरुतरपक्षे म०ज० ६ | गुरुपक्षे ज०उ० ८ | गुरुपक्षे ज०म० ६ | गुरुपक्षे ज०ज० ४ | |
| | २० जघन्यापत्तौ | | | |
| लघुतरपक्षे म०ज० ४ | लघुपक्षे ज०उ० ६ | लघुपक्षे ज०म० ४ | लघुपक्षे ज०ज० आं० | |
| | ५ जघन्यापत्तौ | | | |
| लघुस्वतरपक्षे म०ज० आं० | लघुस्वपक्षे ज०उ० ४ | लघुस्वपक्षे ज०म० आं० | लघुस्वपक्षे ज०ज० ए० | |

### शिशिरे तपोदानयन्त्रकम्

| | | | | |
|---|---|---|---|---|
| | २।१ जघन्यापत्तौ | | | |
| गुरुतरपक्षे म०ज० ४ | गुरुपक्षे ज०उ० ६ | गुरुपक्षे ज०म० ४ | गुरुपक्षे ज०ज० आं० | |
| | २० जघन्यापत्तौ | | | |
| लघुतरपक्षे म०ज० आं० | लघुपक्षे ज०उ० ४ | लघुपक्षे ज०म० आं० | लघुपक्षे ज०ज० ए० | |
| | ५ जघन्यापत्तौ | | | |
| लघुस्वतरपक्षे म०ज० ए० | लघुस्वपक्षे ज०उ० आं० | लघुस्वपक्षे ज०म० ए० | लघुस्वपक्षे ज०ज० पु० | |

### ग्रीष्मकाल तपोदानयन्त्रकम्

| | | | | |
|---|---|---|---|---|
| | २।१ जघन्यापत्तौ | | | |
| गुरुतरपक्षे म०ज० आं० | गुरुपक्षे ज०उ० ४ | गुरुपक्षे ज०म० आं० | गुरुपक्षे ज०ज० ए० | |
| | २० जघन्यापत्तौ | | | |
| लघुतरपक्षे म०ज० ए० | लघुपक्षे ज०उ० आं० | लघुपक्षे ज०म० ए० | लघुपक्षे ज०ज० पु० | |
| | ५ जघन्यापत्तौ | | | |
| लघुस्वतरपक्षे म०ज० पु० | लघुस्वपक्षे ज०उ० ए० | लघुस्वपक्षे ज०म० पु० | लघुस्वपक्षे ज०ज० नि० | |

જે કદાચિત લાગે વ્રતે,
અતિચાર પંક કલંક,
આલોયણેં તે શોધતાં,
મુનિધરે હો શ્રદ્ધા નિઃશંકઃ

૩૫૦ ગાથા સ્તવન
ઢાળ-૧૪ ગા. ૧૩

જીવનમાં પાપ કર્યા પછી
અથવા થયા પછી
પશ્ચાત્તાપ કરવાથી પાપ ધોવાય છે.
અને
પ્રાયશ્ચિત કરવાથી વિશુદ્ધ થવાય છે.



Serving JinShasan
151086
gyanmandir@kobatirth.org

ARYA GRAPHICS - 9925801910